शास्त्रविशारद-जैनाचार्य-श्रीमद्-विजयधर्मसूरिभ्यो नमः ॥

मलधारि-श्रीदेवप्रभसूरिविरचितम्-

श्रीपाण्डवचरित्र-महाकाव्यम् ।

(प्रथमो विभागः ।)

ग्रन्थोऽयं हरिभाइतनयेन शास्त्रि-जेठालालशर्मणा संशोधितः ।

स च पादलिप्तपुरस्थ 'मेसर्स ए एम, एन्ड कम्पनी' इत्यनेन प्रकाशितः ।

भावनगरे महोदय-मुद्रणालये शाह गुलाबचंद लल्लुभाई प्रबन्धेन मुद्रितश्च ।

वीर संवत् २४६२ विक्रम संवत् १९९२ क्राइष्ट १९३६

मूल्यम् रू. ४-०-०

Price 4 Rupees

ॐ नमोऽर्हद्भ्यः ऐं नमः ।

मलधारि-श्रीदेवप्रभसूरिविरचितं

श्रीपाण्डवचरित्रम् ।

प्रथमः सर्गः ।

श्रियं विश्वत्रयत्राण-निष्णः पुष्णातु वः प्रभुः । शंकरः पुण्डरीकाक्षः, श्रीमन्नाभिसमुद्भवः ॥ १ ॥
पान्तु श्रीशान्तिनाथस्य, पदप्रेङ्खन्नखत्विषः । दुरन्तदुरितारण्य-प्रज्वलज्ज्वलनश्रियः ॥ २ ॥
पुण्यप्रसूतिः श्रीनेमेः, पातु वो देशनागवी । घासः स्मरादयो यस्याः, क्षीरं मोक्षसुखं पुनः ॥ ३ ॥

१ तृणम्, भक्ष्यम् ।

पार्श्वनाथः स वः पायाद्, यदङ्गद्युतिसागरे । प्रवालकन्दलायन्ते, फणारत्नप्रभाङ्कुराः ॥ ४ ॥

जयन्ति वर्धमानस्य, जितदम्भोलिवैभवाः । मोहान्धतमसध्वंसे, हेलयः सत्त्वकेलयः ॥ ५ ॥

चरित्रं पाण्डुपुत्राणां, पवित्रमभिदध्महे । श्रुतं हितोपदेशाय, यज्जने पर्यवस्यति ॥६॥ क वृत्तं पाण्डवेयानां ?, क चाहं जडिमैकभूः ? । मेरुमारोढुकामोऽस्मि, मूढात्मा पङ्गुरप्यतः ॥ ७ ॥ यद्वास्तद्बहुमानस्तु, मामत्यन्तमुदस्यति । समीरणेन किं रेणु-रुद्धूतः खे न खेलति ? ॥ ८ ॥

आसीन्निःसीममाहात्म्य-पदमाद्यो महीभृताम् । प्रथमस्तीर्थनाथानां, नाभिभूरिह भारते ॥ ९ ॥ शतमासन् सुतास्तस्य, तेष्वेकः कुरुसंज्ञकः । ख्यातं यस्याख्यया क्षेत्रं, कुरुक्षेत्रमिति क्षितौ ॥ १० ॥ सुतो बभूव हस्तीति, दानोत्तरकरः कुरोः । तदुपज्ञं क्षितावस्ति, पुरं श्रीहस्तिनापुरम् ॥ ११ ॥ स्फुरदम्भःसरोदम्भात्, सैंहिकेयभयादिव । राकामृगाङ्काः संभूय, विभान्ति शरणागताः ॥१२॥ यस्यादर्शोज्ज्वले वप्रः, संक्रान्तः परिखाऽम्भसि । आत्मनः कमनीयत्वं, दिदृक्षुरिव लक्ष्यते ॥१३॥ दारिद्र्यस्यैव दारिद्र्य-मधर्मस्यैव पीडनम् । भयस्यैव भयं तस्मि-न्नन्यायस्यैव निग्रहः ॥१४॥ तत्र हस्त्यन्वयोदन्व-त्कौस्तुभाः[3] स्तुतिभाजनम् । संजज्ञिरे महौजस्काः, परेलक्षाः क्षमाभुजः ॥१५॥ सनत्कुमार इत्यत्र, चक्रवर्ती क्रमादभूत् । चिकित्सति स्म यो भाव-रोगान् वैराग्यभेषजैः ॥ १६ ॥ शान्तिः कुन्थुररश्चैव, तत्र वित्रासितद्विषः । बभूवुश्चक्रिणो धर्म-चक्रिणोऽपि

१ सूर्याः । २ राहुभयात् । ३ हस्तिराजकुलसागरे कौस्तुभमणयः ।

क्रमात्ततः ॥ १७ ॥ विक्रमाक्रान्तसामन्त-चक्रश्चक्रिसमप्रभः । क्रमादनन्तवीर्योऽभू-त्तत्र धात्रीपुरंदरः ॥१८॥ ततो दुर्वारदोर्वीर्यः, कृतवीर्योऽभवन्नृपः । यस्य दानेन नाभूव-न्नर्थिनः पुनरर्थिनः ॥ १९ ॥ अथोग्रमहसां भूमिः, सुभूमि(म)श्चक्रवर्त्यभूत् । अवैरायत वीरेण, यमदग्नेः सुतेन यः ॥ २० ॥

अतिक्रान्तेष्वसंख्येषु, ततो राजस्वजायत । प्रशान्तः शान्तनुर्नाम, तेजोधाम प्रजापतिः ॥ २१ ॥ अन्यायकन्दमुच्छिन्दन्, सिश्चन्न्यायमहीरुहम् । समस्तक्षितिपालाना-मुपमानं बभूव यः ॥ २२ ॥ कर्म मर्माविदन्योन्यं, प्रजानामस्तु दूरतः । यस्य राज्ये त्रिवर्गोऽपि, नाधाद्बाधां परस्परम् ॥२३॥ निखिलव्यसनत्याग-पवित्रस्यापि शान्तनोः । विवेकिनोऽप्यभूदेकं, मृगव्ये व्यसनं परम् ॥२४॥ सोऽन्यदाऽनन्यसामान्य-वेगमारुह्य वाजिनम् । दूरवर्धिष्णुपापर्द्धि-बुद्धिर्मृगवनं ययौ ॥२५॥ तत्रैकं प्रेमरङ्गेण, कुरङ्गीचाटुकारिणम् । दूरात् कुरङ्गमालोक्य, सोऽधिज्यं विदधे धनुः ॥२६॥ स प्रेयसीं पुरस्कृत्य, संत्रासतरलेक्षणाम् । पलायामास सारङ्गः, कांदिशीकमनाः पुरः ॥२७॥ स वल्लभानुरोधेन, मन्दं मन्दं प्लुतोऽपि सन् । मनोऽभिराममारामं, विवेश विवशाशयः ॥ २८ ॥ बाणगोचरभूतेऽपि, दृष्टिमार्गातिगे मृगे । विशति स्म तमारामं, शरं संहृत्य शान्तनुः ॥२९॥ तत्र प्रासाद[1]मालोक्य, समारुह्य च विस्मयात् । एकामालोकयामास, स बालां सप्तमे क्षणे ॥ ३० ॥ अभ्युत्थाय महीनाथ-मर्घ्यमर्घ्यादि[2]पूजया । सा सत्कृत्य यथौचित्यं, स्वपल्यङ्के न्यवीविशत् ॥ ३१ ॥ विलोक्यानर्गलप्रेम-रोमाङ्कुरकरम्बिताम् । सुमुखीं संमुखासीनां, भूपालस्तामभाषत ॥३२॥ कल्याणि ! काऽसि ? कस्यासि, तनया विनयान्विता ?। प्रभातेऽम्भोजिनीवासि, किं

१ उपरितनभूमौ । २ पूज्यम् ।

मृगानुपदिकस्य शान्तनोर्गङ्गामेलापः ॥

वा ? कस्माद्विकस्वरा ? ॥३३॥ इत्याकारेङ्गितज्ञेन, राज्ञा हृष्टेन पृष्टया । ततो दृष्टया तयाऽऽदिष्टा, वयस्यैवं व्यजिज्ञपत् ॥३४॥
विद्याधरपतिर्जह्नु–रस्ति रत्नपुरे पुरे । तस्य पुत्री पवित्राङ्गी, सेयं गङ्गेति गीयते ॥३५॥ अन्यदाऽङ्कस्थितामेतां, जह्नुः
स्नेहादवोचत । वत्से ! रूपानुरूपस्ते, कीदृगालोक्यतां वरः ? ॥ ३६ ॥ एषाऽप्युवाच यस्तात, मदुक्तं नातिवर्तते । सुरूपेणापि
किं भर्त्रा, वचोऽतिक्रमकारिणा ? ॥३७॥ व्यवस्थयाऽनयाऽनल्पे, जह्नुना नृपसूनवः । एतदर्थं वृताः किं तु, स्त्रीवशत्वं न
मन्वते ॥ ३८ ॥ दौर्मनस्यमथैतस्याः, किमप्याविरभूत्तथा । धर्माय स्पृहयामास, यथैकस्मै दिवानिशम् ॥ ३९ ॥ चारणश्र-
मणात् प्राप्य, दुरापं धर्ममार्हतम् । ततःप्रभृति सौधेऽस्मि–स्तस्थुषी जिनमर्चति ॥ ४० ॥ जिनार्चनकृतार्थानि, लूनान्यपि
लतामतः । अद्यैतस्याः फलन्ति स्म, कुसुमानि मनीषितम् ॥४१॥ यदुद्यानेऽत्र पूर्वेद्यु–स्तातेन सह जह्नुना । एत्य नैमित्तिकः
सत्य–वाणिरेनामवोचत ॥ ४२ ॥ भद्रे ! भद्रंकरादस्मात्, सिद्धं धर्मात् तवेप्सितम् । मृगानुपदिकः प्रातः, पुमानेकः समे-
ष्यति ॥ ४३ ॥ मनोऽभिरुचितः पुत्रि !, स ते भर्ता भविष्यति । हस्तिनापुरभूपालं, तं तु जानीहि शान्तनुम् ॥४४॥
तदुक्तिश्रवणादद्य, प्रासादशिखरस्थयोः । आवयोर्भवतो मार्गं, पश्यन्त्योः सिद्धमीप्सितम् ॥४५॥ अथोचे नृपतिर्गङ्गां, मृगो मे
मृगलोचने ! । महोपकारी येनासि, दर्शिता नेत्रकौमुदी ॥४६॥ नानोपायैर्जनो लक्ष्मी–मखिलोऽप्यभिलष्यति । किं ब्रूमस्तस्य
यंमियं, स्वयमेवाभिलाषुका ॥ ४७ ॥ त्वद्वचोऽतिक्रमत्यागः, प्रियस्य हितहेतवे । वैद्योपदेशनिर्माणं, रोगशान्त्यै हि

१ यं जनम्, इयं लक्ष्मीः । २ प्रियहेतवे इति प्रत्यन्तरपाठः ।

रोगिण ॥ ४८ ॥ दण्डोऽयं पुण्डरीकाक्षि !, त्वद्वचोऽतिक्रमेऽस्तु मे । यत्तदैव परित्यागं, कुर्वीथाः सर्वथा मम ॥ ४९ ॥
हर्षादिति वदत्येव, नृपे सैन्यमुपागमत् । जह्नुरप्यायया तत्र, तनयादर्शनोत्सुकः ॥ ५० ॥ सखीमुखेन निःशेषं, तं वृत्तान्तं
त्रपानता । गङ्गा रङ्गादथोत्थाय, जनकाय व्यजिज्ञपत् ॥ ५१ ॥ सोऽपि पल्लवितप्रीतिः, स्फीतान्योऽन्यानुरागयोः । तयोर्निर्वर्त्त-
यामास, पाणिग्रहमहोत्सवम् ॥ ५२ ॥ पाणिमोक्षोत्सवे लब्ध[1]-हास्तिको हस्तिनापुरम् । सदारोऽथ सरोमाञ्च-तनुः
शान्तनुराययौ ॥ ५३ ॥

तत्र प्रेमानुरूपाणि, स्फीतराज्योचितानि च । तौ दम्पती यथौचित्यं, सुखान्यनुबभूवतुः ॥५४॥ अन्यदा निबिडस्थेर्म[2]-
प्रेमबन्धस्य शान्तनोः । अन्तर्वत्नी[3] बभौ पत्नी, निधिगर्भेव काश्यपी[4] ॥५५॥ धामैकधाम[5] गङ्गाया, गङ्गाया इव भास्करम् ।
गर्भमन्तर्दधानाया, दुरालोकमभूद्वपुः ॥५६॥ महामहिम्नस्तस्याथ, सा गर्भस्यानुभावतः । सुमेरुं कन्दुकं मेने, पाथोनाथं च
गोष्पदम् ॥ ५७ ॥ सा मुहूर्ते शुभे सौम्यं, सुखेन सुषुवे सुतम् । यत्प्रभान्यकृतैजसं[6], दीपैश्चित्रगतैरिव ॥ ५८ ॥ तदा तन्नगर
सर्वं, सोत्साहजनसंकुलम् । बभूव केवलं शून्य-प्रचार चारकान्तरम्[7] ॥५९॥ गङ्गाऽपत्यस्य गाङ्गेय, इति सार्थकमर्थवित् ।
तस्यात्मजन्मनो नाम, निर्ममे नृपसत्तमः ॥ ६० ॥

भूपाल मृगयाऽऽरम्भ-गाढसंरम्भमन्यदा । मूर्द्धबद्धाञ्जलिर्गङ्गा, सानुरागं व्यजिज्ञपत् ॥६१॥ प्रजाप्रियः प्रियन्यायः, प्राणेश !
स्थामधामवान् । परोपकारी प्रज्ञावा-नस्ति कस्त्वादृशः क्षितौ ? ॥६२॥ पर परमसौन्दर्य-शालिनस्ते कलावतः । मृगव्यव्यसनं

---

१ प्राप्तहस्तिसमूह । २ स्थेमा–स्थिरता । ३ गर्भिणी । ४ पृथ्वी । ५ तेजसामेकस्थानम् । ६ तेजस्वि । ७ कारागारमध्यम् ।

दोषो, लक्ष्मेव मृगलक्ष्मणः ॥ ६३ ॥ अरण्यबद्धरङ्गाणां, कुरङ्गाणां निरागसाम् । व्यापादनेन मृगया, सत्यं पापर्द्धिरुच्यते ॥ ६४ ॥ वधः कृतापराधानां, निर्मन्तूनां च पालनम् । उर्वीपतीनां सर्वेषा–मेष धर्मः सनातनः ॥६५॥ आपदं श्वापदान्ये(नि)वं, मा स्म नैषीर्नयोज्ज्वल ! । हिंसकानां हि नेदीया–न्नरकोत्सङ्गसंगमः ॥६६॥ तत्यज व्याधसाधर्म्यं, धर्म्यं कर्म समाचर । मम विज्ञापनामेनां, नातिक्रमितुमर्हसि ॥६७॥ अथाऽऽह पृथिवीपालः, प्रिये! साधु त्वमभ्यधाः । इमं चावैमि निःशेषं, पापव्यापारमात्मनः ॥ ६८ ॥ किं तु कान्ते ! दुरुच्छेदः, सैष मे व्यसनग्रहः । यो लङ्घयति ते वाचं, सैमयस्मरणोपमाम् ॥ ६९ ॥ इत्युक्त्वा तामवज्ञाय, मृगयामगमन्नृपः । सा च तं बालमादाय, पितुर्मन्दिरमभ्यगात् ॥ ७० ॥ पुरे रत्नपुरे तस्मि–न्नाढ्ये वैताढ्यमण्डने । तं शिशुं वर्धयामास, सा सती बन्धुवत्सला ॥ ७१ ॥ पत्नीवृत्तं यथावृत्तं, व्यावृत्तो मृगयावनात् । अथ पर्यश्रुरश्रौषी–न्मेदिनीशः परिच्छदात् ॥७२॥ तत् सकर्णः समाकर्ण्य, सोऽन्वशेत निजाशये । पश्चात्तापकृते कस्य, न स्याद्व्यमनमादृतम् ॥ ७३ ॥ नृपः स्मृत्वा स्मितस्मेर–मात्मजास्यमखिद्यत । विरहः सुसहः केन, तादृशस्याङ्गजन्मनः ॥ ७४ ॥ अथ पुत्रकलत्राभ्यां, विप्रयुक्तोऽवनीपतिः । अग्निमग्न इवानैषी–च्चतुर्विंशतिवत्सरीम् ॥ ७५ ॥ हायनैः सोऽथ तावद्भि–र्विस्मृत्य विरहव्यथाम् । अभूद् भूयोऽपि पापर्द्धि–व्यसनस्य वशंवदः ॥ ७६ ॥

मृगव्यव्यसनी दूरं, विहरन्नन्यदा नृपः । एत्य विज्ञपयांचक्रे, व्याधेनैकेन हर्षतः ॥ ७७ ॥ देव ! देव ! सरित्तीरे, नातिदूरेऽस्ति काननम् । यदेकं ते विनोदाय, पर्याप्तमिति मे मतिः ॥ ७८ ॥ यत्रातिविस्मृतत्रामाः, सन्ति संख्यातिगा

१ चन्द्रस्य। २ सिद्धान्तस्मरणसदृशीम् । " स्मरणेऽपि " इति प्रतित्रयपाठः ।

सगाङ्गेय-गङ्गायाः पितृगृहे गमनम्, शान्तनोर्मृगयायां गमनं च॥

मृगाः। घोरैर्घुरघुरारावैः, शूकराश्च भयंकराः ॥७९॥ सन्ति यत्र महाकाया-श्चित्रकायाः सहस्रशः। सरिद्भमितमध्याह्न-वासराश्चापि कासराः ॥ ८० ॥ ततस्तं लुब्धकश्रेष्ठं, पृष्ठमाधाय तत्क्षणात्। तदुपद्रोतुमारेभे, काननं मेदिनीपतिः ॥ ८१ ॥ वागुरापाशवीतंस[1]-विहस्तो[2]भयपाणयः। प्रसस्रुः परितः स्वैर-वादिनस्तत्र सादिनः ॥ ८२ ॥ अमुच्यन्त नवाकल्प-सरमाः सरमासुताः। दधाव विविधारब्ध-कूटः कूटमृगीगणः ॥ ८३ ॥ दुःसाधव्याधहक्काभि-र्भीमैर्व्याघातनिःस्वनैः। क्षणादलभत क्षोभं, भयात्तत् काननं तदा ॥८४॥ आशशंस शशस्त्राणं, कुरङ्गोऽभूत् कुरङ्गकः। समीपी नाभवद्द्वीपी, किरति स्म किरिः स्मयम् ॥ ८५ ॥ शरभः शरभङ्गाय, पूर्वकायमुदास्थत। भीतः ससार कासार-नीरं सपदि कासरः ॥ ८६ ॥ गोमायुरायुरन्तेऽभू-त्त[3]रक्षुर्दिक्षु पुप्लुवे। दूरमुध्धुशितान् दध्रे, केसरी केसरान् पुनः ॥८७॥ वनमालोडयन्नेवं, मन्दराद्रिरिवार्णवम्। केनाप्येत्य नृपो यूना, मा स्म मा स्मेत्यवार्यत ॥८८॥ तध्ध्वनेरध्वनि क्षिप्त-चक्षुः क्षितिपतिः पुरः। मण्डलीकृतकोदण्डं, तूणीरद्वयधारिणम् ॥ ८९ ॥ साक्षादिव धनुर्वेदं, वनं रक्षितुमागतम्। युवानमेकं पीनाङ्ग-मनङ्गोपममैक्षत ॥ ९० ॥ (युग्मम्) तमभ्यधाच्च भो भद्र !, कान्तारान्तरवासिषु। मृगेषु मृगयाशीलान्, कथमस्मान्निषेधसि ? ॥ ९१ ॥ सोऽप्युवाच महाभाग !, वन्यानेतान्निरागसः। भयार्तान्[4] भव्यनीतिज्ञ !, न जन्तून् हन्तुमर्हसि ॥९२॥ भवन्ति हि भवादृक्षाः, सर्वप्राणिप्रियंकराः। प्राणिनां च प्रियाः प्राणा-स्त्रायस्व तदिमानहो ! ॥९३॥ ऊचे नृपश्चलेष्वेषा, शिक्षा लक्ष्येषु दोर्भृताम्। मृगयेति विदुः पूर्वे, तदलं विचिकित्सया ॥ ९४ ॥ तदितोऽपेहि मुग्धोऽसि, विदग्धैर्विप्रतारितः। विलोकय विनोदं मे, सर्वक्षत्रमनोहरम् ॥ ९५ ॥ स युवोवाच

१ वीतंसः-पक्षिग्रहणाय जालः। २ विहस्तः सहितः। ३ लघुव्याघ्रः। ४ भयानभिज्ञान्नीतिज्ञ ! इति प्रतित्रयपाठः।

शान्तनु-गाङ्गेययो-र्युद्धम्, गङ्गाया आगमनम्।

माक्षेपं, हुं ज्ञातोऽसि धनुर्धरः । शिक्षाक्रमश्चले लक्ष्ये, गत्वाऽन्यत्र विधीयताम् ॥ ९६॥ इत्थं यदा निषिद्धोऽपि, मृगान् हन्ति
स्म भूपतिः । रूक्षाक्षरमदाक्षिण्यं, तदा तेन व्यभाष्यत ॥ ९७ ॥ धिङ्निस्त्रिंश ! वृथा वृद्ध !, गर्भव्याध ! न बाधसे। जन्तू-
नरंतुर्दैर्वाणैः, किं तु मामेव बाधसे ॥ ९८ ॥ ततो धर्मविरुद्धेऽत्र, प्रथयन् पथि पान्थताम् । इदानीं दुर्नयस्यास्य, सदृशं फल-
माप्नुहि ॥ ९९ ॥ इत्याक्षिप्य क्षुरप्रेण, लघुहस्ततया तया । स चिच्छेद विसच्छेदं, भूपालरथकेतनम् ॥ १०० ॥ हन्तुमोजा-
यमानोऽपि, कल्लोलिकरुणारसः । स्वापं प्रस्वापनास्त्रेण, सोऽनैषीन्नृपसारथिम् ॥ १०१ ॥ नवाभिभवसंभार-प्रबुद्धक्रोधभीषणः ।
क्षितिपोऽपि निचिक्षेप, क्षिप्रं तं प्रति पत्रिणः ॥ १०२ ॥ महाबलेन ते तेन, सपत्राः पादपा इव । वायुनेव व्यधीयन्त, द्विधा
मार्गेऽपि मार्गणाः ॥१०३॥ वीक्ष्य द्वेधाऽपि वैलक्ष्यं, प्रपेदानमथ प्रभुम् । मृगैरिव मृगारातिः, स रुद्धो नृपसैनिकैः ॥१०४॥
स भटः सुभटालोक-रोमाञ्चिततनुस्तदा । तान् प्रत्येकं शरैरेको, निर्ममे दक्षिणेर्मणः ॥१०५॥ काश्यपीशो दशन् कोपा-द्दशनै-
र्दशनच्छदम् । यावद्धनुपि संधत्ते, सायकं शत्रुशायकम् ॥१०६॥ जितकाशी भृशं ताव-न्निजबाणेन भूपतेः । धनुःस्थं च भुजस्थं
च, गुणं द्वेधापि सोऽच्छिदत् ॥ १०७ ॥ तेन विक्रमिणाऽऽक्रान्तः, सिंहसब्रह्मचारिणा। अभूद्विहस्तो हस्तीव, हस्तिनापुरनायकः
॥१०८॥ आससाद विषादस्य, निषादस्येव पाप्मनः । स्पर्शदोषाद्दिशामीशः, सर्वाङ्गमलिनात्मताम् ॥ १०९ ॥

अथ क्ष्मापालमालिन्य-मपनेतुमिवोत्सुका । विज्ञाय गङ्गा संग्राम-मागमत्तं धनुर्धरम् ॥११०॥ अभ्यधत्त च तं वत्स !,
तव केयमहंयुता ? । समं यन्निजतातेन, ग्रहिलः कलहायसे ॥१११॥ ततोऽसौ विस्मयस्मेरः, पृच्छति स्मेति मातरम् । कथ-

१ दक्षिणे ईर्म-व्रणं येषां तान् दक्षिणपार्श्वविद्धमृगान् तत्सदृशानित्यर्थः । २ ओष्ठम् । ३ शत्रुनिद्राकरम् । ४ व्याकुलः ।५ गर्वः ।

मेप महीनाथ–स्तातो मे वनवासिनः ॥ ११२ ॥ अथाह जननी वत्स !, पिताऽसौ तव शान्तनुः । मृगव्यव्यसनादस्मा–न्न व्यरंसीत् कथंचन ॥ ११३ ॥जातमात्रं तदादाय, त्वामुपागां गृहं पितुः । पितैव शरणं स्त्रीणा–मविधेये हि भर्तरि ॥११४॥ प्रत्युवाच स तां मात–र्यद्यप्येवं तथापि मे । तातोऽपि नाधुना तातः, कर्मठो यः कुकर्मसु ॥ ११५ ॥ असौ प्रत्युत मे शत्रुः, पालितेभ्यो मयाऽनिशम् । बाल्यात् कान्तारजन्तुभ्यो, यदमीभ्योऽपि द्रुह्यति ॥११६॥ पिता वाऽस्तु परो वाऽस्तु, नामुं मुञ्चे कथंचन । प्राणिनो मे प्रियानेता–न्निर्घृणश्चेजिघांसति ॥ ११७ ॥ ततो गङ्गा समागत्य, वसुधाऽधिपमभ्यधात् । आर्यपुत्र ! स्वपुत्रेण, कोऽयं ते भीपणो रणः ? ॥११८॥ एतत्तस्या वचः श्रुत्वा, स्फारिताक्षः क्षमापतिः । इयं गङ्गा कथमयं, गाङ्गेयश्चेत्य-तर्कयत् ॥ ११९ ॥ समुद्गपितरोमाञ्चो, रथादुत्तीर्य पार्थिवः । प्रौढं प्रमोदमारूढ–स्त्वरितं सुतमभ्यगात् ॥ १२० ॥ अपरोऽप्यर्प-रोप्याशु, चापं पर्यश्रुलोचनः । आगत्य भूमिलुठनैः, पादयोरपतत्पितुः ॥१२१॥ पिताऽप्युत्थाप्य सर्वाङ्ग–मालिङ्गन्नङ्गजं निजम् । तत्सुखं प्राप पीयूष–सेकतोऽप्यतिरेकि यत् ॥ १२२ ॥ ॥ परं परस्परस्नेहं, वीक्ष्य प्रत्यक्षतस्तयोः । यामुवाह मुदं तां तु, सैव जानाति जाह्नवी ॥ १२३ ॥

अथ पुण्यपरीपाक–संपन्नाङ्गजसंगमः । आलिङ्गन्नयनैः प्रीत्या, प्रियां प्रोवाच पार्थिवः ॥ १२४ ॥ कस्तूरीस्तबकश्याम–नवश्मश्रुरसौ मया । प्रिये ! सुतोऽपि शौण्डीर्य–विस्मयान्नोपलक्षितः ॥१२५॥ कथं कान्तारवास्तव्यः, सुतो मे समजायत ? । कथं वा यौवनावस्था–मिमामानायितस्त्वया ? ॥१२६॥ गङ्गा जगाद राजेन्द्र !, कथयामि निशम्यताम् । पुरे मातामहस्यायं,

१ 'यलात्' इति प्रत्यन्तरत्रयपाठः । २ 'वाऽस्त्वपरो' इति प्रत्यन्तरत्रयपाठः । ३ 'रोमाऽथ' इति प्रत्यन्तरत्रयपाठः । ४ संहृत्य । ५ गङ्गा ।

तदोपेतः समं मया ॥१२७॥ अतुलैर्मातुलानीना-मङ्कपर्यङ्कखेलनैः। पश्चातिक्रामयन् वर्षा-ण्ययमेकाहलीलया ॥१२८॥ विद्या-
धरकुमाराणां, मध्ये नवयमा स्थितः। तिरश्चकार रूपाणि, तेजांसीव तवात्मजः ॥१२९॥ युग्मम् ॥ ततः पवनवेगेन, मातुले-
नायमादरात्। अध्यापयितुमारेभे, विद्यां विद्यान्तदश्वना ॥ १३० ॥ पपाठाल्पेन कालेन, विनयात्तनयस्तव। वर्धिष्णुप्रतिभो
वार्धि-मगास्त्विरिव वाङ्मयम् ॥१३१॥ अध्यगीष्ट धनुर्वेद-मनिर्वेदमसौ तथा। गुरुः पवनवेगोऽपि, यथाऽत्यन्तं विसिष्मिये
॥ १३२ ॥ नीतस्तेन ततः सर्व-विद्यापारीणतामयम्। तृणवद्गणयामास, विद्याधरपतीनपि ॥१३३॥ मत्पितुः सदने हास्यात्,
सुलभं योऽवहेलनम्। ततः समस्तैस्तैः सार्धं, पुत्रस्ते कलहायते ॥ १३४ ॥ ज्ञात्युपालम्भतो भीता, त्वत्पाणिग्रहसाक्षिणि।
प्रासादे निवसाम्यस्मि-न्नाचरन्ती जिनार्चनम् ॥१३५॥ चारणश्रमणश्रेणि-मुखाद्धर्मं निशाम्यतः। बभूवास्य दयाधर्मः, सुतरां
हृदयंगमः ॥ १३६ ॥ ततः कल्लोलितश्रद्धा-निष्[3]पतद्बाष्पशीकरः। न्यधान्निरपराधानां, निषेधं प्राणिनां वधे ॥ १३७ ॥ ततः
कारुण्यनिष्णेन, योजनानि चतुर्दश। वनेऽस्मिन् परितोऽनेन, सत्त्वरक्षा प्रवर्तिता ॥१३८॥ नामुनाऽप्यध्वना व्याधः, कोऽपि
संचरते भिया। अस्मिन् हिनस्ति हिंस्रोऽपि, न विरोधी विरोधिनम् ॥१३९॥ कान्तारेऽत्र कृतान्तोऽपि, श्वापदानामनापदाम्।
त्वत्पुत्रभीतो नैतेषां, प्रभवत्यपमृत्यवे ॥१४०॥ प्राणसत्रं स्वपुत्रस्य, सर्वसत्त्रशिरोमणिम्। आर्यपुत्र ! परित्रातुं, सर्वथा तत्त्व-
मर्हसि ॥ १४१ ॥ पत्नीमुवाच रोमाञ्च-मतनुं शान्तनुर्वहन्। सर्वाऽप्यतः परं त्यक्ता, त्वद्गिरा मृगया मया ॥ १४२ ॥
वदेहि सह पुत्रेण, मच्चरित्रेण संप्रति। उदग्रा जाग्रतु व्यक्तं, पुनर्मे भाग्यसंपदः ॥ १४३ ॥ साऽभ्यधादधुना लीनं, मनो मे

१ मातुलपत्नीनाम्। २ 'वाङ्मयीम्' प्रत्यन्तरपाठः। ३ निर्गच्छदश्रुबिन्दुः। ४ 'रोमाञ्चकवचं' इति प्रत्य०।

धर्मकर्मणि । व्यधन्ते तद्दिनान्यन्तः, प्राज्यान्यप्यफलानि माम् ॥ १४४ ॥ तन्मेऽधुना जिनस्यैव, वासना पर्युपासने । पुत्रं त्वादाय राजेन्द्र !, व्रज शाधि वसुंधराम् ॥ १४५ ॥ इत्युदीर्य प्रजानाथं, सा तनूजमवोचत । वत्स ! गच्छ पितुः स्वस्य, समर्थय मनोरथान् ॥ १४६ ॥ ईदृक्कस्यास्ति जनकः ?, कस्यास्ति त्वादृशः सुतः ? । तदस्तु युवयोर्योगो, बुधचन्द्रमसोरिव ॥ १४७ ॥ ततो जगाद गाङ्गेय-स्त्यक्तुं त्वामम्ब नोत्सहे । त्वं मे पिता च माता च, दृष्टपूर्व्यसि नापरम् ॥१४८॥ तवोपचर्याशून्यं मे, मा स्म भूदेकमप्यहः । इत्युक्त्वा व्यक्तमुक्ताश्रुः, सोऽपतन्मातृपादयोः ॥ १४९ ॥ अथोत्थाप्य प्रमृज्याश्रु, जनन्या सोऽन्वनीयत । बलिः क्रियेऽहं वत्सस्य, कातर्यमिदमुत्सृज ॥१५०॥ पुत्र ! त्वमसहायस्य, सहायः स्वपितुर्भव । तनुजैर्जनयितुश्चिन्ता-भारहारी हि वार्धके ॥ १५१ ॥ वात्सल्यं वत्सलस्तात-स्तथा ते प्रथयिष्यति । यथा न त्वमिहस्थाया, मम वत्स ! स्मरिष्यसि ॥ १५२ ॥ इत्यादियुक्तिभिर्व्यक्तं, बोधितो बुद्धिमानपि । अम्बायाः स विलम्बेन, वचनं प्रत्यपद्यत ॥ १५३ ॥ गङ्गामापृच्छ्य गाङ्गेय-मादाय दयितः क्षितेः । उत्तोरणपताकाङ्क-गोपुरं पुरमाययौ ॥ १५४ ॥

नृपोऽथ सूनवे तस्मै, यौवराज्यपदं ददौ । योग्यं सुतं वा शिष्यं वा, नयन्ति गुरवः श्रियम् ॥ १५५ ॥ एकातपत्रां सोऽप्युर्वी, कुर्वन्नहितनिग्रहात् । विनीतात्मा तनोति स्म, प्रसादं सदृशं पितुः ॥ १५६ ॥ विनीततनयोत्खात-चिन्ताशल्यश्चिरं नृपः । स्वच्छन्दोल्लसदानन्दं, विजहार महीतले ॥ १५७ ॥

१ 'ते वत्स !' इति प्रत्यन्तरत्रयपाठः । २ 'प्रसादसदृशं' इति प्रत्यन्तरत्रयपाठो न सम्यग् प्रतिभाति, उर्वीविशेषणे तु घटतेऽपि कथञ्चित् । ३ क्रियाविशेषणमेतत् ।

अन्यदा यमुनातीरे, विहरन् स मनोहराम् । कन्यामालोकयामास, कांचिन्नावि निषेदुषीम् ॥१५८॥ स तस्याः स्पृहणीयेन, रूपेण हृतमानसः । काऽसि त्वमिति तामेत्य, पप्रच्छ मदनोत्सुकः ॥ १५९ ॥ जगाद साऽपि भूपालं, कालिन्दीकच्छवासिनः । नौतन्त्राधिपतेः पुत्री, कन्या सत्यवतीत्यहम् ॥१६०॥ ताताज्ञां प्राप्य धर्मेण, वाहयामि तरीमहम् । भवेत् कन्या कुलीना हि, पित्रादेशवशंवदा ॥ १६१ ॥ श्रुत्वेति नीतितत्त्वज्ञः, क्षणेन क्षितिपोत्तमः । तदर्थमर्थी भवितुं, ययौ तत्पितुरन्तिके ॥ १६२ ॥ स्वागतक्रिययाऽऽनन्य, सोऽपि शान्तनुभूपतिम् । देवाऽऽज्ञया प्रसीदेति, विनयेन व्यजिज्ञपत् ॥ १६३ ॥ अभाषिष्ट निविष्टं तं, पतिर्धात्र्यास्तरीपतिम् । सधर्मचारिणी मेऽस्तु, सुता सत्यवती तव ॥ १६४ ॥ अथाभ्यधत्त नौतन्त्र-स्वामी विनयवामनः । गृहमभ्यागतो देव !, त्वमर्थी केन लभ्यसे ? ॥१६५॥ परं पतिंवरामेनां, न तुभ्यं दातुमुत्सहे । गाङ्गेयः खेचरीगेय-चातुर्यस्तेऽस्ति नन्दनः ॥ १६६ ॥ सति राज्यधरे तस्मिन्, दोर्ष्मदूष्मनिषूदने[1] । अस्या यस्तनयो भावी, तस्य राज्यं कदापि न ॥ १६७ ॥ वधूनामवरोधत्वं, कारागारं विदुर्बुधाः । यासामभाग्यभाजां हि, राजा भवति नात्मजः ॥ १६८ ॥ तत् प्रसीद कलत्रार्थ-मन्यत्र व्यवसीयताम् । उदारास्त्वादृशां दाराः, संपत्स्यन्ते[2] पदे पदे ॥ १६९ ॥ अपार्थप्रार्थनः सोऽथ, बभार म्लानमाननम् । सकृदप्यपराद्धेषु-र्धानुष्कः किं न दूयते ? ॥ १७० ॥ दध्यौ नृपोऽभ्यधादेष, नौपतिः सोपपत्तिकम् । नृपश्चेन्नास्य दौहित्रः, किं जामात्रा मया फलम् ? ॥ १७१ ॥ न चान्तरेण गाङ्गेयं, धुर्यो राज्यस्य संभवी । न ह्याकाशप्रकाशाय, प्रभुरन्यो विना रविम् ॥ १७२ ॥ दत्तेऽवश्यं न चान्यस्मै, राज्यमूर्जस्वि[3] शान्तनुः । सुधासर्वस्वमम्भोधि-

शान्तनोः सत्यवतीयाचना ॥

१ वीरगर्वनाशके । २ ' संभवन्ति ' इति प्रत्य० । ३ महत् ।

न्यधात् पुत्रे कलानिधौ ॥ १७३ ॥ इतः कर्षति चेतो मे, नौतन्त्राधिपतेः सुता । संकटे पतितोऽमुष्मि-न्मूढधीः करवाणि किम् ? ॥ १७४ ॥ इत्थं विकल्पैर्भूपालः, कामग्राक्रान्तमानसः । मोगफाल इव क्षीणी, निजं पुरमुपाययौ ॥ १७५ ॥

तदानीमागतो राज-सेवावसरलालसः । निर्वर्ण्य तातवैवर्ण्यं, चिन्तां शान्तनवो व्यधात् ॥ १७६ ॥ विनयातिक्रमः किं मे ?, किमाज्ञाऽलङ्घि केनचित् ?। किं वा सस्मार मे मातु-र्यन्मे श्यामाननः पिता ॥ १७७॥ तातस्तावन्न पृष्टोऽपि, यथावत् कथयिष्यति । अमात्यात्तातमेधीनः, सर्वं जानाम्यदः पुनः ॥१७८॥ ततः सर्वात्मना यतात्, करिष्ये पितुरीप्सितम् । इत्थं विमृश्य सोऽमात्यं, पप्रच्छ विजने सुधीः ॥ १७९ ॥ तस्मान्निःशेषमागम्य, सोऽगमन्नौपतेर्गृहम् । विहितस्वागतश्चैन-मवद-न्नृपनन्दनः ॥ १८० ॥ महाभाग ! महाभाग्यै-रर्थी शान्तनुराप्यते । इत्थं निराकृथा यत्तत्, सुष्ठु नानुष्ठितं त्वया ॥१८१॥ अवदन्नौपतिः प्रीतः, कुमार ! शृणु कारणम् । शान्तनोरपि येनास्मि, प्रार्थनाभङ्गहेतवे ॥१८२॥ सोऽन्धकूपे क्षिपेत् पुत्रीं, ससापत्न्ये ददीत यः । वसन्त्याः शान्तनोर्गेहे, सपत्नोऽस्यास्त्वमेव हि ॥ १८३ ॥ सपत्नीतोऽपि तज्जातं, नितान्तमति-रिच्यते । कोशातकगाः फलेष्वेव, रसः परिसमाप्यते ॥ १८४॥ नररत्न ! सपत्नोऽरि, येषां तेषां कुतः सुखम् । जाग्रत्यसह्ने सिंहे, सुखायन्ते कियन्मृगाः ? ॥ १८५ ॥ अप्रसन्नः प्रसन्नो वा, भवान् येषां द्विषेऽपि ते । आपदां पदमायाः स्युः, संपदा-मपरे पुनः ॥ १८६ ॥ कुमार ! मम दौहित्रो, यस्तु भावी कथंचन । दूरे महोदयस्तस्य, समीपे विपदः पुनः ॥ १८७ ॥ त्वां समुत्सृज्य राजश्रीः, श्रीमन् ! किं वृणुते परम् ?। हित्वा वार्धिं महासिन्धुः, किं तेऽछमुपसर्पति ? ॥ १८८ ॥ मः सर्व-

१ पितृतुल्यान् । २ कारागृम् ।

कमनीयायाः, श्रूयते जनकः श्रियः । प्रजानुरागजलधिः, सोऽपि त्वय्येव जृम्भते ॥ १८९ ॥ स्नेहतो दुहितुः पश्य–न्नायतौ दुःखमायतम् । प्रणयातिक्रमं तेन, कृतवानस्मि ते पितुः ॥ १९० ॥

जगाद शान्तनोः सूनु–र्मातामह ! महान् भ्रमः । तवैष यदिदं वाक्यं, तुच्छोचितमुदाहरः ॥ १९१ ॥ भिदेलिमा हि प्रकृतिः, कुरुवंशान्यवंशयोः । भवेत् स्वभावो न ह्येकः, कलहंसबकोटयोः ॥ १९२ ॥ सापत्न्यमिति संबन्धो, विवेकिनि कुरोः कुले । अभूतपूर्व एवायं, नेत्र विज्ञायते क्वचित् ॥१९३॥ मम सत्यवती माता, गङ्गातोऽपि विशिष्यते । संबन्धो जन्मसंबन्धात्, प्रतिपन्नो महाननु ॥ १९४ ॥ यस्त्वस्या भविता सूनुः, स ममैवोपयाचितैः । शुभः स देशः कालो वा, यत्र भ्रात्रा समागमः ॥ १९५ ॥ स्वादयिष्यति ते पुत्री, पुत्रेण विहितं मया । सुखं विनयतः पूर्वं, पश्चात्तु तनुजैः कृतम् ॥ १९६ ॥ दूयते किं च तातोऽपि, मया भृशमबन्धुना । रथस्यैकरथाङ्गस्य, प्रत्यूहो हि पदे पदे ॥ १९७ ॥ एकां शृणु प्रतिज्ञां मे, बाहुमुत्क्षिप्य जल्पतः । सत्यवत्यास्तनूजस्य, राज्यं नान्यस्य कस्यचित् ॥१९८॥ अहं तु हन्तुमेतस्य, प्रत्यूहव्यूहमन्वहम् । चापभृत्तां करिष्यामि[1], सुतोऽस्मि यदि शान्तनोः ॥ १९९ ॥ अद्यैवाप्तं मया राज्यं, तुष्टाश्च मम देवताः । सत्यवत्या सधर्मिण्या, यत्तातः सुमना भवेत् ॥२००॥ उदात्तामिति गाङ्गेय–गिरमाकर्ण्य विस्मितैः । स्थिराणि खेचरैर्व्योम्नि, विमानानि वितेनिरे ॥२०१॥ विस्मयात् फुल्लनयन–स्ततः सत्यवतीपिता । अत्यन्तलुब्धो विश्रब्धं, कुमारं पुनरभ्यधात् ॥ २०२ ॥ साधु साधु कुमारेन्द्र !, त्वमेव पितृवत्सलः । स्फीतं गुणगणक्रीतं, यदेवं राज्यमुज्झसि ॥ २०३ ॥ राजपुत्रा हि राज्यार्थ–मकृत्यान्यपि कुर्वते ।

१ ' चापभृज्जागरिष्यामि ' इति प्रत्यन्तरद्वयपाठः ।

गाङ्गेय-नौपति-संवादः ॥

उंदात्तं तत् क्रमायातं, को नाम त्वामिव त्यजेत् ? ॥२०४॥ परं कुमार ! ये केचि–द्भवितारस्तवात्मजाः । न तेऽन्यस्य सहि-
ष्यन्ते, राज्यमूर्जितबाहवः ॥ २०५ ॥ त्वत्तो ये जन्म लप्स्यन्ते, पवित्रक्षात्रतेजसः । कस्तानीशिष्यते सोढु–मन्यः सिंहानि-
वाहवे ? ॥ २०६ ॥ राज्यमाच्छेत्तुमुत्सिक्तैः, शक्तैस्ते तनुजन्मभिः । आत्तश्रीः पुनरश्रीको, भविता मत्सुतासुतः ॥ २०७ ॥
इत्थं नानाऽऽधिवैधुर्यं, भावि संभाव्य भूरिशः । सुतायामायतौ तात !, पुनः स्खलति मे मनः ॥२०८॥ इत्युक्तवन्तं तं हृष्य-
न्नन्तः शान्तनवोऽभ्यधात् । एतामपि तवेदानीं, चिन्तां व्यपनयाम्यहम् ॥२०९॥ शृणु त्वं व्योम्नि शृण्वन्तु, सिद्धगन्धर्व-
खेचराः । ममैकं मुषिताशेष–पापग्रहमभिग्रहम् ॥ २१० ॥ स्वर्गश्च सोऽपवर्गश्च, यस्य ख्याता फलद्वयी । आजन्म तन्मयो-
पात्तं, ब्रह्मचर्यमतः परम् ॥२११॥ माता मातामहस्तातो, भाविनो बान्धवाश्च ये । एषामानन्दधुर्यस्य, व्रतस्यास्य किमुच्यते ?
॥ २१२ ॥ चारणश्रमणैः पूर्व–मिति मे प्रतिपादितम् । प्रथमं च चतुर्थं च, व्रतेष्वनुपमे व्रते ॥ २१३ ॥ प्रतिपेदे मया पूर्वं,
प्राणिनामभयव्रतम् । ब्रह्मव्रतमिदानीं तु, मम भाग्यमहो ! महत् ॥ २१४ ॥ अस्तु त्रैस्तविपद्वार्त्तं, तार्तीयीकमपि व्रतम् ।
पितृशुश्रूषणं नाम, ममाजन्म निरत्ययम् ॥२१५॥ इति प्रस्तुवतस्तस्य, श्रद्धालोर्मूर्ध्नि बन्धुरम् । भृङ्गवद्भस्वनोत्कर्षं, पुष्पवर्षं
दिवोऽपतत् ॥२१६॥ उच्चैरुरिति वाचश्च, देवी धन्याऽसि जाह्नवि ! । त्वं चासि शान्तनो ! श्लाघ्यः, सोऽयमीदृग्ययोः सुतः
॥ २१७ ॥ सर्वेऽपि ज्ञानिनो ब्रूत, पृच्छामः खेचरा वयम् । यद्येतद्व्रतमाराध्यं, केनापि गृहमेधिना ? ॥२१८॥ तत्त्वसत्त्वैक-

१ 'उदात्तः' इति प्रत्यन्तरद्वयपाठः । २ आत्ता–गृहीता श्रीर्यस्य यस्माद्वा । ३ 'धुर्येन' इति प्रत्यन्तरत्रयपाठः । ४ त्रस्ता विपदां वार्त्ता यस्मात्तत् । ५ 'देवि !' इति प्र० द्वयपाठः ।

निःस्यन्द-मयो यद्व्यभाददे । ईदृग्ब्रह्मव्रतं भीष्मं, भीष्मस्तेनैष गीयताम् ॥ २१९ ॥

सत्त्वं चेदेकमप्यस्ति, किमन्यैर्बहुभिर्गुणैः । तदेव हन्त ! चेन्नास्ति, किमन्यैर्बहुभिर्गुणैः ? ॥२२०॥

अहिंसा ब्रह्मचर्यं च, पितृभक्तिश्च निश्चला । त्रयस्त्रिभुवने श्लाघ्याः, शान्तनोस्तनुजे गुणाः ॥ २२१ ॥ भवेद्व्रतानां पारीणो, मा स्म रीणः[1] कचिद्भवेः । इत्यभिष्टुत्य निश्छद्म, सद्म स्वं खेचरा ययुः ॥ २२२ ॥ ततो दुहितरं तूर्ण-माहूयोत्सङ्गसङ्गिनीम् । कुर्वन्नुदीरयामास, कुमारं नाविकेश्वरः ॥ २२३ ॥ गुणग्रामैकवास्तव्यो, नास्त्येव त्वत्समः पुमान् । पितुरर्थे कृतं यद्यो, यद्ब्रह्मव्रतमद्भुतम् ॥ २२४ ॥ तवानेन चरित्रेण, चित्रीयितमनाश्चिरम् । वृत्तान्तमेकमाख्यामि, कुमार ! शृणु सांप्रतम् ॥ २२५ ॥

कालिन्दीकूलपालीषु, विहरन्नहमेकदा । अशोकानोकह[2]तले, विश्रामाय समागमम् ॥ २२६ ॥ तदात्वजातां[3] केनापि, तत्र निर्विघ्नचेतसा । मश्रीकामुज्झितामेका-मद्राक्षं मङ्क्षु बालिकाम् ॥ २२७ ॥ अपत्यमनपत्योऽहं, स्पृहयालुरहर्निशम् । सुरूपां तामुपादातुं, प्रवृत्तोऽस्मि सविस्मयः ॥ २२८ ॥ विजातिर्वा सुजातिर्वा, काऽप्यसाविति वेत्ति कः ? । एवं विकल्प्य व्यावृत्य, चलितोऽस्मि स्ववेश्मनि[4] ॥ २२९ ॥ अत्रान्तरेऽन्तरिक्षान्त-रुल्ललास सरस्वती । अस्ति रत्नपुरे स्वस्ति-धाम्नि रत्नाङ्गदो नृपः ॥ २३० ॥ तस्य रत्नवतीकुक्षि-शुक्तिमुक्तेयमात्मजा । खेचरेणापहृत्यात्र, विमुक्ता पितृवैरिणा ॥ २३१ ॥ तामेतामतनुप्रेमा, शान्तनुः परिणेष्यति । इति व्योमगिरा बालां, ग्राहितस्तामहं तदा ॥ २३२ ॥ तनयामनपत्यायाः, प्रियायास्ता-

नौपतिना गाङ्गेयस्य सत्यवती-पितृकुलं कथितम्॥

1 स्खलितः । 2 अनोकहः—वृक्षः । 3 तत्कालोत्पन्नाम् । 4 " चलितश्चास्मि वेश्मनि " प्रत्यन्तरत्रयपाठः ।

मुपानयम् । नामधेयं व्यधां चास्याः, सत्यं सत्यवतीत्यहम् ॥ २३३ ॥ मम पत्न्या च यत्नेन, वात्सल्यजलकुल्यया । केलिकाननवल्लीव-दियं वृद्धिमनीयत ॥ २३४ ॥ त्रिलोकीतिलकीभूता, प्रभूतगुणमन्दिरम् । सेयं सत्यवती पुत्री, कृत्रिमा मम नौरसी ॥ २३५ ॥ पिता भवत्यपत्याना-मीदृशां मादृशः कुतः ? । आस्पदं कल्पवल्ल्या हि, सुमेरुर्न पुनर्मरुः ॥२३६॥ तदस्या दिव्यवाचैव, निर्णीतः शान्तनुः पतिः । वीक्षितुं पितृभक्तिं तु, त्वदीयामित्यजल्पिपम् ॥ २३७ ॥ तदिदानीमुपादत्स्व, मत्सुतां तातहेतवे । अतः परं त्वमेवास्या, विश्रामः सुखदुःखयोः ॥ २३८ ॥ इत्यालप्य कुमारस्य, प्रसरत्पुलकाङ्कुरः । सुतां सत्यवतीं प्रीता-मर्पयामास नौपतिः ॥ २३९ ॥ अलमम्ब ! विलम्बेन, रथोऽयमधिरुह्यताम् । इति तां रथमारोप्य, पुरं शान्तनवो ययौ ॥ २४० ॥

नभश्चरेभ्यो निःशेषं, वृत्तान्तं ज्ञातपूर्विणः । प्रसन्नस्य पितुर्नीत्वा, स चक्रे तामुपायनम् ॥ २४१ ॥ पितापि भीष्ममाश्लिष्य, निर्भरस्नेहपूर्वकम् । आत्मैकवेद्यमानन्द-ममन्दभरमन्वभूत् ॥ २४२ ॥ दृशा पीयूषवर्षिण्या, श्रीविश्राममहीरुहम् । सिञ्चन्नुवाच गाङ्गेय-मुत्सङ्गस्थापितं पिता ॥२४३॥ शृण्वन्ति पितुरादेशं, ये तेऽपि विरलाः सुताः । आदिष्टं ये तु कुर्वन्ति, सन्ति ते यदि पञ्चपाः ॥ २४४ ॥ आत्मना यस्तु विज्ञाय, करोति पितुरीप्सितम् । एक एव स मे सूनु-र्जाह्नवीशुक्तिमौक्तिकम् ॥ २४५ ॥ ततः परसंहस्राणि, वत्सराण्यायुरस्तु ते । एतस्य कुरुवंशस्य, पताकाश्रियमाप्नुहि ॥ २४६ ॥ प्रमोदादेवमाशीर्भि-रभिनन्द्य निजात्मजम् । नृपः सत्यवतीं सौम्ये, मुहूर्ते परिणीतवान् ॥ २४७ ॥

१ न स्वशरीरजा इत्यर्थः ।

ततः सत्यवतीं पत्नीं, नवप्रेमा न(मांश)मीयुषः । भूपालस्य पुमर्थेषु, कामः कामं प्रियोऽभवत् ॥२४८॥ "रति–पुत्रफला दारा, " इति नीतिवचस्तया । सत्यापयन्त्या सुषुवे, पुत्रश्चित्राङ्गदाभिधः ॥ २४९ ॥ तेजस्वितिलकः पादै–राक्रमन् भूभृतां शिरः । योऽभवज्जातमात्रोऽपि, बालार्क इव दुःसहः ॥ २५० ॥ विचित्रवीर्य इत्यासीत्, सत्यवत्याः सुतोऽपरः । बभूव भूभृतो यस्मा–द्वंशः प्रांशुः प्रसृत्वरः ॥ २५१ ॥ तदा तयोः समग्रेषु, हितकर्मसु जाग्रतः । प्रादुर्बभूव सौभ्रात्रं, गङ्गासूनोरकृत्रिमम् ॥ २५२ ॥ सोऽग्रजन्माऽनुजन्मानौ, कृत्वाऽङ्कतलतल्पगौ । उल्लापैः श्रोत्रपीयूषैः, खेलयामास भूरिशः ॥ २५३ ॥ क्षत्रगोत्रोचितैस्तैस्तै–रन्यबालविलक्षणैः । एतयोर्बाल्यचापल्यैः, स तुतोष क्षणे क्षणे ॥ २५४ ॥

अथाल्पीयो विदित्वायु–रग्रिमस्तरसदश्वनाम् । शुभध्यानेन तत्याज, शान्तनुर्मानुषीं तनुम् ॥ २५५ ॥ विधिवद्विदधे भीष्मः, पितुः स्नस्यौर्ध्वदेहिकम् । " इह च प्रेत्य च प्रीत्यै, तादृशा हि सुताः पितुः " ॥ २५६ ॥

सोऽथ चित्राङ्गदं राज्ये, शिशुमेव न्यवीविशत् । " न हि विस्मृतिमभ्येति, प्रतिपन्नं महात्मनाम् " ॥ २५७ ॥ स ग्रीष्मेणेव भीष्मेण, तथोग्रं धाम लम्भितः । उदयन्नपि दुष्प्रेक्ष्यो, यथाऽभूद्भानुमानिव ॥२५८॥ अभूत् कश्चित् स भूपानां, हृदि चित्राङ्गदो गदः । नागदो नागदङ्कारः, कोऽप्यासीद्यच्चिकित्सने ॥ २५९ ॥ तेन नैष्यत भीष्मोऽपि, संविभागी जयेऽपरः । अतः स युद्धमेकाकी, चक्रे सार्धं विरोधिभिः ॥२६०॥ स निर्मलकलासद्म, च्छद्मनाऽभ्येत्य जैत्रसे । नीलाङ्गदेन संग्रामे, शीतांशुरिव राहुणा ॥ २६१ ॥ " शिरःशेषोऽपि चेद्वैरी, तदा बाधेत राहुवत् " । उपानीयत भीष्मेण, सोऽप्यतो नामशेषताम् ॥२६२॥

सत्यवती-शान्तनोर्विवाहः, पुत्रद्वयोत्पत्तिः, शान्तनुमरणम्, चित्राङ्गदस्य राज्यप्राप्तिस्तन्मरणं च ॥

॥ ९ ॥

---

१ भृशम् । २ रतिपुत्रौ फलं यासां ताः । ३ " स हि भीष्मेण भी० " इति प्रत्य० । ४ विनाशितः ।

अथ राज्यं कनिष्ठाय, गरिष्ठो जाह्नवीसुतः। ददौ विचित्रवीर्याय, बन्धवे बन्धुवत्सलः ॥ २६३ ॥ तं भीष्मचापमाहात्म्या-दपचक्रे न कश्चन। "यूथनाथान्तिके केन, कलभः परिभूयते ?" ॥ २६४ ॥ चतसृष्वपि विद्यासु, गतावद्यासु कौशलम्। चक्रे कनीयसो भ्रातु-र्भीष्मः संज्ये च धन्वनि ॥ २६५ ॥ अनेहंयुतयाऽत्यन्तं, भूम्ना वैनयिकेन च। बबन्ध बान्धवस्नेहं, भीष्मस्तस्मिन् विशेषतः ॥ २६६ ॥ दाराणामनुरूपाणां, भ्रातुरुद्वाहहेतवे। गवेषणाय स प्रैषी-न्निजान् प्रति दिशं नरान् ॥ २६७ ॥ मार्गदत्तदृशे तस्मै, कदाचिद्धूलिधूसरः। तेषामेकतमोऽभ्येत्य, कथयामासिवानिति ॥ २६८ ॥

देव ! श्रीकाशिराजोऽस्ति, प्रकाशः काश्यपीतले[3]। यस्य मन्दाकिनी नित्य-मनर्घ्या गृहदीर्घिका ॥ २६९ ॥ अम्बिकाऽम्बालिकाऽम्बा च, तिस्रस्तस्यासते सुताः। विभान्ति पुरतो यासां, तृणवत्त्रिदिवस्त्रियः ॥ २७० ॥ तासां तातेन विश्रब्धं, प्रारब्धोऽस्ति स्वयंवरः। रचयांचक्रिरे मञ्चा-स्तत्र वैचित्र्यशालिनः ॥ २७१ ॥ राजानो राजपुत्राश्च, शतशः सन्त्युपस्थिताः। आपतन्त्यधुना केचि-दापतिष्यन्ति केचन ॥ २७२ ॥ ततः कलाकलापेन, रूपेण वयसाऽपि च। योग्या विचित्रवीर्यस्य, सुतास्ताः काशिभूपतेः ॥ २७३ ॥ गाङ्गेयस्तद्वचः श्रुत्वा, तत्त्वदृष्टिर्व्यतर्कयत्। किमहो काशिराजेन, नानुजो मे निमन्त्रितः ? ॥ २७४ ॥ न गन्तव्यमनाहूतै-र्महीपालैः स्वयंवरे। अतो गत्वाऽहमेवैकः करिष्ये सर्वमीप्सितम् ॥ २७५ ॥ एवं विमृश्य गाङ्गेयो, रथेन प्रस्थितो द्रुतम्। जवनैर्वाजिभिर्वेगा-दगमच्च स्वयंवरे ॥ २७६ ॥ तत्र सिंहासनासीना-नुच्चैर्मञ्चेषु भूपतीन्। सोऽपश्यद्भासुराकल्पान्, विमानेष्वमरानिव ॥ २७७ ॥ उरोलोलन्मनोहारि-हारास्तिस्रोऽपि बालिकाः। दृष्ट्वा विचित्रवी-

१ ज्यासहिते धनुषि च। २ अगर्वितया। ३ 'पृथिवीतले' इति प्र०। ४ 'प्रास्थित' इति प्र० द्वय०। ५ दीप्तभूषणान्।

गाँगं, न हर्तुमकरोन्मनः ॥२७८॥ प्रत्येकमात्मनः कन्या–लाभं संभाव्य भूपतीन् । तांस्तान् विवृण्वतो भावान्, हसति स्म स
मानसे ॥ २७९ ॥ अथ तासां पुरो धात्र्या, कीर्त्यमानेषु राजसु । रथात्तार्क्ष्य इवोत्फालः, स रङ्गाङ्गणमाविशत् ॥ २८० ॥
स तं स्वयंवरं राज–चक्रनक्रगमाकुलम् । बाढं विलोडयामास, पयोधिमिव लीलया ॥२८१॥ आच्छिद्य कन्यारत्नानि, सर्वेषा-
मेव पश्यताम् । रथमारोपयामास, भीष्मो भीष्मपराक्रमः ॥ २८२ ॥ स्यन्दने भयनिस्पन्दा, वेपमानवपुर्लताः । सुताः स
काशिराजस्य, स्निग्धमुग्धमभाषत ॥ २८३ ॥ वत्साः ! किमपि मा भैष्ट, नानिष्टं वः करिष्यते । भीष्मोऽस्मि शान्तनोः
सूनु–र्भवतीनां प्रियंकरः ॥ २८४ ॥ राजा विचित्रवीर्योऽस्ति, जैत्रदोर्वीर्यदुर्जयः । एते सर्वेऽपि यस्याग्रे, गुणैर्बहुतृणं नृपाः
॥ २८५ ॥ अनुभूय प्रियाभूय, तस्य स्मरसमाकृतेः । हस्तिनापुरसाम्राज्यं, चिरं निर्विशताद्भुतम् ॥ २८६ ॥ विनयावर्जितो-
ऽत्यन्तं, तस्याहं बन्धुरग्रजः । तदर्थं रथमारुह्य, युष्मानानेतुमागतः ॥ २८७ ॥ तस्मिंस्ता निस्तरङ्गेण, रागेणाक्रान्तचेतसः ।
इदं गाङ्गेयवचनं, तथेति प्रतिपेदिरे ॥ २८८ ॥ प्रतिपत्तिचलन्मौलि–नृत्यत्ताटङ्करश्मिभिः । ताः स्फीतप्रीतयश्चक्रु–स्तस्य
नीराजनामिव ॥ २८९ ॥ सत्तां मनोरथैः सार्धं, रथं भीष्मो न्यवर्तयत् । कुर्वन् कुण्डलितं चाप–मुच्चैःस्वरमुवाच च ॥२९०॥
सर्वे शृणुत भो! भूपाः!, प्रौढदोःस्थामशालिनः । युष्माकं पश्यतां सैष, भीष्मः कन्या हरत्यमूः ॥२९१॥ ततो वः कोऽपि
जागर्ति, यदि दोर्दण्डचण्डिमा । तदा कोऽप्यायुधं धत्ता–मयमूर्ध्वंदमोऽस्म्यहम् ॥ २९२ ॥ तदा क्षुब्धार्णवनिभो, रङ्गक्षोभ-
भवो ध्वनिः । स कश्चिदासीन्मन्येऽसौ, बिभिदे येन रोदसी ॥ २९३ ॥ रभसोत्थास्तुभूपानां, त्रुटाभिः सिचयाञ्चलैः ।

भीष्मेण कृतमम्बिकादिकन्यात्रयहरणम्।

---

१ 'निस्तरङ्गेण' इति प्र० द्वय० । २ 'पूर्वोक्ताः' इति प्रत्य० ।

भूगताभिर्भयं भूरि, प्रसूतमसिधेनुभिः ॥ २९४ ॥ पलायनकृतेऽवश्यं, व्यवस्यन्तोऽपि कातराः । संबाध[1]कृतसंरोधाः, प्रचेलुर्न पदात्पदम् ॥ २९५ ॥ मुक्ताकलापमुक्तानां, चूर्णैः कीर्णाऽवनिर्बभौ । अमेयगाङ्गेययश-श्चन्दनेनेव चर्चिता ॥ २९६ ॥ रत्नाङ्गदानामन्योन्य-कोटिघट्टनसंभवः । क्षौमाणि क्षोणिपालाना-मधाक्षीदाशुशुक्षणिः ॥ २९७ ॥ तदानीं तत्र केषांचि-दस्य-स्तस्तेयकर्मणाम् । मूलोन्मूलितदौर्गत्यः, स्तुत्यः शान्तनवोऽभवत् ॥ २९८ ॥ वीक्ष्य भीष्मं भयक्षोभा-च्छिरस्तः स्रंस्तब[3]-न्धनः । केनापि राजपुत्रेण, किरीटो नोपलक्षितः ॥ २९९ ॥ नृपपञ्चाननाः केचि-ल्लीलालालसचेतसः । असिमुष्टिमवष्टभ्य, यथास्थितमवस्थिताः ॥ ३०० ॥ अथ शौण्डीरदोर्दण्डाः, केऽपि संभूय भूमिपाः । सद्यः संवर्मयामासु-रस्तिवीरा हि काश्यपी ॥ ३०१ ॥ पुलकोद्भेदमेदस्वि-वपुषां पौरुषस्पृशाम् । तेषां वर्म त्रुटत्संधि, युद्धसन्धां व्यधादृढम् ॥ ३०२ ॥ काशिराजपुरोगैस्तै-र्भृशं सर्वाङ्गवर्मितैः । विपक्षक्षितिपैरेत्य, भीष्मो भीष्ममभाष्यत ॥३०३॥ हंहो ! क्षत्रकुलोत्तंस !, किम-क्षत्रं वितन्यते ? । अयं स्वयंवरध्वंसो, महांस्ते हेतुरंहसाम् ॥३०४॥ श्रियः स्त्रियो वा मा भूव-न्नाहूता दुर्नयेन याः । विपदा-वर्तगर्ते यत्, पातयन्त्येव ताः पतिम् ॥ ३०५ ॥ तत् प्रतीच्छ शरैस्तीक्ष्णैः, पापस्यास्य व्यपोहकम् । गुरुस्तवास्मदिष्वासः, प्रायश्चित्तं प्रदास्यति ॥ ३०६ ॥ अथाभापत गम्भीरं, धीरः शान्तनुनन्दनः । भो ! भूमिपालाः ! सुष्ठूक्तं, युष्माभिर्न्याय-निष्ठुरैः ॥ ३०७ ॥ परमुर्वी च कन्या च, सर्वसाधारणी भवेत् । गृह्णातु स हि यस्यास्ति, विक्रमो निपुणः पुनः ॥ ३०८ ॥

---

१ संबाधः-अन्योऽन्यसंघर्षः, तेन कृतः संरोधो येषां ते । २ अग्निः । ३ 'श्रस्तवानधः' इति प्र० द्वय० । ४ बाणः । ५ 'पणः' इति प्र० द्वय० ।

नैवास्ति विक्रमो यस्य, स हास्यः स्पृहयन्निमाम् । दरिद्र इव रत्नानि, विविधानि धनं विना ॥ ३०९ ॥ विक्रमेण धनेनैव, विना यत्तस्करा इव । कन्यारत्नानि गृह्णीथ, तद्यूयमपराधिनः ॥ ३१० ॥ आगस्विनां च दण्डाय, कोदण्डो मम पण्डितः । इत्युक्त्वा स क्षुरप्रेण, तेषां केतूनपातयत् ॥ ३११ ॥ अथ तेऽपि रथश्रेणि–प्रारब्धपरिमण्डलाः । मध्येकृत्य शितैर्भीष्मं, पत्रिभिः पर्यताडयन् ॥ ३१२ ॥ अभ्यापतन्तो युगप–न्निपीततपनातपाः[1] । तस्य ते विशिखाश्छायां, तेनिरे नार्पैनिन्यिरे[3] ॥ ३१३ ॥ वीरंमन्यतया दृप्ता–नन्यनिन्दापटीयमः । स तानवज्ञयाऽपश्य–न्मृगारातिर्मृगानिव ॥ ३१४ ॥ प्रतिक्षिपन्तः स्वच्छन्द–मायुधान्युद्धतानि ते । जैत्रस्थामानमात्मानं, मेनिरे जितकाशिनम् ॥ ३१५ ॥ इत्थं प्रगल्भमानेषु, ससंरम्भेषु तेष्वथ । खिन्ना नरेन्द्रनन्दिन्यः, स्वं निनिन्दुर्मुहुर्मुहुः ॥ ३१६ ॥ धिगस्मान्मन्दभाग्यानां, धुरि वर्तामहे वयम् । इतो भ्रष्टास्ततो भ्रष्टा, भवितास्मोऽधुना ध्रुवम् ॥ ३१७ ॥ क्वैते नृपाः परोलक्षाः, क्व चायं दोर्द्वितीयकः । तदिदानीं विपन्नेऽस्मिन्, विपन्नं नो मनोरथैः ॥ ३१८ ॥ इत्थं ताः कुमुखीर्वीक्ष्य, भीष्मस्तत् कर्म निर्ममे । मूर्धानं धूनयद्भिर्य–त्रिदशैर्ददृशे दिवि ॥ ३१९ ॥ निशितैः सर्वतो मुष्टया, तान् प्रत्येकं व्रणाङ्कितान् । शरैश्चकार सुश्लोकां, स्वप्रशस्तिं लिखन्निव ॥ ३२० ॥ यावद्विपक्षमक्षेपं, लघुहस्तः क्षिपन्निषून् । वीक्षांचक्रे स तैरेको–ऽप्यसंख्यैरात्मसंख्यया ॥ ३२१ ॥ भीष्मग्रीष्मरवेः क्षिप्ता, मार्गणैः[2] किरणैरिव । क्वाप्यल्पा अपि नैक्ष्यन्त, क्षत्रनक्षत्रजातयः ॥ ३२२ ॥ राजैकः काशिराजस्तु, विच्छायवपुरञ्जसा । रणव्योमैकदेशस्थः, स्तोकस्तोकं विलोकितः ॥३२३॥ हृष्यन्मनोभिः कन्याभि–र्मुक्तामिव विलक्षताम् । जाह्नवीसूनुरद्धाय, तदानीं

भीष्मेण सह स्वयंवरागतराजानां युद्धम् ॥

१ नितरां पीतः सूर्यातपो यैस्ते । २ बाणाः । ३ न स्खलयांचक्रिरे ।

प्रत्यपद्यत ॥ ३२४ ॥ उपेत्य प्रीणयामास, स तथा काशिभूपतिम् । यथा विचित्रवीर्याय, स्वयं प्रादादसौ सुताः ॥३२५॥

स प्रीतिस्फारनेत्राभि-स्ताभिर्बालाभिरन्वितः । हस्तिनापुरमारब्ध-महोत्सवमुपाययौ ॥ ३२६ ॥ स वैवाहिकमाङ्गल्या-स्तिस्रस्ताः काशिनन्दिनीः । भ्रात्रा विचित्रवीर्येण, प्रमोदादुदवाहयत् ॥३२७॥ ताः प्राप्य नृपतिः प्रेम-रसैककनकालुकाः । सिञ्चन् पञ्चापि विषयान्, सिषेवे सोऽतिशाड्वलान् ॥३२८॥ इषून् पञ्चापि पञ्चेषुः, प्रक्षिपन्नपि लक्षशः । प्रेयसीनामसौ मान्य, इति तस्य प्रियोऽभवत् ॥ ३२९ ॥ कामोऽनासक्तिसेव्योऽपि, तेनादृश्यत गौरवात् । प्रायेण यौवनान्धानां, सुलभो हि विपर्ययः ॥ ३३० ॥ ततो विचित्रवीर्यस्य, संप्राप्तावसरः स्मरः । धर्मार्थौ जग्रसे राहुः, सूर्याचन्द्रमसाविव ॥ ३३१ ॥ स प्रेयसीनां तिसृणां, यच्चतुर्थः सदाऽभवत् । तल्लोके लोकपालानां, भवति स्म न पञ्चमः ॥ ३३२ ॥ कामासक्तस्य तस्येत्थं, प्रावर्तत बलक्षयः । अनङ्गेऽतिप्रसङ्गो हि, विरङ्गायैव केवलम् ॥ ३३३ ॥ क्षीयमाणबलं ज्ञात्वा, गाङ्गेयस्तमवोचत । असौ दोषस्त्वयि स्वच्छे, वत्स! त्रासो मणाविव ॥३३४॥ पीनवर्मितसर्वाङ्गान्, कथं शत्रून् विजेष्यसे ?। अनङ्गेनापि कल्याणिन् !, यस्त्वमेवमजीयथाः ॥ ३३५ ॥ धर्मार्थाविव न परं, कामासक्तस्य नश्यतः । मूलं सर्वपुमर्थानां, वपुरप्यपचीयते ॥ ३३६ ॥ दुःसहाः पुष्पबाणस्य, बाणाः पुष्पमया अपि । यत्तेऽभूवंस्ततः प्रौढान्, सोढासि कथमायसान् ? ॥ ३३७ ॥ व्यधीयत तवैताभि-रबलाभिर्बलक्षयः । बलवद्भिस्तु रुद्धस्य, न जाने किं भविष्यति ? ॥ ३३८ ॥ कुरङ्गाक्षीषु नात्यन्त-प्रसङ्गः संगतः सताम् ।

---

१ आलुः--पात्रविशेषः ' झारी ' इति भाषायाम् । २ (अत्र च दीर्घकरणम् ' न तिसृचतसृ-' (६ । ४ । ४) इति पाणिनीयसूत्रविरुद्धं ज्ञेयम्.) " तिसृणां प्रेयसीनां स " इति वा पाठो ज्ञेयः, प्रतित्रये तिसृणामिति पाठः ।

अत्यासन्नाभिरेताभि-र्दूरे स्युर्गुरवो गुणाः ॥ ३३९ ॥

भीष्मे विचित्रवीर्याय, शिक्षामेवं प्रयच्छति । तत्र पुत्रानुशिष्ट्यर्थ-माययौ सत्यवत्यपि ॥ ३४० ॥ साऽप्यभाषिष्ट तनयं, बाष्पाविलविलोचना । अकस्मादेव मे वत्स!, किं छिनत्सि मनोरथान् ॥ ३४१ ॥ मुखं स्नुषाणामुद्वीक्ष्य, मुदमासादयं पराम् । इदानीमस्मि सोत्कण्ठा, तवापत्यविलोकने ॥ ३४२ ॥ सा तु सांप्रतमेतेन, त्वद्दौर्बल्येन दुर्बला । सहोदयन्व्यया पुत्रैः, सवित्रीणां मनोरथाः ॥ ३४३ ॥ सर्वासां क्षत्रियस्त्रीणां, परं वीरप्रसूरहम् । इमं वत्स! ममोत्सेकं, लीलयैव त्वमच्छिदः ॥ ३४४ ॥ कुरुवंशकुलस्त्रीणां, पुत्रिणीनामहं त्वया । धुरि संस्थापिता वत्स!, त्वयैवोत्थापिताऽधुना ॥ ३४५ ॥ तत्स्वगोत्रोचिताचार-व्यभिचारं समाचरन् । अस्मिंस्त्वत्पूर्वजो ब्रूहि, पथि कः पथिकोऽभवत् ? ॥३४६॥ तदायुष्मंस्तव ज्यायान्-बन्धुर्धत्ते मुदं यथा । यथा सिध्येन्ममेच्छा च, प्रवर्तेथास्तथाऽनिशम् ॥ ३४७ ॥

अनुशिष्टिमिति श्रुत्वा, भ्रातुर्मातुश्च सादरम् । विचित्रवीर्यः स्वं कर्म, स्मृत्वा दूरादलज्जत ॥ ३४८ ॥ अदीपिष्ट तदादिष्टं, निर्मले तस्य चेतसि । अर्पितं दर्पणे भानो-र्भृशमुज्जृम्भते महः ॥ ३४९ ॥ शिक्षामादाय तां मूर्ध्ना, प्राञ्जलिस्तौ विसृज्य च । राजा धर्मार्थकामेषु, समवृत्तिरजायत ॥ ३५० ॥

आबभाराम्बिका गर्भ-मन्यदोद्दामदोहदम् । सुलग्ने सुतमुद्दीप्त-प्रभापूतमसूत च ॥ ३५१ ॥ भीष्मेण सत्यवत्या च, महोत्सवपुरःसरम् । धृतराष्ट्र इति श्लाघ्यं, तस्य नाम विनिर्ममे ॥ ३५२ ॥ स दधौ जनुषाऽन्धत्वं, केनापि प्राच्यकर्मणा । स

१ 'स्वस्वगोत्रो०' प्र० द्वय० ।

भीष्मसत्यवतीभ्यां दत्ता विचित्रवीर्याय शिक्षा, धृतराष्ट्रपुत्रजन्म च ॥

नास्ति प्राङ्निबद्धे हि, यो रुणद्धि शुभाशुभे ॥ ३५३ ॥ अम्बालिकाऽपि तनयं, तस्यानुजमजीजनत्। आजन्म पाण्डुरोगित्वा-द्यः पाण्डुरिति पप्रथे ॥३५४॥ गुणाम्बुनिधिरम्बाया-स्तनूजः समजायत। यं चक्रुर्गुरवः सर्व-विदुरं विदुराभिधम् ॥३५५॥

अथ तेषु कुरोर्वंशं, जन्मनाऽलंकरिष्णुषु। शुभैरुज्जृम्भितं भावैः, प्रलीनमशुभैः पुनः ॥ ३५६ ॥ सूचकश्चरटश्चौरः, कृपणः पारदारिकः। एते शब्दास्तदा प्रापु-रभिधेयेन[1] वन्ध्यताम् ॥ ३५७ ॥ लेभे सर्वत्र साम्राज्य-मेकच्छत्रं नयस्तदा। निरन्वय-विनाशेन[2], व्यनश्यद्दुर्नयः पुनः ॥ ३५८ ॥ तदा नाधिर्न च व्याधि-र्बाधते स्म जनं क्वचित्। न दुर्बलो बलिष्ठेन, कश्चनाप्य-भ्यभूयत ॥ ३५९ ॥ नावृष्टिर्नातिवृष्टिश्च, तदा प्रादुरभूद्भुवि। ईतिः प्रीतिविघाताय, नान्याऽप्यासीत् कुटुम्बिनाम् ॥३६०॥ पुष्पन्ति स्म फलन्ति स्म, कालेऽवश्यं महीरुहः। पुष्यन्ति स्म रसोत्कर्षं, पुष्पेषु च फलेषु च ॥ ३६१ ॥ अनुभावात् कुमा-राणा-मित्यभूदुदयो भुवः। भवेद्वाङ्मनसातीतः, प्रभावो हि महात्मनाम् ॥ ३६२ ॥ किं तु स्त्रीव्यसनेनाति[3]-मनोऽभीष्टेन सर्वदा। चिराय मिलितेनेव, भूयोऽप्यालिङ्गितो नृपः ॥ ३६३ ॥ ततः क्षीणतनुः सोऽभूत्, प्रियास्वासक्तमानसः। " रामासु भृशमासक्तिः, कारणं राजयक्ष्मणः " ॥ ३६४ ॥ राजयक्ष्मपरीवारः, कासः श्वासोऽपनिद्रता। रुजोऽन्या अपि राजान-मर्द[4]-जन्ननुवासरम् ॥ ३६५ ॥ चित्रैर्विचित्रवीर्यस्तै-रातङ्कैराकुलीकृतः। संचक्राम परं लोकं, ' कामस्याहो ! दुरन्तता ' ॥३६६॥

तस्मिन्नस्तमिते सूनु-भानौ सत्यवती तदा। शोकान्धकारवैधुर्य-मधत्त द्यौरिवाधिकम् ॥ ३६७ ॥ विललाप च हा ! वत्स !, हा ! परिच्छदवत्सल !। हा ! कौरवकुलोत्तंस !, हाऽगमः कामिमां दशाम् ? ॥ ३६८ ॥ इत्थं सा विलपन्त्येव,

१ अर्थेन। २ समूलनाशेनेत्यर्थः। ३ ' नापि ' इति प्र० द्रय०। ४ अपीडयन्।

मूर्च्छिता भूतलेऽपतत् । अस्तोकं शोकसंतापं, तदा च न विवेद तम् ॥ ३६९ ॥ मूर्छाव्यपगमं प्राप्ता, कथंचिच्चन्दनादिभिः । स्मृत्वा पुनर्गुणान् भूयो, मुक्तकण्ठं रुरोद सा ॥ ३७० ॥ अभ्युपेत्य तदभ्यर्ण-मुरस्ताडनपूर्वकम् । रुदन्ति स्म गलद्बाष्प-मम्बिकाप्रमुखाः स्नुषाः ॥ ३७१ ॥ वयमेकपदे स्वामि-स्त्वयास्तं समुपेयुषा । दुस्थामवस्थामानीता, नलिन्य इव भानुना ॥ ३७२ ॥ क्रीडाद्रिष्वपि न क्रीडा-मेकाकी कृतवानसि । इदानीं तु विमुच्यास्मान्, किमेको गतवानसि ? ॥३७३॥ विप्रयोगासहिष्णूनां, त्वदुपास्तिसुखस्पृशाम् । कस्मादकस्मादस्माक-मिदं वैमुख्यमागमः ? ॥ ३७४ ॥ निजमेनं प्रियावर्गं, जानासि विरहाक्षमम् । तदेहि देहि प्राणेश !, द्रुतं प्रतिवचोऽधुना ॥ ३७५ ॥ एवं विलापवैकल्यं, प्राप्ताः संस्थाप्य तास्तदा । चकार तस्य गाङ्गेयो, निर्वापप्रमुखाः क्रियाः ॥ ३७६ ॥ बाल्यचापल्यललितैः कुमाराणां मनोरमैः । स शोकं स्तोकतां निन्ये, सत्यवत्याः कथंचन ॥ ३७७ ॥

तथाऽजनि कुमाराणां, बन्धुस्नेहः परस्परम् । यथैषां क्षणमप्यस्था-देको नैकतमं विना ॥ ३७८ ॥ बालेष्वपि कुमारेषु, स्वर्गतेऽपि नराधिपे । भयाद्भीष्मस्य राजानो, सीमानं न ललङ्घिरे ॥ ३७९ ॥ तेषां शस्त्रे च शास्त्रे च, भीष्म एवाभवद्गुरुः । अम्भोधराणामम्भोधि-रेव कुक्षिंभरिर्भवेत् ॥ ३८० ॥ नृलोक इव लोकेषु, तेषु त्रिष्वपि बन्धुषु । गोत्राधारतया पाण्डु-र्मध्यमोऽपि व्यशिष्यत ॥ ३८१ ॥ कनिष्ठं धृतराष्ट्रस्तं, गुणज्येष्ठममन्यत । लघीयानपि जायेत, गुणैर्लोकंपृणैर्गुरुः ॥ ३८२ ॥ धृतराष्ट्रमभाषिष्ट, भीष्मो मधुरया गिरा । वत्स ! राज्यमिदानीं त्वां, ज्यायांसमुपतिष्ठताम् ॥ ३८३ ॥ स

१ तर्पणादिकाः ।

पाण्डुविदुरयोर्जन्म, विचित्रवीर्यमरणम्, सत्यवत्यादीनां शोकः ॥

जगाद न योग्योऽस्मि, राज्यस्याहं ध्रुवं ततः । पाण्डुमभ्येति राज्यश्री-र्दिनश्रीरिव भास्करम् ॥ ३८४ ॥ असौ त्रयाणामस्माकं, योग्यो राज्यधुरंधरः । उक्तो मुक्ताकलापेऽपि, मध्यस्थो नायकः परम् ॥ ३८५ ॥ गुणश्रेणिसुधासिन्धु-बन्धोरुज्जागरौजसः । अहं तु नित्यमेतस्य, दास्यायैव कृतस्पृहः ॥ ३८६ ॥ इति निर्बन्धतस्तस्य, सुमुहूर्ते महोत्सवात् । राज्याभिषेकमाधत्त, पाण्डोर्भीष्मः प्रमोदतः ॥ ३८७ ॥ कीर्तिज्योत्स्नाभरव्याप्त-रोदसीकन्दरोदरे । तत्रोदिते नवे राज्ञि, भृशं मुमुदिरे प्रजाः ॥ ३८८ ॥ भीष्मे च धृतराष्ट्रे च, धृतराज्यधुरे सति । न विदामास साम्राज्य-चिन्ताभारक्लमं नृपः ॥ ३८९ ॥ दुष्टनिग्रहनिंःशूक-जागरूकभुजद्वयः । पाण्डुः प्रचण्डदोर्दण्डान्, वशीचक्रे विशांपतीन् ॥ ३९० ॥

कन्दर्पकामिनीरूप-दर्पसर्पस्य जाङ्गुलीः । गान्धारीप्रभृतीरष्टा-वुपादायाथ सोदरीः ॥ ३९१ ॥ सुबलक्ष्मापतेः सूनु-र्गन्धारपतिरन्यदा । शकुनिर्भीष्ममभ्येत्य, बद्धाञ्जलिरभाषत ॥ ३९२ ॥ (युग्मम्) कुलदेव्योपदिष्टाय, विशिष्टक्रमशालिने । तिष्ठन्ते धृतराष्ट्राय, स्वसारो मे पतिंवराः ॥ ३९३ ॥ अम्बिकासूनुना नून-मन्यूनगुणधारिणा । एतास्तदार्य ! सोत्साहं, विवाहयितुमर्हसि ॥ ३९४ ॥ इत्थमभ्यर्थितस्तेन, स्वेह्नि जह्नुसुतासुतः । एतासां पतिमष्टानां, धृतराष्ट्रमतिष्ठिपत् ॥ ३९५ ॥ अनुरूपगुणग्रामा, पाण्डोरुद्दामरौजसः । का कलत्रं भवित्रीति, चिन्ताऽभूद्भीष्मचेतसि ॥ ३९६ ॥ भीष्मः पाण्डुयुतो जातु, पान्थं राजपथे क्वचित् । चित्रचित्रपटव्यग्र-कराग्रं कंचिदैक्षत ॥ ३९७ ॥ नारीरूपं पटे तत्र, दृष्ट्वा पाण्डुरचिन्तयत् । एतस्यामेव पर्याप्तं, सौन्दर्यकथया ध्रुवम् ॥ ३९८ ॥ न ह्येषा रूपरेखा स्या-न्मानुषीषु पुरंध्रिषु । तदियं किं रतिः ? किं वा,

१ नि शूकः-निस्तुषः स्वच्छ इत्यर्थः । २ सुदिने । ३ उत्कटबलवतः ।

कमला ? किमु रोहिणी ? ॥३९९॥ एतस्याः कोमलाकारा–वङ्घ्री पङ्केरुहे ध्रुवम् । अङ्गुल्यो यत्र पत्रन्ति, सौन्दर्यं मकरन्दति ॥ ४०० ॥ जङ्घाकाण्डे किलैतस्या, नाले पादसरोजयोः । रम्भास्तम्भायितं चास्या–मूरुभ्यां यौवनोत्सवे ॥ ४०१ ॥ नितम्बस्थलमेतस्या, जैत्रभूमिर्मनोभुवः । यत् सदैवात्र वास्तव्यः, शास्ति विश्वत्रयीमसौ ॥ ४०२ ॥ वलिष्ठ एव मध्योऽस्याः, कृशोदर्याः कृशोऽपि हि । यो वलित्रितयाक्रान्तो–ऽप्यधिकं पुष्यति श्रियम् ॥ ४०३ ॥ अपूर्वं निर्वृतिस्थान–मेतस्याः स्तनमण्डलम् । मुक्ता व्यक्तं विलोक्यन्ते, यत्र हारिणि भासुराः ॥ ४०४ ॥ एतस्याः सरलाकारा, रोमराजिर्विराजते । कन्दर्पदन्तिनो विभ्र–दालानस्तम्भविभ्रमम् ॥ ४०५ ॥ यदस्या वदनौपम्ये, पार्वणेन्दोर्विलोकनम् । गुञ्जापुञ्जेन सार्धं त–त्तपनीयस्य तोलनम् ॥४०६॥ अस्याः सुकेश्याः कवरी–भारः केनोपमीयते ? । समालम्बितरोलम्बैः, सुस्निग्धो यस्य कालिमा ॥४०७॥ इत्येवं चिन्तयत्येव, स्मेरवक्त्राम्बुजे नृपे । सौधमानीय गाङ्गेयः, पृच्छति स्म तमध्वगम् ॥४०८॥ भद्र ! प्रबुद्धराजीव–मुखी केयमलिख्यत । इह चित्रपटे नारी, दिव्यनारीविजित्वरी ? ॥ ४०९ ॥ पान्थः पुरस्तादस्तोक–विस्मयस्मेरचेतसे । अथासौ मूलतस्तस्मै, तं वृत्तान्तमचीकथत् ॥ ४१० ॥

मथुरेत्यस्ति वास्तव्यैः, श्रीमद्भिर्भूषिता पुरी । आलिङ्गतीव कालिन्दी, यां मुदा वीचिबाहुभिः ॥ ४११ ॥ तेजोधाम यदुर्नाम, तस्यामासीन्नरेश्वरः । यतोऽभूद्भुवनोत्तंसो, वंशो यादवभूभुजाम् ॥ ४१२ ॥ प्रतापी तनुजस्तस्य, शूरः शूरसमोऽभवत् । लीनं यत्रोदिते शत्रु–कौशिकैर्गिरिकन्दरे ॥ ४१३ ॥ तस्य शौरिः सुवीरश्च, द्वावभूतां तनूद्भवौ । कविबद्धैरपि

१ विकसितकमलमुखी । २ कविभिः रचितैः गीतैरिति विरोधपरिहारः

पाण्डो राज्यप्राप्तिः, धृतराष्ट्रस्य गान्धारी-प्रभृति-कन्यापरिणयनम् ॥

भ्रान्तं, भुवि स्वैरं ययोर्गुणैः ॥ ४१४ ॥ राज्यं च यौवराज्यं च, तयोर्दत्त्वा यथाक्रमम् । ययौ तपस्यामभ्यास्य, दिवं शूरनराधिपः ॥ ४१५ ॥ राम-लक्ष्मणयोः साम्यं, तैस्तैस्तौ भेजतुर्गुणैः । ताभ्यां परमरातिभ्यो, घनक्लेशः समर्पितः ॥ ४१६ ॥ दत्त्वा शौरिः सुवीराय, राज्यमुज्जृम्भवैभवम् । स्वयं कुशार्तदेशेषु, विजहार यदृच्छया ॥ ४१७ ॥ स तेषु वासवस्पर्धिशौर्यः शौर्यपुरं व्यधात् । श्रीपतीन् बिभ्रता भूरी-ञ्जिग्ये येनामरावती ॥ ४१८ ॥ अन्धक-वृष्णिप्रमुखा-स्तत्र शौरेस्तनूरुहाः । प्रभूवुर्बहवो बाहु-स्थामसंस्थापितश्रियः ॥ ४१९ ॥ शौरिर्वितीर्य साम्राज्यं, सुतायान्धकवृष्णये । प्रतिगृह्य परिव्रज्यां, शिवश्रियमशिश्रियत् ॥ ४२० ॥ संजज्ञिरे सुवीरस्य, भोज-वृष्ण्यादयः सुताः । अम्लायन् यत्प्रतापेन, शत्रुस्त्रीपमनच्छयः ॥ ४२१ ॥ सुवीरो माथुरं दत्त्वा, साम्राज्यं भोजवृष्णये । सौवीराख्यं पुरं कीर्ति-सिन्धुः सिन्धुषु निर्ममे ॥ ४२२ ॥ विहरन्नन्वहं तत्र, वाप्यां वाप्यां वने वने । पुण्यप्रागल्भ्यलभ्यानि, स सुखानि न्यसेवत ॥ ४२३ ॥ भुञ्जतो मथुराराज्यं, भोजवृष्णेर्महौजसः । उग्रसेनोऽरिसेनाना-मन्तकृत्तनयोऽभवत् ॥ ४२४ ॥

आसीदन्धकवृष्णेश्च, सुभद्रेति सधर्मिणी । निष्ठां यत्र सदाचार-तारतम्यमुपाययौ ॥ ४२५ ॥ दिशां नाथा इव प्रौढा, दशाभूवन् सुतास्तयोः । येषु नीतिनिवासेषु, नाभवत् कोऽपि गोत्रहा ॥ ४२६ ॥ समुद्रविजयः पूर्व-मक्षोभ्यस्तदनन्तरम् । स्तिमितः सागरश्चैव, हिमवानचलस्ततः ॥ ४२७ ॥ धरणः पूरणस्तस्मा-दभिचन्द्राभिधोऽपि च । वसुदेवश्च दाशार्हा, दशाप्येते प्रकीर्तिताः ॥ ४२८ ॥ (युग्मम्) तेषामुपरि पुत्राणां, सुभद्रा सुषुवे सुताम् । परमां मुदमभ्यास्त, यज्जन्मनि जग-

---

१ धनिकान्, पक्षे विष्णून् । २ येन-शौर्यपुरेण.

न्मनः ॥ ४२९ ॥ यज्जन्मलग्नमालोक्य,ज्ञानिनोऽकथयन्निदम् । यद्भविश्री सवित्रीयं, संम्राजामङ्गजन्मनाम् ॥ ४३० ॥ जनानां
श्रोपितं दुःखैः, गुरुभिरुन्मिषितं पुनः । किं न जन्मोत्सवे तस्याः, शुभोदर्कमभूद्भुवि ? ॥४३१॥ पुत्रजन्ममहेभ्योऽपि, विशिष्टो-
ऽस्य कृपृष्णिना । तस्या जन्मोत्सवश्चक्रे, "प्रीतिरत्र प्रयोजिका" ॥ ४३२ ॥ कल्याणपुषि पौपेऽह्नि, दीनोद्धरणपूर्वकम् । प्रीत्या
पितृभ्यामेतस्या, नाम कुन्तीति निर्ममे ॥४३३॥ सा बभूव शिशुत्वेऽपि, कामं पृथुमनोरथा । पृथेति प्रथितामाख्या-मपरा-
ममजत ॥४३४॥ प्रापत् प्रसर्पत्कन्दर्पं, सा क्रमान्नवयौवनम् । यत्र पित्रोर्वरस्यार्थे, चिन्ता जागर्ति चेतसि ॥४३५॥ अस्यां
स्वच्छन्दमुत्सङ्ग-खेलिन्यामन्यदा नृपः । ज्येष्ठं समुद्रविजयं, व्याजहार तनूरुहम् ॥ ४३६ ॥ एतस्या मम वत्सायाः, को
नाम भविता वरः ? । इति मे वत्स ! महतीं, चिन्तामुच्छेत्तुमर्हसि ॥ ४३७ ॥ सोऽप्यभापिष्ट यद्येवं, प्रेष्यतां कोऽपि पूरुषः ।
देव ! देशेष्वशेषेषु, वरवीक्षाविचक्षणः ॥ ४३८ ॥ यथा स प्रतिमाप्रौढो-ऽभिरूपं रूपशालिनम् । स्वसुर्मे सदृशं शुद्धा-न्वयम-
न्वेषते वरम् ॥ ४३९ ॥ स्वयंवरे तु दोषोऽयं, यदेकस्मिन् वरे वृते । ईर्ष्यया कलहायन्ते, नितान्तमपरे नृपाः ॥४४०॥ इति
ज्येष्ठात्मजगिरा, मामाहूय महीपतिः । आदिशत् सर्वदेशेषु, यथा कोरक ! गम्यताम् ॥४४१॥ वरः कश्चिद्वरेण्यश्री-र्यस्तु-
भ्यमवभासते । उपागत्य तमस्माकं, वेगेनैव निवेदयेः ॥ ४४२ ॥ भूपालदुहितुस्तस्या, रूपं चित्रपटे ततः । लेशेनालिख्य
देशेषु, क्रमाद्भ्राम्यन्निहागमम् ॥ ४४३ ॥ असौ रूपेण कन्दर्प-दर्पहा पाण्डुभूपतिः । मया दृष्टश्च हृष्टश्च, जातोऽस्मीप्सितला-
भतः ॥४४४॥ आर्य ! शौर्यपुरेशस्य, सुता तत् पाण्डुभूभुजा । युज्यतामनुरूपेण, द्विरेफेणेव मालती ॥ ४४५ ॥ किं च

१ सार्वभौमानां-महाराजानामिति यावत्.

समुद्रविजयादीनां जन्म, कुन्तीजन्म ॥

काञ्चनवर्णाऽस्याः, कनिष्ठाऽस्ति सहोदरा । नाम्ना माद्रीति रूपेण, यस्याः श्रीरेव सोदरा ॥ ४४६ ॥ विख्यातो दमघोपाख्य-स्तां वृणीते स्म चेदिपः । ज्यायस्यां किं त्वनूढाया-मियं नोद्वाहमर्हति ॥ ४४७ ॥ तदार्य ! सर्वकार्येषु, तिष्ठते त्वयि निर्णयः । एते सुखिन्यौ कन्ये स्ता-मास्तामन्यद्विकल्पनम् ॥ ४४८ ॥ इत्थं तेनार्थितो भीष्म-स्तत्सर्वं प्रत्यपद्यत । "स्वयं वाञ्छितमागच्छत्, को निराकुरुते कृती ?" ॥४४९॥ अथोत्पाद्य नवं रागं, सा मृगाक्षी मनोभुवा । आलिख्यत पटात्तस्मात्, पाण्डोश्चित्तपटे तदा ॥ ४५० ॥ स मध्येमानसं कुन्ती-मश्रान्तं धारयन्नपि । बहिरालोकयामास, स्थाने स्थाने पुरःस्थिताम् ॥ ४५१ ॥ कदा कुन्तीमुखाम्भोजे, मन्नेत्रभ्रमरद्वयी । पाता लावण्यकिञ्जल्क-मित्यासीदुत्सुको नृपः ॥ ४५२ ॥ पृष्ट्वा सत्यवतीं शौर्य-पुरे कोरकसंयुतम् । कार्यस्थैर्याय भीष्मः स्वं, प्रेषयामास पूरुषम् ॥ ४५३ ॥

अथ शौर्यपुरे गत्वा, समेतस्तेन कोरकः । कुन्तीविभूषितोत्सङ्ग-मपश्यद्यादवेश्वरम् ॥ ४५४ ॥ व्यजिज्ञपच्च राजेन्द्र ! तवादेशाद्गतोऽस्म्यहम् । अध्वक्रमात् सदामत्त-हास्तिके हस्तिनापुरे ॥ ४५५ ॥ उत्फुल्लपुण्डरीकाक्ष-स्तत्र पाण्डुक्षितीश्वरः । अदृश्यत दृशामेकः, पार्वणश्चन्द्रिकोदयः ॥ ४५६ ॥ नेत्रयोस्तत्र पुंरत्ने, गते विषयतां मया । अद्यापि रत्नगर्भेति, भूरियं पर्यभाव्यत ॥ ४५७ ॥ तस्य पीनोन्नतावंसौ, लीलाशैलौ नृपश्रियः । विशालं वीरलक्ष्म्याश्च, तल्पकल्पमुरःस्थलम् ॥ ४५८ ॥ प्रीणितार्थिजनस्तस्य, पाणिः कल्पद्रुपल्लवः । विश्वत्राणकृतोर्बाह्वोः, कः पुरीपरिघः पुरः ? ॥ ४५९ ॥ चक्रवर्त्यतिवर्तीनि, तदङ्गे लक्षणान्यपि । शक्रोऽपि स्पृहयत्येव, यस्मै सौभाग्य-विक्रमैः ॥ ४६० ॥ पात्रं कलाकलापस्य, विश्वस्य नयनोत्सवः । असौ योग्यो वरः कुन्त्या, रोहिण्या इव चन्द्रमाः ॥ ४६१ ॥ पितृतुल्यः पितृव्योऽस्ति, पाण्डोर्भीष्म इति श्रुतः । स चित्र-

पटवृत्तान्तं, सर्वं वेत्ति स्म मन्मुखात् ॥ ४६२ ॥ कुन्तीं वरीतुं तेनायं, प्रहितो निजपूरुषः । देवः संप्रति कर्तव्य–मेतस्या-दिशतु स्वयम् ॥ ४६३ ॥ संभाव्य भूमिपालस्त–मौदासीन्यस्पृशा दृशा । प्रातरावेदयिष्याम, इत्युक्त्वा व्यसृजत्तदा ॥४६४॥ उत्थितायां सभायां च, कोरकः स्वं गृहं ययौ । प्रीता पाण्डुगुणैः कुन्ती, कन्यान्तःपुरमाययौ ॥ ४६५ ॥ पाण्डोरव-निमार्तण्ड–स्यावदातान् गुणान् रहः । धात्र्या निवेदयांचक्रे, कुन्ती साकूतमानसा ॥ ४६६ ॥ पराक्रमेण रूपेण, विनयेन नयेन च । असमः सैष मातस्ते, जामाता प्रतिभाति मे ॥ ४६७ ॥ भाग्यान्याविर्भविष्यन्ति, न जाने कीदृशानि मे ? । " विघटन्ते हि कार्याणि, प्रतिकूले विधातरि " ॥ ४६८ ॥ अथादिष्टो विशां पत्या, प्रातराकार्य कोरकः । पाण्डवे पाण्डुरोगित्वा–न्न दातास्मि निजां सुताम् ॥ ४६९ ॥ कोरकेण नरेन्द्रोक्तं, पुरुषाय न्यवेद्यत । तेनापि भीष्म-पाण्डुभ्यां, हस्तिनापुरमीयुषा ॥ ४७० ॥ एकान्ते तं नरं नीत्वा, पाण्डुः पप्रच्छ सादरम् । ब्रूहि राजसुता भद्र !, किं नु मय्यनु-रज्यते ? ॥ ४७१ ॥ सोऽशंसदेव ! तां वेद्मि, रागिणीमिङ्गितैस्त्वयि । यदा त्वां वर्णयामास, कोरकः क्षितिपाग्रतः ॥ ४७२ ॥ भृशं रोमाञ्चितौ तस्याः, कपोलफलकौ तदा । निमेषविमुखे जाते, नेत्रे स्फारितपक्ष्मणी ॥ ४७३ ॥ सा श्रोत्रपुटमाधत्त, निषिद्धविषयान्तरम् । सवेपथुं वपुर्यष्टि–मुवाह च मुहुर्मुहुः ॥ ४७४ ॥

मन्मथेनाथ पृथ्वीशः, पञ्चभिर्युगपच्छरैः । प्रहतः प्राप तं तापं, येन नाप रतिं क्वचित् ॥ ४७५ ॥ क्षणं तस्थौ नृपः सौधे, धारायन्त्रगृहे क्षणम् । क्षणं पल्लवपल्यङ्के, कौसुमस्तरे क्षणम् ॥ ४७६ ॥ जलार्द्रा चन्दनं चन्द्रः, कर्पूराण्यपि भूपतेः ।

१ पुष्पशय्यायाम् । २ आर्द्रव्यजनम्.

कुन्ती पाण्डोः परस्पर-रागः ॥

विलुम्पन्ति स्म संतापं, न स्मरज्वरसंभवम् ॥ ४७७ ॥ अविन्दन्नरविन्दाना–मपि तल्पे रतिं क्वचित् । ययावुपवने पाण्डुः, पुष्पाडम्बरबन्धुरे ॥ ४७८ ॥ कुन्तीविरहदाहार्ति–प्रतीकारचिकीर्षया । तत्र प्रतिद्रु विश्राम्यन्, सोऽद्राक्षीत् खदिरद्रुमम् ॥ ४७९ ॥ तस्य स्तम्बे निरालम्बं, कीलैः कीलितमायसैः । एकं नरं निरुच्छ्वासं, दुःखितं स समैक्षत ॥ ४८० ॥ स्मरसोदरमाकारं, तस्यालोक्य क्षितीश्वरः । आचकर्ष बलोत्कर्षा–ल्लीलया लोहकीलकान् ॥ ४८१ ॥ छिन्नद्रुपातमपतत्, सोऽतिमूर्छाविसंस्थुलः । भूपतिर्लम्भयामास, चेतनां चन्दनैश्च तम् ॥ ४८२ ॥ स पुमान्मुद्रिकान्यस्त–मणिस्नपनवारिभिः । सेचं सेचं व्रणश्रेणीं, प्रगुणीकृतवान् स्वयम् ॥ ४८३ ॥ अथोचे पृथिवीनाथः, पृथुना प्रश्रयेण तम् । ब्रूहि कोऽसि महाभाग !, कथं चेयं दशा तव ? ॥ ४८४ ॥ स जगाद जगद्बन्धो !, वैताढ्यगिरिमण्डनम् । अस्त्यनेकास्तिमत्पौरं[1], पुरं हेमपुराभिधम् ॥ ४८५ ॥ तस्य स्वामी विशालाक्ष–नामा विद्याधरोऽस्म्यहम् । भ्रमन् स्वैरविहारेण, महीमिह समागमम् ॥ ४८६ ॥ वनस्यास्य श्रियं पश्य–न्नुपेत्य रिपुभिश्छलात् । बद्धोऽस्मि करिणीव्यग्रः, करीव करिबन्धकैः ॥ ४८७ ॥ यच्छन् प्राणानतुच्छैवं, किं तन्मे यस्य नेक्षिषे ? । तद्ब्रूहि जनः किं ते, प्रियं कर्तुं प्रवर्तताम् ? ॥ ४८८ ॥ अवदन्नृपतिर्भ्रातः !, किं ममातः परं प्रियम् ? । यत्त्वं विद्याधरेन्द्रत्वं, कुशली पालयिष्यसि ॥ ४८९ ॥ पुनरूचे विशालाक्षः, सशल्य इव लक्ष्यसे । भद्र ! त्वमपि तद्ब्रूहि, पुरो मम मनीषितम् ॥ ४९० अथाकथयदुर्वीशः, सर्वमाकूतमात्मनः । आवेदिता हि सुहृदां, फलन्त्येव मनोरथाः ॥ ४९१ ॥ ततः प्राह विशालाक्षो, प्रीत्या नृत्यन्मना नृपम् । मम वंशक्रमायाता, मुद्रिका गृह्यतामियम् ॥ ४९२ ॥ असौ तव विना

१ अनेके अस्तिमन्तः–धनिकाः पौराः यस्मिन् तत् ।

क्लेशं, दाता सपदि कामितम्। " देवतोपहितानां हि, वस्तूनां महिमाऽद्भुतः " ॥ ४९३ ॥ अदृश्यीकरणं वश्यी-करणं व्रणरोहणम्। विषनिग्रहणं चास्याः, प्रथमः कुसुमोद्गमः ॥ ४९४ ॥ शतकृत्वश्च निर्णीत-प्रभावेयमिति ब्रुवन्। पाण्डोस्तामर्पयामास, वलाद्विद्याधरेश्वरः ॥ ४९५ ॥ इयं संक्रामतु प्रीति-रावयोः पुत्रसंततौ। स किं स्नेहो न यः पुंसां, संतानमनुधावति? ॥४९६॥ इत्याख्याय विशालाक्षे, स्वपुरीं समुपेयुषि। मुद्रिकां तां धरित्रीशः, पर्यधत्त निजाङ्गुलौ ॥ ४९७ ॥ दृष्टप्रतिकृतिं कुन्तीं, पाण्डुश्चित्ते चकार च। तदात्मानमपश्यच्च, तत्र यत्रास्ति सा वने ॥ ४९८ ॥

तत्र तां निभृतं धात्र्या, समं विश्रम्भभाषिणीम्। अदृश्य एव शुश्राव, प्रजानामधिभूरिति ॥ ४९९ ॥ दुरन्तयाऽनया मातर्-दुःस्थयाऽवस्थया मम। कथंचिद्दिवसो यातः, कथं यास्यति यामिनी? ॥ ५०० ॥ जलार्द्रयाऽनया शुष्कं, शुष्कमेभिश्च पङ्कजैः। मम निर्वर्ण्यतामेषा, वपुःसंतापवर्णिका ॥ ५०१ ॥ मुक्ता मुक्ताकलापस्य, मुक्ताः संतापशान्तये। ध्मानास्फोटं स्फुटन्ति स्म, पश्य मातर्ममोरसि ॥ ५०२ ॥ मृणालवलयैरेभि-रेभिश्चन्दनचर्चनैः। अलं मातरलं मातः!, किमु त्वं क्लेशयिष्यसि? ॥ ५०३ ॥ कोरकेण समाख्यातः, स शीतद्युतिशीतलः। मातर्मयि कथंकार-मग्नेरपि विशिष्यते? ॥ ५०४ ॥ निर्मन्तुमपि मां बाणै-र्बाधते कुसुमायुधः। तिरस्कृतोऽपि रूपेण, न तं हन्ति मनागपि ॥ ५०५ ॥ स्मरस्तस्मिन्नपि शरै-र्निशितैः प्रहरेद्यदि। सुभगः सुस्थितंमन्यः, स मां किं न स्मरेत्ततः? ॥५०६॥ गण्डोपर्यपरो ह्येष, निकटः पिटकोदयः। उन्निद्रचन्द्रिकावीचि-रिन्दुर्यदयमुद्गतः ॥ ५०७ ॥ विपर्येति विपर्यस्तै-र्भाग्यैर्भुवनमप्यदः। मम येनोल्मुकायन्ते, चन्द्रस्यापि मरीचयः ॥ ५०८ ॥ हेतोः कुतोऽपि तातो मां, न तस्मै दातुमीहते। हा! हा! मातर्निराशाऽस्मि, शरणं मृत्युरेव मे ॥ ५०९ ॥

पाण्डुविद्याधरयोर्मैत्री, पाण्डोः कुन्तीसमीपे गमनम्, कुन्त्यवस्थादर्शनं च ॥

ततस्तामभ्यधाद्धात्री, वत्से ! मा स्मोत्सुका भव । दुष्प्रापः प्राप्यते प्रेयान्, कृशोदरि ! किमुत्सुकैः ? ॥ ५१० ॥ उपायं चिन्तयिष्यामि, कंचिदव्यभिचारिणम् । जटित्येव यदाकृष्टं, द्रष्टासि पुरतः प्रियम् ॥ ५११ ॥ इत्थमाश्वास्यमानाऽपि, यादवेन्द्रसुता यदा । भृशं लब्धात्मलाभेन, संतापेनाभ्यभूयत ॥ ५१२ ॥ तदा धात्री ययौ दूरं नवपल्लवहेतवे । " त्वरन्ते भृशमाप्ता हि, स्वजनव्यसनोदये " ॥ ५१३ ॥

अथान्तश्चिन्तयामास, यादवेश्वरनन्दिनी । दिष्ट्या निरन्तरायोऽयं, समयो मम मृत्यवे ॥५१४॥ विचिन्त्येति दृढाबद्ध-नीविः संयमितांशुका । अशोकपादपस्याधः, सन्नद्धोद्बन्धनाय सा ॥ ५१५ ॥ इह संनिहिताः सर्वाः, शृण्वन्तु वनदेवताः । जन्मान्तरेऽपि भूपालः, पाण्डुरेवास्तु मे पतिः ॥५१६॥ अभिधायेति शाखायाः, कण्ठे पाशं न्यधात् पृथा। "अयं प्रायः प्रतीकारः, स्त्रीणां हि व्यसनोदये" ॥५१७॥ (युग्मम्) पाशालम्बितमात्मानं, सा स्म यावद्विमुञ्चति । असिधेनुकरस्ताव-द्धात्रीपतिरधावत ॥५१८॥ एतेनालमलं बाले !, साहसेन तवाधुना । इति जल्पन्नृपः कण्ठा-त्तस्याः पाशमपाच्छिदत् ॥५१९॥ अधः पतन्तीमुद्गच्छ-न्मूर्छामुत्सङ्गशायिनीम् । कृत्वा पृथ्वीपतिः क्षौम-पल्लवैस्तामवीजयत् ॥५२०॥ संज्ञामासेदुषी साऽथ, चिन्तयामास शङ्किता । पुमानहह ! को नाम, मामेवं वीजयत्ययम् ? ॥५२१॥ पाण्डोरन्यस्य हा ! क्रोडे, शेते कुन्त्यपि धिग्विधिम् । " जीवितादपि सत्यो हि, धनायन्ति सतीव्रतम् " ॥५२२॥ एषोऽपि कोरकाख्यात-रूपसारूप्यमश्नुते । नृणामन्योन्यमाकार-संवादो वा पदे पदे ॥ ५२३ ॥ कथमस्य वपुःस्पर्शो, मां सिञ्चत्यमृतद्रवैः ? । ममानुकम्पया तत्किं, स एवायमुपागमत् ? ॥५२४॥ कुतोऽथ वा ममैतानि, भागधेयानि जाग्रति ? । इति चिन्तापरा याव-दृशा स्पृशति तद्वपुः ॥५२५॥ कारुण्यादिव शीतांशु-

रस्यास्तावददर्शयत्। नृपकङ्कणयोः पाण्डु-राजस्यैवाक्षरावलीम् ॥ ५२६ ॥ ततः स्निग्धैश्च मुग्धैश्च, सविकल्पैश्च लोचनैः। पश्यन्तीं तामभाषिष्ट, सप्रेमा पृथिवीपतिः ॥ ५२७ ॥ अलं विकल्पैस्तन्वङ्गि !, स एवास्मि तव प्रियः। गुणैः कुन्दावदातैस्ते, समाकृष्टः समागमम् ॥ ५२८ ॥ पटचित्रेऽपि दृष्टा मे, मनः पूर्वमपाहरः। कृशाङ्गि ! वपुरप्यागा-न्मनोऽनुपदि मेऽधुना ॥ ५२९ ॥ मण्डलीकृतकोदण्डः, स्वयं साहायके स्थितः। ममात्तमार्गणो मार्गे, स्मर एवाभवत्पुरः ॥ ५३० ॥ इति वादिनि भूपाले, तत्र धात्री समेयुषी। तैस्तैर्निश्चित्य तं पाण्डुं, चिह्नैः कुन्तीमवोचत ॥५३१॥ वत्से ! पाण्डुमहाराज-स्त्वामुपागात् प्रियोऽतिथिः। प्रथयातिथ्यमुत्थाय, तन्मनःप्रणयोचितम् ॥५३२॥ इत्युक्ता सा समुत्तस्थौ, सलज्जमवदच्च ताम्। जानामि किमहं मात-रुचितं सर्वमाचर ॥ ५३३ ॥ तयोर्विधाय गान्धर्वं, विवाहमथ भूपतिम्। उवाच धात्री धात्रीश !, यत्ते कस्यास्ति तत्कुलम् ? ॥ ५३४ ॥ यत्राभूत्रिजगद्दत्त-शान्तिः शान्तिजिनेश्वरः। द्वेधा क्षमाभृतां चक्रे, चक्रवर्ती बभूव यः ॥ ५३५ ॥ रञ्जितं भवता विश्वं, स्वगुणैर्धवलैरपि। रागं गुणानुरागेण, तदेषाऽपि त्वयि व्यधात् ॥ ५३६ ॥ यादवेन्द्रमतिक्रम्य, मया यां संगमः कृतः। त्वमप्युर्वीश ! कुर्वीथा-स्तद्यत्तव कुलोचितम् ॥ ५३७ ॥ इत्युदीर्य प्रयातायां, तस्यां क्वापि लतान्तरे। तस्य प्रेम्णोऽनुरूपेण, यथा तावप्यदीव्यताम् ॥ ५३८ ॥ मन्मथो मिथुने तत्र, भृशमादेशकारिणि। धर्मार्थाभ्यां पुमर्थाभ्यां, बहुमन्यस्तदाऽभवत् ॥ ५३९ ॥ स्मरः प्राप परां कोटि-मनयोरेकचित्तयोः। मूलं समरसापत्ति-र्निकामं काममोक्षयोः ॥ ५४०॥ तयोः क्रीडाजुषोः स्वैरं, क्षीणा क्षणमिव क्षपा। गच्छन् कालः सुखोत्कर्षी[3], भूयानपि न लक्ष्यते ॥ ५४१ ॥ निशि

पाण्डुकुन्त्योर्गान्धर्वैर्विवाहः ॥

१ 'राजस्येत्यक्ष०' प्र० द्वय०। २ यत् कुलं ते तवास्ति, तत्कुलं कस्यान्यस्य अस्ति ? नास्तीत्यर्थः। ३ 'त्कर्षे' प्र० द्वय०।

जातप्रभातायां, नृपो धात्र्या व्यसृज्यत । सूनोः प्रच्छन्नसङ्के स्यात्, तादृशां हि प्रमाणता ॥ ५४२ ॥ अङ्गुलीयकमाहात्म्या-न्नृपः स्वं स्थानमाययौ । अधिपश्च गभस्तीनां, पूर्वशैलेन्द्रचूलिकाम् ॥ ५४३ ॥

संप्राप्तसंगमा प्रावृड्, पयोदेनेव पाण्डुना । अन्तर्वत्नी विभाति स्म, कुन्ती गूढाङ्कुरेव भूः ॥ ५४४ ॥ क्रमाद्धात्री तथा-भूतां, तां विज्ञाय विचक्षणा । किमप्यपाटवव्याजं, कृत्वा छन्नमधारयत् ॥ ५४५ ॥ आविर्बभूव शौर्यं तत्, तस्या गर्भप्रभा-वतः । विडौजसोऽपि येनौजो, मन्यते स्म तृणाय सा ॥ ५४६ ॥ तदा तस्याः कृताश्चर्य-मौदार्यं तदजृम्भत । येन सर्वस्वदा-नेऽपि, किं दत्तमिति खिद्यते ॥५४७॥ प्रत्याशं प्रसरद्दीप्ति-मण्डले मणिकुण्डले । शस्त्राणि च प्रियाण्यासं-स्तस्याः प्रसृमरौजसः ॥ ५४८ ॥ मार्तण्डमण्डलभ्रान्ति-जनकं निजतेजसा । अथ सा नवमासान्ते, सूते स्म सुदिने सुतम् ॥ ५४९ ॥ पुत्रजन्मेति सानन्दा, प्रच्छन्नमिति शङ्किता । त्याज्योऽयमिति च म्लास्नुः, सा दधौ भावसंकरम् ॥५५०॥ शौण्डीर्यौ-दार्य-साम्राज्य-बीजं वीक्ष्याङ्गलक्षणम् । कुन्ती-धात्र्यावदूयेतां, तत्त्यागोपक्रमे तदा ॥ ५५१ ॥ असौ लोकविरुद्धेन, वर्त्मना जात इत्यमुम् । उज्झितुं रत्नमञ्जूषा, ताभ्यामानीयत क्षणात् ॥५५२॥ क्षिप्त्वा तत्र स्वयं धात्र्या, मणिकुण्डलमण्डितः । रहः प्रवाहयांचक्रे, सोऽन्तर्गङ्गं सबाष्पया ॥५५३॥ त्यक्ते कुन्ती सुते तस्मि-न्नुवाह महतीं शुचम् । "तादृशा पुत्ररत्नेन, वियुक्तः को न खिद्यते" ? ॥५५४॥

अथापृच्छि रहो जातु, धात्री राज्ञ्या सुभद्रया । कथमन्यमिवाकारं, धत्ते कुन्ती सुता मम ? ॥ ५५५ ॥ कथं चान्तः सशल्येव, वहति म्लानमाननम् ? । अथ तैं कथयामास, धात्री वृत्तान्तमादितः ॥ ५५६ ॥ राज्ञ्यप्याख्यत् क्षितीशाय, तस्याः

१ 'नातिप्रभा०' प्रतिद्वय० । २ रात्रिसदृशानाम् । ३ म्लानिं गता । ४ 'तां' इति पाठश्चेत्साधुः ।

सोऽप्येवमादिशत् । वरान्तरेण पर्याप्त-मधुना दुहितुः प्रिये ! ॥ ५५७ ॥ इत्यालोच्य निजः सूनु-र्धरणोऽन्धकवृष्णिना । दत्त्वा शिक्षां पृथायुक्तः, प्रहितो हस्तिनापुरे ॥५५८॥ अश्वैरुत्थापितं रेणुं, करेणुमदवारिभिः । स्थापयन्नाप धरणः, पुरं पाण्डुमहीपतेः ॥ ५५९ ॥ भागीरथीतनूजेन, प्रत्युद्यातो यदूद्भवः । पुरीपरिसरे रम्ये, निवासान् स्वैरमाददौ ॥ ५६० ॥ रागिणीं सानुरागेण, स मुदा मुदिताननाम् । कुमारः पाण्डुराजेन, स्वसारं पर्यणाययत् ॥ ५६१ ॥ दत्तं दन्तावलशतं, शतानि दश वाजिनाम् । वराय पाण्डवे तेन, पाणिमोचनपर्वणि ॥ ५६२ ॥ कृत्वा विवाहकार्याणि, कुमारो धरणस्ततः । पाण्डोरवाप्तसत्कारः, संप्राप्तः स्वपुरं क्रमात् ॥ ५६३ ॥

अथो कुमुद्वती नाम, देवकक्षितिपात्मजा । विदुषा विदुरेणापि, प्रेमतः पर्यणीयत ॥५६४॥ माद्रीति मद्रराजस्य, सुतां सर्वगुणान्विताम् । राज्यवृद्धोपरोधेन, पुनः पाण्डुरुपायत ॥५६५॥ भीष्मे च धृतराष्ट्रे च, भक्तिः पाण्डोरनुत्तरा । नित्यमभ्युदयाशंसि, मनस्तस्मिंस्तयोरपि ॥ ५६६ ॥ अथ पालयतः पाण्डो, राज्यं निर्जितशात्रवम् । अभ्याजगाम सुरभिः, पुष्पैस्तमिव सेवितुम् ॥ ५६७ ॥ रसालस्निग्धकण्ठीभिः, पिकीभिः पञ्चमच्छलात् । प्रावेशिकी वसन्तस्य, ध्रुवा ध्रुवमगीयत ॥ ५६८ ॥ पान्थनिर्मन्थनिर्व्यूढ-गाढप्रौढिर्वने वने । मल्ली भल्लीव भाति स्म, स्मरभिल्लस्य भासुरा ॥५६९॥ ववौ विचित्रवीर्यस्य, सुतानामधिमानसम् । कुसुमायुधजागर्यां, दक्षिणो दक्षिणानिलः ॥५७०॥ कदाचिन्मदनादेशात्, ते त्रयोऽपि प्रियासखाः । दिनानि निन्युः स्वच्छन्दं, दोलान्दोलनकेलिभिः ॥ ५७१ ॥ प्रेङ्खाप्रेङ्खोलनप्रेङ्ख-द्भयोर्मिभ्यो मुहुर्मुहुः । प्रियाभ्यस्ते

१ प्रौढिः-महत्ता । २ कामजागरणेन । ३ प्रेङ्खाया आन्दोलनेन स्पृशन्त भयोर्मयः यासां ताभ्यः ।

कुन्तीसुतस्य त्यागः । पाण्डोः कुन्तीमाद्रीभ्यां सह विवाहः ।

लभन्ते स्म, गाढालिङ्गनकौतुकम् ॥ ५७२ ॥ प्रेक्षासुखप्रकर्षस्य, न तृप्यन्ति स्म तत्प्रियाः । समं प्रियतमैस्तादृक्–संगमो हि कुतोऽन्यथा ॥५७३॥ प्रेयसीभिः समं ताभिः, काननेषु कदाचन । स्वैरं ते विहरन्ते स्म, स्मरादेशवशंवदाः ॥५७४॥ चम्पकोत्तंसविधिना, मल्लीधम्मिल्लबन्धनैः । ते स्वयं रचयांचक्रुः, प्रेयसीनां प्रसाधनम् ॥ ५७५ ॥ मालाकारोपनीतेषु, पुष्पाकल्पेष्वनेकशः । तासां दूरमनास्थाऽभूत्, न हि ते प्रियकर्तृकाः ॥५७६॥ उत्फुल्लमल्लीनिष्पन्न–पुष्पाऽऽभरणशालिनः । ते भृशं बिभरामासु–र्मधोर्मूर्तिमतः श्रियम् ॥ ५७७ ॥ श्रान्ता वनविहारेण, जलकेलिचिकीर्षया । क्रीडावापीषु रम्यासु, तेऽवतेरुः प्रियान्विताः ॥५७८॥ हतास्तोयेन कान्तैस्ताः, प्रमोदेन प्रपेदिरे । अहतास्तु विषादेन, "विपरीतो हि मन्मथः" ॥५७९॥ सार्धं प्रियाभिरभ्यस्त–विलासायुधशासनैः । चन्द्रिका चन्द्रशालासु, वासन्ती तैरसेव्यत ॥५८०॥ मधोरतिक्रमे कामं, जलार्द्रा–चन्द्र–चन्दनैः । अलभ्यन्त तदभ्यर्ण–सेवावसरवासराः ॥ ५८१ ॥ सेकातिरेकसान्द्राणि, मध्येकदलिकाननम् । निकामं कार्यमानानि, कामिभिस्तैः सिषेविरे ॥ ५८२ ॥ प्रावृषि प्रेयसीवर्ग–संसर्गप्रीतचेतसाम् । बभूवुः केकिनां केका–स्तेषां हर्षैकहेतवः ॥ ५८३ ॥ उज्जृम्भितैर्भ्रमद्भृङ्ग–निकरैर्मकरन्दिभिः । प्रेयसीर्भूषयामासु–स्ते कदम्बकदम्बकैः ॥५८४॥ मिलत्परिमलश्रीषु, मालतीषु प्रियासु च । भृङ्गयूनां च तेषां च, पर्याप्तिं भोगसंपदा ॥५८५॥ हित्वा मनोहरान् हारान्, दूरतस्ता मृगीदृशः । पर्यधुर्ग्रथिता नाथैः, शारदेन्दीवरस्रजः ॥ ५८६ ॥ मृगनेत्राः प्रियाः प्राप्य, हैमिनीर्यामिनीश्च ताः । स्मरपारायणं साङ्ग–मध्यगीषत तेऽखिलम् ॥ ५८७ ॥ ते प्रियाणां तदा कण्ठे, गण्डयोः स्तनमण्डले । मसृणैर्घुसृणक्षोदै–र्लिलिखुः पत्रवल्लरीः ॥ ५८८ ॥ प्रियावक्षो-

१ तृणगृहाणि । २ कदम्बपुष्पसमूहैः । ३ शारदकमलमालाः । ४ कुङ्कुमचूर्णैः ।

जघर्मोर्मि-निरस्ततुहिनापदाम् । शिशिरोऽप्यकरोत् तेषां, मधुवचन्दने स्पृहाम् ॥ ५८९ ॥ दयितादर्शनौपम्य-सुभगंभावुकं तदा । आसीद्विशेपतस्तेषां, कुन्दमानन्दहेतवे ॥ ५९० ॥ सौधे कदाचन कदाचन काननेषु, वाप्यां कदाचन कदाचन केलिशैले । पश्चपुमायकसहाः सह वल्लभाभिः, सर्वर्तुचक्रमतिचक्रमुरेवमेते ॥ ५९१ ॥

इति मलधारिश्रीदेवप्रभसूरिविरचिते महाकाव्ये पाण्डवपूर्वजवर्णनो नाम प्रथमः सर्गः ॥ १ ॥

अथ द्वितीयः सर्गः ।

अथाऽन्येद्युरतिस्फीता, पत्यौ प्रीतिमुपेयुषी । बभार गर्भं गान्धारी, शमीवानिर्लसारथिम् ॥ १ ॥ उन्मीलितमहौद्धत्यो, जज्ञेऽन्तर्मनसं मदः । बहिरापीनभावश्च, तस्या वक्षोजकुम्भयोः ॥ २ ॥ अवसादः शरीरस्य, तस्या गर्भभवोऽभवत् । जगदाक्रमणोत्साह-श्चेतमस्तु व्यजृम्भत ॥ ३ ॥ गर्भेणाभ्यधिकं तस्याः, कृतमुज्ज्वलमाननम् । अजायेतां तु वक्षोजौ, कामं श्याममुखौ तदा ॥ ४ ॥ ससत्त्वा धृतराष्ट्रस्य, सा बभूवातिवल्लभा । कृषिः कृषीवलस्येव, संपन्नान्तःफलोदया ॥ ५ ॥ तस्या गर्भानुभावेन, दोहदैर्जातमुद्धतैः । "अन्तर्द्रव्यानुरूपा हि, पयस्यामोदसंपदः" ॥ ६ ॥ उग्रेण विग्रहेणैव, विपदामुदयेन च । जनानां जायमानेन, तस्याः संपेदिरे मुदः ॥ ७ ॥ तस्याः सैनीडसंपन्ना, निगडध्वानबन्धुराः । बबन्धुर्बन्धनागारे, हाकार-

१ अग्निम् । २ विकसितं महत् औद्धत्यं यस्मिन् सः । ३ समीपे प्राप्ताः ।

ऋतु-
वर्णनम् ।
गान्धारी-
गर्भः ॥

ध्वनयो धृतिम् ॥ ८ ॥ तया निष्कारणक्रोध–विकटभ्रुकुटीजुषा । पूज्येष्वपि विसृज्यन्ते, न्यक्कारविरसा गिरः ॥ ९ ॥ मत्त-मातङ्गमारुह्य, पुरे पुरुषवेषभृत् । सा स्वच्छन्दविहारेण, पूरयामास दोहदम् ॥ १० ॥ प्रौढभावं बभारान्त–स्तस्या गर्भो यथा यथा । क्रूरकर्मसु हेवाकः, पाकमागात्तथा तथा ॥ ११ ॥ पृथातः प्रथमं गर्भो, ममाभूदिति गर्विता । विनयस्य विपर्यासं, सा चकार गुरुष्वपि ॥ १२ ॥

पृथाऽपि तत्तिरस्कार–जागरूकमनःक्रुधा । स्पृहयालुरपत्याय, धर्ममेव विनिर्ममे ॥ १३ ॥ फलैः फलार्थिनी तैस्तैः, परिणाममनोरमैः । वीतरागं तदेकाग्र–स्थिरभक्तिरुपास्थित ॥ १४ ॥ प्रावर्तयच्च्चयार्तानां, प्राणिनामभयोत्सवम् । साधर्मिकाणां वात्सल्यं, विधिवत् सा व्यधत्त च ॥ १५ ॥ सा दीननिवहोद्धार–धुरीणा पाणिभूषणम् । कङ्कणादि गुणीकृत्य, दानं मुख्यतया व्यधात् ॥ १६ ॥ अन्येद्युः सागरं मेरुं, सूर्यं चन्द्रमसं श्रियम् । दृष्ट्वा स्वप्नानिमान् पञ्च, साऽथ राज्ञे व्यजिज्ञपत् ॥ १७ ॥ गाम्भीर्यादिगुणस्तोम–संदानितजगत्त्रयः । सुतस्ते भविता देवि !, तस्यै सोऽप्येवमभ्यधात् ॥ १८ ॥ आरभ्य तद्दिनाद्देवी, गर्भ-माणिक्यमासदत् । "सुरोपितः फलत्येव, सद्यः सुकृतपादपः" ॥ १९ ॥ स्तनयोरपि पीनत्वं, पाण्डुभावश्च गण्डयोः । लावण्यं च दृशोस्तस्या, गर्भं व्यानञ्जे रंहसा ॥ २० ॥ अन्तर्वत्नी विशां पत्युः, पत्नी भृशमधारयत् । अन्तःसंक्रान्तशीतांशु–पीयूष-सरसीश्रियम् ॥ २१ ॥ नानाविपदवस्कन्द–दीनवृत्तिषु जन्तुषु । कारुण्यलहरीसान्द्रा–स्तस्याः पेतुर्दृशस्तदा ॥ २२ ॥ आसक्ति-र्जिनधर्मेषु, या तस्याः समजायत । सा नार्थेऽर्थेप्सिणो दृष्टा, न कामे कामुकस्य च ॥ २३ ॥ परोपकारः कारान्तः–क्रान्तप्रा-

१ मनोऽभिप्रायः । २ अप्रधानीकृत्य । ३ संदानितं–बध्धम्–वशीकृतमित्यर्थः । ४ "व्यानञ्जुरञ्जसा" इति प्रतिद्वय० । ५ धनेच्छोः ।

णिविमोचनम् । मारिवारणमश्रान्त-मयं तद्दोहदोदयः ॥ २४ ॥ पत्युः प्रसादादेतस्याः, सर्वोऽपूरिष्ट दोहदः । पाण्डौ भर्तरि लोकेषु, तस्याः किं नाम दुर्लभम् ? ॥ २५ ॥

गान्धारी-कुन्त्योः दोहदः, युधिष्ठिर-जन्म ॥

अथ ज्येष्ठायुते चन्द्रे, वारे मङ्गलनामनि । वृश्चिकाख्ये शुभे राशा-वुचस्थेषु ग्रहेष्वपि ॥ २६ ॥ अजायत सुतस्तस्या, मुहूर्ते तत्र कुत्रचित् । आक्रान्तचतुराशान्ता, जायन्ते यत्र चक्रिणः ॥ २७॥ (युग्मम्) परां तज्जन्मनि प्रीतिं, स्थावराणि चराणि च । भूतान्यनुभवन्ति स्म, "सर्वमत्यद्भुतं सताम्" ॥२८॥ भीष्मं च धृतराष्ट्रं च, पाण्डुं च विदुरं तथा । दिष्ट्याऽमून् वर्धयामासु-र्जनाः शुद्धान्तवासिनः ॥२९॥ अम्बालिका-म्बिका-म्बानां, सत्यवत्याश्च सत्वरम् । गत्वा दास्यः प्रसन्नास्याः, पुत्रजन्म न्यवेदयन् ॥ ३० ॥ जातमात्रे सुते तस्मिन्, बालार्कसमतेजसि । उच्चचार वियत्युच्चै-रशरीरा सरस्वती ॥ ३१ ॥ असौ सत्यवतां मुख्यः, सतामग्र्यः समग्रधीः । शौण्डीर्य-स्थैर्य-गाम्भीर्य-वसतिर्विनयी नयी ॥३२॥ धर्मबद्धरतिर्भूपः, सार्वभौमो भविष्यति । वार्द्धके व्रतमादाय, निर्वाणं च गमिष्यति ॥ ३३ ॥ (युग्मम्) तत्समाकर्णनान्न स्यु-र्भीष्मादीनां मुदः कथम् ? । अपरेषामपि तदा, हर्षं नाख्यातुमीश्महे ॥ ३४ ॥ स्वयमेव पुरे पौरै-रुत्सवो निर्मितस्तदा । आदेशस्तु विशांपत्यु-रभवत् सिद्धसाधनम् ॥ ३५ ॥ निःशेषदिविपद्वर्ग-प्रमोदपिशुनास्तदा । समाकर्ण्यन्त सानन्दं, दुन्दुभिध्वनयो दिवि ॥ ३६ ॥ सुतस्य तस्य भीष्माद्यैः, किंचिद्वीक्ष्याङ्गलक्षणम् । युधिष्ठिर इति श्लाघ्य-मन्वर्थं नाम निर्ममे ॥३७॥ तपोधर्मैकनिष्ठायाः, पृथाया जात इत्यसौ । लेभे नाम्ना तपःसूनु-र्धर्मसूनुरिति क्षितौ ॥ ३८ ॥ तस्य पश्चादजातारि-रिति त्रैलो-

१ 'वनायाः' प्रतिद्वय० ।

क्यविश्रुतम् । तेन तेनावदातेन, नामधेयमजायत ॥ ३९ ॥ समाजग्मुर्महीपालैः, प्रहितानि सहस्रशः । प्राभृतानि सहस्राणि, पाण्डोरात्मजजन्मनि ॥ ४० ॥

उपायनमुपादाय, कुन्त्याः पितृगृहादपि । आययौ विकसद्रोम-कोरकः कोरकस्तदा ॥ ४१ ॥ गौरवार्हविशेषेण, तं पाण्डुपृथिवीपतिः । सत्कृत्य कृत्यनिष्णातः, स्नेहसारमवार्तयत ॥ ४२ ॥ महीतलमिलन्मौलि-माश्वास्य विहितानतिम् । कुन्ती नितान्तवात्सल्यात्, पृच्छति स्मेति कोरकम् ॥ ४३ ॥ श्वश्रूभिः सकृदप्यस्मि, न विसृष्टा पितुर्गृहे । तद्ब्रूहि कुशलं कच्चि-द्बन्धुवर्गस्य मेऽधुना ? ॥४४॥ बन्धुसंतानवृध्द्या च, मामानन्दय संप्रति । इति पृष्टोऽभवद्धृष्टो, व्याकरोति स कोरकः ॥ ४५ ॥ श्रूयतां देवि ! साम्राज्यं, देवेनान्धकवृष्णिना । समुद्रविजये न्यस्य, प्रव्रज्या स्वयमाददे ॥ ४६ ॥ भोजवृष्णेश्च तनयो, मथुराराज्यमूर्जितम् । उग्रसेनः करोतीति, प्रागपि ज्ञातवत्यसि ॥ ४७ ॥ ततःप्रभृति मे स्वामी, समुद्रविजयोऽनुजान् । आत्मनोऽप्यधिकं पश्य-न्पाच्छौर्यपुरप्रजाः ॥ ४८ ॥ पूर्वोपार्जितसौभाग्यः, स्वच्छन्दं विचरन् पुरे । वसुदेवकुमारस्तु, रेमे बन्धुप्रसादतः ॥ ४९ ॥ अन्यदा वसुदेवस्य, तत्रत्यः पुत्रमात्मनः । वणिक् सुभद्रः कंसाख्य-मर्पयामास सेवकम् ॥ ५० ॥ तथा कलाभिस्तेनापि, कुमारः पर्यचर्यत । समानमात्मनो मेने, स यथा तमहर्निशम् ॥ ५१ ॥

अस्ति चात्र जरासंधो, राजा राजगृहे पुरे । स्वैरं क्रीडति यस्याज्ञा, त्रिखण्डक्षितिमण्डले ॥ ५२ ॥ विसृज्य दूतमेतेन, भूमण्डलबिडौजसा । अकस्मात् स्वामिनोऽस्माक-मादिष्टमिदमन्यदा ॥५३॥ अस्ति निर्व्याजशौण्डीर्य-सिंहः सिंहपुरे पुरे ।

---

१ 'माशास्य' प्रतिद्वय० । २ "पृष्टः स हृष्टोऽथ," प्रतिद्वय० । ३ 'तपस्या' प्र० द्वय० । ४ 'विहरन्' इति प्रत्य० ।

नृपः सिंहरथो नाम, स चाज्ञां नो न मन्यते ॥५४॥ जीवग्राहं गृहीत्वाऽमुं, बद्ध्वा पाप्मानमानय । आनीते तत्र दास्यामि, स्वां जीवयशसं सुताम् ॥ ५५ ॥ रुचितं पुरमेकं च, काञ्चनाञ्चितमन्दिरम् । ततो विसृज्य तं दूतं, प्रतस्थेऽस्मत्प्रभुः स्वयम् ॥ ५६ ॥ (युग्मम्) प्रणम्य वसुदेवोऽथ, ज्येष्ठबन्धुं व्यजिज्ञपत् । किमिदं देव ! सिंहस्य, चपेटोत्पाटनं मृगे ? ॥ ५७ ॥ मति मय्यपि भृत्ये च, स्वयं कोऽयमुपक्रमः ? । " अरुणे प्रगुणे ध्वान्तं, न ह्यपाकुरुते रविः " ॥५८॥ एवमाबद्धनिर्बन्धं, बान्धवं लघुमात्मवत् । वरूथिन्यामवस्थाप्य, जयाय व्यसृजन्नृपः ॥ ५९ ॥ सोऽपि शौर्यावतंसेन, कंसेन सह जग्मिवान् । बद्ध्वा सिंहरथं बन्धो-र्दिनैरल्पैरुपानयत् ॥६०॥ कृत्वा जयोत्सवं यान्तं, मुदा राजगृहं नृपम् । क्रोष्टुकिः समभाषिष्ट, ज्ञानी रहसि मानुजम् ॥ ६१ ॥ येयं जरासन्धसुता, कर्मण्यत्र पणीकृता । क्षयकृल्लक्षणैरेषा, पितृश्वशुरपक्षयोः ॥ ६२ ॥ इत्यूचिवांसं विद्वांसं, तं विसृज्य प्रजेश्वरः । ऊचे कुमारमारम्भः, शुभोदर्कोऽस्ति नैष नः ॥ ६३ ॥

ततो व्यज्ञपयद्राज्ञे, वसुदेवः कृताञ्जलिः । सा स्यात् कन्या यथाऽन्यस्य, तथोपायोऽस्ति मे स्मृतः ॥६४॥ सावधानोऽधुना देवः, श्रोतुमेतं प्रसीदतु । इतो युष्माकमादेशा-दस्मि सिंहपुरे गतः ॥ ६५ ॥ कन्दरादिव निर्गत्य, सिंहः सिंहरथः पुरात् । भटान्त्रासयामास, बलाद्दन्तावलानिव ॥ ६६ ॥ ममाप्यत्यद्भुतैस्तैस्तै-र्भुजविक्रमवैभवैः । तेन प्रादुरभाव्यन्त, भाले घर्मजलोर्मयः ॥ ६७ ॥ प्रसादपात्रं पीनांसः, कंसाख्यो मम सारथिः । भङ्गुरं बलमालोक्य, रथात्तूर्णमवातरत् ॥ ६८ ॥ रथं सिंहरथस्यासौ, जितशक्रपराक्रमः । भुजदम्भोलिना भूभृ-द्गर्वचौरमचूरयत् ॥ ६९ ॥ मयूरबन्धं बद्ध्वा च, ततः सिंहरथो रथी ।

कोरककथितो वृत्तान्तः कुन्तीसमीपे। जरासन्धसिंहरथयो र्वृत्तान्तः।

१ भुजवज्रेण । २ भूभृतां–राज्ञां गिरीणां च गर्वं चूरयित्वा ।

मन्मानसैकहंसेन, कंसेनाक्षेपि मे पुरः ॥ ७० ॥ ततो विपस्वसुस्तस्या, दुहितुर्मगधेशितुः। असौ सिंहरथानेता, परिणेताऽस्तु संप्रति ॥७१॥ उवाच श्रीसमुद्रोऽथ, समुद्रविजयो वचः। गतापायमुपायं मे, मनोहरमुदाहरः ॥७२॥ परं पुरा वणिक्पुत्र-स्त्वयाऽसौ प्रतिपादितः। तदस्मै वणिजे पुत्रीं, जरासन्धो न दास्यति ॥७३॥ इति जल्पत एवास्य, कंसः सेवार्थमागमत् । वसुदेवश्च तं राज्ञे, कंसोऽसावित्यचीकथत् ॥ ७४ ॥ तेजः साक्षादिव क्षात्रं, तमूर्जस्विभुजार्गलम् । प्रांशुमांसलमालोक्य, नृपतिः पुनरभ्यधात् ॥७५॥ अत्यद्भुतोऽयमाकारः, सुलभो न वणिकुले । ततोऽस्य पितरं पृष्ट्वा, क्रियते कुलनिर्णयः ॥७६॥

अथाहूय महीभर्त्रा, पृष्टः शपथपूर्वकम् । सुभद्रः सत्यमाचख्यौ, सर्वं कंसस्य पश्यतः ॥ ७७ ॥ यमुनायामनुस्रोतो, वहन्तीमहमेकदा । अपश्यं कांस्यमञ्जूषां, प्रातः शौचार्थमीयिवान् ॥ ७८ ॥ आदाय तामथोद्घाट्य, पार्वणेन्दुसमाननम् । उच्छृङ्खलप्रभाजाल-मिममालोकयं सुतम् ॥ ७९ ॥ उग्रसेनस्य नामाङ्का-मेतां च मणिमुद्रिकाम् । एतच्च पत्रमत्रेदं, लिखितं वाच्यते यथा ॥ ८० ॥ (युग्मम्) उग्रसेनसधर्मिण्या, धारिण्या गर्भकर्तृकः । अभवद्दोहदो भर्तृ-मांसभक्षणलक्षणः ॥८१॥ कथंचित् पूरिते तस्मि-न्नमात्यैर्मतिशालिभिः । पौषे कृष्णचतुर्दश्यां, विष्टौ सूनुरजायत ॥ ८२ ॥ तं दोहदानुभावेन, निर्णीय जनकद्विपम् । विन्यस्य कांस्यपेटाया-मुद्भटाकारधारिणम् ॥८३॥ माताऽपि तदहर्जातं, मथुरातोऽथ धारिणी । पत्युः क्षेमाय चिक्षेप, गम्भीरे यमुनाम्भसि ॥ ८४ ॥ (युग्मम्) इति पत्रार्थतो देव, ज्ञातोऽसावुग्रसेनजः । पुत्रस्नेहस्तथाऽप्यत्र, तदा प्रादुरभून्मम ॥ ८५ ॥ अथानीय निजं गेह-मस्योत्सवपुरःसरम् । कांस्यपेटोपलब्धत्वा-न्नाम कंस इति व्यधाम् ॥ ८६ ॥ असावपुण्याद्वर्धिष्णु-स्तेजः क्षत्रकुलोचितम् । ततः क्रीडन् बलादेष, बालकैः कलहायते ॥८७॥ जनेभ्योऽहमुपालम्भं, लेभे च

नृपः सिंहरथो नाम, स चाज्ञां नो न मन्यते ॥५४॥ जीवग्राहं गृहीत्वाऽमुं, बद्ध्वा पाप्मानमानय । आनीते तत्र दास्यामि, स्वां जीवयशसं सुताम् ॥ ५५ ॥ रुचितं पुरमेकं च, काञ्चनाञ्चितमन्दिरम् । ततो विसृज्य तं दूतं, प्रतस्थेऽस्मत्प्रभुः स्वयम् ॥ ५६ ॥ (युग्मम्) प्रणम्य वसुदेवोऽथ, ज्येष्ठबन्धुं व्यजिज्ञपत् । किमिदं देव ! सिंहस्य, चपेटोत्पाटनं मृगे ? ॥ ५७ ॥ मति मय्यपि भृत्ये च, स्वयं कोऽयमुपक्रमः ? । " अरुणे प्रगुणे ध्वान्तं, न ह्यपाकुरुते रविः " ॥५८॥ एवमाबद्धनिर्बन्धं, बान्धवं लघुमात्मवत् । वरूथिन्यामवस्थाप्य, जयाय व्यसृजन्नृपः ॥ ५९ ॥ सोऽपि शौर्यावतंसेन, कंसेन सह जग्मिवान् । बद्ध्वा सिंहरथं बन्धो-र्दिनैरल्पैरुपानयत् ॥६०॥ कृत्वा जयोत्सवं यान्तं, मुदा राजगृहं नृपम् । क्रोष्टुकिः समभाषिष्ट, ज्ञानी रहसि मानुजम् ॥ ६१ ॥ येयं जरासन्धसुता, कर्मण्यत्र पणीकृता । क्षयकृल्लक्षणैरेषा, पितृश्वशुरपक्षयोः ॥ ६२ ॥ इत्यूचिवांसं विद्वांसं, तं विसृज्य प्रजेश्वरः । ऊचे कुमारमारम्भः, शुभोदर्कोऽस्ति नैष नः ॥ ६३ ॥

ततो व्यज्ञपयद्राज्ञे, वसुदेवः कृताञ्जलिः । सा स्यात् कन्या यथाऽन्यस्य, तथोपायोऽस्ति मे स्मृतः ॥६४॥ सावधानोऽधुना देवः, श्रोतुमेतं प्रसीदतु । इतो युष्माकमादेशा-दस्मि सिंहपुरे गतः ॥ ६५ ॥ कन्दरादिव निर्गत्य, सिंहः सिंहरथः पुरात् । भटानत्रासयामास, बलाद्दन्तावलानिव ॥ ६६ ॥ ममाप्यत्यद्भुतैस्तैस्तै-र्भुजविक्रमवैभवैः । तेन प्रादुरभाव्यन्त, भाले घर्मजलोर्मयः ॥ ६७ ॥ प्रसादपात्रं पीनांसः, कंसाख्यो मम सारथिः । भङ्गुरं बलमालोक्य, रथात्तूर्णमवातरत् ॥ ६८ ॥ रथं सिंहरथस्यासौ, जितशक्रपराक्रमः । भुजदम्भोलिना[1] भूभृ-द्दर्वचौरमचूरयत्[2] ॥ ६९ ॥ मयूरबन्धं बद्ध्वा च, ततः सिंहरथो रथी ।

१ भुजवज्रेण । २ भूभृतां-राज्ञां गिरीणां च गर्वं चूरयित्वा ।

कोरककथितो वृत्तान्तः कुन्तीसमीपे। जरासन्धसिंहरथयोर्वृत्तान्तः॥

मन्मानसैकहंसेन, कंसेनाक्षेपि मे पुरः ॥ ७० ॥ ततो विपस्वसुस्तस्या, दुहितुर्मगधेशितुः । असौ सिंहरथानेता, परिणेताऽस्तु संप्रति ॥७१॥ उवाच श्रीसमुद्रोऽथ, समुद्रविजयो वचः । गतापायमुपायं मे, मनोहरमुदाहरः ॥७२॥ परं पुरा वणिक्पुत्र-स्तयाऽसौ प्रतिपादितः । तदस्मै वणिजे पुत्रीं, जरासन्धो न दास्यति ॥७३॥ इति जल्पत एवास्य, कंसः सेवार्थमागमत् । वसुदेवश्च तं राज्ञे, कंसोऽसावित्यचीकथत् ॥ ७४ ॥ तेजः साक्षादिव क्षात्रं, तमूर्जस्विभुजार्गलम् । प्रांशुमांसलमालोक्य, नृपतिः पुनरभ्यधात् ॥७५॥ अत्यद्भुतोऽयमाकारः, सुलभो न वणिक्कुले । ततोऽस्य पितरं पृष्ट्वा, क्रियते कुलनिर्णयः ॥ ७६ ॥

अथाहूय महीभर्त्रा, पृष्टः शपथपूर्वकम् । सुभद्रः सत्यमाचख्यौ, सर्वं कंसस्य पश्यतः ॥ ७७ ॥ यमुनायामनुस्रोतो, वहन्तीमहमेकदा । अपश्यं कांस्यमञ्जूषां, प्रातः शौचार्थमीयिवान् ॥ ७८ ॥ आदाय तामथोद्घाट्य, पार्वणेन्दुसमाननम् । उच्छृङ्खलप्रभाजाल-मिममालोकयं सुतम् ॥ ७९ ॥ उग्रसेनस्य नामाङ्का-मेतां च मणिमुद्रिकाम् । एतच्च पत्रमत्रेदं, लिखितं वाच्यते यथा ॥ ८० ॥ (युग्मम्) उग्रसेनसधर्मिण्या, धारिण्या गर्भकर्तृकः । अभवद्दोहदो भर्तृ-मांसभक्षणलक्षणः ॥८१॥ कथंचित् पूरिते तस्मि-न्नमात्यैर्मतिशालिभिः । पौषे कृष्णचतुर्दश्यां, विष्टौ सूनुरजायत ॥ ८२ ॥ तं दोहदानुभावेन, निर्णीय जनकद्विषम् । विन्यस्य कांस्यपेटाया-मुद्भटाकारधारिणम् ॥८३॥ माताऽपि तदहर्जातं, मधुरातोऽथ धारिणी । पत्युः क्षेमाय चिक्षेप, गम्भीरे यमुनाम्भसि ॥ ८४ ॥ (युग्मम्) इति पत्रार्थतो देव, ज्ञातोऽसावुग्रसेनजः । पुत्रस्नेहस्तथाऽप्यत्र, तदा प्रादुरभून्मम ॥ ८५ ॥ अथानीय निजं गेह-मस्योत्सवपुरःसरम् । कांस्यपेटोपलब्धत्वा-न्नाम कंस इति व्यधाम् ॥ ८६ ॥ अरावपुण्याद्धिष्णु-स्तेजः क्षत्रकुलोचितम् । ततः क्रीडन् बलादेष, बालकैः कलहायते ॥८७॥ जनेभ्योऽहमुपालम्भं, लेभे च

प्रतिवासरम् । कुमारवसुदेवस्य, ततोऽमुं सेवकं व्यधाम् ॥ ८८ ॥ ततो जगाद सानन्दं, समुद्रविजयो नृपः । अस्मद्गोत्रादृते कस्य, दृश्यते बलमीदृशम् १ ॥ ८९ ॥ इत्युक्त्वा सह कंसेन, गत्वा राजगृहे च सः । चक्रे सिंहपुराधीश-मुपदां मगधेशितुः ॥ ९० ॥ अस्यायमवदातस्य, कंसः कर्तेति सादरम् । नृपो निवेदयामास, मगधानां महीभुजे ॥ ९१ ॥ ततः प्रीत्या ददौ पुत्रीं, कंसाय मगधेश्वरः । प्रतिपन्नं युगान्तेऽपि, नान्यथा हि महात्मनाम् ॥ ९२ ॥ उग्रसेननृपद्वेषा-न्मथुरामेव सादरम् । कंसाय याचमानाय, स दत्ते स्म प्रसादतः ॥ ९३ ॥ अथ सिंहरथोऽप्युच्चै-रुत्खातप्रतिरोपितः । नत्वा प्रसादयामास, तं फलैः कैलभो यथा ॥९४॥ जरासन्धेन सत्कृत्य, विसृष्टाः स्वपुरं प्रति । जग्मुस्तिग्मेन वेगेन, समुद्रविजयादयः ॥ ९५ ॥

सत्यसन्धजरासन्ध-मर्पितबलो बली । कंसस्तु मथुरां गत्वा, तातं निष्करुणोऽरुधत् ॥९६॥ सेनाभिरुग्रसेनोऽपि, तेन सार्धमयुध्यत । अखिद्यत जयश्रीस्तु, तयोर्युद्धे गतागतैः ॥ ९७ ॥ कथंचनापि निर्जित्य, कंसः क्रूरशिरोमणिः । साक्षेपचेताश्चिक्षेप, पितरं काष्ठपञ्जरे ॥ ९८ ॥ दृढं निगडबद्धोऽपि, ज्ञाते तस्मिन्निजात्मजे । सुतेन विजितोऽस्मीति, पिता तु मुदमावहत् ॥ ९९ ॥ सुभद्रवणिजं शौर्य-पुरादानाय्य सोऽञ्जसा । कृतज्ञमानी संपूज्य, पर्युपास्ते स्म तातवत् ॥ १०० ॥

इतश्च केलिशैलेषु, प्रासादेषु वनेष्वपि । शौरिः शौर्यपुरेऽत्यन्तं, विजहार यदृच्छया ॥ १०१ ॥ वसुदेवः सुनेत्राणां, नेत्राणाममृताञ्जनम् । मनसस्तु सदा ध्येयो, मन्त्रोऽभूचतुरक्षरः ॥१०२॥ समुद्रविजयः पौरै-रेत्य विज्ञापितोऽन्यदा । देव !

१ ' कलभो ' इति पाठः सर्वप्रतिषु दृश्यते, स न साधुः प्रतिभाति । २ नारीणाम् ।

त्वयाऽपि नाथेन, वयमत्यन्तदुःखिताः ॥ १०३ ॥ कन्दर्पस्य सरूपेण, रूपेणाक्षिप्तचेतसः । शौरिमेवानुधावन्ति, त्यक्त्वा वेश्मानि नः स्त्रियः ॥ १०४ ॥ अनुगामुकतां शौरे-स्तासु प्राप्तासु सर्वतः । कलत्रकर्तृका काऽपि, शुश्रूषा नास्ति नः प्रभो ! ॥ १०५ ॥ अथ पृथ्वीपतिः प्रीत्या, सान्त्वयित्वा विसृज्य तान् । वसुदेवं समाहूय, रहस्येवं समादिशत् ॥ १०६ ॥ वत्स ! स्वच्छन्दचर्याभि-रभूरत्यन्तदुर्बलः । कुरु सर्वकलाभ्यासं, सौधमध्यस्थ एव तत् ॥ १०७ ॥ कुर्वन्नुर्वीपतेराज्ञा-मेवं राजानुजोऽन्यदा । एकामपश्यदायान्तीं, दासीमन्तःपुरोदरात् ॥ १०८ ॥ विलेपनं करात्तस्याः, सोऽलुम्पन्नर्मलीलया । ततः सकोपं साक्षेपं, वसुदेवं जगाद सा ॥१०९॥ कुमार ! मेदुरामोद-मङ्गरागं किमाच्छिदः ? । देवाय शिवया देव्या, प्रेमतः प्रहितो ह्यसौ ॥ ११० ॥ सौधमध्ये निरुद्धोऽसि, स्थाने देवेन धीमता । विशल्यविनयादेव, पञ्जरे सिंहशावकः ॥१११॥ साऽथ पृष्टा कुमारेण, निजसंरोधकारणम् । तत्पुरः पौरवृत्तान्तं, सर्वं मूलादचीकथत् ॥११२॥ ततो म्लानमुखाब्जश्री-र्व्यतीत्य कथमप्यहः । वसुदेवो विभावर्या-मेकाक्येव क्वचिद्ययौ ॥ ११३ ॥ प्रातरन्वेषणे पूर्व-प्रतोलीद्वारि दूरतः । दग्धमानुषसंस्थानो, भस्मराशिरदृश्यत ॥ ११४ ॥ प्रतोल्यां लम्बमानं च, पत्रमेकमुदैक्ष्यत । शुचोच्चैर्वाचयामास, समुद्रविजयः स्वयम् ॥ ११५ ॥ पुंसो यस्य गुरून् याव-दुपालम्भः प्रवर्तते । तस्य श्रेयस्करो मृत्यु-र्जीवितं तु त्रपाकरम् ॥ ११६ ॥ ततः शौरिः कृतोद्वेगो, गुरूणामगुणैकभूः । विरचय्य चितामत्र, कृशानुमविशत् स्वयम् ॥ ११७ ॥ तदेवं वाचयन्नेव, देवो मूर्छामुपागमत् । ज्ञात्वा विपन्नं सोदर्यं, को हि धैर्यं न मुञ्चति ? ॥ ११८ ॥ व्यलपच्चाप्तचैतन्यो, हा ! वत्स ! गुरुवत्सल ! । दत्त्वा नः शोकमस्तोक-

१ अतिसुगन्धम् । २ 'स्थाने' इति सम्यगर्थेऽव्ययम् । ३ तच्चोच्चै० प्रतिग्रह्य० । ४ गुरून् यावत्-गुरुसमीपे इति भावः ।

मगमः कामिमां दशाम् १॥ ११९ ॥ भाग्यैकलभ्यं सौभाग्यं, वसुदेवस्य संस्मरन् । राजानमनुचक्रन्द, सर्वोऽपि विधुरो जनः ॥ १२० ॥ जनन्यास्तु सुभद्रायाः, सुतशोकाशुशुक्षणिः । तथा नितान्तं जज्वाल, प्राणानप्यहरद्यथा ॥ १२१ ॥ न गीतं गीतशालासु, न लास्यं लास्यवेश्मनि । बभूव शौरिशोकेन, न च तूर्यध्वनिः क्वचित् ॥ १२२ ॥ वसुदेवशुचा देवो, न दिदेवे शरद्यपि । वसन्तेऽपि वसन् वेश्म–न्यरोदीद्दीनलोचनः ॥ १२३ ॥ एवं वर्षाणि भूयांसि, भूशक्रस्यातिचक्रमुः । एत्या-न्यदा निमित्तज्ञो, बभाषे क्रोष्टुकिर्नृपम् ॥ १२४ ॥ दिष्ट्या दृष्टं निमित्तेन, भृशं निश्चिन्वता मया । यज्जीवति प्रफुल्लश्री–र्वसुदेवो निरामयः ॥१२५॥ एवं तद्गिरमाकर्ण्य, कर्णपीयुषसारणिम् । भूयोऽपि राजकार्येषु, किंचित् प्रावर्तत प्रभुः ॥१२६॥

स्वयंवरेऽथ रोहिण्याः, सुताया रुधिराह्वयः । अरिष्टनगरस्वामी, स्वामिनं नः समाह्वयत् ॥ १२७ ॥ देवोऽपि बन्धुभिः सार्धं, महर्धिकपरिच्छदः । शौरिशोकविनोदार्थं, न कन्यार्थं पुनर्ययौ ॥१२८॥ जरासन्धमहाराज–प्रमुखे राजमण्डले । आसीने मञ्चमत्युच्च–मध्युवास नृवासवः ॥ १२९ ॥ मन्मथाङ्कुररोहिण्या, रोहिण्याऽथ कटाक्षिताः । भूपाः स्वं रोचयांचक्रुः, [3]स्फुटितानन्तचेष्टिताः ॥ १३० ॥ परं धात्रीपतेर्धा[4]त्र्या, संकीर्तितगुणश्रियाम् । तेषामेकोऽपि रोहि[5]ण्या, रोचते स्म न कश्चन ॥१३१॥ राज्ञोऽवज्ञाय सर्वांस्ता–नेकं पाटहिकं दृशा । ईक्षांबभूव साकाङ्क्षं, सा मृगाक्षी मुहुर्मुहुः ॥१३२॥ सोऽप्येवं वादयामास, पटहं प्रकटाक्षरम् । अकालक्षेपमेणाक्षि [6]!, स्रजा क्रीणीहि मामिति ॥ १३३ ॥ गुणैः कुमुद–कुन्दे–न्दु–सुन्दरैः सा वशंवदा ।

१ पुत्रशोकाग्निः । २ चिक्रीड । ३ "स्पष्टितानेकचेष्टिताः" इति प्रत्यन्तरत्रयपाठः साधुः । ४ 'धात्र्यां' प्र० । ५ 'रोहिण्यै' इति प्रत्यन्तरपाठः साधुः । ६ हे मृगाक्षि !

वसुदेव-वृत्तान्तः॥

तस्य कण्ठे निचिक्षेप, स्रजं कुब्जाकृतेरपि ॥ १३४ ॥

कृतकोलाहलाः सर्वे, वृते पाणविके तया । जरासन्धाज्ञया योद्धु–मुपचक्रमिरे नृपाः ॥ १३५ ॥ तं पाटहिकमप्यूरी–कुर्वाणं रुधिरं प्रति । तं पराक्रमिणश्चक्रुः, कुन्ताकुन्ति शराशरि ॥ १३६ ॥ उद्बुद्धप्रबलक्रोधो, रुधिरस्तानयोधयत् । न हि क्षुभ्यन्ति शौण्डीराः, प्रत्यर्थिषु बहुष्वपि ॥१३७॥ अथ प्रत्यर्थिभूपालैः, रुधिरे विधुरीकृते । तैः समं तौर्यिकस्तूर्णं, समरायोदतिष्ठत ॥ १३८ ॥ नभश्चरोपनीतेन, सायुधेन रथेन सः । तानेकोऽपि पिनष्टि स्म, स वैरितिमिरार्यमा ॥१३९॥ अबलं स्वबलं वीक्ष्य, जरासन्धो धराधवः । देवं समुद्रमादिक्ष–त्तस्याक्रमणहेतवे ॥१४०॥ तौर्यिकोऽयमिति ज्ञात्वा, सावज्ञमभिषेणयत् । तेन निर्लुम्पता सैन्यं, निन्ये देवोऽपि विस्मयम् ॥ १४१ ॥ रूपाद्विसदृशं तेज–स्तस्य पश्यन् स्वयं ततः । देवः शौर्यपुराधीशः, शरं धनुषि संदधे ॥ १४२ ॥ तेनापि प्रहितं देवो, विनीतमिव सेवकम् । एवं साक्षरमद्राक्षीत्, पादाग्रे पतितं शरम् ॥ १४३ ॥ कौतुकेन तमादाय, व्यक्तां मुक्ताफलोपमाम् । तत्रोच्चैर्वाचयामास, देवस्तामक्षरावलीम् ॥ १४४ ॥ शवदाहमयं छद्म, कृत्वाऽगाद्यः पुरा पुरात् । स ते पादाम्बुजं देव !, वसुदेवो नमस्यति ॥१४५॥ मुक्त्वा स्यन्दनमानन्द–स्यन्दमानाश्रुलोचनः । आगच्छ वत्स ! वत्सेति, देवो जल्पंस्तमभ्यगात् ॥१४६॥ सोऽपि स्वरूपमास्थाय, रथादुत्तीर्य वेगतः । ववन्दे देवपादाब्जं, स्नपयन्नयनाम्बुभिः ॥ १४७ ॥ गाढमालिङ्ग्य देवेन, स पुरो विनयान्वितः । कुत्र वर्षशतं वत्स !, स्थितवानित्यपृच्छ्यत ॥१४८॥ सोऽपि व्यज्ञापयद् देव !, त्वत्प्रभावादशङ्कितः । कृतरूपपरावर्तः, स्वैरं भ्रान्तोऽस्मि भूतले ॥१४९॥

---

१ तौर्यिकेण । २ 'एकं' प्रतिद्वय० । ३ अतिरस्कृतः ।

इत्थं तदा विदित्वा तं, समुद्रविजयानुजम् । प्रमोदमेदुरं चेतो, दधिरे रुधिरादयः ॥१५०॥ ततः स रोहिणीं रोह–द्विशेषप्रेमविह्वलाम् । उपायंस्त सदानन्द–श्चन्द्रमा इव रोहिणीम् ॥ १५१ ॥ शौरिं जगाद देवोऽथ, वत्सागच्छ निजां पुरीम् । "ग्रहा अपि परक्षेत्रा–च्छ्लाघ्याः स्वं क्षेत्रमागताः" ॥१५२॥ ततः शौरिरभाषिष्ट, त्वदादिष्टं तथेति मे । परं स्वपुरमेष्यामि, कालेन कियताऽप्यहम् ॥ १५३ ॥ लुषा[1] वः शतशः सन्ति, नरखेचरकन्यकाः । ततस्ताः शीघ्रमादाय, प्रणन्तास्मि भवत्क्रमौ ॥ १५४ ॥ एवमापृच्छ्य निर्बन्धात्, स जगामोत्तरां दिशम् । देवोऽपि सपरीवारः, पुरमात्मीयमाययौ ॥ १५५ ॥ शौरिशौर्यकथाबन्धैः, समयं गमयन्मुदा । अश्रौषीदेकदा देवः, कौबेर्यां[2] तूर्यनिःस्वनम् ॥ १५६ ॥ दृशौ व्यापारयंस्तस्या–मपश्यन्मणिनिर्मितम् । स्वामी श्रेणीं विमानाना–मभ्यायान्तीं विहायसा ॥ १५७ ॥ नभोनिभालनोत्फुल्ल–नयनस्य नरेशितुः । एत्य शौरिः समेतीति, कश्चिदूचे नभश्चरः ॥१५८॥ प्रत्युद्गम्य ततो देवः, प्रवर्तितमहोत्सवे । उत्तुङ्गतोरणश्रेणौ, शौरिं प्रावीविशत् पुरे ॥ १५९ ॥ मथुरातः समागम्य, कंसः संस्मृतसौहृदः । शौरेश्चकार माङ्गल्य–मन्यराजन्यजित्वरम् ॥ १६० ॥

अथ देवमनुज्ञाप्य, चिरं शुश्रूषणेच्छया । विनयादनयच्छौरिं, मथुरां मथुरापतिः ॥ १६१ ॥ पुत्रीं निजपितृव्यस्य, देवकस्य स देवकीम् । सुरूपामनुरूपेण, शौरिणा पर्यणाययत् ॥ १६२ ॥ कंसबन्धुर्विविक्तात्मा, मुक्तिकामोऽतिमुक्तकः । उत्सवे तत्र भिक्षार्थी, शमवान् मुनिराययौ ॥ १६३ ॥ कंसपत्नी जीवयशा, यौवनोन्मादमेदुरा । तदानीं संमुखीनाऽऽसीन्निःसीमतपसो मुनेः ॥ १६४ ॥ असौ शिथिलधम्मिल्ला, मुनिं स्रस्तस्तनांशुका । क्षीबा[3] श्लथीभवन्नीवी, दृश्यनाभिस्तम-

१ लघुभ्रातृपत्न्यः–मम भार्याः इत्यर्थः । २ उत्तरस्याम् । ३ मदोन्मत्ता ।

वसुदेव-
वृत्तान्तः ।

म्यधात् ॥ १६५ ॥ एहि देवर ! नृत्यावः, स्वसुस्तव महोत्सवे । तमित्यालप्य सा दोर्भ्यां, कण्ठे साग्रहमग्रहीत् ॥१६६॥ आः ! तारुण्यमहारण्य-भल्लूकि ! निरपत्रपे ! । अपेहीति स तां रूक्ष-मधिक्षिप्योक्तवानिति ॥ १६७ ॥ यद्विवाहोत्सवे मत्ता, नृत्यस्यत्यन्तगर्विता । तस्याः सप्तमगर्भेण, तव घातिष्यते पतिः ॥१६८॥ एवं वाङ्मयमन्त्रेण, वित्रासितमदोदया । साऽमुञ्चच्च मुनेः कण्ठं, सोऽगमच्च यथागतम् ॥ १६९ ॥ सा कंसस्य तदाचख्यौ, सोऽपि क्षोभमगाद्भृशम् । " मृत्युदौर्गत्ययोर्वार्ता, न स्यात् कस्यार्तिहेतवे ? " ॥ १७० ॥

मृत्युतो बिभ्यदन्येद्युः, कंसः कूटैककोविदः । दाक्षिण्यस्य निधिं नीत्वा, रहः शौरिमभाषयत् ॥ १७१ ॥ कृतार्थितार्थिनं मित्र !, किंचित् त्वामहमर्थये । ये गर्भाः सप्त देवक्या, भवेयुस्ते भवन्तु मे ॥ १७२ ॥ बलभद्रादयः सन्ति, भूयांसोऽपि ममात्मजाः । एभिः सप्तभिरेषोऽस्तु, ममापत्यैरपत्यवान् ॥ १७३ ॥ एषोऽप्यमून्यपत्यानि, स्नेहतो लालयिष्यति । इत्यालोच्य प्रियां शौरि-स्तथेति प्रतिपन्नवान् ॥ १७४ ॥ (युग्मम्) जातमात्रानपि क्रूरः, संरक्ष्यारिष्टमन्दिरे । ततः कंसोऽग्रहीद्गर्भान्, देवक्याः षडपि क्रमात् ॥ १७५ ॥ मथुरायामियं वार्ता, प्रावर्तत समन्ततः । सुताः षडप्यहन्यन्त, ते कंसेन दुरात्मना ॥१७६॥ खेदोऽभूच्छौरिदेवक्यो-रिमां श्रुत्वा जनश्रुतिम् । "पुत्रव्यापादनोदन्तः, पीडायाः परमोऽवधिः" ॥ १७७ ॥ दधौ सप्तमहास्वप्न-सूचितं निश्चितोदयम् । उदारमन्यदा देवी, देवकी गर्भमद्भुतम् ॥ १७८ ॥

पत्युः शशंस सा स्वप्नान्, प्रातस्तामरसानना । भरतार्धपतिः पुत्रो, भावीत्याख्यत् स तत्फलम् ॥ १७९ ॥ अवादीद्

१ 'संरक्षा०' प्रतिद्वय० । २ सूतिकागृहे । ३ कमलमुखी ।

देवकी देवी, स्वामिन्नात्मजलाभतः । कंसदौष्ट्याच मे चेतः, प्रसीदति विषीदति ॥ १८० ॥ त्वयि नाथेऽप्यनाथाऽस्मि, प्रभो ! धिग्मामपुण्यकाम् । पुत्रं यज्जातमात्रं मे, कंसो विध्वंसते मुहुः ॥ १८१ यद्येनमप्यसौ पुत्रं, पापो व्यापादयिष्यति । देवक्यपि तदा स्वामिन् !, विपन्नैव न संशयः ॥ १८२ ॥ अथाभाषत शौरिस्तां, प्रिये ! जीवन्मृतोऽस्म्यहम् । यस्य मे पश्यतः कंसो, जघान पशुवत् सुतान् ॥१८३॥ तन्मया तनयः सोऽयं, संरक्ष्यः कंसराक्षसात् । स्वगर्भं दोहदैर्हृद्यैः, पालयेर्मा स्म खिद्यथाः ॥ १८४ ॥ रक्षोपायस्त्वसावस्ति, नन्दो मे गोकुलाधिपः । तनूजमेनं यत्नेन, स गुप्तं वर्धयिष्यति ॥१८५॥ इति पत्या कृताश्वासा, जातविश्रामभानसा । देवकी पालयामास, गर्भं सुखसुखेन तम् ॥ १८६ ॥ अयं मे हन्त ! हन्तेति, भीतः कंसोऽपि पत्तिभिः । रक्षां सप्तमगर्भस्य, करोति स्म विशेषतः ॥ १८७ ॥ अथोर्जस्विप्रभाजालं, श्रीवत्साङ्कितवक्षसम् । श्रावणस्यासिताष्टम्यां, लग्ने लोकोत्तरे निशि ॥ १८८ ॥ लक्षणाख्यातसंभाव्य-भरतार्धमहर्द्धिकम् । देवताधिष्ठितं देवी, देवकी सुषुवे सुतम् ॥ १८९ ॥ (युग्मकम्) ये तत्र गर्भरक्षार्थ-मासन् कंसपदातयः । ते भरतार्धदेवीभि-र्निद्रामानिन्यिरे तदा ॥ १९० ॥ ज्ञात्वा निद्रावतस्तांस्तु, देवी शौरिमजूहवत् । सोऽपि तं बालमादाय, प्रतस्थे गोकुलं प्रति ॥ १९१ ॥ देवमुक्तपतत्पुष्प-दन्तुरीभूतभूतलम् । प्रज्वलद्दीपिकाश्रेणि-विश्राणितनवश्रियम् ॥१९२॥ शौरिः सुरैर्धृतच्छत्र-मुद्धूताद्भुतचामरम् । तनयं तं नयन्नुग्र-सेनेनाजल्पि गोपुरे ॥१९३॥ (युग्मम्) किमेतद्दृश्यते नेत्र-प्रियं भावुकमद्भुतम् । कथय प्रथय श्रोत्र-पुटे पीयूषसारणिम् ॥ १९४ ॥ ततः स्मेरमुखः शौरि-रेतस्मात् काष्ठपञ्जरात् । यस्त्वां मोचयिता सोऽय-मिति मन्दमचीकथत्

१ घातकः । २ 'आश्विनस्य' इति क्वचित्पाठो दृश्यते, स न साधुः । ३ 'अथ' इति प्रतिद्वय० ।

॥ १९५ ॥ सोऽप्यूचे कंसतः श्रासो, बन्धोऽप्येष धिनोति माम् । येन जागरितोऽद्राक्ष-मपूर्वमिदमद्भुतम् ॥१९६॥ शिशोस्तस्यानुभावेन, सुखोत्तारमिति द्रुतम् । उत्तीर्य यमुनां शौरि-रगमन्नन्दगोकुलम् ॥ १९७ ॥

तदैव दैवयोगेन, यशोदा नन्दगेहिनी । तनयां जनयांचक्रे, मनोरमतमाकृतिम् ॥ १९८ ॥ तामादाय यशोदायाः, समर्प्य च तनूरुहम् । कृतकृत्यमनाः शौरिः, स्वस्थानं पुनराययौ ॥ १९९ ॥ तां नन्दपुत्रीं देवक्याः, स च वेगादुपानयत् दूरीकृतप्रमादास्ते, पत्तयश्च जजागरुः ॥ २०० ॥ बालिकां तामुपानिन्यु-स्ते कंसाय निरादराः । सावज्ञं वीक्ष्य सोऽप्येना-मकरोल्लूननासिकाम् ॥२०१॥ प्रीत्या भीत्या च योऽश्रान्तं, स्मर्यते मित्रशत्रुभिः । वध्यः सोऽप्यनया कंसः, कूटसत्यं मुनेर्वचः ॥ २०२ ॥ इत्थं हसित्वा सोल्लुण्ठ-मतिमुक्तमहामुनिम् । स मृत्युंजयमात्मानं, मन्वानो राज्यमादधे ॥२०३॥ (युग्मकम्) कन्यामवज्ञया कंसो, देवक्याः पुनरार्पयत् । " उद्दामभुजस्थाम्ना-मनास्था क्षामधामसु " ॥ २०४ ॥

अथाभूद्गोकुलं सर्वं, शिशुना तेन कान्तिमत् । पूर्वाद्रेरिव बालेन, प्रालेयद्युतिना शिरः ॥ २०५ ॥ तदाऽऽसीदुद्यदानन्दं, मनो नन्द-यशोदयोः । तादृशस्य सुतस्यासौ, को हि नाम न हृष्यति? ॥२०६॥ नन्दोऽथ तस्य कृष्णत्वा-न्नाम कृष्ण इति व्यधात् । अङ्कमारोप्य गोप्यस्तं, लालयन्ति स्म विस्मिताः ॥ २०७ ॥ ववृधे गोकुले बालः, पाल्यमानो यशोदया । सिच्यमानः शचीदेव्या, कल्पद्रुरिव नन्दने ॥ २०८ ॥ गच्छन्नुत्सङ्गमुत्सङ्गात्, पाणिं पाणेश्च संचरन् । स गोकुलमृगाक्षीणा-मभूदत्यन्तवल्लभः ॥ २०९ ॥ तं तमुत्सवमुद्दिश्य, तनयालोकनोत्सुका । अगमद्गोकुले देवी, वात्सल्येनान्तरान्तरा ॥

१ अधिकबाहुबलानाम् । २ हीनतेजस्सु । ३ सूर्येण.

२१० ॥ साऽपीप्यत् सूनवे स्तन्यं, स्नेहतः प्रस्नुतस्तनी । मुहुरुल्लापयांचक्रे, विविधोल्लापपण्डिता ॥ २११ ॥ ध्रुवं भाग्यैरहं त्यक्ता, त्यक्ताऽनेन सुतेन यत् । इति स्वमन्तर्निन्दन्ती, नन्दपत्नीमुवाच सा ॥२१२॥ त्वं यशोदे ! त्रिभुवन-स्त्रीणामुपरि वर्तसे । तनयेनामुना नित्य-मङ्कस्ते यदलंकृतः ॥ २१३ ॥ कुलं वा गोकुलं वाऽपि, रम्यं यत्रैष खेलति । प्रशस्यैवं यशोदां सा, मन्थरं मथुरां ययौ ॥ २१४ ॥ वैरं पूर्वमथ स्मृत्वा, पूतना शकुनिस्तथा । विद्याधर्यावुपागत्य, विष्णोर्निधनमीषतुः ॥ २१५॥ ते च देवतया मृत्युं, लम्भिते कृष्णगृह्यया । "स एव निधनं गच्छे-दिच्छेदत्याहितं सताम्" ॥२१६॥ रिङ्खन्नस्खलितं कृष्णः, कण्ठीरवकिशोरवत् । गोकुले दधिदुग्धानां, हठाद्भाण्डान्यलूलुठत् ॥२१७॥ सोऽभूत्तथापि गोपाल-प्रेयसीनामतिप्रियः । "पश्य कस्यापि न द्वेष्य-स्तपनोऽतितपन्नपि" ॥ २१८ ॥

सप्ताष्टहायनः सोऽथ, यशोभिर्व्यानशे दिशः । चम्पकप्रसवो नव्यः, स्फुटन् परिमलैरिव ॥ २१९ ॥ गुणैर्लोकोत्तरैस्तैस्तै-रिदानीं नन्दनन्दनः । विजयी गोकुलेऽस्तीति, पप्रथे मथुरान्तरे ॥ २२० ॥ कीर्तिकोलाहलं श्रुत्वा, तं सूनोः कंसशङ्कितः । हिताय प्राहिणोच्छौरि-र्बलदेवं तदन्तिके ॥ २२१ ॥ कृष्णः प्रीत्या तमद्राक्षी-दविदन्नपि बान्धवम् । "जन्मान्तरकृतः स्नेहः, प्रह्लयत्येव मानसम्" ॥२२२॥ बलदेवान्तिकेऽध्यैष्ट, स कलाः सकला अपि । उपाध्यायश्च बन्धुश्च, स तस्य द्वयमप्यभूत् ॥ २२३ ॥ अगस्तेः पिबतो वार्धीन्, कालो यावानभूत् पुरा । तावानेव चतुर्विद्या-बोधे कृष्णस्य बुध्यताम् ॥ २२४ ॥ रम्ये वपुषि कृष्णस्य, बाल्य-यौवनयोः समम् । त्रुट्यच्च वर्धमानं च, प्रभुत्वमभवत्तदा ॥ २२५ ॥

१ मरणम् । २ आनन्दयति ।

कृष्णस्य बाल्यक्रीडा कलाग्रहणं च ॥

अभिरूपेण रूपेण, जितः कृष्णेन मन्मथः । जघान स तु गोपस्त्रीः, कोपात् तत्रानुरागिणीः ॥ २२६ ॥ ताडिताः पञ्चभिर्बाणैः, पञ्चबाणेन तास्तदा । कृष्णमेव न्यषेवन्त, तज्जेतारमहर्निशम् ॥ २२७ ॥ काश्चिदत्युच्चरोमाञ्चाः, सानन्दाश्चन्दनद्रवैः । मांसलेंऽसस्थले तस्य, लिलिखुः पत्रवल्लरीः ॥ २२८ ॥ उच्चित्य शिखिपिच्छानि, प्रोच्छलत्पुलकाङ्कुराः । चक्रुः काश्चन कृष्णस्य, मौलिमण्डनमद्भुतम् ॥२२९॥ वेपमानकराः काश्चि–न्नवैः कुसुमदामभिः । वक्षःस्थलमलंचक्रु–स्तस्य श्रीवत्सलाञ्छितम् ॥ २३० ॥ गोप्यस्ताः परितः कृष्णं, मण्डलीबन्धबन्धुरम् । प्रदत्ततालमुन्मील–ल्लीलं हल्लीसकं जगुः ॥२३१॥ रतिस्तावत् सुखं तावत्, तावदानंदथुः पृथुः । गोपालसुदृशां तासां, यावत् कृष्णस्य दर्शनम् ॥ २३२ ॥ ताभिरध्यापितः सोऽथ, ललितं मान्मथं तथा । यथा कामकथावादे, पराजीयन्त तेन ताः ॥ २३३ ॥ बन्धुना बलदेवेन, रक्ष्यमाणः प्रतिक्षणम् । इति कृष्णः सुखं क्रीडन्, गोकुले कालमत्यगात् ॥ २३४ ॥

इतश्च श्रीशिवादेवी, स्थिता शौर्यपुरे पुरे । एकदा कार्तिके कृष्ण–द्वादश्यां क्षणदाऽत्यये ॥ २३५ ॥ गर्भावतारपिशुनान्, महास्वप्नांश्चतुर्दश । दृष्ट्वा चित्रागते चन्द्रे, निद्रामुद्रां व्यमुञ्चत ॥२३६॥ (युग्मकम्) प्रहृष्टा यावदाचष्टे, देवी देवाय तान् प्रगे । क्रोष्टुकिस्तावदागच्छ–च्चारणश्रमणोऽपि च ॥२३७॥ तान् निशम्य वरस्वप्ना–स्तत्फलं तावशंसताम् । तीर्थंकराणां जननी, राजन्नेतान् समीक्षते ॥२३८॥ ततो जगत्त्रयत्राण–व्यवसायविशारदः । लोकोत्तरप्रभावोऽयं, भावी तीर्थंकरः सुतः ॥ २३९ ॥ श्रुत्वेति राजा राज्ञी च, पीवरां प्रीतिमीयतुः । ज्ञानिनो (नौ) बहुमानेन, नत्वा व्यसृजतां च तौ ॥२४०॥

१ कामजेतारम् । २ आनन्दः ।

देवी विशेषलावण्यं, देवश्चाभ्युदयं परम् । देशश्च दुरितध्वंसं, लेभे गर्भानुभावतः ॥२४१॥ श्रावणे श्वेतपञ्चम्यां, चन्द्रे चित्रागते निशि । लग्ने सौम्यग्रहैर्दृष्टे, शिवया सुषुवे सुतः ॥२४२॥ तदानीं दिक्कुमारीभिः, सूतिकर्म विनिर्ममे । स्नात्रं च चक्रे शक्रेण, तस्येत्यश्रोपमाप्ततः ॥ २४३ ॥ कुन्ति ! देवि ! मयापीद–मीक्षितं चक्षुषा पुनः । यद्दैर्यादिवेन्द्रस्य, रत्नैः सौधमपूर्यत ॥ २४४ ॥ आजन्मानाप्तसौख्याना–मपि प्राणभृतां तदा । जातमात्रेऽप्यहो ! तत्र, सुखाद्वैतमजायत ॥ २४५ ॥ तस्य जन्मोत्सवे देवः, कारागारमशोधयत् । अमारिं घोषयामास, दीनांश्चोपचकार च ॥२४६॥ सोऽरिष्टानि पिनष्टि स्म, तदा नेमिर्लता इव । अरिष्टनेमिरित्यस्य, ततो नाम विनिर्ममे ॥२४७॥ उपास्यमानः स सुरै–र्नन्द्यमानश्च यादवैः । पाल्यमानश्च धात्रीभिः, सुखं सुखमवर्धत ॥२४८॥ निर्ममे शौरिणा पूर्वं, कृष्णे जातेऽपि नोत्सवः । मथुरायां ततश्चक्रे, तज्जन्मनि विशेषतः ॥२४९॥

आगतो देवकीं द्रष्टुं, कंसः शौरिगृहेऽन्यदा । छिन्नैकनासिकां कन्यां, क्रीडन्तीं तामुदैक्षत ॥ २५० ॥ तामालोक्य मुनेर्वाक्यं, स्मृत्वा सोऽभूद् भयातुरः । " न मृत्युसदृशं दुःखं, न संतोषसदृक्सुखम् " ॥२५१॥ स सौधमेत्य पप्रच्छ, कंचिन्नैमित्तिकं रहः । मुनिना यन्मयि प्रोक्तं, तत्सत्यं किमुतान्यथा ? ॥ २५२ ॥ सोऽवोचन्नृप ! तत् सत्यं, नान्यथा मुनिभाषितम् । जीवत्येव तवाराति–र्देवक्याः सप्तमः सुतः ॥ २५३ ॥ न वेद्मि क्वचिदस्तीति, ज्ञानोपायं तु ते ब्रुवे । प्रदीपेनेव ते वैरी, येनावश्यं प्रकाश्यते ॥ २५४ ॥ वपुष्मानिव दर्पोष्मा, श्यामलो विन्ध्यबान्धवः । ऊर्जस्विगर्जितो यस्ते, दुष्टो रिष्टाभिधो वृषः ॥ २५५ ॥ यश्चास्ति भृशमभ्यस्त–दौःशील्यः केशिसंज्ञकः । लोकोपद्रवनिःशूकः, शूकलस्ते तुरङ्गमः ॥२५६॥ एतावानीय

अरिष्टनेमिजन्म । नैमित्तिकेन कंसस्य–वधकज्ञानोपायः कथितः ॥

१ रथचक्रधारा । (२ निर्दयः । ३ दुर्विनीत ।)

पीनत्व-मुद्दाममदमेदुरौ। मुच्येतां मथुरापुर्यां, बहिः स्वच्छन्दचारिणौ ॥ २५७॥ तावुभाविभवन्मत्तौ, हेलया यो हनिष्यति। केसरीवान्तकृत्तेऽसौ, राजकुञ्जर ! नान्यथा ॥ २५८॥ शार्ङ्गं यदस्ति ते धाम्नि, दुःस्पर्शमितरैर्जनैः। तस्याधिज्यस्य यः कर्ता, प्राणहर्ता तवापि सः ॥ २५९ ॥ शार्ङ्गं तु शार्ङ्गपाणेस्त-द्भविष्यति भविष्यतः। एतत्त्वादिष्टमुत्कृष्ट-ज्ञानैर्मुनिवरैः पुरा ॥ २६० ॥ (युग्मम्) मल्लस्तेऽप्रतिमल्लो यः, शूरश्चाणूरसंज्ञकः। यस्तं हन्ता स ते हन्ता, मा कृथाः कंस ! संशयम् ॥ २६१ ॥ गजौ स्तस्ते श्रियः पद्मौ, यौ पद्मोत्तर-चम्पकौ। एतयोर्जीवितान्तस्य, यो विधाता तवापि सः ॥ २६२ ॥ वास्तव्यो योऽस्ति कालिन्द्यां, कालियो नाम पन्नगः। यस्तस्य दमकः स्वैरं, प्राणानां शमकः स ते ॥ २६३ ॥ श्रुत्वेति प्रोल्लसत्कम्पः, कंसः कातरलोचनः। तं विसृज्य समादिक्षत्, तूर्णमामन्त्र्य मन्त्रिणम् ॥२६४॥ स्वादुभिर्मृदुभिर्घासै-रेतावानीय पीनताम्। वृषा-श्वौ स्वेच्छया मुञ्च, यमुनावनराजिषु ॥ २६५ ॥ चाणूर-मुष्टिकौ पुष्टि-मुपानय रसायनैः। यथा नियुद्धे जीयेते, तौ च मल्लौ न केनचित् ॥ २६६ ॥ मन्त्रिणा प्रौढमन्त्रेण, यथादिष्टमनुष्ठितम्। निस्तन्द्रचन्द्रशालिन्या, शरदा च विजृम्भितम् ॥ २६७ ॥ जगुर्जगच्चमत्कारि, कलं कलमगोपिकाः। मदः सप्तच्छदामोदैः, सहैव करिणामभूत् ॥ २६८ ॥ सरोजानां रजःपुञ्जै-रयुज्यन्त जलाशयाः। दिगन्तास्तु व्ययुज्यन्त, पयोदानां कदम्बकैः ॥ २६९ ॥ गोष्ठोपकण्ठे सोत्कण्ठ-गोपीयुक्तोऽथ रासकैः। चन्द्रिकोन्निद्रचन्द्रासु, कृष्णश्चिक्रीड रात्रिषु ॥२७०॥ दिवसे तु स धेनूनां, वृन्दं वृन्दावने वने। पालयामास गोपाल-बालकैः परिवारितः ॥ २७१ ॥

---

१ मल्लोऽस्त्यप्रति० इति प्रत्य०। २ " नैव मल्लेन केनचित् " इति प्रतिद्वय०। (३ कलमः शालिधान्यविशेषः।)

अथ कूलेषु कालिन्द्या–स्तदा स्वच्छन्दचारिणौ । अरिष्ट–केशिनौ दुष्टौ, क्रमाद्गोष्ठमुपेयतुः ॥२७२॥ तत्र तौ चक्रतुर्लोकं, सशोकमुपमर्दनात् । पयांसि पपतुस्तक्र–मन्थनीश्च ममन्थतुः ॥२७३॥ आभ्यां वृष–तुरङ्गाभ्यां, चक्रे गोकुलमाकुलम् । वत्सः कृष्णोऽत्र नास्तीति, नन्दः खेदमुपासदत् ॥२७४॥ गोपेभ्यस्तदुपश्रुत्य, वनाद् गोष्ठमुपागतः । दुर्नयप्रह्वमाह्वास्त, कृष्णस्तं दुर्मदं वृषम् ॥२७५॥ सोऽपि शृङ्गे महाभीष्मे, रोपादाधाय संमुखे । अधावत् कृष्णमाहन्तुं, यमसैरिभसंनिभः ॥२७६॥ मृणालकन्दलीमोटं, मोटयित्वा शिरोधराम् । निष्ठुरं मुष्टिना हत्वा, सोऽन्तं कृष्णेन लम्भितः ॥ २७७॥ यः कृष्णे मुष्णति प्राणां–स्तस्याभूद्विधुरो ध्वनिः । स एवासीत् तदा नान्दी, कंसविध्वंसनाटके ॥२७८॥ कृष्णे जयिनि गोपीनां, योऽभूज्जयजयारवः । स तद्यशःप्रबन्धस्य, प्रथमः पणवोऽभवत् ॥ २७९ ॥ तदैवाथ जनोन्माथ–प्रवृत्तं वीक्ष्य केशिनम् । कृष्णस्तमक्षरै रूक्षैः, साक्षेपमिदमभ्यधात् ॥२८०॥ दुर्विनीत ! विनेतारं, किं रे ! मां न निरीक्षसे । अनाथमिव मथ्नासि, यदेवं मम गोकुलम् ॥ २८१ ॥ इत्याक्षिप्तः स कृष्णेन, खुरैः कुद्दालयन् महीम् । दशनैर्दशनान् पिंप–न्नाभिमुख्यमुपागमत् ॥२८२॥ प्रक्षिप्य कूर्परं तस्य, यमदण्डोपमं मुखे । कृष्णस्तं जीर्णपटवत् , पाटयामास लीलया ॥ २८३ ॥ अश्वलोत्तारणैर्वृद्धा–स्तरुण्यस्त्ववगूहनैः । तस्य प्रचक्रिरे घोप–योपितः पारितोपिकम् ॥ २८४ ॥

नन्दनन्दनचापल्य–कर्तृकोऽरिष्ट–केशिनोः । वधः शशंसे कंसाय, घोपान्तश्चारिभिश्चरैः ॥२८५॥ तं निशम्य मुनेर्वाचं, सत्यां निश्चित्य सोऽन्यदा । आहूयाभिदधेऽमात्यं, मृत्युभीतो बृहस्पतिम् ॥ २८६ ॥ अस्त्यमात्य ! ममारातिः, सानन्दो

कृष्णेन हतौ अरिष्टकेशिनौ । कंसस्य चिन्ता ॥

१ पिवतः स्म । २ सैरिभः–महिषः ।

नन्दगोकुले । ततस्तद्ग्रहणोपायं, निरपायं विचिन्तय ॥२८७॥ बृहस्पतिरथोवाच, देव! देवसभोपमम् । रङ्गं शार्ङ्गाधिरोपाय, निर्मापय मनोरमम् ॥२८८॥ आहूयन्तां च भूपाला–श्चापारोपमहोत्सवे । विहायाहवशौण्डीरान्, दशार्हान् सुतवत्सलान् ॥२८९॥ इदं चाधोष्यतां चापं,यः समारोपयिष्यति । तस्मै कंसः स्वसारं स्वां,सत्यभामां प्रदास्यति ॥२९०॥ निजैरनुत्सुकैः छेकैः,शौण्डीरैरुद्भटैर्भटैः । धृतासिदण्डैः कोदण्ड–मण्डपः परिवेष्ट्यताम् ॥२९१॥ आयातश्च ततश्चाप–समारोपणकर्मणि । स तैर्गोपस्तवाराति–र्जीवग्राहं ग्रहीष्यते ॥ २९२ ॥ इत्यालत्रितमन्त्रं तं, मन्त्रिणं मथुरापतिः । त्वमेवेदं विधेहीति, सप्रसादं समादिशत् ॥ २९३ ॥

मन्त्रिणाऽनुष्ठिते तस्मिन्, मिलत्सु क्षोणिभर्तृषु । इमं वृत्तान्तमज्ञासी–दनाधृष्टिर्बलाग्रजः ॥२९४॥ छन्नं शौर्यपुरात् सोऽथ, प्रस्थितो मथुरां प्रति । अवात्सीद्बन्धुवात्सल्या–द्गोकुलेऽनाकुलो निशि ॥ २९५ ॥ बलं बलादनुज्ञाप्य, कृष्णमादाय गच्छतः । प्रातर्द्रुमाकुले मार्गे, वटेऽस्य स्यन्दनोऽस्खलत् ॥२९६॥ रथं महारथो नेतुं, नालं ज्येष्ठो यदाग्रतः । तदा दूर्वामिवोन्मूल्य, कृष्णो दूरेऽक्षिपद्वटम् ॥२९७॥ वीक्ष्य विष्णोर्भुजस्थाम, हृष्टोऽनाधृष्टिरञ्जसा । तमालिलिङ्ग सर्वाङ्गं, भूयो भूयश्चुचुम्ब च ॥ २९८ ॥ उपेत्य मथुरां सोऽथ, पुष्पप्रकरदन्तुरम् । मुक्तमुक्ताफलोच्चूलं[3], संप्रापचापमण्डपम् ॥२९९॥ उच्चमञ्चस्थितान् पश्यन्, स्वःपतीनिव भूपतीन् । रथं मुक्त्वा बहिस्तत्र, स विवेश सकेशवः ॥ ३०० ॥ मण्डपान्तः कृतार्चस्य, धन्वनोऽन्ते निषेदुषीम् । निर्जितामर्त्यरामां स, सत्यभामां न्यभालयत् ॥ ३०१ ॥ निपेतुः सत्यभामायाः, पीवरांसस्थले हरौ । मुग्धाः स्निग्धा विदग्धाश्च, पञ्चेषुविवशा दृशः ॥ ३०२ ॥ कलिङ्ग-वङ्ग-काश्मीर–कीरप्रभृतिभूमिपाः । आगम्य

१ त्यक्त्वा । २ ' अनेकैः ' इति प्रत्य० । ३ उच्चूलः–वितानम् ।

सत्यभामा-
स्वयंवरे
कृष्णेन
धनुरा-
रोपितम्॥

धनुरानम्य, स्वं स्वं मञ्चं पुनर्ययुः ॥ ३०३ ॥ हसित्वा ताननाधृष्टि-र्धृष्टो धन्वजिघृक्षया । व्यापारितकरो दूरात्, पतति स्म
निसंस्थुलः ॥ ३०४ ॥ भग्नमाणिक्यमुकुटः, त्रुटन्मुक्तालतश्च सः । सतालं सत्यभामाया, वयस्याभिरहस्यत ॥ ३०५ ॥
कोदण्डं चण्डदोर्दण्डः, कोपादारोप्य तं तदा । विष्णुरुत्थापयत् तासां, हास्यस्थानेऽद्भुतं रसम् ॥३०६॥ कोऽयं दुर्वारदोर्वीर्य?,
इति चिन्ताकुले जने । पत्याऽमुना च भामायां, कृतार्थमन्यचेतसि ॥ ३०७ ॥ प्रसह्य गृह्णतामेष, चापारोपणलम्पटः । मा
स्म यासीदमौ येन, रुष्टोऽस्मै मथुरापतिः ॥३०८॥ इति कंसभटोत्तंस-हक्कां केशिनिसूदनः । धीरं शुश्राव गोमायु-निना-
दमिव केसरी ॥ ३०९ ॥ (त्रिभिर्विशेषकम्) धनाधृष्टिं पुरस्कृत्य, तदानीमकुतोभयः । निरगात् तान् भटान् भित्त्वा, कृष्णो
भानुर्घनानिव ॥ ३१० ॥ याति यात्येष गृह्णीत, गृह्णीताह्वाय सादराः । इति ब्रुवाणाः सुभटा, यावद्धावन्ति पृष्ठतः ॥३११॥
रथाश्ववेगतस्तान-दनाधृष्टिर्जनार्दनम् । गोष्ठे चलान्तिके मुक्त्वा, ययौ शौर्यपुरे स्वयम् ॥ ३१२ ॥

नायमस्मादृशां साध्य, इत्युपागत्य ते भटाः । कंसायावेदयामासु-स्तस्योर्जितमनुत्तरम् ॥ ३१३ ॥ तदाकर्ण्य भृशं
कीर्ण-ज्वलिताङ्गारदुःसहम् । मनोदुःखं वहन् कंसः, प्रकृतिव्यत्ययं ययौ ॥३१४॥ आराध्यमप्यनाराध्यं, गुरुमप्यगुरुं तदा ।
मथुराधिपतिर्मेने, प्रत्यासन्नविपत्तिकः ॥ ३१५ ॥ कोप-प्रसादावस्थाने, व्यवस्थाया व्यतिक्रमम् । न्यायस्यापि विपर्यासं,
स चक्रे मरणातुरः ॥ ३१६ ॥ नियुद्धच्छद्मना पेठु-मरिष्टारिं स दुष्टधीः । चापस्योत्सवमारोप्य, पुनर्भूपानजूहवत् ॥ ३१७॥

१ 'रुग्ल,' 'रुग्लु' इति प्रत्यन्तरपाठौ न सम्यक्, 'रुग्ण' इति स्याचेत् सम्यक् । २ 'रस्थापयत्' इति प्रत्य० ।
३ कीर्णाः-विस्तृताः । ४ 'मारभ्य०' प्रतिद्वय० ।

वसुदेवोऽथ दुर्भावं, तस्य ज्ञात्वाऽऽशमानुषात्। रामाय दापयामास, सर्वां शिक्षां मनोगताम् ॥ ३१८ ॥ समुद्रविजयादीनां, सर्वेषामग्रजन्मनाम्। शौरिर्विज्ञापयामास, कंसाचरणमादितः ॥ ३१९ ॥ अजूहवच्च शौरिस्तान्, कृष्णावष्टम्भहेतवे। अन्यैव हि मनःस्फूर्ति-र्गुरुष्वभ्यर्णवर्तिषु ॥ ३२० ॥ अथ कंसाज्ञया राज्ञः, प्रतीहारो यथोचितम्। तदोपदेशयामास, पृथग्मञ्चेषु गौरवात् ॥ ३२१ ॥ ततः क्षौमकृतोल्लोचं, मञ्चमेकं मनोरमम्। कंसोऽपि स्वयमध्यास्त, विमानमिव वासवः ॥ ३२२ ॥ दशार्हा दशदिक्पाल-समाः शौरिनिमन्त्रिताः। न्यवेश्यन्त कृतोच्चूले, मञ्चे कंसेन सादरम् ॥ ३२३ ॥

अथालोक्य नृपान् कांश्चि-दृच्छतो गोकुलाध्वना। अवोचत बलं विष्णु-र्मल्लालोकनकौतुकी ॥३२४॥ मथुरामार्य! गच्छावः, पश्यावो मल्लसंयुगम्। प्रसीद माऽन्यथा कार्षीः, पूर्यतां मे मनोरथः ॥ ३२५ ॥ एतस्य पितुरादेश-माख्यातुं समयोऽधुना। इति रामो विनिश्चित्य, यशोदामभ्यधात्तदा ॥ ३२६ ॥ मथुरां गन्तुमिच्छाव-स्ततो नौ स्नपय द्रुतम्। सा प्रत्यूचे न युवयोः, स्नपनावसरो मम ॥ ३२७ ॥ क्रोधारुणाक्षः साक्षेपं, बलस्तां प्रत्यभाषत। अरे! दासि! न जानासि, स्वात्मानमतिगर्विता? ॥३२८॥ तामित्युक्त्वा करे धृत्वा, कृष्णं कृष्णमुखं रुषा। स्नानायाहूय कालिन्दीं, कालिन्दीकर्षणो ययौ ॥३२९॥ उपनीरं स वानीर-तले विष्णुमभाषत। वत्स! विच्छायवदनः, किमिदानीं विलोक्यसे? ॥३३०॥ हरिः प्रत्याह दासीति, किमात्थ मम मातरम्?। मातुर्न्यक्कारमाकर्ण्य, सकर्णो हि क्षमेत कः? ॥३३१॥ रोहिणीतनयः कृष्णं, मूर्ध्नि चुम्बन्नवोचत। यशोदा नैव ते माता, न च नन्दः पिता तव ॥ ३३२ ॥ देवकाङ्गभवा देवी, देवकी जननी तव। स्तन्यं या

१ 'ऽपि' इति प्रतिद्वय०। २ मल्लयुद्धम्। ३ बलः।

तुम्यमभ्येत्य, ददाति स्मान्तरान्तरा ॥३३३॥ पिता च वसुदेवो नौ, सुभगः खेचरार्चितः । कुशार्त्ताधिपतिर्यस्य, समुद्रविजयोऽग्रजः ॥३३४॥ ममार्य ! किमु सोदर्य ?, इत्युक्तो विष्णुना बलः । अवदद्वत्स ! बन्धुस्ते, वैमात्रेयोऽस्मि केवलम् ॥३३५॥ उद्दामयदुधामानो, यादवा ज्ञातयस्तव । भरतार्धपतिस्त्वं च, ज्ञानिभिः कथितोऽसि नः ॥ ३३६ ॥ ईदृशि त्वादृशां जन्म, न गोपालकुले भवेत् । मरुस्थले हि कल्पद्रु-रत्नलाभं लभेत किम् ? ॥३३७॥ देवकीवसुदेवाभ्यां, वत्सवात्सल्यतः परात् । पितृभ्यां गोत्रसर्वस्वं, गोपितोऽसि भयादिह ॥३३८॥ कृष्णः पप्रच्छ संभ्रान्तः, कुतो भयममूदृशाम् ? । येन क्षिप्तोऽस्मि पित्राऽस्मिन्, गोकुले गोपसंकुले ॥३३९॥ ततस्तं कंसवृत्तान्त, व्याजहार हरेर्बलः । कर्षकेणेव सद्बीज-मुप्तं काले फलेद्यच्चः ॥३४०॥

अथ बन्धुरथोद्बुद्ध-रोषोऽरिष्टारिरभ्यधात् । सर्वे मे सिद्धगन्धर्वाः, प्रतिज्ञां शृणुत क्षणम् ॥३४१॥ सर्वेषां पश्यतां राज्ञां, पापं कंसं न हन्मि चेत् । ध्रुवं तदाऽहं गृह्येय, तदीयभ्रूणहत्यया ॥३४२॥ रोहिण्यङ्गरुहो रोह-त्पुलकाङ्कुरदन्तुरः । ततो भ्रातरमालिङ्ग्य, निजगाद प्रमोदतः ॥३४३॥ साधु वत्स ! त्वयाऽऽत्मीय-कुलस्य तिलकायितम् । भूभृदाक्रमणोर्जस्वि, तेजो यस्य रवेरिव ॥ ३४४ ॥ तदिदानीमिह स्नात्वा, व्रजावो मथुरां प्रति । इत्युदीर्य बलः कृष्णं, निनाय यमुनाजले ॥३४५॥ तत्र दृष्टिविषः कालः, कालियो नाम पन्नगः । तीरवासी जले क्रीडन्, कृष्णं दष्टुमधावत ॥ ३४६ ॥ निःशूकं[1] दन्दशूकं तं, लोकः स्फारस्फटोत्कटम् । हरिं च बालमालोक्य, हाहारवपरोऽभवत् ॥३४७॥ सोऽतिभीष्मो विपोल्काभि-र्यावद्दशति केशवम् । असौ तमग्रहीत्ताव-च्छीलया गलकन्दले ॥ ३४८ ॥ लीलाकमलनालेन, नस्तयित्वा[2] जनार्दनः । आरुह्य वाहयामास, तमहिं

१ निर्दयम् । २ नासिका विध्वा ।

बलेन कृतो बोधः कृष्णस्य, कृष्णेन कृतं कालिय-नाग-दमनम् ॥

जात्यवाजिवत् ॥ ३४९ ॥ दुर्दमं दम्यमानं तं, पन्नगं वीक्ष्य विस्मिताः । तस्थुर्धृत्वा विमानानि, नभोभागे नभश्चराः ॥३५०॥ कृष्णेन दृढमूरुभ्या–माक्रम्य दमितस्तथा । स यथा सर्वथा जज्ञे, निर्विषो मरणावधि ॥ ३५१ ॥ [1]मीतप्रायमालोक्य, लोकोत्तरकृपापरः । दूरादुत्सृज्य तं विष्णुः, स्नात्वा तीरमुपागमत् ॥ ३५२ ॥ यमुनातीरवास्तव्यै–र्वीतविघ्नैस्तपस्विभिः । स यथार्थाभिराशीर्भि–रभ्यनन्द्यत भूरिशः ॥ ३५३ ॥ तेन नव्यावदातेन, सानन्दैर्नन्दनन्दनः । घोषादागत्य वेगेन, गोपालैः पर्यवार्यत ॥ ३५४ ॥ गायद्भिः कृष्णगीतानि, वादयद्भिश्च शृङ्गिकाः । तैः समं राम–गोविन्दौ, चेलतुर्मथुरां प्रति ॥३५५॥ विस्मयोत्फुल्लनयनै–र्वीक्ष्यमाणः पुरीजनैः । मथुरागोपुरं गोपै–रुपेतः प्राप केशवः ॥३५६॥ अतुल्ययोः प्रतोल्यन्त–र्विशतो राम–कृष्णयोः । कंसादिष्टमहामात्र–प्रयुक्तौ मदविह्वलौ ॥३५७॥ पद्मोत्तरो हरिं हन्तुं, चम्पकश्च हलायुधम् । उद्धुरौ सिन्धुरौ प्रेत–पतिप्रायावधावताम् ॥ ३५८ ॥ युग्मम् ॥ लीलायितशतैस्तैस्तैः, पद्मोत्तरमनुत्तरैः । कुशलो गजशिक्षासु, खेलयामास केशवः ॥ ३५९ ॥ उत्खाय दन्तमुशले, सलीलं तस्य दन्तिनः । निष्ठुरैर्मुष्टिभिर्विष्णु–र्ददौ [2]कीनाशदासताम् ॥३६०॥ [3]कण्ठीरव इवोत्प्लुत्य, भित्त्वा कुम्भस्थलं बलात् । हन्ति स्म रौहिणेयोऽपि, निष्कम्पश्चम्पकद्विपम् ॥ ३६१ ॥ विपुलं वालुकाकीर्णं, विकीर्णकुसुमोत्करम् । सश्रीकमुत्पताकं तौ, जग्मतुर्मल्लमण्डपम् ॥३६२॥ रङ्गं विशति गोविन्दे, निवृत्तविषयान्तराः । लोकस्य विस्मयस्मेरा, निपेतुर्युगपद्दृशः ॥ ३६३ ॥ स एष केशिकीनाशः, स एष वृषमर्दनः । नन्दस्य नन्दनः सोऽयं, सोऽयं सर्पस्य दर्पहा ॥ ॥ ३६४ ॥ गोपालतिलकः सोऽयं, सोऽयं सिन्धुरघातकः । श्लाघ्यमानो जनैरेव–मदर्श्यत परस्प-

१ मृतप्रायम् । २ कीनाशः–यमः । ३ सिंहः ।

रम् ॥ ३६५ ॥ अपरं जनमुत्सार्य, सोत्साहः सपरिच्छदः । आरुरोह दुरारोहं, मञ्चमेकं जनार्दनः ॥ ३६६ ॥ अथाभ्यधत्त तं रामो, वत्स ! सोदर ! वत्सल ! । व्यापार्यतामितो दृष्टि-र्विपक्षुष्टिर्द्विपज्जने ॥ ३६७ ॥ इमं किरीटकेयूर-हारकुण्डलमण्डितम् । उच्चैःसिंहासनासीनं, पश्य कंसं स्ववैरिणम् ॥ ३६८ ॥ असौ ते बन्धुविध्वंस-नवनाटकसूत्रभृत् । तदस्य दर्श्यतामङ्को, मृत्युनामाद्य नूतनः ॥३६९॥ इतोऽपि ज्ञातिवर्गं स्वं, दृशा स्वीकुरु सान्द्रया । असौ तव पिता ज्येष्ठः, समुद्रविजयो नृपः ॥ ३७० ॥ अयं च वसुदेवाख्यः, ख्यातो जनयिता तव । अक्रूराद्यास्तवैतेऽत्र, बन्धवः शौर्यसिन्धवः ॥३७१॥ इतश्चान्येऽपि राजानो, जानन्तस्त्वामुदित्वरम् । विस्मयेन निरीक्षन्ते, निरीक्ष्यन्तां त्वयाऽप्यमी ॥३७२॥ कंसे च ज्ञातिवर्गे च, द्विष्टे प्रीतिपरेऽप्यथ । क्रोधरूक्षा बहुस्नेह-मुग्धाश्चासन् दृशो हरेः ॥३७३॥ समुद्रविजयो राजा, कृष्णं नेत्रपुटैः पिबन् ॥ वसुदेवं प्रति स्निग्धां, मुदा गिरमुदाहरत् ॥ ३७४ ॥

वत्स ! प्रसेदुरस्माक-मद्यैव कुलदेवताः । सुतस्त्रैलोक्यमाणिक्यं, यदसौ ददृशे दृशा ॥३७५॥ इयन्तं समयं याव-द्वञ्चिते मम लोचने । वत्सः कृष्णः सतृष्णाभ्यां, यन्नैताभ्यामपीयत ॥ ३७६ ॥ अथाभाष्यत कंसेन, हरिं वीक्ष्य बृहस्पतिः । शत्रावमुत्र जैत्रे स्यु-र्वाचः कथमृपेर्मृपा ? ॥३७७॥ अरक्ष्यत कथं चासौ, मयि वैरिणि शौरिणा । अथवा सति चाणूरे, रक्षितोऽपि न रक्षितः ॥३७८॥ इति कंसे वदत्येव, तुङ्गजूटोद्भटाकृती । चन्दनद्रवलिप्ताङ्गौ, न्यस्तांसस्थासकौ[1] तदा ॥३७९॥ दृढं चण्डातकौ चण्ड-भुजौ पुष्टवपुष्टरौ[2] । अध्यूपतुः समामध्ये, हृष्टौ चाणूरमुष्टिकौ ॥ ३८० ॥ (युग्मम्) ततोऽभ्यर्णी-

कृष्णबलाभ्यां हतौ गजौ। तयोर्मथुरायां प्रवेशः ॥

१ स्थासकः-सुगन्धितैलेन मर्दनम्। २ पुष्टशरीरौ ।

भवन्मृत्युः, कातरो मथुरापतिः। नियुद्धायादिशद्दूरा–चाणूरं दृष्टिसंज्ञया ॥ ३८१ ॥ कृष्णं कटाक्षयन् दृष्ट्या, चाणूरः क्रूरमानसः। वाचमुच्चारयांचक्रे, राजचक्रस्य पश्यतः ॥ ३८२ ॥ योऽत्रास्ति क्षत्रियोत्तंसः, शूरंमन्यश्च यः किल। अधुना मल्लयुद्धेन, स मया सह युध्यताम् ॥ ३८३ ॥ इत्याक्षिप्तो हरिः क्षिप्रं, फालयोत्तीर्य मञ्चतः। चाणूरस्याग्रतो भूत्वा, प्रग-ल्भमिदमभ्यधात् ॥ ३८४ ॥ एषोऽस्मि क्षत्रियोत्तंसः, शूरमानी तथास्म्यहम्। तवास्मि रे! कृतान्तश्च, विपक्षक्षोददीक्षितः[1] ॥ ३८५ ॥ अथावोचत चाणूरः, सिन्दूरारुणलोचनः। अरे रे! बाल! गोपाल!, किमलीकं प्रगल्भसे? ॥ ३८६ ॥ नाद्यापि ते मुखस्यास्य, स्तन्यगन्धो निवर्तते। ततस्त्रपन्ते गात्रेऽस्मिन्, पतन्तो मम मुष्टयः ॥३८७॥ पयःपानेन पीनत्व–मानीतो गोष्ठतर्णकः। रे! कक्षाकोटरे क्षिप्तो, मया क्षिप्रं विनङ्क्षयसि ॥३८८॥ अरिष्टारिरभाषिष्ट, ततो धीरोचितं वचः। विकत्थनं तवापीत्थं, मल्लराज! न राजते ॥३८९॥ आजन्म विहिताभ्यासः, क्व त्वं मल्लमतल्लिका[2]?। गोपालकुलविद्यानां, पारदृश्वा क्व चास्म्यहम्? ॥३९०॥ किं त्वनेन नियुद्धेन, द्रक्ष्यतेऽन्तरमावयोः। चण्डेन पवनेनैव तूलपूल[3]-नगेन्द्रयोः ॥३९१॥ इत्युक्त्वा सभुजास्फोटं, केशवे वल्गु वल्गति। हाहाकारपरो लोकः, परस्परमभाषत ॥ ३९२ ॥ तरुणः क्व नु चाणूरः?, क्व चासौ गोकुलार्भकः?। न युक्तमनयोर्युद्धं, वृष–तर्णकयोरिव ॥३९३॥ एवमाकर्ण्य लोकोक्तिं, कंसः कोपादवोचत। असौ यदृच्छा-लापेषु, दक्षो दुःशिक्षितो जनः ॥ ३९४ ॥ इह केन समाहूता–वायातौ गोपदारकौ?। दुग्धमत्तौ स्वयं ह्येतौ, युध्येते को निषेधति? ॥३९५॥ इत्याक्षेपवचः श्रुत्वा, शूरसेनमहीपतेः। लोकस्तदा तदाकूतं, मत्वा मौनमशिश्रियत् ॥ ३९६ ॥ गर्वात्

१ शत्रुचूर्णने दीक्षितः। २ श्रेष्ठमल्लः। ३ 'पूग०' प्रतिद्वय०।

कुर्वन् भुजास्फोटं, स्फोटयन्निव रोदसी । ततश्चाणूरमल्लोऽपि, नियोद्धुमुपचक्रमे ॥ ३९७ ॥ तयोर्नवनवोन्मील–न्मल्लविज्ञान-दर्शिनः । तदेकताना राजानो, जाताश्चित्रार्पिता इव ॥ ३९८ ॥ बाल्यचापल्यललितै–र्हरेर्मल्लातिशायिभिः । समुद्रविजयादीनां, तदा कन्दलिता मुदः ॥ ३९९ ॥ विष्णुर्विज्ञाननिष्णात–स्तदानीं पाददर्दरैः[1] । कंसस्य मनसा सार्धं, कम्पयामास मेदिनीम् ॥ ४०० ॥

कृष्णचल-योर्मल्लाभ्यां सह युद्धम् ॥

भीतस्ततो हरिं हन्तु–मपरं मथुरापतिः । दुष्टं मौष्टिकमादिक्ष–न्नास्त्यकृत्यं दुरात्मनाम् ॥ ४०१ ॥ श्रीपतिं प्रति धावन्तं, दृष्ट्वा मौष्टिकमादरात् । सीरपाणिरभाषिष्ट, रोषपाटललोचनः ॥ ४०२ ॥ रे रे ! दुष्ट ! दुराचार !, योद्धुमुत्तिष्ठसे कथम् ? । चण्डदोर्दण्डकण्डूति–मेष व्यपनयामि ते ॥ ४०३ ॥ इत्युदीर्य समुत्तीर्य, मञ्चाद्रोमाञ्चितो हली । द्राग्योधयितुमारेभे, स मुष्टामुष्टि मौष्टिकम् ॥ ४०४ ॥ आहतो हृदये विष्णु–श्चाणूरेणाथ मुष्टिना । यादवानां समं बाष्पैः, पतति स्म भुवस्तले ॥ ४०५ ॥ हरिं मूर्च्छालमालोक्य, चक्रे हाहारवं जनः । उच्छलन्नासनात् कंसः, पुनः किलकिलारवम् ॥ ४०६ ॥ हरेः पुनः प्रहाराय, स स्वं मल्लं[2] समादिशत् । " भवेदासन्नपातानां, मर्यादाया व्यतिक्रमः " ॥ ४०७ ॥ समुद्यते हरिं हन्तुं, तस्मिन्नुत्सृज्य मौष्टिकम् । तं दृढैः कूर्पराघातै–र्बलाद्व्यावर्तयद्बलः ॥ ४०८ ॥

अथोन्मीलितचैतन्यः, स्फारोज्जागरपौरुषः । उत्तस्थौ केशवः साकं, यादवानां मनोरथैः ॥ ४०९ ॥ मूर्च्छामेघावलीमुक्त–स्तेजस्तीव्रं वहन् हरिः । कंसस्य कौशिकस्येव, भानुवद्दुःसहोऽभवत् ॥४१०॥ कृष्णेन विकसद्वक्त्रा–म्भोजमोजायितं

१ पदाघातैः । २ मल्लं ।

तथा । चाणूरेण यथा वेगात्, कृतान्तस्यातिथीयितम् ॥४११॥ कंसस्य वदनाम्भोजे, समुद्रविजयस्य च । हिमांशुश्चाहिमांशुश्च, विष्णुरेकोऽप्यभूत्तदा ॥ ४१२ ॥ मृत्युमेभिरभिज्ञानै-र्ज्ञात्वाऽरिष्टादिदारिभिः । कंसः कश्चीकृतक्षोभः, स्वान् भटानिदमब्रवीत् ॥४१३॥ रे! रे! गृह्णीत गृह्णीत, चाणूरपरिपन्थिनम् । स्वयंभूमल्लमुन्मत्त-मेनं गोपालबालकम् ॥४१४॥ एतद्गृह्यश्च संगृह्य, निग्राह्यो निर्भयैः परः । " चौरस्वीकारकर्ताऽपि, शीर्षच्छेद्यो हि चौरवत् " ॥ ४१५ ॥

व्याजहार हरिः कंसं, विकटभ्रकुटिस्ततः । किं दुरात्मन्ननात्मज्ञ !, जिह्वामालोच्य नोच्यते ? ॥४१६॥ अस्मिन् रङ्गगृहान्तर्मे, भुजेद्वयोंष्मणा कृतः । त्वया दुष्कर्मकिंपाक-परीपाकोऽनुभूयताम् ॥ ४१७ ॥ इति व्याहृत्य संहर्तुं, कंसं संतमसोपमम् । हरिस्तन्मञ्चमारोह-दुदयाचलसोदरम् ॥४१८॥ बालबान्धवविध्वंस-स्मरणारुणलोचनः । तत्रारूढः पुनः प्रौढ-मभ्यधत्त स निर्भयः ॥ ४१९ ॥ सन्ति ये तव मित्राणि, सन्ति ये ते च बान्धवाः । राजानस्ते महौजस्काः, सन्तु त्राणाय तेऽधुना ॥ ४२० ॥ अरे ! स्मरसि निस्त्रिंश !, जातमात्रान्ममाग्रजान् । निःशूकहृदय ! स्फार-शिलास्वास्फालयिष्यसि ॥ ४२१ ॥ आसीद्दोर्दण्डशौण्डीर्य-गर्वः खर्वेतरस्तव । तत्त्वया त्रातुमात्मान-मायुधे दीयतां मनः ॥ ४२२ ॥ इत्युक्त्वाऽङ्घ्रिप्रहारेण, भङ्क्त्वा मुकुटमुद्भटम् । क्षितौ चिक्षेप तं मञ्चा-दृत्वा केशेषु केशिजित् ॥ ४२३ ॥ रामोऽपि युद्धमाधत्ते, मौष्टिकेन समं द्वैः । बन्धैस्तथा यथा मञ्चाः, सर्वेऽप्युच्चैः प्रचुक्रुशुः ॥ ४२४ ॥ प्रस्विद्यद्वेपमानाङ्गः, साश्रुणी भयकातरे । दिक्षु रक्षणसाकाङ्क्षः, कंसश्चिक्षेप चक्षुषी ॥ ४२५ ॥

१ एतस्य पक्षपाती । २ ' भुजशौर्यो० ' प्रतिद्वय० । ३ बहुतरः ।

अत्रान्तरे कृतान्ताभाः, सुभटा मथुरापतेः। अरे! पापमिमं गोपं, हिंस्त हिंस्तेति वादिनः ॥४२६॥ केचित् कुन्तकराः केचि–त्तीक्ष्णनिस्त्रिंशपाणयः। युगपत्ते हरिं हन्तुं, स्वामिभक्त्या ढुढौकिरे ॥ ४२७ ॥ (युग्मम्) रुद्धं कंसभटैः कृष्णं, वीक्ष्य दोःपाशपीडनात् । रामेण मौष्टिकश्चक्रे, चाणूरपरिचारिकः ॥४२८॥ ततः स मञ्चादेकस्मा–दुत्पाट्य स्तम्भमुत्कटम् । भटान्निर्दाटयांचक्रे, तांस्तार्क्ष्यः पन्नगानिव ॥४२९॥ मध्येरङ्गं विडम्ब्योच्चै–र्हृदि पादप्रहारतः। कीनाशग्रासतां निन्ये, कंसः केशिविनाशिना ॥ ४३० ॥ कंसेन कृष्णभीतेन, स्वात्मरक्षणकाङ्क्षिणा। जरासन्धस्य यत् पूर्व–मानिन्ये सैन्यमुद्भटम् ॥ ४३१ ॥ हन्तुं कंसस्य हन्तार–महंकारवशाङ्कुशम् । सर्वं संवर्मयामास, तद्दुर्योधमुदायुधम् ॥४३२॥ समुद्रविजयानीकै–स्तद्बलं मगधेशितुः । प्रभञ्जनैरिव रज–स्तूर्णं निन्ये विशीर्णताम् ॥४३३॥ बन्धुविध्वंससामर्षः, कंसं स्वकुलपांसनम्। रङ्गा–द्बहिर्निचिक्षेप, धृत्वा केशेषु केशवः ॥ ४३४ ॥

इतः किलकिलाराव–मुखराः शौरिवेश्मनि। दत्त्वा श्रीस्थानमास्थानं, तस्थुः सर्वेऽपि यादवाः ॥४३५॥ हृष्टो रथमना–धृष्टि–र्बलेन सह केशवम् । आरोप्य प्रापयामास, शौरिमन्दिरमादरात् ॥४३६॥ कृष्णमायान्तमालोक्य, लोकोत्तरवपुः–श्रियम् । पिबन्तो नेत्रपुटकै–र्यादवाः प्रययुर्मुदम् ॥ ४३७ ॥ शौरिस्तु निस्तुपापत्य–स्नेहसोल्लासमानसः । प्रत्युद्याय हृषी–केश–माश्लिक्षेप मुहुर्मुहुः ॥४३८॥ पादारविन्दं गोविन्दो, ववन्दे ज्यायसः पितुः । तं सोऽप्युद्धुररोमालि–रालिङ्ग्याङ्के न्यवेश–यत् ॥ ४३९ ॥ समुद्रविजयः पश्य–न्नास्यतामरसं हरेः । संपन्नसुमनोभावः, स्वं चक्रे निर्निमेषताम् ॥ ४४० ॥ अभ्येत्य

कृष्णेन कृतः कंसवधः। कृष्णस्य पितृगृहे गमनम् ॥

१. ('निर्घाटयांचक्रे' इति स्यात् ।) २ स्वीचक्रे प्रतिद्वय० ।

देवकी तत्र, प्रस्रवत्क्लिन्नकञ्चुका । चिरेण पुत्रगात्रस्य, स्पर्शसौख्यमशिश्रियत् ॥ ४४१ ॥ चकार मथुरानाथ-मुग्रसेनं
नरेश्वरः । सत्यभामां सुतां सोऽपि, जिष्णवे विष्णवे ददौ ॥ ४४२ ॥ दिव्यस्य धनुषः पूर्व-मारोपणपणीकृताम् । गुरु-
भिस्तामनुज्ञातः, परिणिन्ये जनार्दनः ॥ ४४३ ॥

इतः परीतः शोकेन, कंससीमन्तिनीजनः । विललाप विलिप्ताङ्गः, सर्वतः क्षोणिरेणुभिः ॥ ४४४ ॥ समस्ताभिः सप-
त्नीभिः, समेताऽत्यन्तदुःखिता । ययौ जीवयशास्तत्र, यत्र कंसोऽस्ति संस्थितः ॥४४५॥ व्यात्तदीनाननं दूरा-द्रजोभिरव-
गुण्डितम् । तमुद्वीक्ष्य मृगाक्ष्यस्ताः, समस्ता मुमुहुर्मुहुः ॥ ४४६ ॥ अवसाने च मूर्छायाः, प्रोच्छलच्छोकविह्वलाः । सोरस्ताडं
सपूत्कार-मरुदन्मेदिनीगताः ॥ ४४७ ॥ अथ कंसस्य संस्कारे, जातेऽपि मगधात्मजा । यादवेष्वतिसाक्षेपा, न निवापाञ्जलिं
ददौ ॥४४८॥ उच्चैरवोचदेतच्च, सरामैः सजनार्दनैः । यादवैः सह दास्यामि, प्राणेशाय जलाञ्जलिम् ॥४४९॥ सप्रतापाज्जरा-
सन्धात्, क्व दवादिव यादवाः । कान्दिशीकाः प्रयास्यन्ति, शरणाय मृगा इव [1] ॥४५०॥ इति प्रतिज्ञामेतस्या, निशशाम विशां-
पतिः । उद्बुद्धक्रोधकल्लोल-लोलमेतज्जजल्प च ॥४५१॥ प्रगल्भते किमत्रैवं, मुधा मगधनन्दिनी । यच्छिक्षितं तदाख्यातु, पितुर्ग-
त्वाऽधुनैव सा ॥४५२॥ इत्यवज्ञागिरं राज्ञः, श्रुत्वा साऽथ समुत्सुका । जगाम ग्रामनगरा-ण्युल्लङ्घ्य पितुरालयम् ॥ ४५३ ॥

राजा राजगृहे याता-मेतां विज्ञाय सादरम् । अभीत इव भीतोऽपि, सर्वानाह्वास्त यादवान् ॥४५४॥ अथ क्रोष्टुकि-
माहूय, नृपः पप्रच्छ तैः सह । विरोधिनि जरासन्धे, यत्कर्तव्यमतः परम् ॥४५५॥ स व्याजहार राजंस्ते, भवितारौ सुता-

१ व्यात्तम्.

रिमौ । भरतार्धमहर्द्धीनां, विश्रामौ राम–केशवौ ॥४५६॥ किं तु क्षेत्रं च कालं च, समाश्रित्य शरीरिणाम्। भवन्ति भागधेयानि, विविधानि न संशयः ॥ ४५७ ॥ ततः क्षेत्रमिदं मुक्त्वा, पश्चिमाम्भोधिरोधसि । युष्माभिः सपरीवारै–र्गम्यतामधुना द्रुतम् ॥ ४५८ ॥ तस्मिन् यत्र स्थिता कृष्ण–भाग्यजागरडिण्डिमौ । सत्यभामा सुतौ सूते, तत्र स्थाप्या पुरी वरा ॥४५९॥ इत्युपश्रुत्य सत्कृत्य, तं विसृज्य प्रजेश्वरः । कुशार्तमधुरालोकैः, सह प्रस्थानमादधे ॥ ४६० ॥ बिभ्राणो भाविकल्याण–पिशुनैः शकुनैर्मुदम् । सरिद्भूधरकान्तारा–ण्यतिचक्राम स क्रमात् ॥४६१॥ स क्रोष्टुकिसमादिष्टे, पश्चिमाम्भोधिरोधसि । सैन्यं निवेशयामास, निर्तीर्णनगरभ्रमम् ॥४६२॥ सुतावसूत सत्याऽपि, तत्र सौस्थ्येन तस्थुषी । कल्पद्रुमावनिद्राण–सुवर्णा मेरुभूरिव ॥४६३॥

ततो नैमित्तिकादेशात्, केशवो लवणाधिपम् । सुस्थितं संमुखीकर्तु–मकार्षीदष्टमं तपः ॥४६४॥ आहूतस्तपसा तेन, रत्नप्राभृतसंभृतः । उपेन्द्रमुल्लसत्प्रीति–रुपतस्थेऽथ सुस्थितः ॥ ४६५ ॥ व्याहरच्च हृषीकेशं, निदेशस्थितमात्मनः । जनमेनं विजानीहि, ततः कार्ये नियोजय ॥४६६॥ प्रीत्या प्रत्याह गोविन्द–स्तोयधेः (धे !) संविधेहि मे । प्रवरं नगरीस्थानं, पूर्वकेशवरुद्धितः ॥४६७॥ इत्युक्तो नगरीभूमिं, पाञ्चजन्यं च मञ्जुलम् । कौस्तुभं च मुकुन्दाय, प्रदायान्तर्दधेऽम्बुधिः ॥४६८॥ अहोरात्रेण तत्रेन्द्र–निदेशाद्धनदः स्वयम् । चक्रे द्वारवतीं नाम, विजितस्वःपुरीं पुरीम् ॥४६९॥ वप्रो वज्रमयस्तस्यां, नभःस्पृक्कपिशीर्षकः । अभ्रंलिहानि वेश्मानि, नानामणिमयानि च ॥४७०॥ दिनानर्धचतुर्थांश्च, यक्षा वैश्रवणाज्ञया । रत्नैरनर्घैर्ववृषु–र्जलैर्वर्षाघना इव ॥४७१॥ तत्राभिरामानारामा–न्नन्दनोद्यानबान्धवान् । किंकरैः कारयामास, कुबेरो वासवाज्ञया ॥४७२॥

कंसस्त्रीविलापः। शौरेः समुद्रतीरे गमनम्। द्वारकास्थापनम् ॥

१ दिवसान ।

ततो द्वारवतीराज्ये, समुद्रविजयादिभिः । मुकुन्दः प्रोद्यदानन्द–सौरभ्यैरभ्यषिच्यत ॥४७३॥ पुरन्दरपुरीसख्यां, राजन्वत्यां सुरा इव । तस्यां पुरि सदानन्दाः, स्वैरं नन्दन्ति यादवाः॥ ४७४ ॥

लीलावनेषु वापीषु, क्रीडाद्रिषु यदृच्छया । समं नेमिकुमारेण, रेमाते राम–केशवौ ॥ ४७५ ॥ आश्चर्यं पश्चिमा येयं, ज्योतिषामस्तकारिणी । यादवानां पुनः साऽपि, महाभ्युदयहेतवे ॥ ४७६ ॥ इति प्रीतस्य देवस्य, जनार्दनमहोदये । सांप्रतं त्वेतदायात–मुत्सवादुत्सवान्तरम् ॥४७७॥ यद्देवि ! कुन्ति ! ते पुत्र–जन्मना यादवेश्वरः । दिष्ट्येति वर्धितश्चारै–रायातैर्हस्तिनापुरात् ॥४७८॥ पुत्रोत्पत्तिं तवाकर्ण्य, मुदमुद्वहताऽधिकम् । त्वन्माङ्गल्याय देवेन, तदद्य प्रहितोऽस्म्यहम् ॥ ४७९ ॥ इति वृद्धिं स्वबन्धूनां, श्रुत्वा सर्वातिशायिनीम् । कुन्ती वहन्ती रोमाञ्चं, प्रत्यवोचत कोरकम् ॥४८०॥ साधु कोरक साधु त्वं, कथामिष्टामचीकथः । महोत्सवानुबन्धी मे, जातोऽयं तनयोत्सवः ॥४८१॥ बान्धवा मम जीयासु–र्जीयासुर्बन्धुसूनवः । ममाशिषमिमां तेषां, प्रियंवद ! निवेदयेः ॥४८२॥ इत्थमाभाष्य सत्कृत्य, कुन्त्या कृत्येषु दक्षया । कोरकः प्रोद्गतप्रीति–र्गमनाय व्यसृज्यत ॥ ४८३॥ युधिष्ठिरकुमारोऽपि, बालकल्पाङ्घ्रिपोपमः । मातृवात्सल्यपीयूषैः, पोषितो ववृधे क्रमात् ॥४८४॥ अव्यक्तवर्णरमणीयवचःप्रचारो, रिङ्गन् कदाचन कदाचन पादचारी । नव्योल्लसद्दशनहास्यमनोहरास्यः, कस्य प्रतिक्षणमभून्न मुदे कुमारः ? ॥४८५॥

इति मलधारिश्रीदेवप्रभसूरिविरचिते पाण्डवचरिते महाकाव्ये कृष्णनेमिजन्मद्वारिकास्थापन-
युधिष्ठिरजन्मवर्णनो नाम द्वितीयः सर्गः ॥ २ ॥

---

१ धर्मिष्ठनृपाधिष्ठितायाम् । २ 'मालप्य' इति प्रतिद्वय० ।

युधिष्ठिर-जन्म।
कुन्त्या द्वितीय-गर्भः।
गन्धारी-गर्भः।

अथ तृतीयः सर्गः

धर्मकल्पद्रुमस्याथ, पुनरेव फलार्थिनी। नासिक्येऽकारयत् कुन्ती, श्रीचन्द्रप्रभमन्दिरम् ॥ १॥ प्रदीपा यत्र निस्त्रास-नानामणिविनिर्मिते। प्रभाध्वस्ततमःस्तोमे, मङ्गलायैव केवलम् ॥ २ ॥ प्रसादभुक्तिरात्मीया, नासिक्यमिति तत्र सा। गत्वा गत्वा पुनश्चक्रे, जिनधर्मप्रभावनाम् ॥ ३ ॥ धर्मकर्मैकनिर्माण-व्यसनव्यवसायिनी। पुनरापन्नसत्त्वाऽभूत्, पाण्डुराजसधर्मिणी ॥ ४ ॥ तस्याः स्वप्नेऽक्षिपद्वृक्ष-भञ्जनोऽथ प्रभञ्जनः। आनीय नन्दनोद्याना-दङ्के कल्पमहीरुहम् ॥ ५ ॥ पत्ये शशंस सा स्वप्न-मेनमेनोविनाकृता। तदर्थमर्थिकल्पद्रु-स्तत्पुरः सोऽप्यचीकथत् ॥ ६ ॥ पवमानोपमानस्ते, वलिष्ठैकशिरोमणिः। प्रदत्त-जगदाश्वासो, भविता तनयोऽद्भुतः ॥ ७ ॥ इत्याकर्ण्य दधौ साऽन्यं, हर्षरोमाञ्चकञ्चुकम्। "उत्कल्लोलं भवेच्चेतः, श्रुतेऽपि तनुजन्मनि" ॥८॥ उत्पाटयामि शैलेन्द्र-मपि निर्दलयामि वा। तस्याः प्रादुरभूदेवं, स्फूर्तिर्गर्भानुभावतः ॥९॥ दूरमुज्जाग-रौजस्का, वज्रमप्यङ्गुलीमुखैः। सा तदा पक्वकर्पूर-कणचूरमचूरयत् ॥ १० ॥ गर्भाविर्भावितस्थाम-जनितोत्साहसाहसा। अमन्दोन्माद्यदानन्दा, सा दिनान्यत्यवाहयत् ॥ ११ ॥

इतश्च गर्भदौरात्म्यात्, कृतैरौपयिकैरपि। गान्धारी प्रसवं प्राप, न मासैस्त्रिशताऽपि हि ॥ १२ ॥ उदरं बिभ्रती दूरं-मलिञ्जरसहोदरम्। क्लेशावेशवशाच्चित्ते, गान्धारीदमचिन्तयत् ॥ १३ ॥ अहो! मे दत्ततापस्य, पापस्य परमो [6]विधिः।

१ त्रासो मणेर्दोषविशेषः। २ एनः पापं, तद्रहिता इत्यर्थः। ३ स्वप्रभावम्। ४ अङ्गुल्यग्रैः। ५ महत्। ६ 'ऽवधिः' इति स्यात्।

यदेतन्मारकं दुःख-मिहैवानुभवाम्यहम् ॥ १४ ॥ यत्त्वीदृशं पुरस्तान्मे, कुन्ती सुतमजीजनत् । पंश्य सर्वंकषस्यापि, सा दुःखस्यापि चूलिका ॥ १५ ॥ अधुनाऽपि निराधिर्य-न्निकटप्रसवा पुनः । तन्मामन्तः शितैः कुन्तैः, कुन्ती हन्ति प्रतिक्षणम् ॥ १६ ॥ इति चिन्तापरस्वान्ता, नितान्तं दुःखविह्वला । उदरं ताडयामास, सा शीघ्रप्रसवार्थिनी ॥१७॥ पीडोत्पीडकृता बाढ-माधिना ताडनेन च । अभूदपरिपूर्णोऽपि, गर्भस्तस्यास्तदा बहिः ॥ १८ ॥ मांसपिण्डोपमं सा तं, पश्यन्ती साश्रुलोचना । विषादमासददूरं, "दत्ते क्रुद्धो विधिर्न किम्" ? ॥ १९ ॥ त्वं मे मनोरथानित्थं, किं निकृन्तसि निष्कृप ! । इति दैवमुपालब्ध, लब्धार्तिः सा मुहुर्मुहुः ॥ २० ॥ विस्रेण मांसपिण्डेन, किमनेन ममाधुना ? । इत्युत्स्रष्टुं समारेभे, सा बहिस्तमवज्ञया ॥२१॥

अथ ज्ञातप्रबन्धाभि-रेत्य वृद्धाभिरादरात् । प्रत्यपिध्यत सा बाढं, मा मा मेत्युक्तिपूर्वकम् ॥ २२ ॥ अजल्पंश्च पपातेदं पुत्ररत्नं तवोदरात् । अभाग्येनार्धनिष्पन्नं, वायुनेव तरोः फलम् ॥ २३ ॥ एतत्तु तव कल्याणि !, न मौग्ध्यं ज्ञातुमीश्महे । यदुपक्रमसे त्यक्तु-मपस्करमिवात्मजम् ॥ २४ ॥ अथ साऽकथयत्तथ्यं, मातरः ! शृणुत क्षणम् । गर्भाधाने ममामुष्मिन्, प्रवृत्तमिति चेतसा ॥ २५ ॥ अहं महीपतेः पत्नी, न तावदभवं पुरा । भविष्यामि महीपाल-माता त्वेतत्प्रसादतः ॥ २६ ॥ इत्थं मयि कृताशायां, कुन्त्यसूत युधिष्ठिरम् । तां संप्रत्यहमश्रौष-मासन्नप्रसवां पुनः ॥ २७ ॥ ततो मेदस्विनिर्वेदात्, स्वं निन्दन्ती मुहुर्मुहुः । तूर्णप्रसवसाकाङ्क्षा, कुक्षिं निजमकुट्टयम् ॥ २८ ॥ उशन्ति सत्यमेवैत-द्बुद्धिः कर्मानुसारिणी । तदिदं जातमीक्षध्वं, ब्रूत यत्तत्करोम्यहम् ॥ २९ ॥ ततस्तामभ्यधुर्वृद्धा, आधिं वत्से ! मुधा व्यधाः । कर्माणि हि प्रतिप्राणि, पृथ-

१ प्राप्ता मया । २ अतिखेदात् ।

कप्रसवते फलम् ॥ ३० ॥ वत्से ! मात्सर्यमुत्सार्य, परमार्थे मनः कुरु । पश्यैकाग्रमनाः कुन्ती, धर्ममाराधयत्यलम् ॥ ३१ ॥ धर्मप्रभावसंपन्न-निःशेषाभीष्टसंपदि । ततश्च मत्सरं वत्से !, धत्से कुन्त्यां कथं वृथा ? ॥ ३२ ॥ स्वल्पैः कल्पद्रुमप्रायै-र्धर्मं नोपमिमीमहे । संकल्पतुलया ते हि, यल्लोकमुपकुर्वते ॥ ३३ ॥ यदीच्छावीरुधं वत्से !, विधातासि फलेग्रहिम् । धर्मालवाल-मेतस्याः, सिञ्च श्रद्धामृतैस्ततः ॥ ३४ ॥ लक्ष्यते लक्षणैरेभि-र्भावी बहुयुधिष्ठिरः । तवात्मजोऽपि तन्मा स्म, खिद्यथाः सर्वथा शुभे ॥ ३५ ॥ असौ ते त्रिंशतं मासान्, गर्भे तस्थाविदं कियत् । द्वादशापि समाः कश्चि-त्तिष्ठत्युदरकन्दरे ॥ ३६ ॥ इदानीं तु सुतस्यास्य, जीविताय यतामहे । इत्युक्त्वा ताभिरभ्यक्तः, सर्पिषा तूलसंचयः ॥ ३७ ॥ तेन प्रावृत्य तं बालं, स्वर्णकुंड्यां निधाय च । एकान्ते तां व्यवस्थाप्य, निधानमिव दध्रिरे ॥ ३८ ॥

अथ संपूर्णसर्वाङ्गो, मातुः स्तन्येन सोऽर्भकः । दधौ वृद्धिं परां बाल-विटपीव घनाम्भसा ॥ ३९ ॥ असूत दिवसे यस्मिन्, गान्धारी तं तनूरुहम् । तस्मिन् यामैस्त्रिभिः पश्चात्, सुतं कुन्त्यप्यजीजनत् ॥ ४० ॥ तयोर्भाग्यमहो भिन्न-मप्येकदिनजातयोः । यदाद्योऽजनि दुर्लग्ने, सुलग्ने कुन्तिसूः पुनः ॥ ४१ ॥ उद्दिश्य पाण्डुजन्मान-मभून्नभसि भारती । विजयी वज्रकायोऽय-मुद्दामबलमन्दिरम् ॥ ४२ ॥ भक्तः सहोदरे ज्येष्ठे, जगद्विधुरबान्धवः । भावी मोहच्छिदाच्छेकः, क्रमात्सिद्धिवधूवरः ॥ ४३ ॥ (युग्मम्) प्रीता कुन्ती सुतेनैव, दिवि देवा महोत्सवम् । चक्रुश्चकार पाण्डुस्तु, युगपत् सुतयोर्द्वयोः ॥ ४४ ॥ दुर्योधन इत्याद्यस्य, भीम इत्यपरस्य च । धृतराष्ट्रश्च पाण्डुश्च, पुत्रयोर्नाम चक्रतुः ॥ ४५ ॥ भीम-

१ कल्पवृक्षसदृशैः कामघटादिभिरित्यर्थः । २ अत्यन्तं युधिष्ठिरसदृशः इत्यर्थः ।

स्यातोऽभवन्नाम, मरुत्तनय इत्यपि । स्वभे कल्पद्रुमव्याजा-द्दत्तोऽसौ मरुता यतः ॥ ४६ ॥ पञ्चभिर्लालितौ यत्ना-द्धात्रीभिर्मातृवत् सदा । तौ क्रमाजग्मतुर्वृद्धिं, पञ्चास्यपृथुकाविव ॥ ४७ ॥ रिङ्खन् दुर्योधनः पश्चा-देत्य भीमेन रिङ्खता । बलिना बालचापल्या-द्धृत्वा पादे व्यकृष्यत ॥ ४८ ॥ कदाचिच्च स भीमेन, प्रीत्या मात्रा समर्पितम् । भक्ष्यं हठेन हस्ताग्रा-दाच्छिद्योच्चैररोदयत ॥ ४९ ॥ मिथः कलिकरौ जातु, जातु केलिपरायणौ । एकामत्रभुजौ जातु, तावभूतामनारतम् ॥ ५० ॥

हासयन्नथ वासन्तीं, चन्द्रिकाचन्दनाञ्चितः । मल्लिकामोदसुरभिः, सुरभिः समजृम्भत ॥ ५१ ॥ वसन्तेनोपनीतानि, प्राप्य चूताङ्कुरच्छलात् । नवान्यस्त्राणि पुष्पास्त्र-स्तृणं जगदजीगणत् ॥ ५२ ॥ जगज्जिगीषोः पञ्चेषोः, प्रयाणे जयशंसिनः । ध्वनयोऽदुन्दुभीयन्त, मधुराः पिकयोषिताम् ॥ ५३ ॥ गलद्बकुलकिञ्जल्क-पङ्किलीभूतभूतलम् । पुष्पडम्बरितं पाण्डुः, क्रीडावनमथागमत् ॥ ५४ ॥ भीमं षण्मासदेशीय-मादाय मधुराकृतिम् । पत्या सह ययौ कुन्ती, वसन्तश्रियमीक्षितुम् ॥ ५५ ॥ विकाशिकेशरे पुष्प-त्तिलके चारुचम्पके । पत्या सार्धं वने राजा, विजहार मनोरमे ॥५६॥ लीलयाऽपि क्षिपन् पाणिं, बालः सुलभचापलः । मूलादुन्मूलयामास, विविधान् सविधद्रुमान् ॥ ५७ ॥ प्रियया सार्धमासाद्य, दोलान्दोलनकौतुकम् । आरुरोह महीपालः, सहेलः केलिपर्वतम् ॥ ५८ ॥ कुन्त्यपि प्रेक्षितुं शैल-ग्रामणीरामणीयकम् । समारोहद्दुरारोहा, पत्यानुपदिकी मुदा ॥ ५९ ॥ स्वैरमाराममारामं, वापीं वापीं सरः सरः । सर्वमालोकयांचक्रे, गिरेस्तस्य नृपप्रिया ॥ ६० ॥ पर्यन्तशिखरस्याग्रे, समासादितजन्मनः । कङ्केलिपादपस्याधः, सा विधत्ते स्म विश्रमम् ॥ ६१ ॥ कुरुवंशनवोत्तंस !, जगन्ने-

१ सिंहकिशोरकौ । २ एकपात्रभुजौ । ३ कामः । ४ जेतुमिच्छोः । ५ समीपवृक्षान् ।

प्रसुधाकर!। इत्थमुल्लापयामास, भीमं कृत्वाऽङ्कखेलिनम् ॥ ६२ ॥ एवमुल्लाप्यमानस्य, भीमस्योत्सङ्गसङ्गिनः । श्रमध्वंसाय धात्रीव, निद्राऽभून्नेत्रगोचरा ॥ ६३ ॥

पाण्डुकुन्त्योर्वसन्तक्रीडा। भीमस्य गिरेः पतनम् ॥

वने च विहरन् स्वैर-ममन्दानन्दकन्दलः । स्वयं चम्पकपुष्पाणां, स्रजं जग्रन्थ पार्थिवः ॥६४॥ तामुपादाय दायाद-तुल्यां निजतनुद्युतेः । आत्मसंमुखमायान्तं, कुन्ती कान्तं व्यलोकयत् ॥ ६५ ॥ त्वं कण्ठ! वर्धसे दिष्ट्या, प्रेम्णा प्रेयानिमां स्रजम् । यत्तुभ्यमुपनेतेति, मुदः साऽभूद्वशंवदा ॥ ६६ ॥ पिबन्ती लोचनैर्नाथ-मभ्युत्तस्थौ झटित्यसौ । विस्मृतात्मा न चाबोधि, भीममुत्सङ्गशायिनम् ॥ ६७ ॥ तदेव नृपतिः कान्ता-कण्ठे चिक्षेप च स्रजम् । भीमोऽतिनिःसहवपु-स्तदुत्सङ्गात् पपात च ॥ ६८ ॥ करौ व्यापारयामास, पुत्ररक्षार्थमेकतः । स्रजोऽर्थे चान्यतः कण्ठं, सा शोक-प्रमदाकुला ॥ ६९ ॥ ततः शृङ्गाल्लुठन् बालो, हाहारवमुखैर्जनैः । गण्डशैलकलां बिभ्रत्, साश्रुनेत्रैरदृश्यत ॥७०॥ अधोऽधः पततस्तस्य, शिलासोपानतः क्रमात् । प्रादुर्बभूवुष्टात्कारा:, कुन्तीहृन्मर्मभेदिनः ॥ ७१ ॥ पूर्वकायनता कुन्ती, विलापतुमुला सुतम् । तत्पीडागमनायेव, सिञ्चति स्माश्रुवीचिभिः ॥ ७२ ॥ पश्यतामेव सर्वेषां, लोठं लोठं तटात्तटे । स बालः स्थूलपाषाणा-मुपागमदुपत्यकाम् ॥ ७३ ॥ प्लवंगमा इवोत्प्लुत्य, अङ्घाला वायुरंहसः । तस्यानुपदमुत्ताल-मुत्तेरुर्नृपपत्तयः ॥ ७४ ॥ हा! वत्स! क्वासि? दृश्योऽसि, मया जीवन् पुनः कदा?। दूरतः पेतुषो वत्स!, यद्वा ते जीवितं कुतः? ॥७५॥ इत्थं विलापैरत्यन्त-करुणैर्मर्मभेदिभिः । उच्चैः प्रतिरवव्याजा-द्रोदयन्ती गिरीनपि ॥ ७६ ॥ कुन्ती शोकाकुला जात-डिम्बेन सह पाण्डुना। पुत्रालोकनसोत्कण्ठा,

१ 'बिभ्रदश्रुने०' प्रतिद्वय०। २ अङ्घावलवन्तः । ३ डिम्बः-हाहारवः ।

शनैः शोकादवातरत् ॥ ७७ ॥ (त्रिभिर्विशेषकम्) उवाच राज्ञी प्राणेश !, केनैताश्चूर्णिताः शिलाः ?। न जानामीति तेनोक्ते, देवी पुनरभाषत ॥ ७८ ॥ अमून् भीमद्रुहः को हि, दारुणान् दारयिष्यति ? । शङ्के स्वेनैव पापेन, शीर्णास्तु कणशः स्वयम् ॥ ७९ ॥ तेनानवाप्तपूर्वेण, नगोत्तारक्रमेन च । पुत्रशोकेन चात्यन्तं, कुन्ती वैक्लव्यमागमत् ॥ ८० ॥

अथातिरंहसा कांश्चि-द्व्याकोशास्यकुशेशयान् । पत्तीनागच्छतो दूरा-द्वीक्षांचक्रे क्षितीश्वरः ॥ ८१ ॥ तत्प्रमोदानुमानेन, परिज्ञाय नृपोऽभ्यधात् । देवि ! त्वं वर्धसे दिष्ट्या, कुशली तव नन्दनः ॥ ८२ ॥ इति वर्धयतो राज्ञीं, राज्ञस्तेऽपि व्यजिज्ञपन् । अग्रेऽसौ विजयी स्वामि-न्नक्षताङ्गस्तवात्मजः ॥ ८३ ॥ देवीक्रोडस्थितस्येव, त्वत्पुत्रस्य मनागपि । पेतुषोऽपि गिरेः शृङ्गा-न्मुखरागो न भिद्यते ॥८४॥ एतत् कथितमस्माभि-रन्यदत्यद्भुतं पुनः । पुरो गत्वा स्वबालस्य, स्वयमालोकयिष्यसि ॥ ८५ ॥ इति वार्तासुधापान-प्रोपिताशेषवैशसा । त्वरितं त्वरितं भीम-जननी पुरतो ययौ ॥ ८६ ॥ राजाऽपि राजमानास्यः, प्रेयसी-पृष्ठतो व्रजन् । समाससाद तं देशं, यत्रास्ति क्षेमवान् सुतः ॥ ८७॥ शिलाचूर्णमये तल्पे, सुखोत्तानशयं सुतम् । अक्षतं शत-पत्राक्षं, तौ निरीक्षांबभूवतुः ॥ ८८ ॥ तमुद्वीक्ष्य तयोरासीत्, प्रीतिर्वाचामगोचरा । तौ समालोक्य बालोऽपि, हर्षादुद्बाहु नृत्यति ॥ ८९ ॥ ऊर्ध्वमूर्ध्वं लसद्बाहुं, भीममादाय वक्षसा । कुन्ती सानन्दमालिङ्ग्य, चुचुम्ब प्रस्नुतस्तनी ॥ ९० ॥ गतभत्पूहमुत्फुल्ल-लोचनः पाण्डुभूपतिः । बलादाच्छिद्य पत्नीतः, सानन्दं सस्वजे सुतम् ॥ ९१ ॥ पृथा पप्रच्छ पृथ्वीश-मार्यपुत्र ! द्रढीयसी । असौ शिला समग्राऽपि, बिभिदे कणशः कथम् ? ॥ ९२ ॥ पार्थिवः कथयामास, प्रिये ! तव तनूरुहः ।

१ विकसितमुखकमलान् । २ नष्टसर्वविघ्ना ।

यन्नकायोऽयमाख्यायि, भारत्या ननु दिव्यया ॥ ९३ ॥ तदस्य वपुषा बाढं, वज्रेणेवाभिताडिता । शिलेयं केलिशैलस्य, चूर्णीभावमुपाययौ ॥९४॥ योऽपि खण्डीकृतो दृष्टः, प्रस्तरोऽद्य त्वया पथि । तदपि त्वत्तनूजस्य, तनूंशातविजृम्भितम् ॥९५॥ तच्छ्रुत्वा विस्मितस्वान्ता, कुन्ती कान्तिमुपेयुषी । आदाय दयिताद्भीम-मालिलिङ्ग मुहुर्मुहुः ॥९६॥ प्रयातभूमिं भीमस्य, भूद्गारानर्जितैर्जलैः । निषिच्य श्रेयसे वृद्धाः, क्षणादानर्चुरक्षतैः ॥ ९७ ॥ ततो मुदितयोपात्त-सुतया प्रियया समम् । उत्तम्भितध्वजां राजा, राजधानीमुपाययौ ॥ ९८ ॥

अभ्रंमूवल्लभारूढं, निशाशेषे कदाचन । स्वप्ने महेन्द्रमद्राक्षीत्, पृथा पृथुमनोरथा ॥ ९९ ॥ सा स्वप्नं कथयामास, पत्युः प्रातः प्रमोदिनी । तस्यै सोऽपि समाचख्यौ, शक्राभं भाविनं सुतम् ॥ १०० ॥ ततः प्रीतिं परां प्राप्ता, श्लाघ्यं गर्भं बभार सा । "प्रातःकालोपलब्धो हि, स्वप्नः सद्यः फलप्रदः" ॥ १०१ ॥ स्वयं सागरपर्यन्तां, मेदिनीमनुपद्रवाम् । मण्डलीकृतकोदण्डा, कर्तुमीहांबभूव सा ॥ १०२ ॥ समयेऽपि समागत्य, प्रजाः संहरतस्तदा । कृतान्तस्यापि सा कर्तुं, स्पृहयामास निग्रहम् ॥ १०३ ॥ सूर्याचन्द्रमसौ जातु, यत्तुतोद विधुंतुदः । तस्मिन्नपि बभूवेय-मभिषेणनकाङ्क्षिणी ॥ १०४ ॥

इत्थं गर्भप्रभावोत्थ-धीरोदात्तमनोरथा । तनयं जनयामास, सा मुहूर्ते मनोहरे ॥ १०५ ॥ तदैव दिवि वाग्देवी, सर्वतः शुश्रुवेतराम् । अमावाराधितज्येष्ठो, जगदेकधनुर्धरः ॥ १०६ ॥ दुर्धर्षोऽत्यन्तसौम्यास्यः, सामर्षो नयवत्सलः । भविष्यति क्रमात् कर्म-निर्मुक्तो मुक्तिवल्लभः ॥ १०७ ॥ (युग्मम्) तदनन्तरमाकाशे, संगीतमुदजृम्भत । रम्भो-र्वशीप्रभृतयो, नृत्यम-

१ तनू-शरीरम् । २ ऐरावणगजारूढम् । ३ राहुः । ४ सक्रोधः ।

प्सरसो न्यधुः ॥ १०८ ॥ जगुर्जगन्मनोहारि–मूर्छनं किन्नरेश्वराः । अजायत पुनर्वाद्य–नादाद्वैतं तथा दिवि ॥ १०९ ॥ प्रदत्तत्रिदशानन्दे, तस्मिन्नात्मजजन्मनि । प्रमोदकृतसंवादं, पाण्डुश्चक्रे महोत्सवम् ॥ ११० ॥ तं चकार स नाम्नाऽपि, गुणैरर्जुनमर्जुनम् । इन्द्रस्य ! दर्शनात् स्वप्ने, जातोऽसाविन्द्रसूरिति ॥ १११ ॥

अथ श्लाघ्यतमस्वप्न–सूचितौ निचितौ श्रिया । यमलौ जनयांचक्रे, मद्रराजसुता सुतौ ॥ ११२ ॥ तावप्याकाशभारत्या, कथितौ यद्भविष्यतः । सत्त्वशौर्ययुतौ सिद्धि–गामिनौ गुरुवत्सलौ ॥ ११३ ॥ प्रदत्तया पितृभ्यां तौ, विनीतौ नयशालिनौ । नकुलः सहदेवश्चे–त्याख्यया ख्यातिमीयतुः ॥ ११४ ॥ अमी कुमाराः पञ्चापि, दिविषत्पादपा इव । यशःकुसुमसौरभ्य–सुभगाः ख्यातिमाययुः ॥ ११५ ॥

गान्धारीप्रमुखाश्चाष्टौ, धृतराष्ट्रस्य याः प्रियाः । अजायन्त सुतास्तासां, क्रमाद्दुर्योधनानुजाः ॥ ११६ ॥ पुत्राणां नवनवति–स्तेषां नामानि तद्यथा । आसीद्दुःशासनः पूर्वो, दुःसहो दुःशलस्तथा ॥ ११७ ॥ रणः श्रान्तः समाढ्यश्च, विन्दः सर्वसहोऽपि च । अनुविन्दः सुभीमश्च, सुबाहुर्दुष्प्रधर्षणः ॥ ११८ ॥ दुर्मर्षणः सुगात्रश्च, दुष्कर्णो दुःश्रवास्तथा । वरवंशो विकीर्णश्च, दीर्घदर्शी सुलोचनः ॥ ११९ ॥ उपचित्रो विचित्रश्च, चारुचित्रः शरासनः । दुर्मदो दुष्प्रगाहश्च, युयुत्सुर्विकटाभिधः ॥१२०॥ ऊर्णनाभः सुनाभश्च, तथा नन्दो–पनन्दकौ । चित्रवाणश्चित्रकर्मा[3], सुवर्मा दुर्विमोचनः ॥ १२१ ॥ अयोबाहुर्महाबाहुः, श्रुतवान् पद्मलोचनः । भीमबाहुर्भीम-

१ जगतो मनोहारिणी मूर्छना यस्मिन् कर्मणि यथा स्यात्तथा । २ इन्द्रसदृशम् । ३ 'चित्रवर्मा' प्र० द्वय० ।

यलः, सुषेणः पण्डितस्तथा ॥ १२२ ॥ श्रुतायुधः सुवीर्यश्च, दण्डधारो महोदरः । चित्रायुधो निषङ्गी च, पाशो वृन्दारकस्तथा ॥ १२३ ॥ शत्रुंजयः शत्रुसहः, सत्यसन्धः सुदुःसहः । सुदर्शनश्चित्रसेनः, सेनानीर्दुष्पराजयः ॥ १२४ ॥ पराजितः कुण्डशायी, विशालाक्षो जयस्तथा । दृढहस्तः सुहस्तश्च, वातवेग-सुवर्चसौ ॥ १२५ ॥ आदित्यकेतुर्बह्वाशी, निर्बन्धोऽपि प्रयास्यपि । कवची रणशौण्डश्च, कुण्डधारो धनुर्धरः ॥ १२६ ॥ उग्ररथो भीमरथः, शूरबाहुरलोलुपः । अभयो रौद्रकर्मा च, तथा दृढरथाभिधः ॥ १२७ ॥ अनाधृष्यः कुण्डभेदी, विराजी दीर्घलोचनः । प्रमथश्च प्रमाथी च, दीर्घालापश्च वीर्यवान् ॥ १२८ ॥ दीर्घबाहुर्महावक्षा, दृढवक्षाः सुलक्षणः । कनकः काञ्चनश्चैव, सुध्वजः सुभुजस्तथा ॥ १२९ ॥ विरजाश्चेत्यमी सर्वे, रणकर्मविशारदाः । सर्वे शौण्डीरदोर्दण्डाः, सर्वे सर्वास्त्रकोविदाः ॥ १३० ॥

धृतराष्ट्रोऽथ भीष्मादी-नुपवेश्य परेद्यवि । मौहूर्तिकान् समाहूय, पप्रच्छ स्वच्छमानसः ॥ १३१ ॥ आख्यातमशरीरिण्या, भारत्या यद्युधिष्ठिरः । भविता भुवनश्लाघ्यो, न कोऽप्यत्रास्ति संशयः ॥ १३२ ॥ किं त्वनन्तरमेतस्मा-द्राजा दुर्योधनः किमु । भविष्यति न वेत्येवं, ज्ञानेनालोच्य शंस नः ॥ १३३ ॥ अत्रान्तरे दिगन्तेषु, रजोभिः परिजृम्भितम् । उदतिष्ठन्त निर्घाता-श्चकम्पे च वसुंधरा ॥ १३४ ॥ शिवाश्चाशिवशंसिन्यो, विरेसुर्विरसं तथा । मार्तण्डमण्डलं चाभूत्, परिवेषेण भीषणम् ॥ १३५ ॥ एतानि दुर्निमित्तानि, प्रेक्ष्य तल्लक्षणानि च । ज्ञानिनः सर्वविदुरं, विदुरं प्रत्यचीकथन् ॥ १३६ ॥

१ 'प्रयाद्यपि'-प्रतिद्वय० ।

अर्जुन-नकुल-सहदेव-जन्म । धृतराष्ट्र-पुत्राणां नवनवते-र्जन्म ॥

अयमूर्जस्वलो राजा, राजचक्रविजित्वरः । भविष्यति परं कालः, कुलस्य च जनस्य च ॥ १३७ ॥ इति नैमित्तिकादिष्ट-मनिष्टं विदुरस्ततः । सभासमक्षमाचख्यौ, धृतराष्ट्रस्य पृच्छतः ॥१३८॥ तच्चाकर्ण्य विषं कर्ण-पुटयोरम्बिकासुतः । पुनः पर्यनुयुङ्क्ते स्म, कुले शान्तिः कथं भवेत् ? ॥ १३९ ॥

अथ संदेहसंदोह-च्छिदुरो विदुरस्तथा । अप्रेयोऽपि वचः पथ्यं, तथ्यं च तमुदाहरत् ॥ १४० ॥ निखिलस्य कुलस्यास्य, क्षेमं चेत् कर्तुमिच्छसि । तदेनमेनसां पात्रं, दुष्पुत्रं त्यक्तुमर्हसि ॥ १४१ ॥ तनयेनापि किं तेन, कुलप्रलयकारिणा ? । तेन हेम्नाऽपि किं कार्य-मार्य ! कर्णौ छिनत्ति यत् ॥ १४२ ॥ आसतां शतमेकोन-मपि स्वस्तिकृतः सुताः । अल्पमल्पेतरस्यार्थे, त्याज्यमित्थं विदुर्बुधाः ॥ १४३ ॥ आम्बिकेयस्तदाकर्ण्य, न यावत् प्रत्यभाषत । पाण्डुरुड्डामरप्रीति-स्तावद्विदुरमभ्यधात् ॥ १४४ ॥ ईदृशानि न लभ्यन्ते, पुत्रभाण्डानि कुत्रचित् । ममोपयाचितैरेष, जातो दुर्योधनः सुतः ॥ १४५ ॥ क्षयः कुलस्य चेत् पुत्रा-द्वृद्धिस्तर्हि कुतो भवेत् ? । भानोश्चेद् ध्वान्तमाकाशे, प्रकाशः स्यात् कुतस्ततः ? ॥१४६॥ युधिष्ठिरादपि ज्येष्ठः, पूर्वं गर्भावतारतः । असौ राज्याब्जसविता, भविता गोत्रवर्धनः ॥ १४७ ॥ तच्छिवाः सन्तु पन्थानः, स्वस्थानगमनाय वः । अभिधायेदमास्थाना-दुदस्थात् पाण्डुभूपतिः ॥१४८॥ दुर्योधनस्य दुःशल्या, नाम यैामिर्बभूव या । सिन्धूनामधिराजस्ता-मुपयेमे जयद्रथः ॥ १४९ ॥

अथ ते धृतराष्ट्रस्य, वर्धन्ते स्म शतं सुताः । दोष्णोर्येषां स्म जागर्ति, स्फूर्तिस्त्रैलोक्यतोलने ॥ १५० ॥ धार्तराष्ट्राः

१ बलवान् । २ अप्रियमपि । ३ बहोः प्रयोजनाय । ४ स्वसा ।

शतं पञ्च, पाण्डवास्ते तु संहताः । शतं पञ्चोत्तरं स्वैरं, रेमिरे हस्तिनापुरे ॥ १५१ ॥ भीष्मं च धृतराष्ट्रं च, पाण्डुं च विदुरं च ते । प्रतिप्रभातमभ्येत्य, नमस्यन्ति स्म भक्तितः ॥ १५२ ॥ ततः सत्यवतीं पूज्या-मम्बिकाऽम्बालिके तथा । अम्बा-गन्धारिका-कुन्ती-मुख्याश्च प्राणमन्नमी ॥ १५३ ॥ मातॄणां च पितॄणां च, तथा वात्सल्यवशगाः । निर्विशेषं मनस्तेषु, "गुरवो हि समाश्रयाः" ॥ १५४ ॥ शैशवादप्यजायन्त, पाण्डवाः परमार्हताः । "यस्य यादृक्परो लोक-स्तस्य चेष्टा हि तादृशी" ॥ १५५ ॥ दिवा वा यदि वा नक्तं, भक्तिप्रह्वीकृता इव । चेतस्तेषां न मुञ्चन्ति, पञ्चापि परमेष्ठिनः ॥ १५६ ॥ रंहस्वितापरीक्षार्थं[1], निर्णीतपणपूर्वकम् । सहस्रतालमुत्ताला-स्ते कदाचिद्धाविरे ॥ १५७ ॥ गङ्गायाः पुलिने जातु, सिकताकणकोमले । सर्वे कुमाराश्चिक्रीडु-स्ते शश्वत् पांशुकेलिभिः ॥ १५८ ॥ तुङ्गातटीविटङ्काग्रे, जलकेलिकुतूहलात् । यमुनायां कदाचिच्च, झम्पापातं वितेनिरे ॥ १५९ ॥ रंहःकेलि-रजःकेलि-जलकेलिषु लीलया । तान् बन्धूनजयन्नेके, बलोदारो वृकोदरः ॥ १६० ॥ सदाऽप्यदातप्रकृति-र्धर्मात्मा धर्मनन्दनः । बबन्ध बन्धुषु स्नेहं, विशेषेण सुयोधने ॥ १६१ ॥ चप-लोऽपि निसर्गेण, बान्धवेषु वृकोदरः । क्रीडयाऽलोलयद्बालान्, दुःशासनमुखानिति ॥ १६२ ॥ क्षिप्ताः कदाचित् कक्षायां, भीमेन भुजपीडनात् । श्वासावरोधदौस्थ्येन, संस्थिता[2] इव तेऽभवन् ॥ १६३ ॥ भीमः कदाचिदेतेषा-मन्योन्यं शिरसा शिरः । नालिकेरद्वयास्फाल-मास्फालयदनेकशः ॥ १६४ ॥ धृत्वा कदाचित् पादाग्रे, कोशमात्रं भुवं नयन् । नासा-जानु-ललाटादौ, त्वचयामास तानसौ ॥ १६५ ॥ तान् बद्ध्वा शणपाशेन, मज्जयित्वा चिरं जले । भीमः केलिप्रियो जातु, मृतप्राया-

१ वेगवत्तापरीक्षार्थम् । २ मृताः ।

पाण्डव-कौरवाणां बालक्रीडा ।

नमुञ्चत ॥ १६६ ॥ धार्तराष्ट्राः कनीयांसः, क्रीडन्तस्ते कदाचन । कुतूहलात् कपित्थादी–नुद्यानारुरुहुस्तरून् ॥ १६७ ॥ ततः पादप्रहारेण, तानाहत्य महीरुहान् । फलैः सार्धमपात्यन्त, ते भीमेन भुवस्तले ॥ १६८ ॥ खेदिता अपि भीमाय, न ते किंचन चुक्रुधुः । स्नेहोऽयं न पुनर्द्रोह–स्तस्येति ज्ञातपूर्विणः ॥ १६९ ॥ लब्धास्पदं मनोधात्र्यां, वैरभूरुहकारणम् । मात्सर्यबीजमा बाल्या–दभूद्दुर्योधनस्य यत् ॥ १७० ॥ तदानीं भीमसेनस्य, बल-विस्फूर्ति-कीर्तिभिः । तच्चक्रे किंचिदुच्छूनं, नव्याभिरिव वृष्टिभिः ॥ १७१ ॥

ओजायितानि भीमस्य, खिद्यमानांश्च बान्धवान् । वीक्ष्यावलेपात् कोपाच्च, बाढं दुर्योधनोऽभ्यधात् ॥ १७२ ॥ कदर्थ्यन्ते कथं भीम !, भ्रातरोऽमी स्तनंधयाः ? । तव दोर्दण्डकण्डूति–हरोऽस्मि तदुपेहि माम् ॥ १७३ ॥ तेनेत्थं स्पर्धमानेन, समाहूतो वृकोदरः । अभ्यधत्त महाभाग !, नाहं बन्धुषु दुर्मनाः ॥ १७४ ॥ परमित्थं मम स्नेह–चापल्यं पर्यवस्यति । वनेषु दन्तिनो दन्त–क्रीडाऽपि तरुभञ्जिनी ॥ १७५ ॥ ततोऽवलेपं कोपं वा, मुधा दुर्योधन ! व्यधाः । " यद्वा नैवास्ति मर्यादा, काऽप्यनालोच्य वादिनाम् " ॥ १७६ ॥ त्वया हि मम दोःकण्डू–र्न मनागप्यपोह्यते । " न ह्येरण्डो गजेन्द्रस्य, कटकण्डूयने क्षमः " ॥ १७७ ॥ अस्ति चेत्तव दोर्दर्पो, यद्वाऽसूया बलीयसी । तदेहि त्वं नियुध्यस्व, बुध्यस्व बलमात्मनः ॥ १७८ ॥ इत्याक्षिप्तः स भीमस्य, नियुद्धाय पुरोऽभवत् । " किं लोकाधिकधामानः, सहन्ते तेजसो वधम् ? " ॥ १७९ ॥ यदा विरमतो नैतौ, निरोद्धरि युधिष्ठिरे । तदा तौ परितस्तस्थुः, कुमाराः प्रेक्षकाः परे ॥ १८० ॥ मर्मप्रहारनिर्मुक्त–मनलंकृतरम्ययोः । नियुद्धमेतयोरासी–दशिक्षितमनोहरम् ॥ १८१ ॥ तयोर्द्वयोरपि ख्यात–बलिभ्योऽपि बलिष्ठयोः । प्रावर्ततोत्तराधर्य–परावृत्तिः

क्षणे क्षणे ॥ १८२ ॥ दिनेन्दु-दिननाथाभै-स्तयोर्जयपराजयौ । दुःशासना-र्जुनादीना-मकथ्येतां मुखैस्तदा ॥ १८३ ॥ नियुध्यमानो वज्राङ्गः, क्रीडयाऽपि वृकोदरः । क्रमाद्दुर्योधनं दूरा-न्निन्ये निःसहदेहताम् ॥१८४॥ चिराददभ्रं बिभ्राणः, पराजयपराभवम् । श्यामास्यः प्रययौ बन्धु-मध्याद्दुर्योधनः शनैः ॥ १८५ ॥

तथैवावस्थितं रङ्गे, भीममेत्य युधिष्ठिरः । रजोऽवगुण्डितं प्रेम्णा, प्रममार्ज स्ववाससा ॥ १८६ ॥ बन्धोर्नियुद्धखिन्नस्य, वपुर्विपुलमंसलम् । स्नेहात् संवाहयामास, मृदुपाणिर्धनंजयः ॥१८७॥ नकुलः सहदेवश्च, प्रमोदादमितः स्थितौ । स्वाञ्चलव्यजनैर्भीमं, वीजयांचक्रतुश्चिरम् ॥ १८८ ॥

दुर्योधनो रहःस्थाने, स्थित्वा चक्रे जडोचितान् । निजाशयप्रमाणेन, विकल्पानञ्जनालवत् ॥ १८९ ॥ अर्धराज्यहरो योऽपि, सोऽपि वध्यो महौजसाम् । किं पुनर्ब्रूमहे तस्य[1], सर्वराज्यहरो हि यः ॥ १९० ॥ ततः सर्वप्रकारेण, मम वध्यो युधिष्ठिरः । "उदीयमानोऽप्युच्छेद्यो, विरोधी व्याधिवद्बुधैः" ॥१९१॥ किं त्वसाध्यः परीतोऽयं, भीमेन विजयेन च । भूपाल इव संपन्नो, विक्रमेण नयेन च ॥१९२॥ ततो भीमा-र्जुनावेव, पुरस्ताद्वधमर्हतः । यौ दुर्वारमहावीर्या-वजातारे[3]र्भुजाविव ॥ १९३ ॥ तत्रापि प्रथमं निर्भी-र्भीमो निःसीमविक्रमः । कीनाशपुरवास्तव्यः, कर्तव्यः प्रसभं मया ॥ १९४ ॥ व्यापादिते मयाऽमुष्मिन्, युधिष्ठिर-किरीटिनौ । भवितारौ हठात् कृष्ट-स्तम्भप्रासाददुर्बलौ ॥१९५॥ तदा नियुद्धसंबद्ध-रजःपरिचयादिव । मलीमसामिमां सन्धां, चक्रे दुर्योधनो रहः ॥ १९६ ॥ ततश्छिद्राणि दुष्टात्मा, भीमस्य स्वच्छचेतसः । नित्य-

१ " दिनेश-दिनचन्द्राभैः " इति प्रतिद्वयपाठः । २ प्रभूतम् । ३ युधिष्ठिरस्य । ४ कीनाशः-यमः । ५ बलात् ।

मन्वेषयामास, स नटः कूटनाटके ॥ १९७ ॥ परं विविधकेलीभि-र्गङ्गायाः कूलपालिषु । समं सर्वैः कुमारैस्तैः, सोऽपि चिक्रीड सर्वदा ॥ १९८ ॥ कुमारान् क्रीडतस्तत्र, विदित्वा सुतवत्सलः । भूपतिः कौ[१]यमानानि, कमनीयान्यकारयत् ॥ १९९ ॥ क्रीडाशौण्डतया तेषु, भुक्तिं सुप्तिं च ते व्यधुः । सर्वदाऽप्यधिकः किं तु, भीमोऽभूद्भोजनादिभिः ॥ २०० ॥

कूले परेद्युर्गङ्गायाः, सौगन्धिकसुगन्धिनि । सुष्वाप सिकतातल्पे, केलिश्रान्तो वृकोदरः ॥ २०१ ॥ आहारं मधुरं स्निग्धं, तस्य भुक्तवतस्तदा । बभूव सुखनिद्राऽपि, दीर्घनिद्राविजित्वरी ॥ २०२ ॥ इदमन्तरमासाद्य, दुष्टबुद्धि[२] सुयोधनः । भीमं बद्ध्वा लतापाशैः, प्रचिक्षेप छलाज्जले ॥ २०३ ॥ लतापाशान् विमच्छेदं, छेकंशिछत्वा वृकोदरः । स्नात्वा क्षणेन गङ्गायाः, करीन्द्र इव निर्ययौ ॥ २०४ ॥ निद्रायमाणमन्येद्यु-स्तं तथैवाङ्गमर्मसु । धार्त्तराष्ट्रोऽतिधृष्टात्मा, दन्दशूकै[३]रदंशयत् ॥ २०५ ॥ सकोपाः सफणाटोपा, दंष्ट्रया गरलोग्रया । तीक्ष्णाग्रया दशन्तोऽपि, विभिदुस्ते न तत्त्वचम् ॥ २०६ ॥ क्रमाज्जागरितो निर्भी-र्भीमस्तानवहेलया । दूरेणापोह्यन्नागा-ञ्शिशुनागानिव क्षणात् ॥ २०७ ॥ ततः सुयोधनो दौष्ट्या-द्भीमे भोक्तुमुपस्थिते । अज्ञातमशनस्यान्त-र्विषमं विषमक्षिपत् ॥ २०८ ॥ सद्यः प्राणहरे तस्मिन्, दत्ते भीमं सुयोधनः । कृतान्तदन्तयन्त्रान्त-र्गतवन्तममन्यत ॥ २०९ ॥ प्रत्युतोर्जितमातेने, तेन भीमस्य तत्क्षणात् । "पुंसां जाग्रत्सु भाग्येषु, विपत्तिरपि संपदे" ॥२१०॥ क्रीडामात्रमिदं सर्व-मेतस्येति विचिन्तयन् । भीमो न कोपमलिनं, मनश्चक्रे मनागपि ॥ २११ ॥ धृतराष्ट्रतनूजास्तु, निष्फलारम्भदुःस्थिताः । तेजोभिः पाण्डुपुत्राणां, दन्दह्यन्ते स केवलम् ॥ २१२ ॥

---

१ तृणगृहाणि । २ चतुरः । ३ सर्पैः ।

पाण्डव-कौरवाणां बालक्रीडा। तेषां कलाभ्यासः॥

निदित्वा विदुरस्तेषा-मेनमुच्छृङ्खलं कलिम्। विजने भीष्ममुख्यानां, पुरस्तादिदमभ्यधात् ॥ २१३ ॥ अमी धर्महराः सर्वे, प्रतिभोत्कर्षशालिनः। कुमाराः समजायन्त, तन्नोपेक्षितुमर्हथ ॥ २१४ ॥ कलाकलापोपनिप-न्निषण्णमनसो यथा। एते भवन्त्युपाध्यायात्, प्रयतध्वं तथाऽधुना ॥ २१५ ॥ अस्त्वेषां कः कलाचार्यः, सर्वविद्याब्धिपारगः। साकाङ्क्षमिति पृष्टस्तै-राचष्ट विदुरः पुनः ॥ २१६ ॥ अत्रैवास्ति कृपो नाम, कलाचार्यः प्रसिद्धिभाक्। देवस्य शान्तनोर्नित्यं, यत्रासीत् पुत्रवासना ॥ २१७ ॥ स वः प्रार्थनया विद्या-नेतानध्यापयिष्यति। लभ्यतेऽयमुपाध्यायः, पुण्यैरत्यन्तपीवरैः ॥२१८॥ तत्समाकर्ण्य गाङ्गेयः, कुमारान्निखिलानपि। समाकार्य कृपाचार्य-मध्यापयितुमार्पयत् ॥ २१९ ॥ अध्यगीषत ते शास्त्रं, शब्दपारायणादिकम्। ततः आरेभिरेऽध्येतुं, धनुर्वेदमनिर्विदः ॥२२०॥ लघुसंधान-विच्छेद-प्रहारच्छेकबाहवः। तेषामभूवन् भूयांसः, शस्त्रैः सब्रह्मचारिणः[1] ॥ २२१ ॥

इतोऽभूत् तत्र वास्तव्यः, सधर्मा[2] विश्वकर्मणः। पुमानतिरथिर्नाम, सदाचारैकमन्दिरम् ॥२२२॥ विधोरिवानुराधाऽभूत्, तस्य राधा सधर्मिणी। कदाचिदपि या नैव, ज्येष्ठोपास्तिमपास्थत ॥२२३॥ तयोः कर्ण इति ख्यातः, सुतः सत्त्वैकभूरभूत्। यत्रौदार्यं च शौर्यं च, द्वयं निःसीमतां गतम् ॥ २२४ ॥ पङ्कोपमे कुले तस्मिन्, परां वृद्धिमुपेयुषः। नलिनस्येव तस्यासीत्, उत्तमैरेव संगतिः ॥२२५॥ कलाकूपारपाराय[3], स्पृहयालुरहर्निशम्। स शिक्षां शस्त्र-शास्त्राणा-मियेष गुरुसंनिधौ ॥ २२६ ॥ प्रणिपत्य कृपाचार्य-मेत्य सोऽपि खलूरिकाम्[4]। कुमारैः सममाधत्त, शस्त्रश्रममनारतम् ॥ २२७ ॥ कृपाचार्योपदेशाख्य-

१ शस्त्रैः सदृशाः। २ सदृशः। ३ कलासमुद्रपारगमनाय। (४ शस्त्राभ्यासभूमिम्।)

स्वातिवर्षस्य सर्वतः। तेषु कर्ण–किरीटिभ्यां, मुक्ताशुक्तिपुटायितम् ॥२२८॥ आत्तेऽपि विद्यासर्वस्वे, कृपाचार्यात् समंततः। किरीटि–कर्णयोः प्रज्ञा, मनागपि न तृप्यति ॥ २२९ ॥ क्रीडाजुषां कुमाराणां, पुरीपरिसरेऽन्यदा। तदीयाघातभीत्येव, कूपान्तः कन्दुकोऽपतत् ॥ २३० ॥ विदधुर्विविधोपायान्, कन्दुकाकर्षणं प्रति। परां क्लान्तिं कुमारास्ते, वृथारम्भास्तु लेभिरे ॥ २३१ ॥

तेष्वेवं क्लिश्यमानेषु, वर्षीयान्[1] पथिको द्विजः। विप्रेण सममेकेन, यूना कश्चिदुपागमत् ॥२३२॥ ततो जगदिरे तेन, कुमारास्ते द्विजन्मना। एतस्य कन्दुकस्यार्थे, कथं ताम्यत (थ) पुत्रकाः!? ॥२३३॥ इयं वो मधुरा मूर्ति–रियं वः स्फूर्तिरुत्तरा। इयं वश्चातुरी चापे, किणसंचयसूचिता ॥२३४॥ तदल्पीयसि कार्येऽस्मिन्, किमारम्भोऽयमीदृशः?। "करप्राप्ये फले को हि, समारोहति भूरुहम्?" ॥२३५॥ तदेषोऽहमिदानीं वः, करिष्यामि समीहितम्। इत्युक्त्वाऽदर्शयत् तेषा–मिषीकाः[2] करवर्तिनीः ॥ २३६ ॥ मयाऽभिमन्त्रिता ह्येताः, समानेष्यन्ति कन्दुकम्। इत्याख्यायाक्षिपत् तासा–मेकां विप्रोऽनुकन्दुकम् ॥ २३७ ॥ बिभेद कन्दुकं सद्यः, सा च नाराचलीलया। "सुहस्तहस्तमुक्तानि, बाणायन्ते तृणान्यपि" ॥२३८॥ अन्ते तामन्ययाऽविध्यत्, तामप्यपरया तथा। एवं परम्परायोगा–दुपादत्त स कन्दुकम् ॥ २३९ ॥ भुवनाद्भुतभूतेन, कर्मणा तेन विस्मिताः। प्रणम्य बद्धाञ्जलयः, कुमारास्तं व्यजिज्ञपन् ॥ २४० ॥ आर्येश्चक्रिरेऽस्माभि–श्चापाचार्याः सहस्रशः। परं नृलोके नालोकि, कस्यापि प्रौढिरीदृशी ॥२४१॥ गुरुर्वा त्वं पिता वा त्व–मस्माकमसि संप्रति। एते स्मः किंकराः सर्वे, ब्रूहि किं करवाम ते? ॥२४२॥

---

१ अतिवृद्धः। २ शरशलाकाः।

पाण्डव-कौरवाणां बालक्रीडा। तेषां कलाभ्यासः॥

निदित्वा विदुरस्तेषा-मेनमुच्छृङ्खलं कलिम्। विजने भीष्ममुख्यानां, पुरस्तादिदमभ्यधात् ॥ २१३ ॥ अमी धर्महराः सर्वे, प्रतिभोत्कर्षशालिनः। कुमाराः समजायन्त, तन्नोपेक्षितुमर्हथ ॥ २१४ ॥ कलाकलापोपनिप-न्निषण्णमनसो यथा। एते भवन्त्युपाध्यायात्, प्रयतध्वं तथाऽधुना ॥ २१५ ॥ अस्त्वेषां कः कलाचार्यः, सर्वविद्याब्धिपारगः। साकाङ्क्षमिति पृष्टस्तै-राचष्ट विदुरः पुनः ॥ २१६ ॥ अत्रैवास्ति कृपो नाम, कलाचार्यः प्रसिद्धिभाक्। देवस्य शान्तनोर्नित्यं, यत्रासीत् पुत्रासना ॥ २१७ ॥ स वः प्रार्थनया विद्या-नेतानध्यापयिष्यति। लभ्यतेऽयमुपाध्यायः, पुण्यैरत्यन्तपीवरैः ॥२१८॥ तत्समाकर्ण्य गाङ्गेयः, कुमारान्निखिलानपि। समाकार्य कृपाचार्य-मध्यापयितुमार्पयत् ॥ २१९ ॥ अध्यगीषत ते शास्त्रं, शब्दपारायणादिकम्। ततः प्रारेभिरेऽध्येतुं, धनुर्वेदमनिर्विदः ॥२२०॥ लघुसंधान-विच्छेद-प्रहारच्छेकबाहवः। तेषामभूवन् भूयांसः, शस्त्रैः सब्रह्मचारिणः ॥ २२१ ॥

इतोऽभूत् तत्र वास्तव्यः, सधर्मा विश्वकर्मणः। पुमानतिरथिर्नाम, सदाचारैकमन्दिरम् ॥२२२॥ विधोरिवानुराधाऽभूत्, तस्य राधा सधर्मिणी। कदाचिदपि या नैव, ज्येष्ठोपास्तिमपास्थत ॥२२३॥ तयोः कर्ण इति ख्यातः, सुतः सत्त्वैकभूरभूत्। यत्रौदार्यं च शौर्यं च, द्वयं निःसीमतां गतम् ॥ २२४ ॥ पङ्कोपमे कुले तस्मिन्, परां वृद्धिमुपेयुषः। नलिनस्येव तस्यासीत्, उत्तमैरेव संगतिः ॥२२५॥ कलाकूपारपाराय, स्पृहयालुरहर्निशम्। स शिक्षां शस्त्र-शास्त्राणा-मियेष गुरुसंनिधौ ॥ २२६ ॥ प्रणिपत्य कृपाचार्य-मेत्य सोऽपि खलूरिकाम्। कुमारैः सममाधत्त, शस्त्रश्रममनारतम् ॥ २२७ ॥ कृपाचार्योपदेशाख्य-

१ शस्त्रैः सदृशाः। २ सदृशः। ३ कलासमुद्रपारगमनाय। (४ शस्त्राभ्यासभूमिम्।)

स्नातिवर्षस्य सर्वतः। तेषु कर्ण-किरीटिभ्यां, मुक्ताशुक्तिपुटायितम् ॥२२८॥ आत्तेऽपि विद्यासर्वस्वे, कृपाचार्यात् समंततः। किरीटि-कर्णयोः प्रज्ञा, मनागपि न तृप्यति ॥ २२९ ॥ क्रीडाजुषां कुमाराणां, पुरीपरिसरेऽन्यदा। तदीयाघातभीत्येव, कूपान्तः कन्दुकोऽपतत् ॥ २३० ॥ विदधुर्विविधोपायान्, कन्दुकाकर्षणं प्रति। परां क्लान्तिं कुमारास्ते, वृथारम्भास्तु लेभिरे ॥ २३१ ॥

तेष्वेवं क्लिश्यमानेषु, वर्षीयान्[1] पथिको द्विजः। विप्रेण सममेकेन, यूना कश्चिदुपागमत् ॥२३२॥ ततो जगदिरे तेन, कुमारास्ते द्विजन्मना। एतस्य कन्दुकस्यार्थे, कथं ताम्यत (थ) पुत्रकाः!? ॥२३३॥ इयं वो मधुरा मूर्ति-रियं वः स्फूर्तिरुत्तरा। इयं वश्चातुरी चापे, किणसंचयसूचिता ॥२३४॥ तदल्पीयसि कार्येऽस्मिन्, किमारम्भोऽयमीदृशः?। "करप्राप्ये फले को हि, समारोहति भूरुहम्?" ॥२३५॥ तदेषोऽहमिदानीं वः, करिष्यामि समीहितम्। इत्युक्त्वाऽदर्शयत् तेषा-मिषीकाः[2] करवर्तिनीः ॥ २३६ ॥ मयाऽभिमन्त्रिता ह्येताः, समानेष्यन्ति कन्दुकम्। इत्याख्यायाक्षिपत् तासा-मेकां विप्रोऽनुकन्दुकम् ॥ २३७ ॥ बिभेद कन्दुकं सद्यः, सा च नाराचलीलया। "सुहस्तहस्तमुक्तानि, बाणायन्ते तृणान्यपि" ॥२३८॥ अन्ते तामन्ययाऽविध्यत्, तामप्यपरया तथा। एवं परम्परायोगा-दुपादत्त स कन्दुकम् ॥ २३९ ॥ भुवनाद्भुतभूतेन, कर्मणा तेन विस्मिताः। प्रणम्य बद्धाञ्जलयः, कुमारास्तं व्यजिज्ञपन् ॥ २४० ॥ आर्येक्षांचक्रिरेऽस्माभि-श्चापाचार्याः सहस्रशः। परं नृलोके नालोकि, कस्यापि प्रौढिरीदृशी ॥२४१॥ गुरुर्वा त्वं पिता वा त्व-मस्माकमसि संप्रति। एते स्मः किंकराः सर्वे, ब्रूहि किं करवाम ते? ॥२४२॥

१ अतिवृद्धः। २ शरशलाकाः।

कुरुवंशे ध्वजायध्व-मध्वनीनाः सदध्वनि । इत्याश्वास्य द्विजः सर्वान्, प्रसन्नांस्तानवोचत ॥२४३॥ अध्वश्रमाविलं दूर-मनेन विनयेन वः । मनो मे कतकेनेव, वारि निन्ये प्रसन्नताम् ॥ २४४ ॥ दर्शयध्वमुपाध्यायं, ममेदानीं तमात्मनः । ननु युष्माकमातिथ्यं, भवतादिदमेव मे ॥ २४५ ॥ स हि युष्मदुपाध्यायः, कृपाख्यः स्वजनो मम । तस्यान्तेवासिनो युष्मान्, दृष्ट्वा हृष्टोऽस्मि संप्रति ॥ २४६ ॥ इत्युक्तैर्मण्डलीभूय, सर्वैस्तैः परिवारितः । पार्थदत्तभुजालम्बः, प्रविवेश द्विजः पुरे ॥ २४७ ॥

गृहाभिमुखमायान्तं, तमालोक्य गुणालयम् । प्रत्युज्जगाम रोमाञ्च-संवर्मितवपुः कृपः ॥ २४८ ॥ स्वच्छन्दनिर्यदानन्द-बाष्पवीचिविलोचनः । पञ्चाङ्गालिङ्गितक्षोणि-र्नमस्यति च तं कृपः ॥ २४९ ॥ कृपं दृशा पिबन् सोऽपि, प्रसारितभुजद्वयः । तथाऽऽलिङ्गद्यथा जातौ, तावेकवपुषाविव ॥ २५० ॥ कृपः सिंहासने भक्त्या, निवेश्य तमभाषत । अद्येदं मन्दिरं पूतं, यदाक्रान्तं भवत्क्रमैः ॥ २५१ ॥ संवत्सरे समग्रेऽपि, वासरोऽयं सुवासरः । अवतारः सरस्वत्या-स्त्वं यत्रातिथिरागतः ॥ २५२ ॥ अनमस्यत् कृपाचार्य-मादरेण द्विजो युवा । अभ्यनन्दत् तमाशीर्भिः, सोऽपि स्वजनवत्सलः ॥ २५३ ॥ कोऽयं महात्मा ? यस्येत्थं, कुरुध्वे पर्युपासनाम् । इति राजसुतैः पृष्टः, कृपः पुनरवोचत ॥ २५४ ॥

वत्साः ! सोऽयं गुरुर्द्रोणः, कलानां कुलमन्दिरम् । अयमेव रहस्यज्ञो, धनुःपारायणे पुनः ॥ २५५ ॥ प्रख्यातः सूनुरस्याय-मश्वत्थामेति नामतः । न परं पितरं मूर्त्या, योऽनुचक्रे गुणैरपि ॥ २५६ ॥ इत्याख्याय विसृष्टेषु, कुमारेषु मुदा

१ 'ध्वजायिध्व०' 'ध्वजायित्व०' इति प्रतिद्वयपाठो न सम्यक् प्रतिभाति । २ पान्थाः । ३ मार्गश्रमेण मलिनं—व्याकुलं मे मनः । ४ 'नमस्यामास तं' प्रतिद्वय० ।

पाण्डव-कौरवाणां कला-भ्यासः द्रोणा-श्वत्थामा-गमनम् ॥

कृपः । द्रोणाचार्याय विदधा–वातिथ्यमतिथिप्रियः ॥ २५७ ॥ प्रसन्नमन्यदा द्रोणं, व्याजहार रहः कृपः । प्रणयात् प्रार्थ्यसे किंचि–न्नान्यथा कर्तुमर्हसि ॥२५८॥ चापाचार्यस्त्वदन्योऽस्ति, यथा न भुवनत्रये । तथाऽमीभ्यः कुमारेभ्यो, नास्ति सप्रतिभः परः ॥ २५९ ॥ व्याकुरुष्व तदेतेभ्य–श्चापोपनिषदं निजाम् । स्थानन्यासेन विद्याया–स्त्रैलोक्यप्रथितो भव ॥२६०॥ शालिबीजं च विद्यां च, वप्तुकामैर्मनीषिभिः । सुक्षेत्रं च सुपात्रं च, विना पुण्यैर्न लभ्यते ॥ २६१ ॥ एतावद्भिर्दिनैरेते, भित्तिवच्चित्रकर्मणाम् । मया त्वदुपदेशाना–मुपानीयन्त योग्यताम् ॥ २६२ ॥

तथेत्यङ्गीकृते तेन, गत्वा भीष्मान्तिकं कृपः । सर्वमावेदयामास, द्रोणवृत्तान्तमादितः ॥ २६३ ॥ द्रोणाचार्यमथाकार्य, सत्कृत्य कनकोत्करैः । अर्पयामास गाङ्गेयः, पौत्रान् ग्राहयितुं कलाः ॥ २६४ ॥ तदा वैकटिकस्येव[1], माणिक्येषु सुजातिषु । संस्कारस्तेषु सर्वेषु, दिदीपे सुतरां गुरोः ॥२६५॥ संयोगो गुरुशिष्याणा–मन्योन्यं प्रीतिशालिनाम् । तेषामत्यद्भुतः सोऽभू–दिन्दुकैरवयोगवत् ॥ २६६ ॥ वृष्टिं मेघ इवाचार्यः, शिक्षां समतया ददौ । सा त्वाधारवशाद्दध्रे, परिणामं पृथक् पृथक् ॥२६७॥ उपदिष्टं धनुर्वेदं, सर्वं वेत्ति स्म फाल्गुनः । विवेदानुपदिष्टं तु, स्वयं शुश्रूषणं गुरोः ॥२६८॥ धनंजयस्य गुर्वङ्ग–संवाहनभवश्रमः । महान्तमपि हन्ति स्म, शस्त्राभ्यासपरिश्रमम् ॥ २६९ ॥ सुधास्वादु गुरोः पाद–पयः पीत्वा रजस्वलम् । निजां कपिध्वजश्चक्रे, चित्रं प्रज्ञामनाविलाम् ॥२७०॥ विनयं कुर्वताऽत्यर्थ–मर्जुनेन विशेषतः । सर्वशिष्यप्रियस्यापि, गुरोरावर्जितं[2] मनः ॥२७१॥ गुरुभक्तिसुधासेक–संपत्त्या सितवाजिनः । शिक्षावल्लिः फलस्फाति–माततानातिशायिनीम् ॥ २७२ ॥

१ मणिपरीक्षकस्य । २ अर्जुनः ।

गरांतिशायिमद्बोध-मकरन्दकरम्बिते । शिष्यप्रद्मनपुञ्जेऽस्मि-न्नर्जुनेनाम्बुजायितम् ॥ २७३ ॥ लक्ष्ये स्थिरे चले दूरे-ऽनपराद्धेषुमर्जुनम्। पश्यञ्जज्ञे सकर्णोऽपि, कर्णो मनसि मत्सरी ॥२७४॥ असौ साधारणः पन्थाः, पुत्रो भवति यत् प्रियः। गुणैर्गुरोस्ततोऽप्यागात्, प्रियतामर्जुनः पुनः ॥२७५॥ अवोचदेकदाऽऽचार्यो, विनयावर्जितोऽर्जुनम्। कर्तास्मि त्वां गुणैरेभिर्जगत्येकधनुर्धरम् ॥ २७६ ॥ प्रसादः स गुरोस्तच्च, चापचातुर्यमद्भुतम्। पार्थस्येदं द्वयं वाढं, बाधते स्म सुयोधनम् ॥ २७७ ॥ ॥ मद्गुणैः पाण्डवैः सार्ध-मुच्छलन्मत्सरौ तदा। कर्ण-दुर्योधनौ मैत्री-मन्वभूतां परस्परम् ॥ २७८ ॥

अनध्यायदिने क्वापि, गोधांधारी धनुर्धरः। वने पुष्पकरण्डाख्ये, किरीटी क्रीडितुं ययौ ॥२७९॥ अपश्यत् तत्र तूणीवत्, पूर्णास्यमफलैः शरैः। सारमेयममेयान्त-र्विस्मयः कंचिदर्जुनः ॥२८०॥ अभूत् तस्य मनस्येवं, तं वीक्षितवनस्तदा। अस्ति क्वापि प्रदेशेऽस्मिन्, धुर्यः कश्चिद्धनुष्मताम् ॥२८१॥ अथामावग्रतो गच्छन्, योग्यानिरतमुन्नतम्। एकं पुमांसमद्राक्षी-ल्लक्ष्यभेदैककोविदम् ॥२८२॥ संधाना-ऽऽदान-मोक्षेषु, तस्य संप्रेक्ष्य लाघवम्। पार्थस्त विस्मितोऽपृच्छत्, कोऽसि त्वं ? कश्च ते गुरुः ? ॥ २८३ ॥ सोऽवदद्भद्र ! पल्लीन्दो-र्हिरण्यधनुषः सुतः। एकलव्याभिधानोऽस्मि, पुलिन्दकुलसंभवः ॥२८४॥ शस्त्रतत्त्वाम्बुधिद्रोणी, द्रोणाचार्यश्च मे गुरुः। श्रूयते धन्विनां धुर्यः, शिष्यो यस्य धनंजयः ॥२८५॥ प्रत्यावृत्तस्ततः पार्थो, विच्छायवदनः पथि। आगच्छन्नुच्छलन्मन्यु-र्मनस्येवमचिन्तयत् ॥२८६॥ कुन्दे-न्दुधवलैरेप, मां पराजयते गुणैः। शङ्के शिष्यप्रसादोऽपि, चक्रेऽस्य गुरुणाऽधिकः ॥२८७॥ इति चिन्तामपीलेप-श्यामलः साश्रुलोचनः। पार्थो व्यर्थश्रमंमन्यो, गुर्वन्तिकमुपाययौ ॥२८८॥

१ हस्तयन्धनचर्मपट्टकधारी। २ योग्यायां-शस्त्राभ्यासे निरतं-तत्परम्।

द्रोणपार्श्वे कुमाराणां कलाभ्यासः। अर्जुनपुलिन्दयोः समागमः॥

अथोन्नमय्य चिबुकं, तं स्नेहाद्गुरुरब्रवीत्। दिनेन्दुवत् कथं वत्स!, वहसि म्लानमाननम्? ॥२८९॥ कृतान्तः कुपितस्तस्य, तस्य संनिहितोऽशनिः। साक्षेपस्तक्षकस्तस्य, निकारं ते चकार यः ॥२९०॥ यथार्थमवदत् पार्थः, कः प्रभो! न्यक्करोति माम्?। "किं केशरिकिशोरोऽपि, केनचित् परिभूयते?"। ॥२९१॥ किं त्वाश्लिष्य पुरा प्रोक्त-स्त्वयाऽहं वत्स! ते समः। मम शिक्षामधीयानो, न धन्वी भविता परः ॥२९२॥ इति प्राक् सुकृताऽऽसाद्यात्, प्रसादाद्यदुदीरितम्। वचस्तत् ते भवन्मिथ्या, मथ्नाति मम मानसम् ॥२९३॥ यत् ते शिक्षाग्रणीरेको, मयाऽद्य ददृशे वने। अहं प्रभो! पुरस्तस्य, कलां नाप्नोमि षोडशीम् ॥२९४॥ उज्जगार गुरुर्वत्स!, शिष्यो मे नास्ति कश्चन। यस्त्वया हन्त तुल्योऽपि, त्वदाधिक्ये तु का कथा? ॥ २९५ ॥ एवं चादिनमाचार्य-मर्जुनो विनयान्वितः। एतं वो दर्शयामीति, वदन् निन्ये तदन्तिके ॥२९६॥ पादपान्तरितो भूत्वा, तत्राद्राक् तस्य लाघवम्। गुरुः प्रथममालोक्य, जगाम पुरतस्ततः ॥२९७॥ आयान्तमेकलव्योऽपि, द्रोणमुद्वीक्ष्य दूरतः। आगत्य भूमिलुठनै-र्न्यपतत् तस्य पादयोः ॥२९८॥ ज्याकठोरप्रकोष्ठाङ्कं, प्रशान्तं ब्रह्मचारिणम्। चिरं संभावयामास, द्रोणस्तं सान्द्रया दृशा ॥२९९॥ अब्रवीच्च कुतो वत्स!, सैष शिक्षाक्रमस्तव?। न हीदृशममोघ्नायं, भवेत् कार्मुककौशलम् ॥३००॥ विहस्य गुरवेऽशंस-देकलव्यः कृताञ्जलिः। विदांकुरुत मे विद्यां, द्रोणाचार्याज्जगद्गुरोः ॥३०१॥ नासौ विद्योपदेशस्ते, मत्तः किं भाषसे मृषा?। यथार्थं भद्र! जल्पेति, गुरुस्तं भृशमभ्यधात् ॥ ३०२ ॥

एवमुक्तो विनीतात्मा, पल्लीपतितनूरुहः। मृण्मयं दर्शयामास, स द्रोणं द्रोण-पार्थयोः ॥ ३०३ ॥ पार्थः पृथुलवे-

---

१ अपमानम्। २ सदभ्यासं विना।

दिस्यां, नम्पकरार्चितार्चनाम् । तां गुरोः प्रतिमां वीक्ष्य, वन्दते स्म मुहुर्मुदा ॥ ३०४॥ एकलव्यं च पप्रच्छ, भ्रातरावेद्यतां मम । आजगाम गुरुर्द्रोणः, कुत्र ते नेत्रपात्रताम् ? ॥३०५॥ सोऽप्यस्मै कथयामास, महाभाग ! मयैकदा । गुरुरभ्यर्थित-चाप-शिक्षाहेतो रहःस्थितः ॥३०६॥ तदा विनयनम्रोऽपि, योग्योऽयोग्योऽप्यहं सखे ! । हेतोः कुतोऽपि गुरुणा, सर्वथाऽपि निराकृतः ॥ ३०७ ॥ गुरुपादाः प्रसादाय, ध्यानाध्यक्षीकृता[1] अपि । भवन्त्येवेति निश्चित्य, प्रदेशेऽत्र समागमम् ॥ ३०८ ॥ साक्षादिव गुरुं पश्य-न्नभ्यर्च्य प्रतिमामिमाम् । दिवानिशमिपूनस्यं[2]-न्नभ्यासमहमादधे ॥ ३०९ ॥ नमोऽस्तु गुरवे तस्मै, प्रसादाद्यस्य पश्यत । मादृशो मलिनात्माऽपि, विधत्ते चापचापलम् ॥ ३१० ॥ यो हि स्मरणमात्रेण, हन्ति संतमसं भृशम् । अवाप्नोतु गुरोस्तस्य, तरणिः करणिं कथम् ? ॥ ३११ ॥

इति जल्पन्तमानन्दात्-तं सरोमाञ्चकञ्चुकम् । अतुच्छपार्थवात्सल्य-विवशो गुरुरब्रवीत् ॥३१२॥ पल्लीन्द्रपुत्र ! चेदस्मि, गुरूकृतस्त्वया । तदनार्थे कृतार्थेन, दीयतां गुरुदक्षिणा ॥ ३१३ ॥ एकलव्यस्तदाकर्ण्य, विकस्वरमुखाम्बुजः । तं बभाषे प्रभो ! ब्रूहि, वस्तु किं तेऽस्तु दक्षिणा ? ॥३१४॥ विभवो वा शिरो वाऽस्तु, मदीयं तव दक्षिणा । एतेनाप्याधमर्ण्यात् ते, न निमुच्येय निश्चितम् ॥ ३१५ ॥ इत्युक्तो गुरुरप्यूचे, वाचं निर्स्त्रिंशतोचिताम् । वामेतरकराङ्गुष्ठो, निर्लूय मम दीयताम् ॥३१६॥ तन्निशम्य प्रसन्नास्यः, कृतार्थंमन्यमानसः । सोऽसिधेनुकया छित्त्वा, गुरवेऽङ्गुष्ठमार्पयत् ॥ ३१७ ॥ पुष्पवृष्टिः सुरैर्मुक्ता, तस्योपर्यपतत् तदा । गुरुभक्तिद्वितीयेन[3], कः सत्त्वेन न रज्यते ? ॥३१८॥ द्रोणाचार्योऽपि साश्चर्यः, प्रीतचेतास्त्रपानतः । तमा-

१ ध्यानेन प्रत्यक्षीकृताः । २ क्षिपन् । ३ गुरुभक्तिः द्वितीया यस्मिन् तेन ।

द्रोणार्जुन-पुलिन्दानां समागमः

श्ष्याभ्यधाद्वत्स !, दुष्करं कृतवानसि ॥ ३१९ ॥ अतःप्रभृति कोदण्ड-मङ्गुलीभिरपि स्फुटम् । आकर्षन्नपरांद्वेषुः, कदाचिन्न भविष्यसि ॥ ३२० ॥ इति प्रीत्या तमाश्वास्य, व्यावृत्तो[1] वर्त्मनि व्रजन् । गुरुर्धनंजयेनैत-द्विनयादन्वयुज्यत ॥३२१॥ तैस्तैः शिष्यगुणैः काम-मुपेतोऽपि प्रभो ! त्वया । असौ गुणैकगृह्येण, कथं न ग्राहितः श्रमम् ? ॥३२२॥ इति पर्यनुयुक्तोऽथ, द्रोणाचार्योऽप्यचीकथत् । शृणु कारणमत्रार्थे, वत्स ! त्वं गुरुवत्सल ! ॥३२३॥ शस्त्रे[1]शास्त्रे च केनापि, मा स पार्थोऽतिशय्यताम् । इयं मम प्रतिज्ञाऽस्मि-न्नवज्ञाहेतुतां ययौ ॥३२४॥ यथार्थमिदमासाद्य, गुरोरुत्तरमर्जुनः । मेने प्रत्युपकाराय, प्राणानपि न किंचन ॥ ३२५ ॥

अथागत्य विनीतांस्ता-ञ्शिष्यानध्यापयद्गुरुः । अमुक्ते करमुक्ते च, शस्त्रे तेऽपि व्यधुः श्रमम् ॥ ३२६ ॥ अशिक्षेतां गदायुद्धं; भीम-दुर्योधनौ पुनः । कलापारंगमैर्जातं, कुमारैरखिलैः क्रमात् ॥ ३२७ ॥ शिखिपिच्छमवस्थाप्य, तालपादपमूर्धनि । द्रोणाचार्योऽथ कोदण्डे, तानारेभे परीक्षितुम् ॥ ३२८ ॥ लक्ष्याभिमुखमालीढं, स्थानमास्थाय तिष्ठत । शरस्तु मद्गिरा मोच्यो, गुरुस्तानित्यशिक्षयत् ॥ ३२९ ॥ मण्डलीकृत्य कोदण्डं, गुर्वादेशानुसारतः । निक्षिप्तचक्षुषो लक्ष्ये, ते तस्थुः स्थिरचेतसः ॥ ३३० ॥ प्रत्येकं तेऽन्वयुज्यन्त, गुरुणा किमु पश्यथ । मां च वृक्षं च लक्ष्यं च; बन्धूनेतांश्च पुत्रकाः ! ॥ ३३१ ॥ तेऽप्यभापन्त पश्याम-स्त्वां चैनं च महीरुहम् । सर्वांश्च बान्धवानेतान्, लक्ष्यं चैतत् पुरःस्थितम् ॥ ३३२ ॥ तेन तद्वचसाऽऽचार्यः, सव्यथोऽन्तरचिन्तयत् । अजात्यरत्नवदमी, योग्या नोत्तरकर्मणः ॥ ३३३ ॥ अथ पार्थं व्यवस्थाप्य, तथैव गुरुरादि-

१ स्खलितबाणः ।

शत् । प्रेक्षे चन्द्रकमेवाहं, पिच्छेऽस्मिन्निति सोऽवदत् ॥ ३३४ ॥ तामर्जुनगिरं श्रुत्वा, निश्चिक्ये मुदितो गुरुः । राधावेधोपदेशस्य, योग्योऽयमिति चेतसि ॥ ३३५ ॥ अन्यदा स्वर्णदीतोये, मज्जनाय गुरुर्ययौ । कुमारा अपि सर्वेऽपि, सुविनीतास्तमन्वयुः ॥ ३३६ ॥ मज्जन्तमन्तःसलिलं, गम्भीरिमगुरुं गुरुम् । जङ्घाकाण्डेऽथ जग्राह, ग्राहः कश्चिद्दृढग्रहः ॥ ३३७ ॥ स विक्रमकलासारान्, कुमारानखिलानपि । अलंभूष्णुरपि ग्राह–निग्रहाय समादिशत् ॥ ३३८ ॥ अगाधजलदुर्गस्थं, ते च तं हन्तुमक्षमाः । उदासांचक्रिरे सर्वे, गुरोः पार्श्वचराश्चिरम् ॥ ३३९ ॥ अकिंचित्करतां तेषां, विभाव्य गुरुरादरात् । मुखमालोकयामास, प्रह्वबाहोः किरीटिनः ॥३४०॥ गुरुं रक्षन् निजग्राह, ग्राहं पार्थः पतत्रिभिः । "हस्तवांश्च मनस्वी च, किं न कुर्याद्धुरंधरः ?" ॥ ३४१ ॥ द्रोणाचार्योऽथ पार्थाय, पृथुदोर्वीर्यशालिने । राधावेधोपदेशाख्यं, प्रददौ पारितोषिकम् ॥ ३४२ ॥ प्रदत्तोपनिपत्तेन, भृशं रेजे धनंजयः । वार्धिविश्राणितसुधा–सर्वस्व इव वासवः ॥ ३४३ ॥

आकलय्य कुमारांस्तान्, सर्वविद्यास्वधीतिनः । द्रोणाचार्योऽथ भीष्माद्यै–रुपेतं पाण्डुमभ्यगात् ॥ ३४४ ॥ सत्कृत्य विष्टरेऽभ्यर्णे, स भूपेनोपवेशितः । अभाषत सभां दन्त–ज्योत्स्नाभिः स्नपयन्निव ॥ ३४५ ॥ महाराज ! कुमारास्ते, समस्तेऽप्यत्वनर्त्मनि । परमां प्रौढिमारूढाः, परीक्ष्यन्तां ततोऽधुना ॥ ३४६ ॥ अभिनन्द्य गुरुं प्रीत्या, राजा विदुरमादिशत् । पुरीपरिसरे रम्ये, रच्यतां रङ्गभूरिति ॥३४७॥ अपशल्यां समां सौम्यां, भुवमभ्यर्णपाथसम् । अदर्शयत् तदोपेत्य, विदुरस्य गुरुस्ततः ॥ ३४८ ॥ तत्रादृतेन गुरुणा, निर्मिते बलिकर्मणि । विदुरोऽपि क्षितीशार्थं, प्रेक्षाऽगारमकारयत् ॥ ३४९ ॥ अवरोध-

१ गङ्गानदीजले । २ समुद्रेण दत्तं सुधासर्वस्वं यस्य सः । ३ 'सज्जयता' प्रतिद्वय० । ४ जलसमीपस्थाम् ।

वपुःश्रेतो-र्वेदिकाश्च गरीयसीः । उर्वीशवर्गयोग्यांश्च, मञ्चानुच्चानचीकरत् ॥ ३५० ॥ दिने गुरुसमादिष्टे, दूताहूता महीभुजः । तस्थुः मञ्चानधिरुह्य-गिरीनिव मृगारयः ॥ ३५१ ॥ सहितो धृतराष्ट्रेण, जाह्नवीयेन चान्वितः । प्रेक्षागारमगात् पाण्डुः, पुत्रशिक्षादिदृक्षया ॥ ३५२ ॥ कुन्ती निजतनूजानां, शिक्षालोकनोत्सुका । सत्यवत्यादिभिस्तत्र, समं श्वश्रूभिराययौ ॥ ३५३ ॥ कुमारास्त्रपरीक्षार्थं, रूपाचार-व्योमचारिणाम् । रेजे समाजो निर्व्याज-प्रीतिसंमीलितस्तदा ॥३५४॥ द्रोणाचार्य-कृपाचार्यौ, विविधायुधपाणिभिः । शिष्यैरुपरिवृतैः सार्धं, रङ्गे प्राविशतां तदा ॥ ३५५ ॥ युधिष्ठिरं तदा भीम-कर्ण-दुर्योधना-र्जुनान् । पुरस्ताऽन्येषां गुरुः पारा-स्त्रज्ञान् अदर्शयत् ॥ ३५६ ॥

केचित् तेषु कुमारेषु, गजा-श्वाधिरोहिणः । कोदण्डे दर्शयामासु-र्निजं शिक्षासु कौशलम् ॥३५७॥ तेषामाबाणसंधाना-द्भूयाभेदान्तयोरपि । एकमेव जनः कालं, कलयामासिवांस्तदा ॥ ३५८ ॥ संचरत्सु यथालक्ष्यं, तद्बाणेषु नभोऽङ्गणे । भयेन संकुचन्ति स्म, सर्वतः प्रेक्षिणो जनाः ॥३५९॥ राजन्यतनयोपज्ञे, लक्ष्यभेदे पदे पदे । साधु साध्विति लोकस्य, कलः कलकलोऽभवत् ॥ ३६० ॥ स्थिरत्वे सौष्ठवे केचि-ल्लाघवे दृढमुष्टिताम् । आविष्य दर्शयामासु-स्ते राजादिषु कौशलम् ॥ ३६१ ॥ बाहुके यन्त्रमुक्ते च, पाणिमुक्तेऽप्यदर्शयन् । समस्तोऽप्यायुधे केचि-द्गुरुशिक्षा विचक्षणाः ॥ ३६२ ॥

बाणोद्गतवरो राजन्य-धौरेयो युधिष्ठिरः । लोकश्च तत्र निक्षेप, सन्दामसदृशो दृशः ॥ ३६३ ॥ एकां लक्ष्ये निचिक्षेप, चित्रां दृष्टिं मुनिभरताम् । तस्मिन् विस्मयनिष्पन्ना, कोटिसंख्यां जनः पुनः ॥३६४॥ असावचिन्त्यमाहात्म्य-प्रह्वीकृत-

---

१ धनाकोष ॥ ' प्रतिपत्ति० । २ अन्यागणत्वातः । ३ राजपुत्रकृते ।

जगत्त्रयः। असावशेषशौण्डीर-चूडारत्नमनुत्तरम् ॥ ३६५ ॥ असावनुपमन्याय-पथैकपथिकोत्तमः। असावनन्यसामान्य-सत्यपूतवचःक्रमः ॥ ३६६ ॥ इत्थं लोककृतां श्लाघां, श्रुत्वाऽतिप्रीतचेतसः। पुण्डरीकोपमाः पाण्डो-र्दृशः पेतुर्युधिष्ठिरे ॥३६७॥ (त्रिभिर्विशेषकम्) रथी सोऽथ रथारूढः, प्रौढविक्रमसंक्रमः। निःशेषं दर्शयामास, शस्त्रकौशलमात्मनः ॥ ३६८ ॥

अथ तौ नित्यसंहृष्टौ[1], दुर्योधन-वृकोदरौ। गदामुद्दाय संनद्धौ, रङ्गोत्सङ्गेऽवतेरतुः ॥ ३६९ ॥ रङ्गेण रङ्गगगने, सूर्याचन्द्रमसाविव। तौ प्रदक्षिणचारीभि-रभितश्चेरतुश्चिरम् ॥ ३७० ॥ तौ विस्मयेन पश्यन्त-स्तदा दिविषदो दिवि। फलमाकलयामासु-र्नेत्रयोर्निर्निमेषयोः ॥३७१॥ दुर्योधने च भीमे च, पक्षपातात् पृथक् पृथक्। एकाऽपि परिषत् तत्र, द्वैधीभावमुपाययौ ॥ ३७२ ॥ धैर्यं दुर्योधनस्याहो !, भीमस्याहो सुसौष्ठवम्। इति लोकप्रशंसाभिः, शब्दाद्वैतं तदाऽभवत् ॥ ३७३ ॥ ततो हृदि स्थितो भीम-प्राणनाशोपदेशकृत्। गुरुर्दुर्योधनस्योच्चै-र्जागरामास मत्सरः ॥ ३७४ ॥ ततो लोचनयोः किंचिद्गान्धारीतनुजन्मनः। क्रोधाश्रयाश[2]ज्वालेव, प्रादुरास पिशङ्गता ॥ ३७५ ॥ धृतराष्ट्रतनूजस्य, क्रोधान्धस्य शरीरतः। स्वेदबिन्दुव्रजव्याजा-न्निर्ययुर्मत्सरोर्मयः ॥३७६॥ ततो वीक्ष्य तदाकारं, निर्विकल्पमना अपि। विदाञ्चकार परित-स्तदाकूतं वृकोदरः ॥ ३७७ ॥ क्रोधधूम[3]ध्वजस्फूर्ज-द्धूमसंचयसंनिभः। उज्जृम्भते स्म भीमस्य, मूर्ध्नि मूर्धरुहोच्चयः ॥ ३७८ ॥ क्षणाद्दशनभीत्येव, स्फुरति स्मौष्ठपल्लवः। तस्याङ्गान्यपि रोमाञ्च-व्याजात् [4]प्रासानसज्जयन् ॥३७९॥ कोपाटोपादधावेतां, तावुद्घूर्णगदौ[5] ततः। संहारमारुतोद्भूता-विव विन्ध्य-हिमालयौ ॥ ३८० ॥ संजग्माते न तौ यावत्, प्रहाराय परस्परम्।

कुमारयोः कला-परीक्षा। भीमदुर्योधनयोः परीक्षा ॥

१ 'ससृष्टौ' इत्यपि क्वचित् पाठः। २ आश्रयाशः-अग्निः। ३ धूमध्वजः-अग्निः। ४ कुन्तास्त्राणि। ५ उत्क्षिप्तगदौ।

अभाषिष्ट गुरुस्ताव–दश्वत्थामानमात्मजम् ॥३८१॥ वत्स ! वत्सौ महावीरौ, निवारय जवादिमौ। मा भूत् क्षोभः क्षणादेवं, रङ्गस्यास्य गरीयसः ॥३८२॥ उभावपि ततस्तेन, वारितौ गुरुसूनुना। तावुपाविशतां स्थानं, सावहित्थौ निजं निजम् ॥३८३॥

निवार्य तूर्यनिर्घोषं, रोदसीभेदभैरवम्। कोलाहलं च लोकानां, गुरुर्गिरमवोचत ॥ ३८४ ॥ यो मे पुत्रादपि प्रेयान्, प्राणेभ्योऽपि प्रियंकरः। सर्वास्त्राम्भोधिपारीण–स्तं पार्थं पश्यताधुना ॥ ३८५ ॥ आनद्धोभयतूणीरः, करोपहितकार्मुकः। बद्धगोधाङ्गुलित्राणः, कवचच्छन्नविग्रहः ॥ ३८६ ॥ ततो विवेश बीभत्सु–र्गिरान्तःसदसं गुरोः। मध्येसुरधुरं यन्तु–र्येलेनेव सुरद्विपः ॥ ३८७ ॥ (युग्मम्) त्रिजगत्येकवीरोऽय–मयमस्त्रविदां वरः। कुरुगोत्रप्रदीपोऽय–मयं भुवनरक्षिता ॥ ३८८ ॥ तेजसामेकधामाय–मयं न्यायनिकेतनम्। कीर्तीनां कुलवेश्माय–मयमुत्साहमन्दिरम् ॥ ३८९ ॥ इत्यानन्दाज्जनैरुक्ताः, शृण्वन्त्याः सर्वतो गिरः। प्रस्रवेण समं कुन्त्याः, पेतुः प्रीत्याऽश्रुविप्रुषः ॥३९०॥ (त्रिभिर्विशेषकम्) धृतराष्ट्रस्य पाण्डोश्च, पुलकच्छद्मना बहिः। फाल्गुनं पश्यतोर्जाताः, शुभस्नेहाङ्कुरा इव ॥ ३९१ ॥ दिदृक्षयेव पार्थस्य, लोकवक्त्रेषु राकया। एत्यामावस्यया तस्थे, गान्धारीवदने पुनः ॥ ३९२ ॥ संसञ्जनोत्थितैस्तैस्तै–रर्जुनस्तुतिघट्टनैः। दिदीपे कोपसप्तार्चिः, सुयोधनशमीतरौ ॥ ३९३ ॥ कर्णस्तु सर्वशस्त्राब्धि–कर्णधारभुजोर्जितः। सार्जुनं तं जनं हन्तु–मियेष प्रस्तुतस्तुतिम् ॥ ३९४ ॥ कलितोद्दण्डकोदण्ड–मालीढस्थानमास्थितः। किरीटी ददृशे साक्षा–द्धनुर्वेद इवाङ्गवान् ॥ ३९५ ॥ जनस्याभून्मुदा तूर्य–निनादैरभिनन्दितः। ब्रह्माण्डभाण्डभेदीव, कलः कोलाहलो महान् ॥ ३९६ ॥ उपजग्मुषि विश्रान्ति–मथ

---

१ स्वस्थौ। २ अर्जुनः। ३ नियन्तुः। ४ अर्जुनम्। ५ 'सुतस्ने०' प्रतिद्वय०। ६ ससत्–सभा।

तस्मिन् कथंचन । अस्त्रकौशलमात्मीयं, दर्शयामास फाल्गुनः ॥ ३९७ ॥ लक्ष्ये चले स्थिरे स्थूले, लघीयसि च लाघवम् । के नाम विस्मयं नापुः, पश्यन्तः सव्यसाचिनः ? ॥ ३९८ ॥ दृढानि दृढमुष्टित्वा-दुर्भेद्यान्यपि भिन्दिना । जिष्णुना वैरिवारस्य, दृढं चेतोऽप्यभिद्यत ॥ ३९९ ॥ तस्मिन् बहूनि चित्राणि, विचित्राणि वितन्वति । चित्रीयन्ते स्म के नाम, न माघदोर्मदा अपि? ॥४००॥ शरग्रहण-संधान-समाकर्षण-मुक्तयः । शतशो लक्ष्यभेदाश्च, तस्यैक्ष्यन्त समं जनैः ॥ ४०१ ॥ न यत्र निपतन्ति स्म, नायना अपि रश्मयः । लक्ष्यं तत्राप्यणीयोऽपि, भिन्दन्ति स्मार्जुनेषवः ॥ ४०२ ॥ चक्रवद्भ्रमतो लोह-वपुषो यन्त्रपोत्रिणः । निचखान मुखे पञ्च, बाणान् युगपदर्जुनः ॥ ४०३ ॥ राधावेधादिकं तत्तत्, पार्थोऽन्यदपि दुष्करम् । करोति स्म यदालोक्य, सुरैरपि विसिष्मिये ॥ ४०४ ॥ चक्र-प्रास-गदा-खड्ग-प्रभृतिष्वपि कौशलम् । शस्त्रेषु श्वेतवाहस्य, निर्वाहमगमत् परम् ॥ ४०५ ॥ क्षणात् प्रांशुः क्षणाद्ध्रस्वः, क्षणाद्भूमौ क्षणाद्दिवि । क्षणात् क्रीडन्नथक्रोडे, तत्र जिष्णुरदृश्यत ॥ ४०६ ॥ मन्त्रास्त्राण्यप्यनुध्यान-मात्रजातोदयानि सः । आग्नेय-वारुणादीनि, कुरुभर्तुरदर्शयत् ॥ ४०७ ॥

ततः समर्थितप्राये, तस्मिन् महति कर्मणि । सभालोके च सर्वस्मि-न्नानन्दमकरन्दिते ॥४०८॥ संवर्त-पुष्करावर्त-निध्वानप्रियबान्धवः । भुजास्फोटध्वनिः कर्ण-स्फोटकृद्धैरवोऽभवत् ॥ ४०९ ॥ (युग्मम्) भूभृतः किमु शीर्यन्ते ?, दीर्यते किमु मेदिनी ? । पतन्ति विद्युतः किंस्वित् ?, क्षुभ्यन्ति किमुताब्धयः ? ॥ ४१० ॥ विकल्पजातमित्यन्तः, कुर्वन्नुद्भ्रान्तमानसः । विसंस्थुलं समुत्तस्थौ, सर्वोऽथ स सभाजनः ॥ ४११ ॥ (युग्मम्) आवव्रे पञ्चभिर्द्रोणः, पाण्डवैः सायुधैस्तदा । मूर्तिमान्

१ अर्जुनस्य । २ यन्त्रवराहस्य । ३ अर्जुनस्य । ४ उन्नतः ।

परमात्मेव, महाभूतैः शरीरिभिः ॥ ४१२ ॥ अश्वत्थामान्विताः स्थाम-बन्धुरा बान्धवाः शतम् । तारका इव शीतांशुं, परिवव्रुः सुयोधनम् ॥ ४१३ ॥ अमन्दमन्दरक्षुब्ध-क्षुभ्यदम्भोधिभैरवम् । कातरीकृतशौण्डीरं, सिंहनादं समावहन् ॥४१४॥ भुजास्फोटानुसारेण, प्रक्षिप्तनयनाम्बुजैः । विस्मयस्तिमितैस्त्रास-लोलैश्चालोकितो जनैः ॥ ४१५ ॥ भीमाकृतिरतिप्रांशुः, सासि-तूणीर-कार्मुकः । काञ्चनं कवचं बिभ्रत्, सुमेरुरिव जङ्गमः ॥४१६॥ बीभत्सुं प्रति बीभत्से, क्षिपन् गुञ्जारुणे दृशौ । रङ्गमध्यमथाध्यास्त, कर्णः शौर्यमहार्णवः ॥४१७॥ (चतुर्भिः कलापकम्) ततः कर्णः कृपाचार्यं, द्रोणं च द्रुहिणोपमम् । ननाम नामितारातिर्-नीतिप्रह्वान्तराशयः ॥४१८॥ ततः सगर्वं सोऽवोचत्, पार्थ ! माऽनेन कर्मणा । मंस्थाः कर्मठमात्मानं, मामालोकय संप्रति ॥४१९॥ अथ पार्थो यथा यद्यत्, कर्म निर्मितवान् पुरा । कर्णः सातिशयं तत्तत्, प्रथयामासिवांस्तथा ॥४२०॥

ततः सहर्षमुत्थाय, धृतराष्ट्रात्मजाग्रणीः । कर्णं निबिडमालिङ्ग्य, प्रणयादित्यवोचत ॥ ४२१ ॥ कर्ण ! त्वमेकवीरोऽसि, त्वं त्रिलोकीविभूषणम् । त्वं धनुर्वेदविद्यायाः, परां सीमानमीयिवान् ॥ ४२२ ॥ त्वमेव वैरिदोर्दर्प-संपदां पश्यतोहरः[3] । त्वमेव कीर्तिनिर्घोस-डिण्डिमः सर्वधन्विनाम् ॥ ४२३ ॥ इदं राज्यमिमे प्राणा, इमाः कुरुकुलश्रियः । सर्वं त्वदीयमेवैत-द्ब्रूहि येन प्रयोजनम् ॥ ४२४ ॥ कर्णोऽप्युवाच मेऽस्त्येव, समस्तं सुहृदि त्वयि । प्रार्थये केवलं भूयात्, सौहार्दं ते मयि स्थिरम् ॥ ४२५ ॥ किं तु पार्थस्य दोर्दण्ड-कण्डूतिज्वरितात्मनः । इच्छति द्वन्द्वयुद्धेन, भुजो भिषजितुं मम ॥ ४२६ ॥ गिरमाकर्ण्य कर्णस्य, तामधिक्षेपपांशुलाम्[4] । हुतो वह्निरिव क्रोधा-ज्ज्वलितः फाल्गुनोऽभ्यधात् ॥ ४२७ ॥ कर्ण ! निर्नाम ! निर्मज्जन्,

१ क्षुब्धः-मन्थानः । २ ब्रह्मोपमम् । ३ चौरः । ४ अधिक्षेपेण-तिरस्कारेण पांशुलां-सपापाम् ।

मदीयशरसागरे । अस्रोदकैर्निजस्त्रीणां, दृशः किं प्लावयिष्यसि ? ॥ ४२८ ॥ कर्णस्ततोऽब्रवीत् कोपात्, पार्थ ! केयं विभीषिका । गृहाणास्त्रं हराम्येष, सर्वं गर्वं तवाधुना ॥ ४२९ ॥ ततो द्रोणाभ्यनुज्ञातः, प्रगृह्य सशरं धनुः । युद्धश्रद्धाय कर्णाय, कपिकेतुरतिष्ठत ॥ ४३० ॥

तयोः समरसंरम्भ-दर्शनोत्सुकचेतसाम् । आसीत् कुसुमितेव द्यौ-र्विमानैस्त्रिदिवौकसाम् ॥ ४३१ ॥ तदीयसमरारम्भ-विलोकनकुतूहली । अनूरुसारथिस्तस्थौ, स्थिरीकृतरथः क्षणम् ॥ ४३२ ॥ तौ प्रजाभिरदृश्येतां, रणायान्योन्यसंमुखौ । विन्ध्याद्रिविपिनोत्सङ्गे, मत्तौ दन्तावलाविव ॥ ४३३ ॥ अभूवन् कर्णतः केचित्, केचिदर्जुनतः पुनः । खेचरामरमर्त्यानां, तदा द्वैधमजायत ॥ ४३४ ॥ पुरः कर्णस्य को जिष्णु-रिति दुर्योधनादयः । कः कर्णोऽग्रेऽर्जुनस्येति, दधुर्भीमादयो मुदम् ॥ ४३५ ॥ कुन्ती तु कुन्तभिन्नेव, तनयस्नेहविक्लवा । मूर्च्छान्धकारविधुरा, पपात जगतीतले ॥ ४३६ ॥ तां तथा विदुरः प्रेक्ष्य, प्रेष्याभिश्चन्दनद्रवैः । क्षणादाश्वासयामास, शीतैश्च व्यजनानिलैः ॥ ४३७ ॥ विषमैव गतिः कामं, समरस्येति कातरम् । पाण्डोर्वदनमालोक्य, राधेयमवदत् कृपः ॥ ४३८ ॥

कुन्तीकुक्षिसरोहंसः, कुरुवंशैकमौक्तिकम् । पाण्डुहेमाद्रिकल्पद्रु-र्बीभत्सुर्विदितोऽस्ति नः ॥ ४३९ ॥ तत्त्वमप्यात्मनो ब्रूहि, मातरं पितरं कुलम् । ताम्यतस्तत्र चेद्बाहू, रणाय कपिकेतुना ॥ ४४० ॥ तां कृपस्य कृपाणाग्र-शितामाकर्ण्य भारतीम् । झटित्युत्थाय संरम्भा-दभाषत सुयोधनः ॥ ४४१ ॥ किं कुलेन पितृभ्यां वा ?, गौरवं हि गुणैर्नृणाम् । अधिरोहति

१ अर्जुनः । २ सूर्यः । ३ 'नूतनस्रे०' प्रतिद्वय० । ४ कर्णम् । ५ अर्जुनः ।

मूर्धान-मरविन्दं किमन्वयम् ? ॥ ४४२ ॥ रणः शौण्डीरिमापेक्षः, कुलं न काप्यपेक्षते । शौण्डीरस्तद्बलात् कर्णः, फाल्गुनं योधयिष्यति ॥ ४४३ ॥ किं नाम सोऽपि शौण्डीरः ?, क्षमते यः परानपि । न नाम सहते सिंहो, गर्जाभिः स्फूर्जतो घनान् ॥ ४४४ ॥ अथ जल्पथ नाराज्ञा, विधत्ते युद्धमर्जुनः । राज्ये कर्णस्तदङ्गाना-मभिषिक्तो मयाऽधुना ॥ ४४५ ॥ इत्युदीर्य कृपाचार्य—प्रभृतीन् धृतराष्ट्रजः । कर्णराज्याभिषेकाय, तत्कालमुपचक्रमे ॥ ४४६ ॥

पुरोहितमथाहूय, कर्णं स्वर्णासनस्थितम् । स्वभुक्ते सोऽङ्गसाम्राज्ये-ऽभ्यषिञ्चत् तीर्थवारिभिः ॥४४७॥ निष्कलङ्कमृगाङ्काभं, तस्य च्छत्रमधार्यत । अर्जितं निजदोर्दण्डै-र्यशः स्वमिव पिण्डितम् ॥ ४४८ ॥ प्रेकीर्णकानि कर्णस्य, धूयन्ते स्म वधूजनैः । अभिषेक्तुं तमायाता, गङ्गोर्मय इवाम्बरात् ॥ ४४९ ॥ चिरं जयाङ्गराजेति, शब्दोद्गारपुरःसरम् । तस्य भोगावलीं पेठु—र्व-न्दिनो विश्वनन्दिनः ॥ ४५० ॥ कर्णः प्रत्युपकाराय, ययाचेऽथ सुयोधनम् । स्थेमानमर्थयांचक्रे, सोऽपि सौहार्दसंपदः ॥ ४५१ ॥ सौहार्दे हि कियन्मात्रं ?, प्राणा अपि तवैव मे । इत्युक्तवन्तं राधेयं, मुदाऽश्लिष्यत् सुयोधनः ॥ ४५२ ॥ ततः प्राप्ताङ्गसाम्राज्यः, पुनरादाय कार्मुकम् । रणारम्भाय राधेयो, दूरादाह्वास्त फाल्गुनम् ॥ ४५३ ॥

साम्राज्यमङ्गदेशाना-मुपश्रुत्यात्मजन्मनः । सरदानन्दसंदोह-विसंस्थुलपदक्रमः ॥४५४॥ स्रस्तोत्तरीयसिचयः, प्रफुल्ल-नयनोत्पलः । कर्णस्य जनकोऽभ्यागात्, तत्रातिरथिसारथिः ॥४५५॥ युग्मम् ॥ कर्णः पितरमालोक्य, दूरादुत्सृज्य कार्मुकम् । पपात पादयोस्तस्य, "दैवतं हि परं पिता" ॥४५६॥ अङ्गराज्याभिषेकार्द्र-मानन्दाश्रुकणोदकैः । पुनरुक्तं शिरः सोऽपि,

---

१ चामराणि । २ स्तुतिम् । ३ सुयोधनः ।

तनूजस्याभ्यषिञ्चत ॥ ४५७ ॥ आलिङ्गति स्म सर्वाङ्गं, सुतमुत्थाप्य सारथिः । उन्मीलत्पुलको मूर्ध्नि, भूयो भूयश्चुचुम्ब च ॥४५८॥ विज्ञाय विज्ञतिलक-स्तमित्थं सारथेः सुतम् । कर्णमभ्यर्णमागत्य, वदति स्म वृकोदरः ॥४५९॥ सूतात्मज ! न पार्थेन, कथंचिद्योद्धुमर्हसि । गृह्यतां प्राजनं चाप-मपहाय कुलोचितम् ॥ ४६० ॥ अङ्ग ! त्वमङ्गसाम्राज्य-योग्योऽसि न कथंचन । मृगारातिपदे हन्त, गोमायुः किमु जायते ? ॥ ४६१ ॥ इति व्याहरति स्वैरं, भीमे भीमभुजोर्जिते । आगत्य रमगाङ्गात्-मभ्यादुर्योधनोऽभ्यधात् ॥४६२॥ वीराचारानभिज्ञोऽसि, भीम ! यत् कुलमीक्षसे । चुलुकाचान्तसप्ताब्धेः, कुलं कुम्भोद्भवस्य किम् ? ॥४६३॥ तत्त्वान्तरं किमप्येतत्, कर्ण इत्युदितं भुवि। दिव्याङ्गलक्षणं सूती, न सूते सुतमीदृशम् ॥४६४॥

अथातिरथिराह स्म, साधु साधु सुयोधन ! । असौ मे नाङ्गजः सूनु-र्यथा प्राप्तस्तथा शृणु ॥४६५॥ त्रिस्रोतःस्रोतसि पुरा, प्रभाते गतवानहम् । अपश्यं रत्नमञ्जूषां, पुण्यलक्ष्मीं निजामिव ॥ ४६६ ॥ गृहे नीत्वा पुरः पत्न्या-स्तामुद्घाट्य तदन्तरे । सकुण्डलं स्फुरत्कान्ति, वचनागोचरश्रियम् ॥ ४६७ ॥ राजकुञ्जरदर्पोष्म-ध्वंससंभाविताकृतिम् । एकमालोकयं बालं, सिंहार्भकमिवोद्भटम् ॥ ४६८ ॥ (युग्मम्) तमालोक्य कृतालोकं, पत्नीं राधामथाभ्यधाम् । अनपत्या प्रिये ! संप्र-त्यनेन भव पुत्रिणी ॥ ४६९ ॥ इत्युक्ता साऽपि मामाह, प्राणेश ! घुसृणारुणे । जाते प्राच्या दिशो वक्त्रे, स्वप्नोऽद्य ददृशे मया ॥४७०॥ जानामि भानुमानेत्य, सप्रसादं जगाद माम् । वत्से ! संपत्स्यते तेऽद्य, शौण्डीरतिलकः सुतः ॥ ४७१ ॥ तं दृष्ट्वा दधती हर्ष-मुआगरमजागरम् । तदैव च त्वयाऽनेन, दिष्ट्या पुत्रेण वर्धिता ॥ ४७२ ॥ इत्याख्याते शुभे स्वप्ने, प्रियायाः

१ अश्वनोदनयष्टिः । २ अगस्त्यमुनेः । ३ सारथिभार्या । ४ कृतप्रकाशम् । ५ कुङ्कुमारुणे ।

कुमाराणां कला-परीक्षा । कर्णस्य वृत्तान्तः ॥

पुलकस्पृशः । मञ्जूपातः समाकृष्य, तमङ्के बालमक्षिपम् ॥४७३॥ कर्णस्याधः करं कृत्वा, सुप्तः प्राप्तोऽयमित्यसौ । आपितः कर्ण इत्याख्यां, तनयः सुदिने मया ॥ ४७४ ॥ स्वप्ने रविवितीर्णत्वा-दपरं रविभूरिति । अस्योद्यद्भागधेयस्य, नामधेयमजायत ॥ ४७५ ॥ भवन्ति स्म गुणा बाल्या-दस्मिन्नसमरकुलातिगाः । पङ्के पङ्केरुहो वृद्धिः, सौरभं तु स्वतोभवम् ॥ ४७६ ॥ असौ राजकुले क्वापि, लब्धजन्मा न संशयः । इति कुन्दोज्ज्वलैरस्य, गुणैरनुमितं मया ॥ ४७७ ॥ असौ मद्वंशजत्वेन, यदधिक्षिप्यते मुहुः । काकोलकुलजत्वेऽपि, कुत्सनं कोकिलस्य तत् ॥ ४७८ ॥

इमामाकर्ण्य कर्णस्य, कथामतिरथेर्मुखात् । दधुः सभासदः सर्वे, विस्मयस्तिमितं मनः ॥ ४७९ ॥ कुन्ती तु चिन्तयामास, दिष्ट्या जीवति मे सुतः । नेत्रयोश्चिररात्राय, ममाभूत् पारणाविधिः ॥ ४८० ॥ सैवेयं यन्मणिस्तोम-मण्डिता कुण्डलद्वयी । अहमेकैव धन्याऽस्मि, यस्याः कर्णा-र्जुनौ सुतौ ॥४८१॥ कोऽन्यः स्पर्धेत पार्थेन ?, यो हि न स्यात् सहोदरः । अमृतेनामृतांशु-रेव स्पर्धितुमर्हति ॥ ४८२ ॥ कर्णो वः सोदरो बन्धु-रिति संबन्धमादितः । समये धर्मजादीनां, ज्ञापयिष्यामि जातुचित् ॥ ४८३ ॥ एवं विकल्पकल्लोलैः, कुन्त्यामाक्रान्तचेतसि । सभायां भुजमुत्क्षिप्य, क्रुधा दुर्योधनोऽभ्यधात् ॥ ४८४ ॥ अभिषिक्तोऽयमङ्गेषु, यादृशस्तादृशो मया । नाभीष्टो यस्य कस्यापि, स नामयतु कार्मुकम् ॥ ४८५ ॥ तामाकर्ण्य गिरं पाण्डु-सूनुषु ज्वलितात्मसु । भयोद्भ्रान्तस्य लोकस्य, जज्ञे कोलाहलो महान् ॥४८६॥ पाण्डुर्द्रोणमभाषिष्ट,

१ 'पान्तः' प्रतिद्वय० । २ काकोलः-द्रोणकाकः-काकजातिविशेषः इत्यर्थः । ३ चिरकालेन । ४ चन्द्रः । ५ 'भीष्मं' प्रतिद्वय० ।

दृष्ट्वा तदसमञ्जसम् । प्रचण्डः पुत्रभाण्डाना-मकाले कलहः किमु ? ॥ ४८७ ॥ एषामस्माभिरासूत्रि, कलामात्रपरीक्षणम् । कुमाराणां विरोधोऽयं, तदाचार्य ! निवार्यताम् ॥ ४८८ ॥ मिथो विरोधं बन्धूना-मवेक्षितुमिवाक्षमः । तदानीं च पतिर्भा-मा-मस्तगह्वरमाविशत् ॥ ४८९ ॥ अथोत्क्षिप्य भुजं द्रोणः, पाण्डवान् कौरवानपि । सिंहपोतानिवान्योन्यं, युध्यमाना-न्यवारयत् ॥४९०॥ भुजोत्कर्षाच्च बीभत्सोः, कुमाराणां च मत्सरात् । आनन्दश्च विषादश्च, समं पाण्डोरभूद्द्वयम् ॥४९१॥ धृतराष्ट्र-कृप-द्रोण-गाङ्गेयादिभिरन्वितः । विसृज्य संमदं पाण्डु-र्निजमन्दिरमासदत् ॥ ४९२ ॥ कृतकर्णस्तुतिः कश्चित्, कश्चित् पार्थस्तवोल्बणः । कश्चिद्दुर्योधनस्तोता, जनः स्वं स्वं गृहं ययौ ॥ ४९३ ॥

इतरेतररन्ध्रवीक्षिणस्ते, विनयाच्छादितमत्सराः कुमाराः ।
सकलासु कलासु केलियोग्या, मिलिता एव वितन्वते स्म नित्यम् ॥ ४९४ ॥

इति मलधारिश्रीदेवप्रभसूरिविरचिते पाण्डवचरिते महाकाव्ये भीम-दुर्योधनादिजन्मकुमारकलारोपणास्त्रदर्शनवर्णनो नाम तृतीयः सर्गः ॥ ३ ॥

अथ चतुर्थः सर्गः।

अथान्यदाऽवदातश्रीः, श्रीमान् पीनांसकुट्टिमः। खण्डितारातिदोष्काण्डः, पाण्डुः संसदमासदत् ॥ १ ॥ हिरण्मयमयं भेजे, शारदाम्भोधरद्युतिः। भद्रासनं शशिकान्त-सुमेरुशिखरोपमम् ॥२॥ दधार रत्नकेयूरे, स प्रभाऽरुणिताम्बरे। वमद्भ्यामिव बाहुभ्यां, प्रतापं मूर्त्ततां गतम् ॥ ३ ॥ अरातिकीर्तिसर्वस्व-मावर्त्यैव विनिर्मितम्। स बभारोज्ज्वलं हार-मुरःस्थलविलम्बिनम् ॥ ४ ॥ शिरस्युवाह पीतानां, विपक्षमहसामिव। अमान्तमन्तः संदोहं, स रत्नमुकुटच्छलात् ॥ ५ ॥ कपोलदर्पणे द्रष्टु-मात्मीयकमनीयताम्। विकर्तनाविवायातौ, स दधौ स्वर्णकुण्डले ॥ ६ ॥ जयप्रशस्तिमेतस्य, चामरग्राहिणीगणाः। कङ्कणौघरणत्कार-कैतवेन वितेनिरे ॥ ७ ॥ हारयष्टिं महीपृष्ठे, तस्येव विशदं यशः। पुञ्जयन्तः क्षितीशास्तं, प्रणम्योपाविशन् पुरः ॥ ८ ॥ मणिकोटीरसंक्रान्त-मूर्तिरार्तैकबान्धवः। उह्यमान इव भ्रेजे, शिरोभिः सोऽवनीश्वरैः ॥ ९ ॥ स्त्यानीभूयंगतैर्मूर्ति-मद्भिः कामरसैरिव। निर्मिताः परितो वार-नार्यस्तं पर्यवृण्वत ॥ १० ॥ गाङ्गेय-धृतराष्ट्रादि-गुरुवर्गोऽपि गौरवात्। अलंचक्रे तदास्थान-मानन्दभरमेदुरः ॥ ११ ॥ यथास्थानमथासीने, सामन्ता-मात्यमण्डले। स्तुवत्सु तद्यशो विश्व-श्रोत्रानन्दिषु बन्दिषु ॥ १२ ॥ पुष्पावचूलरोलम्ब-कदम्बध्वनिडम्बरैः। मुहुर्निह्नूयमानासु, गाथकीकलगीतिषु

१ सूर्यौ। २ कोटीरः-मुकुटः। ३ रोलम्बा-भ्रमराः।

॥ १३ ॥ नानासूक्तीः कवीन्द्रेषु, रसभङ्गितरङ्गिताः । उद्गिरत्सु जनश्रोत्र-पुटपीयूषवर्षिणीः ॥ १४ ॥ विशारदेषु पुरतो, भरतादिमहीभुजाम् । प्रथयत्सु कथास्तथ्या, नितान्तमघमर्षणीः ॥ १५ ॥ अभ्येत्य भूमिन्यस्तैक-जानुरानम्य भूपतिम् । मूर्धन्यञ्जलिमाधाय, प्रतीहारो व्यजिज्ञपत् ॥ १६ ॥

देव सेवककल्पद्रो !, द्रुपदस्य महीपतेः । आकारविदिताकूतो, दूतस्ते द्वारि वर्तते ॥ १७ ॥ जाह्नवेय-धृतराष्ट्र-विदुराणामथाशयम् । ज्ञात्वोर्वीपतिरादिक्षत्, तत्प्रवेशाय तं भ्रुवा ॥ १८ ॥ आक्षिप्तचक्षुरालान-लालितैः केलिलोलुपैः । सविभ्रमाभ्रमातङ्ग-बन्धुभिर्गन्धसिन्धुरैः ॥१९॥ वनायुदेश्यैर्देवाश्व-देशीयैर्मन्दुरोदरे । भृशमोजस्विभिः क्लृप्त-नेत्ररङ्गैस्तुरङ्गमैः ॥ २० ॥ संगीतरङ्गनिःसङ्ग-मृदङ्गध्वनिलासिभिः । हृष्यन्नजस्रविस्रम्भा- दलोलैः केलिकेकिभिः ॥२१॥ वपुर्विसारिसौरभ्य-संभावितनभोऽन्तरे । निविष्टदृष्टिरुत्फाले, केलिकस्तूरिकामृगे ॥२२॥ स दूतः पूतवाङ्क्विन्दन्, संसदं शार्तमन्यवीम् । उपतस्थे नृपास्थानं, प्रतीहारपुरःसरः ॥ २३ ॥ (पञ्चभिः कुलकम्) स प्रणम्य यथास्थान-मुपविश्य विशांपतिम् । विज्ञो विज्ञपयामास, मौलिकुड्मलिताञ्जलिः ॥ २४ ॥ अविश्रांतकृतासेव !, देव ! द्रुपदभूपतिः । प्राहिणोदनणुप्रेम-प्रणयी मां त्वदन्तिके ॥ २५ ॥ सुताऽस्य द्रौपदीत्यस्ति, प्राणेभ्योऽपि प्रियंकरा । इमां स यस्मै कस्मैचि-द्दातुमुत्सहते न हि ॥ २६ ॥ व्यक्तं च वक्ति यः कोऽपि, राधावेधं विधास्यति । तस्मै सुतेयमस्माभि-र्दास्यते पारितोषिकम् ॥ २७॥ आम्नातिनो धनुर्वेदे,

१ पापक्षयकारिणीः । २ अभ्रमातङ्ग-ऐरावणः । ३ वनायुदेशे-अश्वस्थाने भवाः तैः । ४ अश्वशालामध्ये । ५ ' दालोलैः ' प्रतिद्वय० । ६ इन्द्रसंबन्धिनीम् । ७ सदभ्यासवन्तः ।

पाण्डुसभायां द्रुपददूतागमनम्॥

सर्वाअित्वाऽस्त्रकोविदान् । वर्तन्ते भवतो विश्व–विश्वानन्दननन्दनाः ॥ २८ ॥ ततः सत्यपि दोर्दण्ड–मण्डने राजमण्डले । नेतुर्नः पूरयिष्यन्ते, नूनमेतैर्मनोरथाः ॥२९॥ मत्तद्विपकपोला हि, मदपानकुतूहलम् । पूरयन्ति द्विरेफस्य, नाऽऽलेख्यकरिणां कटाः ॥ ३० ॥ जगत्यामेकधानुष्कै–रागत्य सह सूनुभिः । स्वयंवरं भुवो भर्तु–स्तदलंकर्तुमर्हसि ॥ ३१ ॥ मतमादाय गाङ्गेय–प्रभृतीनां कुरूद्वहः । दूतस्य भारतीमेता–मोमिति प्रत्यपद्यत ॥३२॥ रत्न-कुण्डल-केयूर–कङ्कणाद्यैरनेकशः । काम-मानन्द्य तं दूतं, विससर्ज विशांपतिः ॥ ३३ ॥

अथ प्रतस्थे काम्पील्यं, पृतनाभिः प्रकम्पयन् । मेदिनीमण्डलं पाण्डु–र्भुग्नभोगीन्द्रधारितम् ॥ ३४ ॥ प्रस्थानमङ्गलं तस्य, महितस्य तनूरुहैः । विदधे कुलवृद्धाभि–र्मूर्ताभिरिव सिद्धिभिः ॥ ३५ ॥ तत्कालोन्मीलदानील–दानाम्भःश्रु(स्रु)–तिभिर्भुवि । द्वैतीयिकीं वितन्वन्तं, कलिन्दतनयामिव ॥ ३६ ॥ गर्जाभिः स्निग्धमन्द्राभिः, शिखण्डिकुलताण्डवम् । कुर्वाणं वारणाधीश–मारुरोह महीपतिः ॥ ३७ ॥ (युग्मम्) दुकूले कलयामास, स प्रयाणक्षणोचिते । दधच्चन्द्रातपाश्लिष्ट–गिरीशे-गिरिविभ्रमम् ॥ ३८ ॥ नाशो मदुपजीव्यस्य, रवेस्तेजः क्षमिष्यते । इति छत्रच्छलान्मन्ये, तस्येन्दुरुपरि स्थितः ॥ ३९ ॥ युधिष्ठिरादयः पञ्च, शतं दुर्योधनादयः । विविधं यानमारूढाः, परिवव्रुस्तमात्मजाः ॥ ४० ॥ हयौघहेषितैर्दन्ति–बृंहितैरुप-बृंहितः । आविर्बभूव गम्भीरः, प्रयाणपटहध्वनिः ॥४१॥ वाहिनी हास्तिका-श्वीय–रथ्या-पादातमेदुरा । तमन्वगच्छदह्नाय, जाह्नवीव भगीरथम् ॥ ४२ ॥ निस्वाननिस्वनस्तस्य, दारयन् गिरिकन्दरान् । उच्चचार स्वमाधार–मम्बरं स्फारयन्निव ॥ ४३ ॥

---

१ अस्माकं नेतुः–द्रुपदनृपस्य । २ भुग्नः–अवनतः । ३ गिरीशस्य–महादेवस्य गिरिः–कैलासपर्वतः । ४ ऊर्ध्वं चचार ।

अनुकूलानिलोद्धूताः, स्वयंवरदिदृक्षया । पुरो गन्तुमिवेच्छन्त्यो, वैजयन्त्यो विरेजिरे ॥ ४४ ॥ अनुयातः स सामन्तैः, समन्तात् परमर्द्धिभिः । साक्षात् सुरैरिव हरिः, परीतो ददृशे जनैः ॥ ४५ ॥ असौ कुन्त्या च माद्र्या च, याप्ययानाधिरूढया । बभौ गङ्गा-मृडानीभ्यां[1], चन्द्रचूड[2] इवान्वितः ॥४६॥ धृतराष्ट्रादिभिः सर्वैः, स्वस्वशुद्धान्तशालिभिः । स बभौ वल्लभाबद्ध-सङ्गैर्भृङ्गैरिव द्रुमः ॥४७॥ सैन्यवोद्धूतधूलीभिः, पिदधे घर्मदीधितिः । तद्यशश्चन्द्रमाः कामं, जगत्यामद्युतत् पुनः ॥४८॥ नेत्रैः सेन्दीवरा वक्त्रैः, सेन्दवोऽङ्गैः सवीरुधः । तद्दिदृक्षुमृगाक्षीणां, विरेजुः पुरवीथयः ॥४९॥ अभिरामगुणग्राम-गरीयान् नगरश्रियम् । अवेक्षमाणः स प्राप, प्रतोलीमतुलद्युतिः ॥५०॥ अन्योन्यजङ्घासंघट्ट-सीदन्निखिलसादिका । दूरत्रस्तजनोर्जस्वि-गर्जत्तुङ्गमतङ्गजा ॥ ५१ ॥ जाह्नवीव तुषाराद्रि-सद्मपद्महृदोदरात् । निर्जगाम चमूः पाण्डोः, शनकैः पुरगोपुरात् ॥५२॥ (युग्मम्) कुरूणां प्रवरैश्छाया-प्रवाल-फल-कुड्मलैः[3] । प्रथयामासुरातिथ्यं, जाह्नवीतीरभूरुहः ॥ ५३ ॥ सैनिकानां नगोत्तुङ्ग-वीचिसंचारमन्थरैः । स्वेदाम्बुततिराचेमे, गाङ्गेयैः पवनोर्मिभिः ॥५४॥ हैयङ्गवीनगोमुख्यै-र्ग्रामीणोपायनैरसौ । मुमुदे मेदिनीपालः, कालः प्रत्यर्थिनां पथि ॥५५॥ रथा-श्वे-भादिभिः सीम-सामन्तानभ्युपस्थितान् । स पश्यन्नन्दयामास, प्रसादस्निग्धया दृशा ॥५६॥ मनोहरसरःशैल-केलिदुर्ललिता क्रमात् । कौरवी दूरमध्वान-मतिचक्राम सा चमूः ॥ ५७ ॥

काम्पील्यस्याथ सीमान-माससाद कुरूद्वहः । प्रमोदस्तु विवेशान्त-रुत्फुल्लजनसूचितः ॥ ५८ ॥ तमभ्यगच्छदुत्सर्पि-चलोर्मितुमुलैर्दिशः । द्रुपदो बधिरीकुर्वन्, मृगाङ्कमिव नीरधिः ॥५९॥ अम्भोदरवगम्भीरः, परस्परचमूचरैः । दूरमाक-

पाण्डव-कौरवाणां काम्पील्यं प्रति-गमनम् ॥

१ गङ्गापार्वतीभ्याम् । २ शिवः । ३ कुड्मलः-पुष्पकलिका ।

र्णयामाहे, वाहिनीतुमुलध्वनिः ॥ ६० ॥ तुरङ्गमखुरक्षुण्णः, क्षोणिरेणुः परस्परम् । सस्वजे प्रणयेनेव, सैन्ययोरुभयोरपि ॥६१॥ द्वयोरपि वरूथिन्यो–र्दुन्दुभिध्वनिभिस्तयोः । स्वैरं दिगन्तविश्रान्तैः, प्रतिशब्दायितं मिथः ॥ ६२ ॥ बलौघः पाण्डुजन्मा च, द्रौपदी च पताकिनी । अयुध्येतां तदा ताव–द्धान्यर्थपिशुनाविव ॥ ६३ ॥ ते वाहिन्यौ तदाऽन्योन्य–मेकीभावमुपागते । चकाशामासतुर्गङ्गा–पतङ्गतनये इव ॥ ६४ ॥ पदातौ द्रुपदे जाते, संत्यज्य जयकुञ्जरम् । उज्झांचकार करटि–प्रकाण्डं पाण्डुभूपतिः ॥ ६५ ॥ तौ वितत्य भुजौ प्रीत्या, सस्वजाते यशस्विनौ । अन्योन्यं विकटं वक्षो, मिमानाविव वक्षसा ॥६६॥ वालेवायज–नीलाश्म–कुरुविन्दकरम्बितम् । बिडौजसा जितेनेव, प्रतापैरुपदीकृतम् ॥ ६७ ॥ रथं पवनजङ्घालो–त्तालकाम्बोजवाजिनम् । उपानिनाय काम्पील्य–काश्यपीनाथसारथिः ॥६८॥ (युग्मम्)॥ दत्तहस्तावलम्बस्तं, स्वयं काम्पील्यभूभुजा । पुरः प्रेङ्खत्पताकाङ्क–मारुरोह कुरूद्वहः ॥ ६९ ॥ क्रान्तविश्वस्य तेजोभि–रुष्णरश्मेरिवारुणः । चकार कुरुनाथस्य, सारथ्यं पृथिवीपतिः ॥ ७० ॥ प्रियालापमिवान्योन्यं, प्रीत्या ज्ञातेयजातया । कुर्वाणे किङ्किणीक्वाणै–स्तयोश्छत्रे विरेजतुः ॥ ७१ ॥ दुन्दुभिध्वनिभिस्तारै–रवश्यमुभयैरभूत् । ब्रह्माण्डभाण्डनिर्भेद–शङ्की पङ्केरुहासनः ॥७२॥ ईक्षांबभूव काम्पील्य–मावासैरवनीभुजाम् । परीतं परितः प्रीत्या, पाण्डुः शाखापुरैरिव ॥ ७३ ॥ तरङ्गहस्तविन्यस्त–विकस्वरसरोरुहा । मुदाऽर्धमुत्क्षिपन्तीव, ददृशे तेन जाह्नवी ॥ ७४ ॥ उदारमञ्जरीसार–सहकारप्रियंकरे । विकासिबकुले फुल्ल–मल्लिकामोदमालिनि ॥ ७५ ॥ कदम्ब-

१ द्रुपदनृपसंबन्धिनी । २ ' तदाऽतीवभान्य० ' प्रतिद्वय० । ३ पतङ्गतनया–सूर्यपुत्री–यमुना इत्यर्थः । ४ वालवायजः–वैडूर्यमणिः । ५ कुरुविन्दः–रत्नविशेषः । ६ ज्ञातित्वेन जातया । ७ ब्रह्मा ।

जम्बु–जम्बीर–निकुरुम्बकरम्बिते । विपाकपिङ्गनारङ्ग–पिशङ्गितदिगन्तरे ॥ ७६ ॥ असङ्गभृङ्गसंगीत–सुभगंभावुकद्रुमे । रसालाङ्कुरवाचाल–कोकिलालापशालिनि ॥ ७७ ॥ द्रुपदस्य गिराऽगृह्णा–न्निवासान् भूमिवासवः । वसन्त इव कुत्रापि, स्वःसरित्तीरकानने ॥ ७८ ॥ (कुलकम्)

तस्मिन् विलासवापीषु, स्नायं स्नायमनेकशः । विनिन्ये सैनिकैर्दूर–मार्गचङ्क्रमणक्लमः ॥ ७९ ॥ हित्वा हिरण्यकोटीरान्, कुरुविन्दाङ्कुराङ्कितान् । चक्रुः सकिंशुकैः केचि–च्चम्पकैरवतंसकान् ॥८०॥ नित्यमेकधुरीणानि, पूर्णेन्दुकरकन्दलैः[1] । केचिन्मृणालनालानि, मुक्ताहारपदे दधुः ॥ ८१ ॥ नवस्रस्तरमास्तीर्य, कि(क)ङ्केल्लिद्रुमपल्लवैः । केऽपि च्छायासु सान्द्रासु, पथिश्रान्ता विशश्रमुः ॥ ८२ ॥ पीयूषरसगण्डूष–मदमोषीणि हर्षुलैः । नालिकेरीफलाम्भांसि, कैश्चिदापपिरे भृशम् ॥ ८३ ॥ मृगारिकरजाकारान्, वीक्ष्य किंशुककोरकान् । वारणेन्द्राः प्रणश्यन्तः, कथंचित्तत्र धारिताः ॥ ८४ ॥ सैकते कुसुमभ्रश्यत्परागपरिपिञ्जरे । वाह्लीकान्[2] वेल्लयांचक्रु–रक्रमेण तुरङ्गिणः ॥८५॥ भारावरोहणायान्यैः, कृतयत्नशतैरपि । नाक्षम्यतौक्षकं[3] नेतुं, सारणीतृणलोलुपम् ॥ ८६ ॥ क्षुद्रेतरैः परिक्षिप्ते, कदलीकेलिकाननैः । आदर्शदर्शितातङ्क–मृगाङ्कमणिकुट्टिमे ॥ ८७ ॥ सारणीशीकरासार–लघुसंचारमारुते । उन्मीलन्मुकुलामोद–मदिरामोदितालिनि ॥ ८८ ॥ सान्द्रशीततरच्छाये, बकुलोर्वीरुहस्तले । द्रुपदादेशिनस्तेनुः, पाण्डवं पटमण्डपम् ॥८९॥ (त्रिभिर्विशेषकम्) स्थलेभ्योऽभ्यधिकं दूर्वा–सहजास्तरणा[4] व्यधुः । प्रमोदमवरोधाना–मतिमुक्तकमण्डपाः ॥ ९० ॥ स्मेरयन्तोऽधिकं दर्पं, श्रियः साक्षादिवर्तवः । महीरुहः श्रयन्ति स्म, सामन्ताः

पाण्डवकौरवाणां काम्पील्ये निवासः ॥

१ कन्दलं–नवाङ्कुरः । २ अश्वान् (' वाह्लीक ' इत्यमरकोषे) । ३ वृषयूथम् । ४ दूर्वा एव स्वाभाविकम् आस्तरणं येषु ते ।

केऽपि कानपि ॥ ९१ ॥ तस्मिन् युधिष्ठिरप्रष्ठ–कुमारकुलकैतवात् । कानने विहरन् रेजे–ऽनेकमूर्तिरिव स्मरः ॥ ९२ ॥

काम्पील्यनाथः कल्याणी–भक्तिः प्रीतेन पाण्डुना । अनुज्ञातोऽथ सानन्द–मन्तर्नगरमाविशत् ॥ ९३ ॥ सोऽप्रीणयत् तथा पाण्डो–रुपचारैश्चमूचरान् । निजस्य न यथा कामं, स्मरन्ति स्म पुरस्य ते ॥ ९४ ॥ शिल्पिभिः कलयामास, सर्वस्वैर्विश्वकर्मणः । सधर्माणं सुधर्मायाः, स स्वयंवरमण्डपम् ॥ ९५ ॥ महानीलमयी तत्र, बभार तलमेदिनी । प्रतिच्छायाच्छलादन्त–र्द्वितीयमिव मण्डपम् ॥ ९६ ॥ नीलाश्मकुट्टिमे तस्मिन्, श्वेतसोपानभूर्बभौ । कालिन्दी[1]शङ्कयोद्वीचि–रारोहन्तीव जाह्नवी ॥ ९७ ॥ स्तम्भाः स्वर्णमयास्तस्मि–न्नश्मगर्भमयक्षितौ । वातोत्थयमुनापद्म–पांसुदण्डनिभा बभुः ॥ ९८ ॥ तस्मिन् स्वयंवरालोक–कौतुकात्त्रिदिवाङ्गनाः । प्रतिस्तम्भमुपारूढाः, शालभञ्जीनिभा बभुः ॥ ९९ ॥ नीलवेदीपरिक्षिप्ता, क्वचिदिन्दूपलक्षितिः । वनीवलयितक्षीर–नीरधिश्रियमश्नुते ॥ १०० ॥ तस्मिन् हरिन्मणिस्तम्भाः, पद्मरागप्रभाश्चिताः । लीनां(लां)नीलत्विषः क्वापि, तन्वते पीतवाससः[2] ॥ १०१ ॥ क्वचित् कार्तस्वरस्तम्भा–स्तस्मिन्नीलाश्मकन्दलैः । मेरुं विडम्बयामासु–र्जम्बूराजिविराजितम् ॥ १०२ ॥ क्वचिन्नीलमणिक्षोणी–परितोऽर्काश्मवेदिका । दध्रेऽम्भोधितटाश्लिष्ट–निर्वृष्टाम्भोदविभ्रमम् ॥ १०३॥ कर्केतना–र्कमाणिक्य–वज्र–वैडूर्यकान्तिभिः । तस्य च्छन्नः करामर्शाद्वारदेशोऽध्यगम्यत ॥ १०४ ॥ नीलाश्मद्वारशाखांशु–श्रेणिरुत्पलकोमला । तत्र शाश्वतिकं दध्रे, कदलीस्तम्भविभ्रमम् ॥ १०५॥ संध्याम्भोदसनाभीनि, तत्प्रदेशेष्वनेकशः । शिल्पिनः पञ्चरूपाणि, वितानानि वितेनिरे ॥१०६॥ तस्मिन् मुक्तावचूलेषु, स्थान-

---

१ कालिन्दी–यमुना । २ कृष्णस्य ।

स्थानावलम्बिषु । पेतुर्मधुव्रतव्राताः, पुष्पस्तबकशङ्किनः ॥१०७॥ तस्मिन् भान्ति स्म संक्रान्त–कान्तप्रालम्बमौक्तिकाः । पुष्पोपहारहारिण्यः, सदैव मणिभूमयः ॥१०८॥ कुर्वतः सर्वतः स्वर्गि–विमानश्रीविमाननाम् । नृपस्तं परितो मञ्चा–नुच्चकैर्निरमापयत् ॥ १०९ ॥ विश्वकर्माऽपि निर्माण–नैपुण्यमवलोकयन् । मन्ये तच्छिल्पिनामैच्छ–दन्तेवासित्वमात्मनः ॥ ११० ॥ नानारत्नमयं तेषा–मेकैकमपि पश्यतः । द्रुपदे स्वर्गलुण्टाक–वासना कस्य नाभवत् ? ॥१११॥ तानालोक्यात्मनः संप–ल्लोपाशङ्कापिशाचकी । भूमौ लुठन् रसत्युच्चै–र्याप्ति ध्रुवमर्णवः ॥११२॥ सुदुस्तपतपःक्लेश–ग्रासं नूनमवेक्ष्य तान् । अनिन्द्यत गतानन्दैः, सुरैः स्ववासवैशसम् ॥ ११३ ॥

स्तम्भमुत्तम्भयामास, हैमं मध्येस्वयंवरम् । पञ्चालभूपतिर्जम्बू–द्वीपान्तर्मेरुविभ्रमम् ॥ ११४ ॥ रेजुर्भ्रमन्ति चत्वारि, वामं चत्वारि दक्षिणम् । रत्नचक्राणि नक्षत्र–चक्राणीवास्य मूर्धनि ॥ ११५ ॥ भाति स्म रत्नपाञ्चाली, मूर्ध्नि तेषामवाङ्मुखी । तद्भ्रमोग्रजवालोक–कौतुकेनेव निश्चला ॥ ११६ ॥ अधः स्तम्भस्य दम्भोलि–सारैरिव विनिर्मितम् । राजाऽमुञ्चत् क्रमायातं, देवताऽधिष्ठितं धनुः ॥ ११७ ॥

अथ मौहूर्तिकादिष्टे, दृष्टे पूर्णशुभग्रहैः । उच्चस्थैश्चास्थिते लग्ने, प्रीतिनिर्मग्नमानसः ॥ ११८ ॥ पञ्चालपृथिवीपालः, सायमर्वाचि वासरे । प्रातराहूतये दूतान्, प्राहिणोत् प्रतिपार्थिवम् ॥ ११९ ॥ (युग्मम्) तदा रविरलंकर्तु–मिव द्रुपदनन्दिनीम् । रत्नभारमुपादातु–माशु रत्नाकरेऽविशत् ॥ १२० ॥ वयं दवीयोवास्तव्याः, स्वयंवरकुतूहलम् । न द्रक्ष्याम इतीवाशा–स्तमः-

१ वैशसं–विघ्नः । २ प्रथमे । ३ दूरतरनिवासिन्यः ।

श्यामास्यतां दधुः ॥ १२१ ॥ कला काऽप्यस्ति भूपानां, द्रौपदीप्राप्तिकारणम् । इति ज्ञातुमना मन्ये, कलानां निधिरुद्ययौ ॥ १२२ ॥ पाञ्चाली नयनौपम्य–महमेव लभे परम् । इत्यवश्यमिदं हर्षा–दुन्निमील महोत्पलम् ॥ १२३ ॥ पाञ्चालीस्पृहयालूनां, भूभुजामथ मन्मथः । मुमोच मार्गणश्रेणि–मीर्ष्ययेव समं हृदि ॥ १२४ ॥ अङ्गेष्वनल्पसंकल्प–सूनुसंतापशान्तये । रचयांचक्रिरे केचि–ज्जाह्नवीमसरोरुहाम् ॥ १२५ ॥ द्रौपदीवदनाम्भोज–प्रतिस्पर्धितया स्फुटम् । अभूत् केषांचिदानन्द–न्निन्दुरप्यास्पदं रुषाम् ॥ १२६ ॥ प्रेङ्खोलयद्भिरत्युष्ण–निःश्वासपवनोर्मिभिः । शातितः शीतिमा कैश्चित्, कदलीदलमारुतैः ॥ १२७ ॥ भ्रातर्जानीहि जातेय–मस्मदुत्सङ्गसङ्गिनी । सुहृदं केचिदित्यूचुः, कार्मुकाभ्यासकर्मठाः ॥ १२८ ॥ अङ्गारीयति हारोऽयं, हिमांशुस्तपनीयति । तमस्तोमीयति ज्योत्स्ना, स्वगुप्तीयति पङ्कजम् ॥ १२९ ॥ नाडिका यामकल्पाऽद्य, यामोऽभूद्यामिनीसमः । यामिनी वर्षदेश्या च, धिगेयं विपरीतता ॥ १३० ॥ द्वीपान्तरेऽपि कस्याश्चित्, स्वयंवरमहोत्सवम् । रविरालोकयत्यद्य, नाभ्युदेति किमन्यथा ? ॥१३१॥ इति द्रुपदकन्याङ्ग–संगमोत्सवमिच्छताम् । बभूव सर्वभूपानां, कोटियामेव यामिनी ॥ १३२ ॥ (चतुर्भिः कलापकम् ।) अन्तर्विचिन्त्य पाण्डुस्तु, दोर्दण्डानात्मजन्मनाम् । अपास्तचिन्तासंतापः, सुखी सुष्वाप निर्भरम् ॥ १३३ ॥ कुरुवंशाङ्कुराणां त–द्विलोक्य ललितं वपुः । पणं पञ्चालभूपालः, स्वं निनिन्द मुहुर्मुहुः ॥ १३४ ॥ इत्थं पृथ्वीभुजां नाना–विकल्पाचान्तचेतसाम् । कृच्छ्रलब्धाल्पनिद्राणां, विरराम विभावरी ॥१३५॥ दिगुद्भूतारुणोद्भेदा, बभासे शार्तमन्यवी

१ सङ्कल्पसूनुः–कामः । २ उच्छलद्भिः । ३ नाशितः ध्वस्त इत्यर्थः । ४ चन्द्रः । ५ स्वगुप्ता–लताविशेषः 'रीसामणी' इति भाषायाम् । ६ ऐन्द्री–पूर्वा इत्यर्थः ।

सकाश्मीराङ्गरागेव, पत्यौ भास्वत्युपेष्यति ॥ १३६ ॥ राजाऽस्मि निर्वसुः प्रात-र्लज्जिष्ये राजमण्डले । इत्यालोच्येव पीयूष-द्युतिर्दिशान्तरं ययौ ॥ १३७ ॥ मुक्ताकणभ्रमादुच्चैः, पाञ्चालीहारहेतवे । उच्चितानीव केनापि, नक्षत्राणि क्षणाद्ययुः॥ १३८ ॥ कलङ्क्यपि ममोच्छेद-कारीन्दुः किमु निर्मलः?। कृष्णास्येन्दुर्विधातेति, भियेव बिभिदे तमः॥ १३९ ॥ संमुखं सर्वभूपाल-मनोभिरभिभावितैः । रविः करैर्निराकृष्य, पूर्वाद्रिमधिरोपितः ॥ १४० ॥ राजन्यमुखराजीव-सरोराजीवकानने । तुल्यमुल्लासयन् भानु-र्नभोङ्गणमगाहत ॥ १४१ ॥

अथ काम्यतमाकल्प-कल्पनाल्पेतरश्रियः[1] । मञ्चानारोढुमौत्सुक्या-द्धावन्ति स्म धराभुजः ॥ १४२ ॥ मञ्जुलैर्मङ्गलातोद्यै-र्वन्दिकोलाहलैरपि । विहाय विक्रमचक्षुः, शनैर्निद्रां सुखासिकाम् ॥१४३॥ विधाय विधिवत्सर्व-प्रातःकृत्यानि कृत्यवित् । प्रतिपाल्य मिलत्सैन्य-सामन्तामात्यमण्डलम् ॥ १४४ ॥ औचित्यरचिताकल्पान्, कल्पवृक्षाङ्कुरानिव । कुमारान् स्वान् पुरस्कृत्य, नित्यदोर्दण्डमण्डनान् ॥ १४५ ॥ ययौ स्वयंवरं पाण्डु-रखण्डमहिमोदयः । रम्यं च मञ्चमारोहत्, काम्पील्यपतिदर्शितम् ॥ १४६ ॥ (चतुर्भिः कलापकम्) सिंहासने स नीलाश्म-मयूखपरिवेषिणि । स्वरक्षार्थमयःशाल-शालिनीव न्यविक्षत ॥ १४७ ॥ बद्धकायानिव न्याया-नुत्साहानिव देहिनः । वपुष्मन्तीव तेजांसि, मूर्तान् कीर्तिचयानिव ॥ १४८ ॥ कुमारान् मारजैत्रांस्तान्, पश्यतां काश्यपीभुजाम् । राज्येऽप्यभवदाच्छेद-शङ्कापङ्काविलं मनः ॥१४९॥ (युग्मम्) साक्षादिव धनुर्वेदं, वीरं रसमिवाङ्गिनम् । ज्योतिर्विवर्त[2]मुत्तीर्ण-मादिपुंस इवावनौ ॥ १५० ॥ तेषामपि विशेषेण, विलोक्य कपिकेतनम्[3] ।

१ इष्टतमभूषणानां रचनयाऽनल्पशोभावन्तः । २ ज्योतिषां समूहः । ३ अर्जुनम् ।

नात्मानमपि के नाम, विस्मरन्ति स्म भूभुजः ॥ १५१ ॥ (युग्मम्) तनूरुहपरीवार-स्तस्मिन् रेजे स राजके । पाण्डुर्बद्ध-फलः कल्प-शिखरीवार्वकेशिषु ॥ १५२ ॥

अथ स्वयंवरागार-मानेतुं नित्ययौवनाम् । साधु प्रसाद(ध)यामासुः, प्रीतिप्रह्वाः प्रसाधिकाः ॥ १५३॥ अलक्तकरस-स्तस्याः, पादयोर्निहितो बभौ । जितैः पङ्केरुहैः शङ्के, स्वकान्तिरुपदीकृता ॥ १५४ ॥ तस्याः स्वर्णाभमत्यच्छ-चन्दनच्छुरितं वपुः । बिभर्ति स्माभ्रकच्छन्न-प्रदीपकलिकोपमाम् ॥ १५५ ॥ तस्या बिम्बोष्ठयोर्व्यक्त-मलक्तकरसच्छलात् । आदधे रागसर्वस्व-निधानं कुसुमायुधः ॥ १५६ ॥ अरालनीलभ्रूवल्लि-प्रतिबिम्बविडम्बिनी । बभौ कपोलयोस्तस्याः, कस्तूरीपत्रवल्लरी ॥ १५७ ॥ तस्याः शङ्के दृशौ पुष्प-धन्वनः केलिदीर्घिके । लावण्यजलजम्बाल-मञ्जुलं कज्जलं पुनः ॥ १५८ ॥ तस्याः स्म भासते भाले, मृगनाभिललाटिका । कृताक्रान्तिरिव क्रुद्धो, विधुबुद्ध्या विधुंतुदः ॥ १५९ ॥ धम्मिल्लो मल्लिदा-माङ्क-स्तस्या मूर्धन्यधारयत् । मुक्तवैरमिथःश्लिष्ट-शशिस्वर्भानुविभ्रमम् ॥ १६० ॥ असौ विशदकौशेय-संवीतवपुराबभौ । तपस्यासमये गङ्गा-वीचिश्लिष्टेव पार्वती ॥१६१॥ तस्याश्चकासे माणिक्य-किरीटकिरणोत्करः । उदैष्यत इवानङ्ग-तरणेररुणोदयः ॥ १६२ ॥ निर्मलः संपदे सद्यः, श्रितानामिति नान्यथा । द्विरुक्तिमीयतुस्तस्याः, कुण्डले तेन गण्डयोः ॥ १६३ ॥ कर्णोत्तंसमणिव्याजा-देत्य देवः स्वयं स्मरः । तस्याः कटाक्षविक्षेप-निदेशाकाङ्क्षया स्थितः ॥ १६४ ॥ जगज्जिगीषोः कामस्य, तस्या वक्षःस्थलाश्रमे । तपस्यतोऽक्षमालेव, भाति स्मैकावलिच्छलात् ॥ १६५ ॥ परितो रत्नकेयूर-मरीचिपटलच्छलात् ।

२ वन्ध्यवृक्षेषु । २ द्रौपदीम् । ३ अराला-वक्रा । ४ जम्बालः-सेवालः । ५ कस्तूरितिलकम् । ६ स्वभानुः-राहुः । ७ अभ्रकः ।

रागोऽन्तर्मानसं तस्याः, प्रविविक्षुरिवैक्ष्यत ॥ १६६ ॥ लक्ष्म्यादिललनाकीर्ति-मावर्त्येव विनिर्मिते । करयोः कङ्कणे मुक्ता-मये तस्या विरेजतुः ॥ १६७ ॥ तस्याश्चकासे जघने, रसनागुणनिस्वनः । तुमुलः कामसैन्यस्य, निवासानिव गृह्णतः ॥ १६८ ॥ झङ्कारमुखरौ तस्याः, पादयोर्मणिनूपुरौ । विभ्राजेते स्म सर्वाङ्ग-लक्ष्मीवैतालिकाविव ॥ १६९ ॥ इति प्रसाधिता माऽभू-दतिमात्रमनोहरा । कामं रम्या हि वासन्ती, वसन्तश्रीवतंसिता ॥ १७० ॥

अथ बन्धुपुरंध्रीणा-मुलूलुध्वनिबन्धुरे । स्फुरत्यम्भोधिगम्भीरे, विश्वतस्तूर्यनिःस्वने ॥ १७१ ॥ उन्मीलत्यभितो वैता-लिककोलाहले मुहुः । वेत्रिणां वद्धतुमुले, मूर्च्छत्युत्सारणाध्वनौ ॥ १७२ ॥ किङ्किणीक्काणनिर्वाण-पुष्पोच्चूलालिनिक्कणम् । तपनीयपताकान्त-र्मूर्च्छन्मार्तण्डदीधिति ॥ १७३ ॥ विमानरत्नमारुह्य, नरवाह्यं नृपात्मजा । व्योमाङ्कमिन्दुलेखेव, स्वयंवर-मवातरत् ॥ १७४ ॥ (चतुर्भिः कलापकम्)

तां भवानीभ्रमान्नेत्रै-रेकहेलानिपातिभिः । भूपाः सौभाग्यभाग्याय, भेजुरिन्दीवरैरिव ॥ १७५ ॥ तस्मिञ्शिल्पाद्भुते विश्व-शिल्पिनः कन्यकामये । दू(दौ)त्यायेव मनः सर्वे, प्राहिण्वन्नवनीभुजः ॥ १७६ ॥ तां पश्यन्तोऽतिनिर्बन्धात्, सर्वेऽप्युर्वीभुजस्तदा । स्वनेत्रायापि तेऽकुप्य-न्निमेषमधिकुर्वते ॥ १७७ ॥ तां दृशामुत्सवज्योत्स्ना-मेवमेवापि पश्यते । ईर्ष्यामासुर्मुहुः प्राण-प्रियाय सुहृदेऽपि ते ॥ १७८ ॥ समस्तकरणस्तोम-स्तैस्तदा निखिलैरपि । व्यापारं लोचनस्यैव, कलयन्नभ्यलक्ष्यत ॥ १७९ ॥ तेषामनीक्षमाणस्य, मृगाक्षीं तां शतक्रतोः । निन्दास्पदं तदा नेत्र-सहस्रतयमप्यभूत् ॥ १८० ॥

१ 'निक्वणः' प्रतिद्वय० । २ किङ्किणीशब्देन शान्तः पुष्पमयध्वजपटस्थभ्रमराणां शब्दः यस्मिन् तत् । ३ 'मूर्च्छे' प्रतिद्वय० ।

प्रलोभनाय तच्चेतो–मृगस्य स्वैरचारिणः । रोमहर्षमिषादेते, दधुर्दूर्वाङ्कुरोत्करान् ॥ १८१ ॥ जगन्नयनपीयूष–नवकादम्बिनी-मिमाम् । पश्यन्तश्चिन्तयामासु–रन्तः सर्वेऽपि भूभुजः ॥१८२॥ भुवनस्य य एवास्य, निर्माताऽस्याः स एव न । तदीयशिल्पसीमा हि, स्थिता गौरी–न्दिरादिषु ॥ १८३ ॥ यद्वा तस्यापि यः कश्चि–दाचार्यः शिल्पकर्मणि । त्रिलोकीमण्डनं नून–मियं तेनैव निर्ममे ॥ १८४ ॥ मुखेन्दू[1] रचयत्यस्या, नित्यराकामयीं महीम् । जडप्रकृतिरेवाय–मुद्गच्छन्मृगलाञ्छनः ॥ १८५ ॥ चक्षुर्निमज्जदेतस्या, लावण्यक्षीरसागरे । उरोऽन्तरीपमासाद्य, निर्वृतिं लभते यदि ॥ १८६ ॥ इत्यादीन् कोटिशस्तर्का–स्तन्वन्तः स्मेरितस्मराम्[3] । विलोकयन्तः पाञ्चाली–मचेष्टन्तेति भूभृतः ॥ १८७ ॥

तस्याः किमिह वास्तव्या, लक्ष्मीरभ्येति तुल्यताम् ? । इतीवालोकयांचक्रे, कश्चिल्लीलासरोरुहम् ॥ १८८ ॥ अन्यस्य करमारूढा–मप्याच्छेत्तुमलंतमाम् । इमामहमितीवांसं, मुहुः कश्चिदवैक्षत ॥१८९॥ निपतन्ति मयि स्वैरं, कुतोऽमी स्मरमार्गणाः ? । इतीव पार्श्वतः कश्चित्, पश्यति स्म मुहुर्मुहुः ॥१९०॥ कश्चिदैक्षिष्ट कस्तूरी–तिलकं रत्नकङ्कणे । भालाक्षरलिपीस्तस्या, लाभायेव निभालयन् ॥ १९१ ॥ राधावेधे तवैवास्मिन्, मुखमीक्षामहे वयम् । इतीव भुजमस्पृक्षत्, कोऽपि केयूरकैतवात् ॥१९२॥ कश्चित् कुपितपुष्पेषु–शरपातभयादिव । प्रावारवाससा चक्रे, सर्वाङ्गमवगुण्ठनम् ॥ १९३ ॥ कश्चिन्नागरखण्डानि, खण्डयन् दशनाङ्कुरैः । प्रकुप्यतः स्मरस्याग्रे, क्षिपतीव मुखेऽङ्गुलीः ॥१९४॥ बहिर्विभाव्यमानाऽपि, योगिनीचेयमीक्ष्यते । कथमन्तरितीवान्यो, हृदयं मुहुरैक्षत ॥१९५॥ परिभ्रष्टमिव क्वापि, निजमालोकयन्मनः । लिलेख कश्चिदानम्रः, पादाङ्गुष्ठेन पीठिकाम्[4] ॥१९६॥

१ 'मुखेन्दौ' प्रतिद्वय० । २ उर एव द्वीपम् । ३ 'स्मारित' प्रतिद्वय० । ४ पृथ्वीम् ।

इत्याविर्भूतभावेषु, तेषु सर्वेषु राजसु। चिक्षेप क्षोणिभृत्कन्या, स्वभावसरलां दृशम् ॥१९७॥ पाण्डोः पुत्रांस्तु पञ्चापि, विभाव्य मधुराकृतीन्। धृतिं बबन्ध तच्चक्षुः, पणमुद्वीक्ष्य चाधृतिम् ॥१९८॥ विमानादथ रम्भेव, देवैभूमीभृतस्तले। हेममूर्तेरधो राधा-स्तम्भस्येयमवातरत् ॥१९९॥ तस्मिन्नूर्ध्वमधस्तिर्य-क्संक्रान्तप्रतियातना॥ । पाञ्चाली काममेकापि, बभार बहुरूपताम् ॥२००॥

ऊर्ध्वीकृत्य भुजं लोक-तुमुलं प्रतिषिध्य च । धृष्टद्युम्नस्ततो वाच-मुवाच द्रुपदात्मजः ॥ २०१ ॥ दोर्दण्डचण्डिमाक्रान्त-जगतो जगतीभृतः । गिरमेतामुभाकर्णि, सर्वेऽप्याकर्णयन्तु मे ॥ २०२ ॥ साक्षीकृत्य वियत्यर्क-सिद्ध-गन्धर्व-खेचरान् । क्षितौ च ललना-बाल-गोपालप्रमुखं जनम् ॥ २०३ ॥ इदमस्मत्कुलोत्तंसं, देवताशतसेवितम् । चापमारोप्य यः कोऽपि, राधावेधं विधास्यति ॥ २०४ ॥ भुवनाद्भुतसौभाग्य-भागिनी भगिनी मम । शौण्डीर्यवेतनं तस्मै, कृष्णेयं कल्पयिष्यते ॥ २०५ ॥ (त्रिभिर्विशेषकम्)

अथाभ्युत्तिष्ठतो भूपान्, कार्मुकारोपकर्मणि । प्रगल्भवाक्प्रतीहारी, याज्ञसेन्यै व्यजिज्ञपत् ॥ २०६ ॥ भूपतिर्दमदन्तोऽयं, रिपुदन्तिमदान्तकृत् । चापारोपार्थमुत्तस्थौ, देवि ! त्वामभिलापुकः ॥ २०७ ॥ श्रियो विहितविश्रान्ते-र्यस्य दोर्दण्डमण्डपे । भाति वैडूर्यपर्यङ्क, इव ज्याकिणपद्धतिः ॥ २०८ ॥ संमुखीनक्षुतेनाय-मागच्छन् विनिवारितः । आसने पुनरप्राप्त-तेजोहानिरुपाविशत् ॥ २०९ ॥

उत्तिष्ठत्येष वामाक्षि !, धरो नाम धराधवः । नवालवालं (लो) यत्कीर्ति-वीरुधो मधुरापुरी ॥ २१० ॥ यच्छुद्धान्त-

१ मेरुपर्वतस्य । ॥ प्रतियातना-प्रतिमा । २ 'वेतने' इति वा पाठः । ३ द्रौपद्यै ।

वधूनेत्र–कज्जलैर्जलकेलिषु । हतैरिव बभूवेयं, कालिन्दी कालिमास्पदम् ॥ २११ ॥ यमुनाया इवासत्तेः, प्रकामश्यामलत्विषः । तन्वते तन्वि ! यन्नेत्रा–नन्दं वृन्दावनद्रुमाः ॥ २१२ ॥ उपत्यकावने यस्य, क्रीडतः प्रेयसीजुषः । विलासवेश्मतां यान्ति, गोवर्धनगिरेर्गुहाः ॥ २१३ ॥ किमेष पर्षदं राज्ञा–मवज्ञायोपहासिनीम् । अवतीर्यावनौ मश्चं, पुनरप्यधिरोहति ॥ २१४ ॥

विराटाधिपतिः सोऽय–मासनादुच्चलन्निव । लक्ष्यते मृगशावाक्षि !, वीरलक्ष्मीस्वयंवरः ॥ २१५ ॥ काङ्क्षन्ती कीर्तिसंहर्षात् धामारोढुमिवोच्चकैः । देवि ! यस्यांसशैलाग्र–मश्रान्तं श्रीरशिश्रियत् ॥ २१६ ॥ करसंपर्कमासाद्य, यस्य सूते धनुर्लता । शरश्रेणीं च कीर्तिं च, युगपद्वैरिदुःसहाम् ॥ २१७ ॥ भूपतिः किमयं भूमि–मागत्य कियतीमपि । जातस्तम्भ इवाकस्मा–त्तस्थौ चित्र इवार्पितः ॥ २१८ ॥

असौ वैरिमनःशल्यं, शल्यो नाम सुमध्यमे ! । उज्जिहीते जगन्नेत्रा–नन्दी नन्दिपुरेश्वरः ॥ २१९ ॥ आरोहति परां कोटिं, गुणश्चापस्य चास्य च । परेभ्यः शरणायाता–नरातीनपि रक्षतः ॥ २२० ॥ यत्खड्गदण्डे निःश्वास–पवनं पीवयत्यपि । स्फुरन्ति चित्रं शत्रूणां, भाले घर्मोदबिन्दवः ॥ २२१ ॥ उल्लसद्दैवतज्योतिः–पराहतविलोचनः । चापमप्येतदब्जाक्षि !, क्षमते नायमीक्षितुम् । ॥ २२२ ॥

कुमारः सहदेवोऽयं, देवि ! देवसमाकृतिः । दूरादुपहसन्नेनं, झगित्यासनमत्यजत् ॥ २२३ ॥ अस्ति दोर्विक्रमाक्रान्त–त्रिखण्डक्षितिमण्डलः । जैत्रकीर्तिर्जरासन्धो, राजा राजगृहेश्वरः ॥ २२४ ॥ आहुतीकृत्य भूदेवो, यश्चक्रोर्दोर्चिपि द्विपः ।

१ ' प्रेयसीयुजः ' प्रतिद्वय० । २ ' संहर्षा ' प्रतिद्वय० । ३ पर्धयति । ४ चक्राग्नौ ।

प्रतापं वर्धयामास, यशश्चागमयद्दिवम् ॥ २२५ ॥ नमद्भूपालभालेषु, राजेति लिपिमुल्बणाम् । असूययेव लुम्पन्ति, यस्य पादरजःकणाः ॥ २२६ ॥ आस्थानीमास्थिते यस्मि-न्निदेशैकाभिलाषिणः । अश्रान्तमेव तिष्ठन्ति, देवा अप्यौपजानुकाः ॥ २२७ ॥ तस्मादसौ महातेजाः, प्रदीप इव पावकात् । अजायत जगज्जैत्रो, जयन्त इव वासवात् ॥ २२८ ॥ शुचिर्यद्विक्रमस्ता-लु-चारीणि रिपुयोपिताम् । भालव्योमाङ्कमारोप्य, वर्षत्यश्रुकणच्छलात् ॥ २२९ ॥ आत्मनैकधुरीणेऽस्मिन्, न्यस्तविश्वंभराभरः । अपरां निर्वेयग्राम-चिन्तां वितनुते पिता ॥ २३० ॥ कोदण्डमिदमादाय, कान्तिदायादचन्द्रिके ! । पुनर्विमुञ्चत्यानम्य, सोऽयमप्युल्लसत्त्रपः ॥ २३१ ॥

कृशाङ्गि ! शिशुपालोऽयं, चेदीनामधिदैवतम् । बान्धवैरुपरुद्धोऽपि, राधावेधाय धावति ॥२३२॥ खड्गेनाम्बुभृता सिक्ताः, प्रतापग्रीष्मतापिते । हृदये नोदगुः कस्य, यस्य विक्रान्तिवीरुधः॥ २३३ ॥ शौण्डीर्याहंकृतीः कामं, निर्वास्य चिरवासिनी (नीः) तेनिरे येन वास्तव्या, विद्विषां हृदये भियः ॥ २३४ ॥ क्षणं बाणावलीर्वर्षन्, जिहीर्षोः किल रुक्मिणीम् । चक्रे यश्चक्रिणोऽप्यन्तः, शङ्कापङ्काकुलं मनः ॥ २३५ ॥ अरिकीर्तीः क्षिपंस्ताराः, पद्मोल्लासं दिशन् युधि । प्राक्सन्ध्यां करिसिन्दूरै-र्यस्य कालः करोत्यसिः ॥ २३६ ॥ कार्मुकं नमयन् बाहु-सारसर्वाभिसारतः । अयमप्यवनीपालैः, सस्मितैरवलोक्यते ॥ २३७ ॥

देवि ! दर्पादनुत्थासु-रपि मित्रोपरोधतः । नृपः कर्णोऽयमभ्यर्ण-मभ्येति धनुषः शनैः ॥ २३८ ॥ धनुर्वेद-

---

१ जानुसमीपे स्थायिनः । २ भोगसमूहचिन्ताम् । ३ कान्तिविभागग्राहिणि ! चन्द्रिकावत् आनन्ददायिनि ! । ४ शिशुपालस्य । ५ 'कृती' प्रतित्रयपाठो न सम्यग् भाति । ६ 'वासिनी' प्रतिचतुष्टयपाठो न सम्यग् भाति ।

कृतं ज्ञान-चक्षुरत्रागवस्थितम् । प्रयोगे पुनरेतस्य, ततोऽपि पुरतोऽगमत् ॥ २३९ ॥ समरे येन निर्माय, मण्डपं काण्डपङ्क्तिभिः । पाणौ चक्रे परासूनां, द्विपां श्रीरपि रक्षिता ॥ २४० ॥ मार्गणाः संगरे यस्य, पश्चान्मुञ्चन्ति कार्मुकम् । द्विपां प्राणास्तु तच्छेद-भियेव पुरतो ययुः ॥ २४१ ॥ संयुगे यस्य पश्यद्भि-रिष्वासाभ्यासलाघवम् । स्वर्वीरैः कृतकृत्येव, मन्यते निर्निमेषता ॥ २४२ ॥ दत्ते लक्ष्यमसौ प्राणा-नप्यस्य रिपवः पुनः । तत्कं स्तुम इतीवावा-ङ्मुखा यन्मार्गणा रणे ॥२४३॥ अथास्यामिति जल्पन्त्या-मुन्मीलत्स्वेदमेदुरा । श्यामीभवन्मुखाम्भोजा, पाञ्चालीदमचिन्तयत् ॥ २४४ ॥ सूतसूति-रिति ख्यातो, जगत्येकधनुर्धरः । अस्मिंश्च रमते हन्त, मनो मे न मनागपि ॥ २४५ ॥ रतिं त्वेतेऽङ्गजन्मानः, पाण्डोस्ता-ण्डवयन्ति मे । विडम्बयितुमारब्धा, तत्किं नामास्मि वेधसा ? ॥ २४६ ॥ मया बद्धोऽञ्जलिर्बाढ-मयं वः कुलदेवताः ! । रक्षणीयः पतिः पाण्डो-रात्मजेभ्यो ममापरः ॥ २४७ ॥ इति पृथ्वीपतेः पुत्री-मन्तश्चिन्तां वितन्वतीम् । व्याजहार प्रती-हारी, पुनः श्रोत्रामृतं वचः ॥ २४८ ॥

हेलया चापमारोप्य, हठग्रहकुतूहली । राधावेधी न राधेयो, जनन्या नामसाम्यतः ॥ २४९ ॥ परं त्वत्कुलदेवीनां, प्रभावप्रहतौजसः । न हि स्वयंवरक्षोभे, कस्यापि प्रभविष्णुता ॥ २५० ॥ बल-प्रद्युम्न-साम्बाद्यैः, प्रवीरैः परिवारितः । अद्याप्यासीन एवास्ते, कृष्णः केनापि हेतुना ॥ २५१ ॥ अन्धसा कंसरूपेण, कीनाशं भोजयिष्यता । चाणूराद्याः कृता

१ 'श्रीरपरिक्षता' प्रतित्रयपाठः । तत्र न परिक्षता-नष्टाऽखण्डितेति यावत् । २ देवैः । ३ 'लक्ष०' प्रतित्रयपाठः । ४ 'रिपवस्तु नः' प्रतिद्वय० 'रिपवस्तु न' इत्येका प्रतिः । ५ 'त्स्वेद०' प्रतित्रय० । ६ सूतपुत्रः-कर्णः । ७ ओदनेन ।

येन, तेऽफलाः फलिकापदे ॥ २५२ ॥ कंसक्षेत्रेषु भास्वान् यत्, प्रतापः पत्रवल्लरीः । अशोषयत्तथा भूयः, प्ररोहन्ति स्म नो यथा ॥ २५३ ॥ द्वैराज्यस्य द्विषन् कंचित्, स्वदायादमवेक्षितुम् । विवेश हृदि नो कस्य, यद्भुजस्तम्भविक्रमः ? ॥ २५४ ॥ वैरिनारीदृशो यस्य, ददतीवाश्रुकैतवात् । प्रियस्यास्तमुपेतस्य, विलासस्य जलाञ्जलिम् ॥२५५॥ वक्षोऽङ्कितं द्विपदन्ति-दन्ताघातकिर्णार्बुदैः । यस्य श्रीराश्रयदुर्ग-मिवानेकाऽद्रिदुर्ग्रहम् ॥ २५६ ॥ असौ लोलेक्षणे ! सर्व-कर्मीणभुजवैभवान् । कर्मणीह कृतोत्साहान्, सुतानपि निषेधति ॥ २५७ ॥

धृतराष्ट्राङ्गभूर्योध-लक्षयोधी सुयोधनः । स एष मातुर्गान्धार्यां, रोमाञ्चेन सहोत्थितः ॥ २५८ ॥ यस्यांसशैलमालम्ब्य, घनपल्लवितश्रियम् । कुरुवंशः परां कांचि-दुत्तंसयति संपदम् ॥ २५९ ॥ आकृष्य प्रीतिलुण्टाकीः, सुहृच्चेतोनिकेतनात् । योऽस्त्रयद्भियः शत्रु-मनःकाराकुटुम्बिनीः ॥२६०॥ केचित्तत्कालमानम्राः, क्षणात् केऽपि पलायिताः । नास्यं यस्याप्यमित्रस्या-प्यपश्यन् वैरिणो रणे ॥ २६१ ॥ त्राणाय शत्रुभिर्यस्य, बृहत्कटकशालिनः । उभयेऽपि निषेव्यन्ते, महीयांसो महीभुजः ॥ २६२ ॥ दर्पादिप्वाममादातुं, नम्रीभूतोऽपि भामिनि ! । हेतोः कुतोऽप्यसौ कामं, नमस्यति महाभुजः ॥ २६३ ॥ अन्येऽपि धृतराष्ट्रस्य, सुता दुःशासनादयः । दोर्वैभवावधिं वीक्ष्य, निषीदन्ति विषादिनः ॥ २६४ ॥ एते तु भगदत्ताश्व-त्थाम-भूरिश्रवः-शलाः । जयद्रथ-महासेन-चारुदेष्णादयोऽपि च ॥ २६५ ॥ तथैव तस्थुर्दोःस्थाम, निजमालोच्य

१ शाकस्थाने । २ कंसभार्यासु । पक्षे सुगमार्थः । ३ चन्दनादिलेपान् । ४ अर्बुदः-पर्वतविशेषः । 'अम्बुदैः' 'आयुधैः' इति प्रतिपाठो न सम्यग् भाति । ५ '·नेकारि०' इति प्र० । ६ पर्वताः राजानश्च ।

चेतसि । सतामात्मज्ञता नाम, महर्द्धिमहिमास्पदम् ॥ २६६ ॥ (युग्मम्)

ग्रचेलुर्मञ्चतः पश्य, देवि ! भ्रूसंज्ञया हरेः । विसायस्मेरराजन्य–नेत्रनीराजिताननाः ॥ २६७ ॥ कटाक्षकोटिभिः प्रत्युद्याताः कस्याश्चिदादरात् । समरेष्वव इवोच्चण्डाः, पाण्डोः पञ्चापि सूनवः ॥ २६८ ॥ (युग्मम्) देवि ! पञ्चभिरप्येतैः, कुलं कुरुनरेशितुः। पाण्डवैर्मण्डयांचक्रे, शरीरं करणैरिव ॥ २६९ ॥ रसौ वीरश्च शान्तश्च, व्योम्नीवार्कनिशाकरौ । तिष्ठतो यत्र किं नाम, तस्याजातरिपोः स्तुवे ? ॥ २७० ॥ भुजैर्युद्धेष्वरिस्तोम–यमयोर्यमयोरपि । स्वःकुरङ्गदृशां भर्तृ–सुभिक्षं निर्ममे–तमाम् ॥ २७१ ॥ रिपुघ्नं युधि नामापि, भीम–फाल्गुनयोः पुनः । हरेर्वित्रासयत्येव, प्रतिशब्दोऽपि दन्तिनः ॥ २७२ ॥ व्योम्नि त्रस्तसुरस्त्रैणे, ग्रहितैः केलितैः पुनः । युधि क्रीडति भीमोऽयं, कुञ्जरैः कन्दुकैरिव ॥ २७३ ॥ अर्जुनस्य पुनर्बाणाः, शत्रुप्राणापहारिणः । अमुक्ता अपि चापेन, विविशुः कस्य नो हृदि ? ॥ २७४ ॥ शरैर्यस्यारिनारीणां, लूनाः पत्रलतास्तथा । यथा सह व्यलीयन्त, कटाक्षसुमनोलिहः ॥ २७५ ॥ इदमस्थास्तु कल्पान्त–स्थायिन्येषां तु भूरिति । मन्ये यन्मार्गणा लक्ष्य–मादायापि श्रयन्ति ताम् ॥ २७६ ॥ यस्य बाणा रणे वक्षो, भञ्जन्ति प्रतिपन्थिनाम् । तच्छुद्धान्तवधूनां तु, स्रंसन्ते हारवल्लयः ॥ २७७ ॥ केयमात्तविमुक्तीना–मपि नः कर्मनिम्नता ? । इत्यादित्यमिव प्रष्टुं, द्यां ययुर्यच्छरा रणे ॥ २७८ ॥ धनुर्वेदोपनिषदं, पश्यन् यत्रात्मनोऽधिकाम् । गुरुर्द्रोणोऽपि नियतं, यं गुरुं कर्तुमिच्छति ॥ २७९ ॥ इत्यस्यां वेत्रधारिण्यां, धात्रीशदुहितुः पुरः । निगदन्त्यां मुदा प्राप, चापसामीप्यमर्जुनः ॥ २८० ॥

१ इन्द्रियैः । २ युगलयोः–सहदेवनकुलयोः । ३ देवीनाम् । ४ सिंहस्य । ५ हस्ते गृहीतैः । ६ लक्ष्यम् ।

कस्यापि विस्मयस्मेराः, कस्याप्युत्त्रासपांशुराः । क्रोधताम्राश्च कस्यापि, दृशः पेतुः किरीटिनि ॥ २८१ ॥ क्षणात् प्रदक्षिणीकृत्य, प्रणिपत्य च कार्मुकम् । ज्येष्ठबन्धोरथादेशा–दुचिक्षेप कपिध्वजः ॥ २८२ ॥ साहंकारस्ततस्तार–मुज्जगार घृकोदरः । एतदत्यद्भुतं कर्म, कुर्वाणे कपिकेतने ॥ २८३ ॥ दोर्भूतो यस्य कस्यापि, शिरःशूलमुदेष्यति । गदेयमगदंकारः, तस्य जागर्ति मामकी ॥ २८४ ॥ (युग्मम्) पार्थोऽप्यनमयचापं, समं मानैर्महीभृताम् । निनाय शिञ्जिनीकोटि–मात्मना सह धन्विषु ॥ २८५ ॥ तदानीमासदन् कान्तिं, सुहृदां वदनेन्दवः ॥ तत्प्रणुन्न इव ध्वान्तो, मुखमाशिश्रियद्द्विषाम् ॥ २८६ ॥ अमुञ्चदङ्कुरान् कुन्ती, मनस्यानन्दकन्दलान्[3] । गान्धारी हृदि तु स्वैर–मप्रीतिविषवल्लरीम्[4] ॥ २८७ ॥ आसन् युधिष्ठिरादीनां, प्रमोदविशदा दृशः । तदा दुर्योधनादीनां, पुनर्दोषकषायिताः ॥ २८८ ॥ अभूत् कर्मेदमेतावत्, पुरो भवतु देवता । इत्याशंसारसाक्रान्ते, द्रौपदी विवशां दशाम्[5] ॥ २८९ ॥ पाण्डुं च धृतराष्ट्रं च, भीष्मं च गुरुरब्रवीत् । अर्जुनस्य भुजौर्जित्य–मितः पश्यत पश्यत ॥ २९० ॥ शनकैराकृषेर्वत्स !, चापमेतच्चिरंतनम् । सहिष्यते न ते सार–मिति भीमेऽनुशासति ॥ २९१ ॥ आसनाद्भ्रमसोत्ताल–वाचालवदनोदरे । पश्यति द्रुतमुत्थाय, पृथिवीपालमण्डले ॥ २९२ ॥ कुतूहलान्मिलन्तीनां, सिद्धगन्धर्वयोषिताम् । व्योम्नि वक्त्रैर्विमानान्त–र्लक्षितैः शतचन्द्रिते[6] ॥ २९३ ॥ सुहृद्वपुषि रोमाञ्चः, प्रस्वेदो द्वेषिवर्ष्मणि । कांण्डः[7] कोदण्डदण्डे च, संदधे सव्यसाचिना ॥ २९४ ॥ (चतुर्भिः कलापकम्) अथान्तस्तैल-

१ उपहासेन पापिष्ठाः । २ प्रत्यक्षाग्रम् । ३ ' न्दलः ' प्रतित्रयपाठः । ४ ' वल्लरी ' प्रतित्रयपाठः । ५ ' विशदां दृशं ' ' विवशां दशाम् ' प्र० । ६ शतचन्द्रवति कृते सति । ७ शरः ।

कुण्डस्य, प्रतिबिम्बवतामधः । जवेन भ्राम्यतां तेषां, चक्रकाणामरान्तरे ॥ २९५ ॥ लक्ष्यीकुर्वन् नमद्वक्त्रो, राधाया वामभीक्षणम् । ऊर्ध्वीकृत्य दृशं[1] पूर्वां, वक्षोऽन्तमपरां नयन् ॥ २९६ ॥ कटाक्षैः सह कृष्णायाः, कुन्त्याः प्रस्रवनिर्झरैः । पितुरानन्दवाष्पैश्च, चकर्ष धनुरर्जुनः ॥ २९७ ॥ (त्रिभिर्विशेषकम्) तथाभूतः स भाति स्म, हन्तुं देवानिवोद्यतः । दीनं च तन्मुखाम्भोज-मनीक्षितुमना इव ॥२९८॥ अदभ्रसंभ्रमैः कैश्चि-दासनात् पतयालुभिः । स्थगयद्भिः श्रुती पाणि-पल्लवाभ्यां च कैश्चन ॥ २९९ ॥ उद्बुद्धसाध्वसैः कैश्चित्, परिभ्रष्टोत्तरीयकैः । अतिभूरिभयोद्भ्रान्तै-र्वेपमानैश्च कैश्चन ॥ ३०० ॥ भिन्दानोऽद्रितटीस्तन्वन्, शब्दाद्वैतमयं जगत् । फाल्गुनाकृष्टकोदण्ड-ठंकारः श्रूयते स्म सः ॥ ३०१ ॥ (त्रिभिर्विशेषकम्) मन्ये तस्माद्धनुर्ध्वानात्, त्रस्तैरश्वैर्विवस्वतः । एकचक्रो रथश्चक्रे, मेरोरास्फाल्य सानुषु ॥ ३०२ ॥ भुजैः सह महीशानां, मार्गणो[2] गुणमत्यजत् । बिभेद मङ्क्षु लक्ष्यं च, तदीयहृदयैः समम् ॥ ३०३ ॥ क्षणादूर्ध्वं शरः प्राप, शरव्यं[3] सव्यसाचिनः । लोकाग्रं पुनरासेदु-र्भुजविस्फूर्तिकीर्तयः ॥ ३०४ ॥ पुष्पवर्षं मरुत्पर्ष-दुपरिष्टात् किरीटिनः । दिवोऽङ्कादमुचत् प्राप्त-मानन्दमिव मूर्त्तताम् ॥ ३०५ ॥ विलेसुर्दिवि गीर्वाण-दुन्दुभिध्वनयोऽधिकम् । धनंजयधनुर्ध्वान-प्रतिध्वानसनाभयः ॥ ३०६ ॥ मुदा लोकस्य सर्वस्या-प्युल्ललास जयध्वनिः । सूत्रयन्मातृकां देवीं, वर्णद्वयमयीमिव ॥ ३०७ ॥ आनन्दैकमयं संप-न्मयं स्फीतयशोमयम् । तदा कुन्त्याश्च पाण्डोश्च, बभूव निखिलं जगत् ॥ ३०८ ॥

साकाङ्क्षमथ पश्यन्ती, दृशः कोणेन कोटिशः । सुतान् पञ्चापि पाञ्चाली, पाण्डोरुद्दण्डविक्रमान् ॥३०९॥ रोमहर्षमिपा-

१ ' दृढं.' प्रतित्रय० । २ बाणः । ३ लक्ष्यम् ।

नव्य-स्मराङ्कुरकरम्बितम्। वपुर्लीलावनं भूम्ना, सिञ्चन्ती स्वेदवारिभिः ॥ ३१० ॥ स्वैरमुज्जृम्भितस्तम्भा, पृथुप्रथितवेपथुः। मदौत्सुक्य-त्रपा-हर्ष-साध्वसस्फारचारिमा ॥ ३११ ॥ वरीतुकामा पञ्चापि, लोकनिर्वादशङ्किता। दौवारिकीकराब्जाभ्यां, कण्ठपीठे किरीटिनः ॥ ३१२ ॥ वरमालां निचिक्षेप, सा तु दिव्यानुभावतः। लोकैः प्रत्येकमेकाऽपि, तेषां कण्ठेष्वदृश्यत ॥ ३१३ ॥ (पञ्चभिः कुलकम्) उच्चचार ततस्तारा, व्योम्नि वागशरीरिणी। साधु साधु वृतं राज-कन्यया मा स्म शङ्क्यताम् ॥ ३१४ ॥ चिन्ता चतुर्णामन्येषा-मनुरूपा स्नुषाऽस्तु मे। इदानीमपयातेय-मिति कुन्ती मुदं दधौ ॥ ३१५ ॥ किमेषामपि भाग्येन, दत्तभूयिष्ठसौष्ठवः। कर्मेदमादधे जिष्णु-रिति पाण्डुर्विसिष्मिये ॥ ३१६ ॥ परिवेत्ता भविष्यामि, नाहमुद्वाहशालिनि। तपःसुते च भीमे चे-त्यप्रीयत कपिध्वजः ॥ ३१७॥ पञ्चभ्यस्तनयामेकां, नामीभ्यो दातुमुत्सहे। ददानो हि गमिष्यामि, साधूनामुपहास्यताम् ॥३१८॥ वरमाला च पञ्चाना-मपि कण्ठे लुलोठ। सा दिव्यवाक् कथमुत्तस्थौ?, तत् किं नाम भविष्यति? ॥३१९॥ इति चिन्तातुरो याव-दभूद्द्रुपदभूपतिः। चारणश्रमणः कश्चि-त्तावदागाद्दिवोऽध्वना ॥ ३२० ॥ (त्रिभिर्विशेषकम्)

दिशः काञ्चनकान्ताभि-र्दिहानं देहकान्तिभिः। परमज्योतिषः प्राप्तं, विवर्तमिव मूर्त्ततम् ॥ ३२१ ॥ तमभ्युदस्थुः पाञ्चाल-विष्वक्सेनादयो नृपाः। स्फुरदम्भोरुहाराम-पवमानमिवालिनः ॥ ३२२ ॥ (युग्मम्) तमासयित्वा सर्वेऽपि, रत्न-

१ करम्बितं—सहितम्। २ प्राप्तस्तब्धता। ३ चारिमा—सुन्दरता। ४ महती। ५ "परिवेत्ताऽनुजोऽनूढे, ज्येष्ठे दारपरिग्रहात्" इत्यमरः। ६ लिम्पन्तम्। ७ पवमानः—वायुः।

सिंहासने मुनिम् । धात्रीलुठितमूर्धानः, प्रणेमुः पृथिवीभुजः ॥ ३२३ ॥

अथावसरमासाद्य, देशनान्ते मुनीश्वरम् । किं धवाः पञ्च पाञ्चाल्या ?, इत्यपृच्छज्जनार्दनः ॥ ३२४ ॥ सोऽब्रवीदेतया पूर्व-जन्मोपात्तनिदानया । वृताः पञ्च धवास्तद्भोः !, कृतं मीमांसयाऽनया ॥ ३२५ ॥ पुरा हि पुरि चम्पायां, भूमिदेवास्त्रयोऽभवन् । सोमदेव-सोमभूति-सोमदत्ताः सहोदराः ॥ ३२६ ॥ तेषामासन् क्रमात्तिस्रः, प्रेमजन्मभुवः प्रियाः । नागश्रीरथ भूतश्री-यक्षश्रीश्चेति नामतः ॥ ३२७ ॥ मिथः स्निग्धतया तेषा-मियमासीद्व्यवस्थितिः । यत् पर्यायेण भोक्तव्यं, सर्वैरेकस्य वेश्मनि॥ ३२८ ॥ अथ क्रमात् समायाते, भुक्तिवारकवासरे । नागश्रीराश्रितानेक-रसां रसवतीं व्यधात् ॥३२९॥ कटुतुम्बीफलं तस्या-मनेकद्रव्यसंस्कृतम् । अपाक्षीदियमज्ञासीत्, पाकान्ते च कथंचन ॥ ३३० ॥ नानावस्तुव्ययोद्भूतं, कार्पण्येन न साऽत्यजत् । केवलं क्वचिदेकान्ते, निधाय तदधारयत् ॥३३१॥ तदन्यैर्विविधैर्भोज्यैः, स्वादुभिः पति-देवरान् । भोजयामास सा प्रीता, क्षणात् तेऽपि बहिर्ययुः ॥३३२॥ तदा सुभूमिभागाख्ये, पुरोद्याने महामनाः । धर्मघोषाभिधः सूरि-र्ज्ञानवान् समवासरत् ॥ ३३३ ॥ तस्य धर्मरुचिः शिष्यो, मासक्षपणपारणे । किरात्या इव कल्पद्रु-र्गृहं नागश्रियो ययौ ॥ ३३४ ॥ वृथा मा भूदिदं ताव-द्भवेदेषोऽपि तोषितः । इत्यालोच्य तया तस्मै, तत्तुम्बीव्यञ्जनं ददे ॥ ३३५ ॥ अपूर्वमिति संचिन्त्य, तद्ग्रहानुग्रहेच्छया । असौ वसतिमागत्य, गुरूणां तददर्शयत् ॥ ३३६ ॥ तेऽपि तद्गन्धमाघ्राय, वात्सल्यादिदमूचिरे । यदीदं भोक्ष्यसे वत्स !, सद्यो मृत्युमवाप्स्यसि ॥ ३३७ ॥ विशुद्धे स्थण्डिले मङ्क्षु, तत् परिष्ठापय क्वचित् । इत्यादेशाद्गुरोः

१ ' सर्वेषामेव वेश्मनि ' इत्येकप्रतिपाठः । २ ' व्ययोद्भूतका० ' प्रतित्रयपाठः । ३ ग्रहः-आग्रहः ।

मोऽपि, जगाम नगराद्बहिः ॥३३८॥ बिन्दौ निपतिते तस्य, कथंचित् तत्र पात्रतः। सक्ताः स मुनिरद्राक्षी-न्म्रियमाणाः पिपी-
लिकाः ॥ ३३९ ॥ दध्यौ च बद्धसंवेगो, बिन्दुरप्यस्य यद्यसौ। प्राणिनामियतां हन्ता, तत्सर्वं किं करिष्यति ? ॥ ३४० ॥
वरमेकस्य मे मृत्युः, कोटिशो न तु देहिनाम्। इत्यालोच्य सरोमाञ्च-स्तदसौ बुभुजे स्वयम्॥ ३४१ ॥ सिद्धप्रत्यक्षमालोच्य,
समाधिमधुरं मनः। दधत् सर्वार्थसिद्धेऽगा-न्मुनिः प्राणान् विहाय सः ॥३४२॥ बहिर्धर्मरुचेः कस्मा-द्विलम्ब ? इति वेदितुम्।
गुरुः श्रीधर्मघोपोऽथ, निदिदेश परान् मुनीन् ॥ ३४३ ॥ तं परासुं बहिर्वीक्ष्य, तद्रजोहरणादिकम्। आदाय गुरुपादानां,
तेऽपि सर्वं न्यवेदयन् ॥ ३४४ ॥ विज्ञायातीन्द्रियज्ञानो-पयोगेन यथास्थितम्। सर्वं मुनीनां नागश्री-वृत्तान्तं तेऽप्यचीक-
थन् ॥३४५॥ ज्ञात्वा कथंचिल्लोकानां, वाक्परम्परया जनाः। सोमदेवादिविप्राणां, तस्या दुश्चेष्टितं जगुः ॥ ३४६ ॥ काम-
माक्रुश्य विप्रास्ते, तां गृहान्निरवासयन्। लोकैर्धिक्क्रियमाणा च, साऽपि बभ्राम सर्वतः ॥ ३४७ ॥ कास-श्वास-ज्वरो-त्कम्प-
कुष्ठाद्यैः क्रान्तविग्रहा। रोगैः षोडशभिर्लेभे, साऽत्रैव नरकव्यथाम् ॥ ३४८ ॥ क्षु-त्पिपासार्दिता लोकै-र्निन्द्यमाना पदे पदे।
दुःखं भ्रमन्ती सा मृत्वा, षष्ठं नरकमासदत् ॥ ३४९ ॥ तस्मादुत्पद्य मीनेषु, सप्तमं नरकं ययौ। पुनर्मीनत्वमासाद्य, तस्मि-
न्नेव जगाम सा ॥ ३५० ॥ द्विर्द्विरेवं सिषेवेऽसौ, नरकान् सकलानपि। पृथ्वीकायादिषूत्पेदे, तदुद्धृत्ता च भूरिशः ॥ ३५१ ॥
चम्पायामथ सा कर्म-लाघवात् सुकुमारिका। सुता सागरदत्तस्य, सुभद्राकुक्षिभूरभूत् ॥३५२॥ जिनदत्तात्मजस्तत्र,
भद्राजश्चास्ति सागरः। वेश्मस्थां तत्पिताऽन्येद्यु-र्ददर्श सुकुमारिकाम् ॥ ३५३ ॥ तनयस्य मदीयस्य, योग्येयमिति चिन्त-
यन्। सह बन्धुभिरभ्येत्य, पितरं तामयाचत ॥ ३५४ ॥ सोऽप्यूचेऽतिप्रिया मेऽसौ, न भवाम्यनया विना। ममास्तु गृहजा-

माता, सागरस्तत् तवात्मजः ॥३५५॥ सुतमालोचयामीति, जिनदत्तोऽगमद् गृहम्। सागरस्य तदाख्यच्च, मौनमालम्ब्य स स्थितः ॥ ३५६ ॥ अनिषिद्धं ह्यनुमत-मिति न्यायेन तत्पिता। मेने सागरदत्ताय, गृहजामातरं सुतम् ॥३५७॥ आश्चर्यकृत्तयोर्जज्ञे, पाणिग्रहमहोत्सवः। नक्तं शिश्रियतुस्तौ च, पल्यङ्कं वासवेश्मनि ॥ ३५८ ॥ पूर्वकर्मवशात्तस्याः, स्पर्शमङ्गारसोदरम्। आसाद्य सागरस्तस्थौ, क्षणं तत्र कथंचन ॥३५९॥ तस्यां सुखप्रसुप्तायां, स प्रणश्य गृहं ययौ। निद्रात्ययेऽरुदत् कान्त-मपश्यन्ती च सा भृशम् ॥३६०॥ अथादिष्टा तयोर्दन्त-शौचहेतोः सुभद्रया। प्रातरैक्षिष्ट तां चेटी, रुदन्तीं वल्लभोज्झिताम् ॥ ३६१ ॥ सा गत्वाऽऽख्यत् सुभद्रायै, साऽपि स्वप्रेयसे क्षणात्। पितुरेषोऽपि जामातु-रुपालम्भं ददौ स्वयम् ॥३६२॥ सोऽप्याह तनयं वत्स !, न युक्तं विदधे त्वया। गच्छाधुनाऽपि तत् तत्र, माऽन्यथा मद्वचः कृथाः ॥३६३॥ सागरोऽप्यूचिवानग्नौ, वरं झम्पां तनोम्यहम्। न पुनस्तात ! गन्तास्मि, वेश्म तस्याः कदाचन ॥ ३६४ ॥ इदं सागरदत्तोऽपि, तत्कुड्यान्तरितोऽशृणोत्। जगाद च गृहं गत्वा, निराशः सुकुमारिकाम् ॥ ३६५ ॥ कथंचित् सर्वथा वत्से !, विरक्तः सागरस्त्वयि। तन्मा खिद्यस्व कोऽप्यन्यः, पतिस्तव विधास्यते ॥ ३६६ ॥ कौपीनाम्बरमात्रैक-कर्परं मक्षिकावृतम्। भिक्षुकं कंचिदद्राक्षीत्, स गवाक्षस्थितोऽन्यदा ॥ ३६७ ॥ आहूय तेन सोऽम्भोभिः, स्नपयित्वा सुगन्धिभिः। विलिप्य चन्दनैर्दिव्यवासांसि परिधाप्य च ॥ ३६८ ॥ ऊचे तुभ्यं मया दत्ता, पुत्रीयं सुकुमारिका। मदीयां विलसन् लक्ष्मीं, सुखमास्स्व सहानया ॥ ३६९ ॥ (युग्मम्) इत्युक्तः सोऽविशद्वास-वेश्म साकं तया निशि। मेने च तद्वपुःश्लेष-मग्निप्लोषमिवात्मनः ॥३७०॥

---

१ अभिदाहम्।

गह्नोत्थाय वेषं स्व-मादाय स पलायितः। तथैन रुदतीं तां च, विलोक्य जनकोऽब्रवीत् ॥ ३७१ ॥ सोऽयं प्राक्कर्मणां वत्से!, विपाकोऽन्यदत्र कारणम्। तदास्स्व ददती दानं, शान्तात्मा मम वेश्मनि ॥ ३७२ ॥ तथैव कुर्वती तस्थौ, सा धर्मैकपरायणा। प्रापुस्तद्गेहमन्येद्युः, साध्व्यो गोपालिका इति ॥३७३॥ शुद्धैरशनपानाद्यैः, सा भक्त्या प्रतिलाभ्य च। तन्मुखाद्धर्ममाकर्ण्य, विरक्ता व्रतमग्रहीत् ॥ ३७४ ॥ तपोऽथ कुर्वती नित्यं, तुर्य-षष्ठा-ष्टमादिकम्। आर्यिकाभिः सहैताभि-र्विहारमकरोदियम् ॥ ३७५ ॥ आर्यास्ताः सा कदाऽप्यूचे, तनोम्यातापनामहम्। सुभूमिभागोद्यानस्था, दत्तदृष्टिर्विवस्वति ॥ ३७६ ॥ सा प्रत्यभिदधे ताभि-रिति ह स्मागमोक्तयः। आतापना न साध्वीनां, कल्पते वसतेर्बहिः ॥ ३७७ ॥ अनाकर्ण्य च तद्वाचं, वने तस्मिन्नुपेत्य सा। यावदारभते क्षिप्त-चक्षुरातापनां रवौ ॥ ३७८ ॥ तावदुत्सङ्गमेकस्य, श्रयन्तीमपरस्य तु। अङ्के न्यस्ताङ्घ्रिमन्येन, बध्यमानावतंसकाम् ॥ ३७९ ॥ परेण विधृतच्छत्रां, वीजितामितरेण च। गणिकामागतां तत्र, देवदत्तां ददर्श सा ॥ ३८० ॥ (त्रिभिर्विशेषकम्) तां वीक्ष्यापूर्णभोगेच्छा, निदानमिति साऽकरोत्। भवेयं तपसाऽनेन, पञ्चप्रेयस्य-साविव ॥ ३८१ ॥ तन्वती देहशौचाद्य-मभ्युक्षन्ती क्षणे क्षणे। वार्यमाणेयमार्याभि-र्मनसीदमधारयत् ॥ ३८२ ॥ पुरा बहु-मताऽभूव-मार्यिकाणामगारिणी। तिरस्कुर्वन्ति मामेता, भिक्षुकीमधुना पुनः ॥ ३८३ ॥ इत्यालोच्य विनिर्गत्य, विभिन्न-चमतिस्थिता। व्रतं सा पालयामास, चिरं स्वच्छन्दवर्तिनी ॥ ३८४ ॥ मासान् संलेखनामष्टौ, कृत्वाऽनालोच्य संस्थिता[1]। नवपल्योपमायुष्का, सौधर्मे देव्यभूदियम् ॥ ३८५ ॥ च्युताऽभवच्च कृष्णेयं, प्राचीनाच्च निदानतः। भर्तारो जज्ञिरेऽमुष्याः,

१ मृता।

पश्चैते कोऽत्र विस्मयः ?॥३८६॥ इत्येतां गिरमुद्दीर्य, जगाम नभसा मुनिः। कुर्वते चिरमेकत्रा–वस्थितिं न हि तादृशाः ॥३८७॥

पाण्डवानां वधूलाभे, दधुः स्वजनभूभृतः। विकासमुदये भानो–ररविन्दाकरा इव ॥ ३८८ ॥ अथ वैवाहिकं कर्म, प्रारभेते स्म तत्क्षणात्। पाण्डुः पाञ्चालभूपश्च, लक्ष्मीसंभारभासुरम् ॥ ३८९ ॥ प्रमोदोत्फुल्लनेत्राभिः, सौधमानीय सादरम्। पाञ्चाली कुलवृद्धाभिः, स्नानपीठे न्यवेश्यत ॥३९०॥ उद्गिरन्ती बहिः स्नेहं, पाण्डुपुत्रेष्विवाऽऽन्तरम्। कृष्णा सुगन्धिभिस्तैलैः, कृताभ्यङ्गा स्म भासते ॥ ३९१ ॥ तस्याः पिष्टातकक्षोद–क्षरदुद्वर्तनीमिषात्। विक्षिप्तं यौवनेनाङ्गात्, खण्डयित्वेव शैशवम् ॥ ३९२ ॥ रतेरिव निधानानि, श्रीखण्डतिलकान्यत्र। तस्याः सहर्षमङ्गेषु, चक्रिरे कुलयोषितः ॥ ३९३ ॥ नवीनयौवनावास–हेतोरिव तदङ्गके। तर्कुसूत्रमिषात् सूत्रं, स्वगोत्राविधवा दधुः ॥ ३९४ ॥ जृम्भते स्म भृशं विश्व–श्रोत्रपीयूषवर्षिणः। कुललीलावतीवर्ग–मङ्गलध्वनयस्तदा ॥३९५॥ चिक्षिपुः कुलवामाक्ष्यो, द्रौपदीमिति वर्णके। तथैव तस्याः सानन्द–मुद्वर्णकमपि व्यधुः ॥३९६॥ अथान्तःक्षिप्तकर्पूर–कस्तूरी–कुङ्कुमैरिमाः। वारिभिः स्नपयांचक्रुः, कवोष्णैर्नित्ययौवनाम् ॥ ३९७ ॥ मार्जितं गन्धकाषाय्या, पाञ्चाल्याः शुशुभे वपुः। नवमाणिक्यपाञ्चाल्या, इव तत्कालसंस्कृतम् ॥ ३९८ ॥ आचार इति तास्तैस्तै–र्भूषणैस्तामभूषयन्। न हि प्रकृतिरम्याणा–माहार्यैः काऽप्यलंकृतिः ॥ ३९९ ॥ लावण्यवारिधाराभि–र्वर्षन्तीव दशामिषात्। पारिणेत्रदुकूलानि, सा तदा पर्यधाप्यत ॥ ४०० ॥ उत्पाद्य योषितो हर्षा–दिमां मातृगृहेऽनयन्। आसयंश्च स्मरस्मेर–लोचनां काञ्चनासने ॥४०१॥ पाण्डवा अपि निर्वृत्त–वर्णको–द्वर्णकक्रियाः। निर्माय मङ्गलस्नान–मामुक्तोचितभूषणाः

१ कमलाकराः। २ कृत्रिमैः।

॥ ४०२ ॥ औपवाह्यानथारुह्य, वारणेन्द्रान् पृथक् पृथक् । समं पञ्चापि पाञ्चालीं, परिणेतुं प्रतस्थिरे ॥ ४०३ ॥ (युग्मम्)
मौलिनीलमणिज्योति-र्भानुज्योतिःपराहतम् । मूर्ध्नीव पिण्डितं तेषां, मायूरच्छत्रमाबभौ ॥ ४०४ ॥ रेणुर्मङ्गलतूर्याणि, पुरस्ते-
षामनेकशः । तारैराकारयन्तीव, दिशामीशान् प्रतिस्वनैः ॥ ४०५ ॥ पश्चादुच्चेरुरद्रीन्द्र-कन्दरादारणोल्बणाः । शात्रवावस्थिति-
क्रोधा-दिव निस्वाननिस्वनाः ॥ ४०६ ॥ सर्वंकषेषु तेजस्वि-तेजसां पाण्डुसूनुषु । पतन्ति नित्यमेतस्य[3], जगत्यां किममी
कराः ॥ ४०७ ॥ मिलत्स्वजनभूपाल-तुरङ्गमखुरोद्धतः । इतीव स्थगयामास, पांशुरंशुमतो वपुः ॥ ४०८ ॥ (युग्मम्)
अध्यासितुं मदस्रोतो, भूपाकुसुमदाम च । सामन्तसामजेन्द्राणां, द्विरेफाः समशेरत ॥ ४०९ । स्वजनोर्वीपतिश्वेत-च्छत्रैश्छन्नं
नभो बभौ । विवाहमीक्षितुं सर्व-राकेन्दुभिरिवागतैः ॥ ४१० ॥ ध्वजैर्विरेजे वेल्लद्भि-रनुकूलेन वायुना । द्रौपदीकौतुकागार-
वर्तनीदेशकैरिव ॥ ४११ । नारीमङ्गलसंगीत-श्रवणप्रवणाश्चिरम् । सादिनं खेदयामासु-स्ते पतङ्गतुरङ्गमाः ॥ ४१२ ॥ तदा
कुन्ती च माद्री च, गान्धारीप्रमुखा अपि । भृङ्गारैरद्भुतैः प्रापु-र्देवानामप्यवेक्ष्यताम् ॥ ४१३ ॥ श्रुतीर्मत्सरिणां तूर्यैः,
स्फोटयद्भिः स्फुटारवैः । आलोकनाय लोकं च, विकर्षद्भिरितस्ततः ॥ ४१४ ॥ सर्वतः स्तूयमाने च, वन्दिभिर्भुजवैभवे । अथ
क्रमात् समाजग्मु-र्मण्डपद्वारि पाण्डवाः ॥४१५॥ (युग्मम्) कृतं प्रतीक्ष्य श्वश्रूभि-रवतारणमङ्गलम् । मातृगेहमुपाजग्मु-
स्तेऽथ तिग्मांशुतेजसः ॥ ४१६ ॥ पाञ्चाल्या दक्षिणः पाणि-स्तदीयैर्दक्षिणैः करैः । तत्र संगमयांचक्रे, वेधसेव पुरोधसा ॥
४१७ ॥ वृद्धावचोभिः पाञ्चाली, त्रपातरलितां दृशम् । कथंचिन्मिश्रयामास, दृशा पाण्डुतनूरुहाम् ॥ ४१८ ॥ ततो दधन्ति

१ दध्वनुः । २ वाजिनध्वनयः । ३ सूर्यस्य । ४ सूर्यस्य ।

पञ्चाङ्ग-मन्त्राङ्गाणीव मूर्तताम् । साक्षाल्लक्ष्म्येव काम्पील्य-नाथनन्दनयाऽन्विताः ॥४१९॥ वैवाहिकीर्ऋचोऽधीत्य, हुतं हव्यै-र्द्विजन्मना । दक्षाः प्रदक्षिणीचक्रु-स्ते वेधां जातवेदसम् ॥ ४२० ॥ (युग्मम्) द्रुपदोऽप्युपदीचक्रे, पाणिमोचनपर्वणि । पाण्डवानां विना दारान्, गृहसर्वस्वमात्मनः ॥ ४२१ ॥ पिकीपञ्चमनिर्ह्राद-कलमङ्गलगीतयः । दुन्दुभिध्वनिभिस्तारै-राहूतपुरयोषितः ॥ ४२२ ॥ राजलक्ष्मीमिवाध्यक्षा-मादाय द्रुपदात्मजाम् । पाण्डवा रथमारुह्य, निजावासमुपागमन् ॥ ४२३ ॥ (युग्मम्)

कृष्णादिभिर्नृपैराप्तैः, सदारैः स्वात्मजन्मभिः । अनुद्रुतः प्रतस्थेऽथ, पाण्डुर्निजपुरं प्रति ॥ ४२४ ॥ अनुगच्छन्तमाक्रम्य, कियतीमपि मेदिनीम् । बलान्निवर्तयामास, पाण्डुर्द्रुपदभूपतिम् ॥ ४२५ ॥ अथ प्रत्यालयोन्मील-न्नीलचन्दनमालिकम् । सर्वराजपथोत्क्षिप्त-पताकापीतपुष्करम्[1] ॥ ४२६ ॥ स्थानस्थानोल्लसन्मञ्च-विमानितविमानकम् । ककुप्कुक्षिंभरिक्षुभ्य-न्नादकम्पितमानकम् ॥ ४२७ ॥ प्रेक्षाकौतूहलाहूत-नारीनयनपङ्क्तिभिः । नवेन्दीवरकेदार-करम्बितमिवाभितः ॥ ४२८ ॥ अनुयातः सहायात-स्वजनोर्वीशमण्डलैः । तैः सदारैः कुमारैश्च, पाण्डुः स्वपुरमाविशत् ॥ ४२९ ॥ (चतुर्भिः कलापकम्) विहाय कृष्णं सत्कृत्य, हास्तिका-श्वीय-काञ्चनैः । विससर्ज स्वदेशेभ्यः, सर्वं राजाऽथ राजकम् ॥४३०॥ लीलाशैलोच्चयोद्यान-केलिवापीषु पाण्डवाः । दिनान्यतीयुः क्रीडन्तः, समं कृष्णेन यामवत् ॥ ४३१ ॥ अथालोच्यायतिं स्नेहात्, कृष्णः शुभफलोदयाम् । समाहूय रहः किंचि-द्यावद्वदति पाण्डवान् ॥ ४३२ ॥ तावद्व्योम्ना महःपुञ्ज-धौतदिक्कुञ्जकालिमा ।

१ पुष्करम्-आकाशम् ।

आययौ नेत्रपीयूष–नीरदो नारदो मुनिः ॥ ४३३ ॥ प्रीतान्तःकरणः काम–मभ्युत्थानासनादिभिः । पाण्डवेभ्योऽनुशिष्टिं स, विततार हरेर्गिरा ॥ ४३४ ॥

आकर्ण्य कर्णपीयूषं, युष्मदुद्वाहमङ्गलम् । प्राप्तोऽस्मि परमब्रह्म–लयादप्यधिकां मुदम् ॥ ४३५ ॥ वत्साः ! किं त्वेकजानित्वं, किंचिदन्तर्दुनोति वः । वैरवारिधरोल्लास–प्रावृषः खलु योषितः ॥ ४३६ ॥ आरूढस्य परां प्रौढिं, बन्धुस्नेहमहीरुहः । हन्त दावानलज्वाला–माहुर्मृगविलोचनाम् ॥ ४३७ ॥ स्रोतस्विनीप्रवाहाणा–मिव बान्धवचेतसाम् । द्वैधीभावकरी शैल–तटीव तरलेक्षणा ॥ ४३८ ॥ वत्साः ! कुटुम्बसंहार–कारणं हरिणेक्षणा । यथा समभवत् पूर्व–माकर्णयत तां कथाम् ॥ ४३९ ॥

अस्ति रत्नपुरं नाम, पुरं भरतभूषणम् । न यत्रार्थिजनाभावात्, कोऽपि त्यागीति[1] विश्रुतः ॥ ४४० ॥ तत्र श्रीषेण इत्यासी–द्दासीभूतरिपुर्नृपः । न्यायविक्रमयोर्येन, धर्मः संधिकरः कृतः ॥४४१॥ तस्याभिनन्दितेत्याद्या, द्वितीया शिखिनन्दिता । प्रिये बभूवतुः प्रीति–रती इव मनोभुवः ॥४४२॥ सतीललाम सूते स्म, नन्दनावभिनन्दिता । जगदुद्द्योतनौ प्राची, सूर्याचन्द्रमसाविव ॥४४३॥ इन्दुषेण इतीन्दुश्री–राद्योऽभून्नयनोत्सवः । स्मरलीलालताकन्दो, बिन्दुषेणस्ततोऽपरः ॥ ४४४ ॥ कुमारयोस्तयोः शङ्के, शास्त्रस्पर्धाऽनुबन्धतः । शस्त्रमप्यभवत् सर्व–जगतो मात्रयाधिकम् ॥ ४४५ ॥ क्रमान्मदसरस्तीर–सान्द्रदुर्विनयद्रुमम् । तौ स्मरानेकप[2]क्रीडा–वनं यौवनमीयतुः ॥४४६॥ गुरुस्ताभ्यां गुणाराम–राजिनी राजकन्यकाः । अनेकरसपीयूष–वाहिनीरुदवाहयत् ॥४४७॥ तस्मिन्नेव पुरे सर्व–कलानां पारदृश्वरी । गणिकाऽनङ्गसेनेति, गुणानां जन्म-

१ दाता । २ अनेकपः–हस्ती ।

भूरभूत् ॥ ४४८ ॥ तस्यां लावण्यपीयूष-सरस्यां रागिणां दृशः । मज्जन्त्यः प्राप्य वक्षोज-कुम्भौ प्रीतिं ययुः पराम् ॥४४९॥ यूनां तदीयवैदग्ध्य-वागुरापतितं मनः । स्वच्छन्दमदनव्याध-विद्धं न पदमप्यगात् ॥ ४५० ॥ द्वावप्युर्वीपतेः पुत्रौ, तस्यामासक्तमानसौ । तौ मिथः कलहायेतां, करिण्यां करिणाविव ॥४५१॥ कुर्वाणौ कलहं नित्य-मत्यन्तोत्त्रासितत्रपौ । खेदादन्येद्युराहूय, तौ महीपतिरन्वशात् ॥४५२॥ वत्सौ ! किमिदमारब्धं, मलीमसकुलोचितम् ? । कलहायेत नान्योऽपि, वेश्यार्थे किमु बान्धवौ ? ॥ ४५३ ॥ स्वल्पाऽप्युज्जृम्भते यासु, न प्रेमसलिलार्द्रता । सुखशाखिप्ररोहोऽस्तु, कस्तास्वद्रिशिलास्विव ? ॥ ४५४ ॥ विलोकन्तेऽन्यमन्यस्य, कण्ठाश्लेषं वितन्वते । चित्ते दधति चाश्चान्यं, तासु वेश्यासु का रतिः ? ॥४५५॥ यासां काऽप्यार्द्रता ताव-द्यावद्दानाम्बुवृष्टयः । वेश्यासु मरुदेश्यासु, तासु रज्येत कः सुधीः ? ॥४५६॥ निर्धनत्वादिपुष्पस्य, नरकादिफलस्य च । मूलं वेश्यैव जानीतं, महाव्यसनशाखिनः ॥ ४५७ ॥ नित्यमित्यादिभिर्वाक्यै-र्भूभृता बोधितावपि । तौ नितान्तमयुध्येता-मत्यन्तोत्सिक्तमत्सरौ ॥ ४५८ ॥ तयोः संरब्धयोरेवं, द्रष्टुं मृत्युमनीश्वरः । विषमं विषमास्वाद्य, परलोकं ययौ नृपः ॥४५९॥ पत्युर्विपत्तिशोकेन, विक्लवे ते अपि द्रुतम् । विपेदाते तथैवाभि-नन्दिता-शिखिनन्दिते ॥४६०॥ बद्धानुरागावत्यन्तं, तस्यां तदपि निस्त्रपौ[1] । मिथः क्रोधोद्धतौ युद्धा, मृत्युं तावप्यवापतुः ॥ ४६१ ॥ इत्थं कुटुम्बसंहारः, स्त्रीनिमित्तोऽभवत् पुरा । अनर्थबीजं राजीव-चक्षुषो[3] हि प्रचक्षते ॥ ४६२ ॥

वत्सास्तद्वो रिरंसूना-मेकामेव मृगीदृशम् । क्षेमं खलु न पश्यामि, तत एवागतोऽस्म्यहम् ॥ ४६३ ॥ तत्सर्वैरपि युष्माभि-

---

१ अतिनिर्लज्जौ । २ कुपितयोः । ३ कमलनेत्राः स्त्रियः ।

रात्मनः शिवंतातिभिः[1] । अनेन समयेनैव, वर्तितव्यमहर्दिवम् ॥ ४६४ ॥ यदा युष्माकमेकस्य, द्रौपदी वासवेश्मनि । कार्यतोऽपि तदाऽन्येन, न गन्तव्यं कथंचन ॥ ४६५ ॥ कथंचिदथ यः कोऽपि, भिनत्ति समयं यदि । वनवासाय गन्तव्यं, तेन द्वादशवत्सरीम् ॥ ४६६ ॥ मुनेर्गिरमिमां काम-मायतिक्षेमकारिणीम् । अनुमेने मुकुन्दोऽपि, कौन्तेयानां हितेच्छया ॥ ४६७ ॥ तां वाचमुरीचक्रु-र्वाचंयमपतेर्मुदा[2] । पाण्डवा अपि को नाम, नात्मनीनाय[3] धावति ? ॥ ४६८ ॥ मुनीन्द्रोऽपि यथार्थाभि-राशीर्भिरभिनन्द्य तान् । विकस्वरमनाः स्वैर-मुत्पपात विहायसा ॥ ४६९ ॥ कामं हृष्यन् हृषीकेशोऽप्युपचारैरनेकशः । पाण्डुं पाण्डुतनूजान-प्यापृच्छ्य द्वारकां ययौ ॥ ४७० ॥

इति समयनिरुद्धकामचाराः, प्रणयप्रह्वधियः परस्परेण ।
सहविहितसमस्तकेलिरम्यं, गमयन्ति स्म दिनानि पाण्डवेयाः ॥ ४७१ ॥

इति मलधारिश्रीदेवप्रभसूरिरचिते पाण्डवचरिते महाकाव्ये
द्रौपदीस्वयंवरवर्णनो नाम चतुर्थः सर्गः ॥ ४ ॥

---

१ मङ्गलश्रेणिभिः । २ प्रतिज्ञया । ३ आत्महिताय ।

पाण्डवानां नारदोपदेशः ॥

अथ पञ्चमः सर्गः ।

अथानुजग्मुषां तेषा-मन्वहं समयं मुनेः । परस्परमभूत् प्रीति-रखण्डा पाण्डुजन्मनाम् ॥ १ ॥ मनोभिः पञ्चभिस्तेषां, कृतमेकं महन्मनः । तेनैव नियतं ख्याता, महामनस इत्यमी ॥ २ ॥ अवश्यमेक एवात्मा, तासु मूर्त्तिषु पञ्चसु । न खल्वेकैव पत्नी स्या-द्भूयसां पतिदेवता ॥ ३ ॥ अविशेषकृतोपास्तिः, शशिलेखेव शूलिनाम् । निष्कलङ्कैव पाञ्चाली, तेषामासीदतिप्रिया ॥ ४ ॥ पतिव्रता न गङ्गाऽपि, हरादम्भोधिमीयुषी । श्रयन्ती हन्त पञ्चापि, द्रौपदी तु पतिव्रता ॥ ५ ॥ पञ्चभ्योऽपि क्रमात् तेभ्यः, प्रियेभ्यस्त्रिजगत्प्रियान् । लोकपालोपमान् पञ्च, पाञ्चाली प्रापदात्मजान् ॥ ६ ॥ पाञ्चालीलब्धजन्मत्वात्, पृथग्भिन्नाभिधा अपि । एते पञ्चापि पाञ्चाला, इति पप्रथिरे भुवि ॥ ७ ॥

सौभ्रात्रं पाण्डुपुत्राणां, द्रौपद्याश्च सतीव्रतम् । अवलोकितुकामेव, ततः शरदुपागमत् ॥ ८ ॥ भेजे विप्रोषितप्रावृड्-भुजङ्गीविषवल्गितैः । औषधीशकरामर्शा-दिव वैशद्यमम्बुदैः ॥ ९ ॥ घनोपरोधनिर्मुक्तो, ध्वस्तध्वान्तरिपुः शशी । भाति स्म दिग्वधूक्षिप्तै-र्नक्षत्रैरक्षतैरिव ॥ १० ॥ नम्रीभूतशिरःपक्व-शालिकेदारकं बभौ । जनकस्येव जीमूत-कालस्य विरहासहम् ॥ ११ ॥ जिगीषुनृपसैन्याश्व-रजोमलिनमम्बरम् । अहसन्नमलाः स्मेरा-म्भोजव्याजाज्जलाशयाः ॥ १२ ॥ दिशः शरदमायातां, चिरात्

१ चन्द्रकिरणस्पर्शात् ।

प्रियसखीमिव । आलपन्त्य इवैक्ष्यन्त, सरसैः सारसारवैः ॥१३॥ मरालैः कमलोत्तंसाः, सरस्यः पुनराश्रिताः । सेव्यते हि प्रभुः प्रायो, विशदैरपि संपदि ॥ १४ ॥ हससप्तच्छदामोदा, विरेजुर्वनभूमयः । क्रीडत्कामेभसंभूत-दानाम्भःसौरभा इव ॥ १५ ॥ संपन्नसर्वसस्यौघ-मण्डितां पाण्डुसूनवः । शरदं निर्विशन्ति स्म, शश्वदुद्यानकेलिभिः ॥ १६ ॥

गोचरेऽपररात्रस्य, निर्गतं बहिरन्यदा । समस्तमप्यपाहारि, तस्करैः पुरधेनुकम् ॥ १७ ॥ तत्क्षणाद्दक्षिणेर्माण-स्तस्कर-श्रेणिमार्गणैः । भूशक्रस्यैत्य पूच्चक्रु-र्मन्दिरद्वारि वल्लवाः ॥ १८ ॥ तदीयध्वनिमाकर्ण्य, कर्णयोः क्रकचोपमम् । उज्झांचकार बीभत्सु-र्निद्रातन्द्रालुतां क्षणात् ॥ १९ ॥ ततो जीवधनं दस्यु-हृतं विज्ञाय तन्मुखात् । शौण्डीरचूडामाणिक्य-मन्तर्जज्वाल फाल्गुनः ॥ २० ॥ अर्जुनेन प्रजाकार्ये, प्राणानपि जिहासता । तदा समयभेदोऽपि, सानन्दमुरीकृतः ॥ २१ ॥ ततो धनुः सतूणीर-मादातुं फाल्गुनोऽविशत् । वासवेश्मनि कृष्णायाः, क्रोडक्रीडद्युधिष्ठिरे ॥ २२ ॥ आदाय विजयस्तस्मा-न्निज-तूणीरकार्मुके । तस्करानुपदं वीरः, क्रोधावेशादधावत ॥ २३ ॥ स वीरग्रामणीर्वाणै, रणे निर्जित्य तस्करान् । प्रीत्याऽभिनन्दितः पौरैः, पुरस्कृत्याऽऽनिनाय गाः ॥२४॥ विगाहते स्म गायद्भि-स्तद्भुजस्फूर्तिचर्चरीः । गोपैरेत्य वृतः प्रीत्या, नरो नारायणो-पमाम् ॥ २५ ॥ पार्थस्येव यशः साक्षात्, क्षरन्त्यः क्षीरमुज्ज्वलम् । स्वस्ववत्सोत्सुका गावः, स्वं स्वं धामोपतस्थिरे ॥ २६ ॥

कश्चिदभ्येत्य बीभत्सो-रादेशादथ पार्थिवम् । कुन्ती-युधिष्ठिरप्रष्ठ-कुटुम्बोपेतमभ्यधात् ॥ २७ ॥ दिष्ट्या त्वं वर्धसे

१ हंसैः । २ रात्रिचरमसमये । ३ पारधिना दक्षिणपार्श्वे विद्धो मृगो दक्षिणेर्मोच्यते, स प्राणधारणे निराशो भवति तत्सदृशा इमे वल्लवाः—गोपाः । ४ अर्जुनः । ५ प्रतिज्ञाभङ्गः । ६ पमः,, पमा. पमम . इति प्रतिपाठाः । ७ प्रष्ठ०—मुख्यः ।

पञ्चपाञ्चालजन्म । तस्करहृतं पुरधेनुकं अर्जुनेन प्रत्याहृतम्।

देव !, भुजैः पार्थस्य यैस्तव । पुरजीवधनत्राणात्, कीर्तयः सुरभीकृताः ॥ २८ ॥ पुरद्वारि स्थितो मूले, सहकारमहीरुहः । किं तु विज्ञापयत्येवं, देव ! त्वां कपिकेतनः ॥ २९ ॥ अभिधत्त मुनेरद्य, प्रजार्थे समयो मया । विवेचयन्ति नो किंचित्, कुरुवंश्या हि तत्कृते ॥ ३० ॥ करिष्ये तीर्थयात्रां त-द्वने द्वादशहायनीम् । ताः प्रमाणीभवन्त्वद्य, गरीयस्यो मुनेर्गिरः ॥ ३१ ॥ तन्मे तीर्थाद्रिकान्तार-विहाराय प्रसीदत । अविघ्नं च करिष्यन्ति, युष्मत्पादाः स्थिता हृदि ॥ ३२ ॥

तामाकर्ण्य गिरं दुःख-जननीमवनीपतिः । सपरीवार एव द्रा-ग्जगामोपकपिध्वजम् ॥ ३३ ॥ स्वेदमेदस्विनिःश्वासः, करे धृत्वा किरीटिनम् । सोऽन्वशात् किं त्वयाऽऽरब्धं, वत्स ! विश्वैकवत्सल ! ॥३४॥ नवे वयसि कोऽयं ते, तीर्थारण्यमनोरथः ? । सुतोपहितभारा हि, कुरवो वनवासिनः ॥ ३५ ॥ तदस्मत्कृत्यमेवैत-न्नैव त्वं कर्तुमर्हसि । भारे महोक्षवाह्ये हि, किमु दम्यो नियम्यते ? ॥ ३६ ॥ सर्वतोऽस्मत्प्रतापाग्ने-र्वैरिवंशान् दिधक्षतः । प्रभञ्जनायते वत्स !, तवैव भुजविक्रमः ॥ ३७ ॥ मा गास्ततः क्वचिद्देहि, नेत्रानन्दं चिराय मे । इति जल्पति भूपाले, कुन्ती साश्रुरवोचत ॥ ३८ ॥

पितुर्वाचमिमां वत्स !, नान्यथाकर्तुमर्हसि । प्रायश्चित्तं गुरूणां हि, वचांसि निखिलैनसाम् ॥ ३९ ॥ मामुदश्रुमुखीमेवं, त्यक्तुमुत्सहसे कथम् ? । हा ! मम त्वां विना वत्स !, वत्सरीयति वासरः ॥४०॥ दाधिकैरथ सार्पिष्कैः, पायसैरपि पोषितम् । कथं वर्तिष्यते वत्स !, वन्याहारैर्वपुस्तव ? ॥ ४१ ॥ रुद्धस्पर्शः पुरा छत्रै-र्भानुः सेर्ष्य इवाधुना । तापसर्वाभिसारेण, पथि त्वां व्यथयिष्यति ॥ ४२ ॥ नवानुरागकल्लोलां, स्नुषामिन्दुमुखीमिमाम् । पर्यश्रुलोचनां वत्स ! विहातुं कथमीहसे ? ॥ ४३ ॥

---

१ अकथयत् । २ दमनयोग्यो वत्सतरः । ३ वायुरिवाचरति । ४ 'देहि' प्रतिद्वय० ।

जनन्यामिति वादिन्यां, बन्धुज्येष्ठो युधिष्ठिरः । स्फुरदस्तोकशोकोर्मि-पीतप्रीतिरभाषत ॥ ४४ ॥ त्वद्वियोगासहौ वीर !, पितरौ मावमानय । नातिक्रान्तगुरूणां हि, क्रिया काऽपि फलेग्रहिः ॥४५॥ समयोऽपि मुनेरद्य, त्वया कोऽयमभिधत ? । अत्या-हिते[1] हि साधूना-मतिभूमिर्न दूषिता ॥ ४६ ॥ भिन्न एवाथवा तस्य, प्रायश्चित्तमपि त्वया । एताः पौरगवीः किं नु, न प्रत्या-हरता कृतम् ? ॥ ४७ ॥ मनसेव न मन्येऽह-मन्तरं वपुषाऽपि ते । आत्मन्यन्तःस्थिते भेदः, समयस्य न चात्मनः ॥ ४८ ॥ *प्रतिध्वान इवैतां च, वाचमाजातशात्रवीम् । अनुगम्य गिरं दीनां, निजगाद वृकोदरः ॥ ४९ ॥* गन्तुकामोऽपि मां भ्रात-स्व-स्थानाय मानय । हृदयं स्फुटतीवेदं, भवद्विरहकातरम् ॥ ५० ॥ यमावप्यूचतुर्भ्रातः !, कान्ताराय गते त्वयि । नित्यं विविध-केलीभिः, को हि नौ लालयिष्यति ? ॥ ५१ ॥

अथ स्फुटमवष्टभ्य, धैर्यं धीमानवोचत । स्वप्रतिश्रुत[2]निर्वाह-बद्धबुद्धिर्धनंजयः ॥ ५२ ॥ पृथग्जनोचिता हन्त !, केयं कातरताऽद्य वः ? । भवन्मनस एवाय-मन्तेवासी पविर्न तु ॥ ५३ ॥ ममाङ्गीकृतनिर्वाह-व्रतचर्यावकीर्णिनः[3] । युष्मानेवायशः कामं, नन्विदं लज्जयिष्यति ॥ ५४ ॥ तद्बलादनुमन्यध्व-मरण्यगमनाय माम् । सत्याः सन्तु मुनेर्वाचो, ममापि पुरुषव्रतम् ॥ ५५ ॥ इति सस्नेहमापृच्छ्य, बीभत्सौ गन्तुमिच्छति । तमस्तान् व्यानशे सर्वान्, दिक्कुञ्जानिव भास्वति ॥ ५६ ॥ अथानम्य क्रमान्मन्यु[4]-गद्गदाशीर्गिरो गुरून् । प्रीत्याऽऽलिङ्ग्यानुगच्छन्तौ, कनीयांसौ न्यवर्तयत् ॥ ५७ ॥

अमङ्गल्यधिया वाष्प-बिन्दुपातं निरुन्धती । प्रस्थितं पार्थमभ्येत्य, जगाद द्रुपदात्मजा ॥ ५८ ॥ पुंसां मतीः क्वचि-

प्रतिज्ञाभङ्गेऽर्जुनस्य वने गमनाय प्रार्थनम् ॥

१ अतिभयजनके कार्ये । २ प्रतिश्रुतं-प्रतिज्ञा । ३ अवकीर्णी-भङ्गकारकः । ४ मन्युः-शोकः ।

द्योपि-न्मतयो नातिशेरते। तदप्युदीर्यसे नाथ !, त्वयाऽऽरब्धं न साध्विदम् ॥ ५९ ॥ यदियं मन्मनःप्रीतिः, प्रस्थिता पुरतस्तव। गणनाभिर्दिनानां तु, धरिष्ये यदि जीवितम् ॥ ६० ॥ पन्थानस्तीर्थशैलानां, शिवाः सन्तु तथापि ते। निष्प्रत्यूहं वितन्वन्तु, सर्वतः कुलदेवताः ॥ ६१ ॥ भ्रमन् कान्तारमेकाकी, मा भूत् (भूः) क्वापि प्रमद्वरः। मलीमसानि चेतांसि, साधुष्वपि हि पाप्मनाम् ॥ ६२ ॥ संचरन् पुरुषान् पश्यन्, प्रतिस्थानं नवान्नवान्। विद्याः कीर्तीश्च लक्ष्मीश्च, नूतनाः कांश्चिदर्जयेः ॥ ६३ ॥ तथा किमपि मा कार्षी-र्भ्रमन् देशाननेकशः। यथा नाथ वयं स्याम, वैमनस्यवशंवदाः ॥ ६४ ॥ पावितं सुकृतैर्नाना-तीर्थाभिगमजन्मभिः। त्वामुपागतमालिङ्ग्य, मयाऽऽत्मा पावयिष्यते ॥ ६५ ॥ मया ते स्खलितस्वैर-संचारस्य पदे पदे। मा भूत् पुण्यक्रियाविघ्न, इत्यागच्छामि नो समम् ॥ ६६ ॥

इति ब्रुवाणां प्रणय-प्रह्वीभूतान्तराशयाम्। आलिङ्ग्य मुहुरालप्य, वचोभिः स्नेहनिर्भरैः ॥ ६७ ॥ अनुव्रजन्तीं दयिता-मवस्थाप्य कथंचन। प्रतस्थे पुरतः पार्थः, सतूणधृतकार्मुकः ॥ ६८ ॥ (युग्मम्) आ लोचनपथात् पार्थं, पथिकं सा पपौ दृशा। प्रेम्णा सोऽप्यचलन्मन्द-मन्दं वलितकंधरः ॥ ६९ ॥ मन्द्रारघट्टनिर्घोष[1]-शिखण्डिकृतताण्डवान्। माद्यन्मधुव्रतव्रात-झङ्कारमुखरोदरान् ॥७०॥ सान्द्रनैकद्रुमच्छाया-निपीततपनातपान्। पश्यन् परिसरारामान्, स जगाम शनैः शनैः ॥७१॥ (युग्मम्) तीरप्ररोहसानन्द-माकन्दप्रायपादपम्। कूजत्कुररहारीत-कपिञ्जलजलद्विकम्[2] ॥ ७२ ॥ तारुण्ये तरणेः क्षोणि-मतीत्य कियतीमपि। पार्थः क्षीरोददायाद[3]-माससाद महासरः ॥७३॥ (युग्मम्) तत्राङ्गशौचमाधाय, प्रणिधाय जिनेश्वरम्।

१ मन्द्रः-गम्भीरध्वनिः। २ द्विकः काकः। ३ क्षीराब्धिसदृशम्।

आहारं सरसैस्तैस्तैः, फलौघैः फाल्गुनो व्यधात् ॥ ७४ ॥ असङ्गभृङ्गसंगीत–मतिमुक्तकमण्डपम् । सपुष्पतल्पमध्यास्य, स मध्यंदिनमत्यगात् ॥ ७५ ॥ इति क्रामन् क्रमाज्जिष्णु–र्बहुकौतूहलां महीम् । विवेश भैरवाभोग–दत्तमोहां महाटवीम् ॥७६॥ केलिहुंकारिणः क्वापि, क्रूरा हरिणवैरिणः । मृगानुपदिकाः कोप–साटोपा द्वीपिनः क्वचित् ॥ ७७ ॥ क्वाप्यन्योन्यरणारम्भ–प्रहृपोत्रोाथ पोत्रिणः । तस्यां किमपि न क्षोभं, कुर्वते स्म किरीटिनः ॥ ७८ ॥ (युग्मम्)

स्वैरमस्यां च बीभत्सु–रभीर्गच्छन् पुरः पुरः । गिरिं धात्रीशिरोरत्नं, रत्नसानुमुदैक्षत ॥ ७९ ॥ यस्य निर्झरझात्कार–शब्दाद्वैतकतार्किकी । द्रुमैरभ्रंकषैः केषां, मुदे नाभूदुपत्यका ? ॥ ८० ॥ अध्यास्यन्ते स्म तिग्मांशु–गभस्तीनामसंस्तुताः । यस्य विद्याधरैर्विद्या–सिद्धिक्षेत्राणि कन्दराः ॥ ८१ ॥ किंनरीकेलिसंगीत–निस्तरङ्गा मृगा अपि । यस्मिन्नैक्ष्यन्त मोक्षाय, प्राणायामोल्बणा इव ॥८२॥ द्रुमैः कुसुमितैस्तैस्तै–र्विलोभितविलोचनः । सव्यसाची गिरौ तस्मि–न्नारुरोह कुतूहलात् ॥८३॥ इन्द्रनीलाङ्कितद्वारं, शोणसोपानपद्धतिम् । शातकुम्भमयस्तम्भ–कुम्भसंभारभासुरम् ॥ ८४ ॥ नीरैरनुक्षपं चन्द्र–कान्त्यतिकरोद्भवैः । अदेवमातृकोन्माद्य–दुद्यानजगतीरुहम् ॥ ८५ ॥ तत्रोत्कालप्रभाजाल–निपीताहर्पतिद्युति । चन्द्राश्ममयमद्राक्षी–दर्जुनो जिनमन्दिरम् ॥ ८६ ॥ (त्रिभिर्विशेषकम्) क्षालिताङ्गस्तदुद्यान–दीर्घिकाम्भसि रंहसा । मेदुरामोदमादाय, तदीयकमलोत्करम् ॥ ८७ ॥ तस्मिन्भ्रमरनिर्मुक्त–पुष्पप्रकरदन्तुरे । अविक्षत् कौतुकाक्षिप्त–चक्षुः क्षितिपनन्दनः ॥ ८८ ॥ (युग्मम्)

१ पोत्रं–किरिमुखाग्रम् । २ किरयः वराहा इति यावत् । ३ तर्कशास्त्रसंबन्धिनी । ४ पर्वतस्यासन्ना भूमिः । ५ सूर्यकिरणानाम् । ६ निस्तरङ्गा–निश्चलाः । ७ शातकुम्भं–सुवर्णम् । ८ अनुरात्रम् ।

तत्र प्रदक्षिणीकृत्य, त्रिर्युगादिजिनेश्वरम् । बद्धरोमाञ्चमभ्यर्च्य, स तुष्टावेति तुष्टिमान् ॥ ८९ ॥ जय नाभिकुलक्षीर–नीराकर-निशाकर ! । जयाशेपजगद्दुःख-निदाघजलदागम ! ॥९०॥ देव ! संसारकान्तार–पर्यन्तपुरपादपाः । पादास्तव भवक्लान्ति–विच्छेदाय भवन्तु मे ॥९१॥ इत्यभिष्टुत्य नाभेयं, निकेतं परितोऽपि तत् । विलोक्य कल्यामास, बीभत्सुर्नयनोत्सवम् ॥९२॥

गिरेरधित्यकाराम–रामणीयकलोलुपम् । चक्षुर्विनोदयन् यावत्, पार्थः प्रस्थान्तरं ययौ ॥ ९३ ॥ तावन्मुहुर्मुहुर्मौलिं, खेलयन्त्या पदाम्बुजैः । अङ्गुलीर्वदने दैन्यात्, प्रक्षिपन्त्या मुहुर्मुहुः ॥ ९४ ॥ मुहुर्मुहुर्वितन्वत्या, प्रीत्या चाटूनि कोटिशः । उत्तरीयपटप्रान्त–माकृपन्त्या मुहुर्मुहुः ॥ ९५ ॥ कयाचिद्योपिता रुद्ध–स्वैरचारं पदे पदे । युवानमेकमैक्षिष्ट, गत्वाऽभापिष्ट चादरात् ॥ ९६ ॥ (त्रिभिर्विशेपकम्) तव प्रसादनप्रह्वा–मिमामत्यन्तदुःखिताम् । किं नाम भद्र ! कल्याणीं, त्वमेवमवमन्यसे ? ॥ ९७ ॥ प्ररूढप्रणयं सन्तो, नान्यमप्यवजानते । किं पुनः प्रेमसर्वस्व–विक्लवामबलां क्वचित् ? ॥ ९८ ॥ एतस्या-माकृतौ शङ्के, न व्यलीकलवं क्वचित् । कथ्यतां यदि नाकथ्यं, तदस्यां कोपकारणम् ॥ ९९ ॥ पाणिसंपुटमाबध्य, सोऽभ्यधत्त धनंजयम् । महती खलु वार्तेयं, पुरस्तात् कस्य कथ्यते ? ॥ १०० ॥ परं विश्वैकविश्वास्य–मूर्तेः किं गोप्यमस्ति ते । किं तु त्वां कर्तुमिच्छामि, न दुःखौघविभागिनम् ॥ १०१ ॥ बीभत्सुरभ्यधाद्भूयः, स्खलितव्यं न हि त्वया । परिज्ञाय कुरून् विश्व–दुःखत्राणैकदीक्षितान् ॥ १०२ ॥

ससौष्ठवं तदाकर्ण्य, वचः स पुनरब्रवीत् । वैताढ्ये दक्षिणश्रेण्या–मस्ति रत्नपुरं पुरम् ॥ १०३ ॥ वैरिदोर्दण्डकण्डूति–

१ अन्यशिखरम् । २ विक्लवा–व्याकुलाम् ।

वैद्यो विद्याधरेश्वरः । ख्यातश्चन्द्रावतंसाख्य-स्तत्र धात्रीधवोऽभवत् ॥ १०४ ॥ पतिव्रतामयं ज्योतिः, सौभाग्यव्रतदेवता । मूर्तेव श्रीरभूत् तस्य, प्रिया कनकसुन्दरी ॥१०५॥ वात्सल्यवाहिनीसिन्धु-र्मणिचूडस्तयोः सुतः । आसीत् कन्दलितानन्दा, नन्दना च प्रभावती ॥ १०६ ॥ कुमारः केलिलीलाभिः, सोऽतिवाहितशैशवः[1] । पितृभ्यां ग्राहयामास, गुरुभ्यः सकलाः कलाः ॥ १०७ ॥ लावण्यसरसीं[2] पुण्य-तारुण्यवनसानुमान् । चन्द्राननामुपायंस्त, चन्द्रापीडसुतामसौ ॥ १०८ ॥ दत्ता प्रभावती साऽपि, कलाकुलनिकेतनम् । हिरण्यपुरनाथाय, हेमाङ्गदमहीभुजे ॥ १०९ ॥ कुलक्रमागताः सर्वाः, पिता विद्याः परेद्यवि । मणिचूडकुमाराय, विततार तरस्विने ॥११०॥ तस्मिन्नसिद्धविद्येऽपि, साधनक्रमवेदिनि । सद्यो माद्यद्गदा[3]वेगः, पिता लोकान्तरं ययौ ॥ १११ ॥ क्लृप्ताभिषेकसंभारः, प्रेक्षमाणः शुभं क्षणम् । न यावत् पदमात्मीयं, सोऽध्यासामास पैतृकम् ॥ ११२ ॥ तावदागत्य दायादः, खेचरानीकिनीवृतः । विद्युद्वेगस्तमाक्रम्य, नगरान्निरवासयत् ॥ ११३ ॥ दायादहृतसाम्राज्यं, त्याज्यमेतद्वपुर्मया । इत्यन्तश्चिन्तयन् दुःखा-देकाङ्गः सोऽचलत् ततः ॥ ११४ ॥ तमन्वगाद्विसृष्टाऽपि, प्रसह्य पितृवेश्मनि । चन्द्रानना प्रिया तस्य, कुलस्त्रीणां व्रतं ह्यदः ॥११५॥ सोऽस्मिन् पदाभ्यामभ्येत्य, रत्नसानुगिरौ क्रमात् । संसारमरुकल्पद्रु-मद्राक्षीदृषभध्वजम् ॥ ११६ ॥ पुण्यपाथेयमादाय, नाभिनन्दनदर्शनात् । सांप्रतं सोऽहमिच्छामि, स्वर्लोकपथपान्थताम् ॥ ११७ ॥ इयं तु मे प्रिया चन्द्रा-नना प्रणयकातरा । प्राणत्यागाय गच्छन्तं, मां रुणद्धि पुनः पुनः ॥ ११८ ॥ असौ मन्मृत्युमत्यन्त-मनलंभूष्णुरीक्षितुम् । विहातुमीहते प्राणान्, हन्त प्रथममेव हि ॥ ११९ ॥ दयां मयि

१ निर्गमितबाल्यावस्थः । २ 'लावण्यसारणी (णीं)' प्रतित्रयपाठः तत्र प्रथमा विभक्तिश्चिन्त्या । ३ गदः—व्याधिः ।

तदाधाय, बन्धो ! संबोध्यतामियम् । येनाध्वनाशु मुञ्चामि, प्रस्थेऽस्मिन् सार्वकामिके ॥ १२० ॥

अथोजगार गाण्डीवी, भाले ताण्डवयन् भ्रुवौ । कोऽयं मरणनिर्बन्धो, बान्धवे मयि सत्यपि ? ॥ १२१ ॥ अपि देवेन्द्रदेशीयै[1]-मर्गिणैर्वैरिणं रणे । निहत्य वितराम्येष, पैतृकीं ते पुनः श्रियम् ॥१२२॥ अवैधव्याध्वरे नित्य-दीक्षितेयं मृगेक्षणा । चिरं त्वदङ्गसङ्गेन, दत्तानन्दा च नन्दतु ॥ १२३ ॥ बभाण मणिचूडोऽथ, भ्रातरस्यास्तवाकृतेः । असाध्यं नाम नास्त्येव, स्वाराज्यमपि[2] तेऽन्तिके ॥ १२४ ॥ किं तु व्योमाङ्गणस्वैर-संचाराः खेचराः खलु । शक्यन्ते ते पराजेतुं, न विद्यैश्वर्यवर्जितैः ॥ १२५ ॥ ततोऽनवद्य ! मे विद्यास्त्वं गृहाण यथाविधि । साधिताशेषविद्यस्य, द्विपन्नीपञ्जयः स ते ॥ १२६ ॥ तासां सत्त्वैकसाध्यानां, विद्यानां च त्वमास्पदम् । वाहिनीनां हि सर्वासा-माधारो वारिधिः परम् ॥ १२७ ॥ विलुप्तसत्त्वतत्त्वस्य, शात्रवैः समराङ्गणे । नाधुना साधने तासां, मम तु क्रमते मतिः ॥ १२८ ॥ सोऽभिधायेति निर्बन्धा-दाक्षिण्यक्षीरनीरधेः । अनिच्छतोऽपि बीभत्सो-र्विद्यास्तास्ताः प्रदत्तवान् ॥ १२९ ॥

विज्ञायाथ विधिं विज्ञ-ग्रामणीर्मणिचूडतः । तासां क्रमादुपाक्रंस्त[3], साधनाय धनंजयः ॥१३०॥ स्नानक्रियां वितन्वानः, शश्वत् कासारवारिणि । विधाय विधिवत् सर्वां, पूर्वसेवां महामनाः ॥ १३१ ॥ वशी निविविशे सोऽथ, पश्यन् सिद्धिं करस्थिताम् । तस्यैव भूभृतः क्वापि, कन्दरामन्दिरोदरे ॥ १३२ ॥ (युग्मम्) बभूव सर्वकर्मीणः[4], स एवोत्तरसाधकः । विद्याधरकुमारोऽस्य, दूरावस्थापितप्रियः ॥ १३३ ॥ बद्धपद्मासनो नासा-प्रान्तविश्रान्तलोचनः । पार्थः पाण्मासिकं जाप्य-विधि-

१ 'देवेन्द्रदेशीयं' इति प्रतित्रयपाठः साधुः देवेन्द्रसदृशं वैरिणमिति योगः । २ स्वर्गराज्यम् । ३ आरभत । ४ सर्वकर्मसमर्थः ।

मारब्धवान् सुधीः ॥ १३४ ॥ तस्मिन् मनागसंपूर्ण-निर्माणे जाप्यकर्मणि । आविर्बभूवुः क्रव्यादा, व्यादाय मुखमुल्बणम् ॥ १३५ ॥ मांसखण्डानि चर्वन्तः, स्वादयन्तोऽसृंगासवम् । साट्टहासमटीकन्त, साटोपाः केऽपि तत्पुरः ॥१३६॥ कर्तिकाभिः पुरस्तस्य, दारं दारं शवोदरम् । चित्राभिरन्त्रमालाभिः, केऽपि हारं वितेनिरे ॥ १३७ ॥ केचिदुत्तुङ्गमातङ्ग-रूपाः कोपान्धचेतसः । तत्संमुखमधावन्त, दन्तक्रीडाविधित्सया ॥१३८॥ केऽपि कण्ठीरवीभूय, भूयोभूयस्तलं भुवः । घोरक्ष्वेडारवा रौद्रैः, पुच्छाघातैरताडयन् ॥ १३९ ॥ विसङ्कटस्फुटाभोगा, भुजङ्गमवपुर्भृतः । भोगैरावेष्टयामासु-राविष्टाः केऽपि तद्वपुः ॥ १४० ॥ कदाऽप्यागत्य केऽप्यूचु-स्त्वदानयनहेतवे । कुरूणामग्रणीर्देवः, स्नेहेन प्रजिघाय नः ॥ १४१ ॥ केचिदभ्यधुरभ्येत्य, त्वदीयविरहातुरा । नित्यमश्रूणि मुञ्चन्ती, कुन्ती निर्मम ! ताम्यति ॥ १४२ ॥ ऊचुः केचिदपि स्वप्ने, त्वदालिङ्गनमङ्गलम् । प्राप्य पश्चादपश्यन्ती, कृष्णा त्वां खिद्यतेतमाम् ॥ १४३ ॥ इत्याद्युपद्रवैस्तैस्तैः, कोटिशः पिशिताशिनाम्³ । प्रतीपैरप्रतीपैश्च, चकम्पे न कपिध्वजः ॥ १४४ ॥ विधौ पाण्मासिके तस्मिन्, परिपूर्तिमुपेयुषि । ध्यानासीनस्य तस्यावि-रासीत् काऽपि सुराङ्गना ॥ १४५ ॥ साऽब्रवीन्नन्वितो दृष्टि-र्विष्टपाश्रय ! दीयताम् । देव्यो विज्ञापयन्त्यष्टौ, त्वां प्रज्ञप्तिपुरःसराः ॥ १४६ ॥ लोकाद्भुतैर्भवत्सत्त्व-चेष्टितैस्तोपिता वयम् । अन्तर्विचिन्त्य तद् ब्रूहि, किं नाम तव कुर्महे ? ॥१४७॥ अथोन्मील्य दृशौ सत्यं, तदे(द)वेत्यार्जुनोऽभ्यधात् । कुमारमणिचूडोऽयं, भगवत्यनुगृह्यताम् ॥ १४८ ॥ सा विहस्य पुनः प्राह, परोपकृतिकर्मठ ! । नन्वेतदेव ते सत्त्वं, देवतातोपहेतवे ॥ १४९ ॥ किं तु क्रमोऽयमस्माक-माराध्यति य एव नः । कामं तस्यैव तुष्यामो,

१ रुधिरमद्यम् । २ अचरन् । ३ मांसाशिनां-राक्षसानाम् ।

नापरस्य कदाचन ॥ १५० ॥ तवास्मिन्नपि चेतश्चे–दुपकारतरङ्गितम् । तदस्य तोषमेष्यामः, सकृदाराधनादपि ॥ १५१ ॥
ततः किरीटिना कामं, भवत्वेवमितीरिते । सा गीर्वाणमृगीचक्षु–रन्तर्धानमुपागमत् ॥१५२॥ वाचं जय जयेत्युच्चै–रुच्चरन्ती
कृतानतिः । क्षणादाविरभूत् तस्य, वियेचरचमूः पुरः ॥ १५३ ॥ नेत्रकोणेन कौन्तेय !, सप्रसादमुदीक्ष्यताम् । स्मृतिमात्रा-
दुपस्थेयं, भूयोऽपीति विसृष्टवान् ॥ १५४ ॥ मणिचूडस्तदालोक्य, कलितोत्साहसाहसः । विद्याः साधयितुं जिष्णो–र्निदे-
शादुपचक्रमे ॥ १५५ ॥ स्वल्पैरेव दिनैः पार्थे, स्वयमुत्तरसाधके । विद्यास्तस्याभवन् सर्वा, निर्विघ्नं निर्भृवृत्तयः ॥ १५६ ॥
अथोद्यत्किङ्किणीक्काण–झणत्कारिदिगन्तरम् । मूर्छितार्कच्छविस्वर्ण–पताकाशतभूपितम् ॥ १५७ ॥ विद्युदुद्द्योतसध्रीची–
र्मरीचीः परितः किरत् । विमानद्वयमाकाशा–न्मणीमयमवातरत् ॥१५८॥ (युग्मम्) ततोऽवतीर्य पर्याय–वर्जमूर्जस्वलद्युतः ।
पार्थं च मणिचूडं च, प्रणेमुर्व्योमचारिणः ॥ १५९ ॥ तदात्वमङ्गमुद्वर्त्य, दिव्यैरुद्वर्तनैस्तयोः । स्नपयांचक्रिरे केचित्,
कवोष्णैर्गन्धवारिभिः ॥१६०॥ गोशीर्षचन्दनक्षोदै–र्विलिप्यानैवलेपिनः । तावुभौ रभसा केचि–द्दिव्यवासांस्यवासयन् ॥१६१॥
हारकुण्डलकेयूर–किरीटकटकादिभिः । माणिक्यखचितैः केचि–द्भूपणैस्तावभूपयन् ॥ १६२ ॥ कैश्चिद्वारिभराभुग्न–नूतना-
म्भोदसोदरम् । तयोरुपरि मायूर–मातपत्रमधार्यत ॥ १६३ ॥ अनेकप्रहतातोद्य–वेणुवीणालयानुगम् । पुरः सङ्गीतमातेनु–
स्तयोर्विद्याधराङ्गनाः ॥ १६४ ॥ तयोर्निःसीमसत्त्वश्री–प्रशस्तिविशदाक्षरम् । अकठोरगिरः पेतुः, पुरः खेचरबन्दिनः ॥१६५॥

१ देवाङ्गना । २ विद्याधरसेना । ३ आगन्तव्यम् । ४ वशवर्तिन्यः । ५ अनुक्रमं वर्जयित्वा । ६ तदात्वं–तत्कालम् ।
७ अगर्विष्ठाः नम्रा इति यावत् ।

चन्द्राननामथादाय, मेरीभाङ्कारडम्बरैः । हयौघहेषितैर्दन्ति–बृंहितैर्भटगर्जितैः ॥ १६६ ॥ नभो बिभित्सुना सैन्य–संभारेण नभःसदाम् । तावुभौ द्राक् प्रतस्थाते, विजयार्धगिरिं प्रति ॥१६७॥ (युग्मम्) प्रभापल्लवितैः क्षुद्र–विमानैः परिवारिते । चक्रतुस्त्वद्विमाने द्या–मपरार्केन्दुतारकाम् ॥ १६८ ॥ तौ बाहुवीर्याद्वैताढ्यौ, वैताढ्यगिरिमूर्धनि । बलोर्मिदुर्धरौ रत्न–पुरद्वारमुपेयतुः ॥ १६९ ॥ तत्रापत्रासमावासान्, परिगृह्य धनंजयः । क्षणेन प्राहिणोद् दूतं, विद्युद्वेगाय वाग्मिनम् ॥ १७० ॥ स विद्युद्वेगमभ्येत्य, कृतावष्टम्भमभ्यधात् । जल्पति त्वामनल्पौजा, मध्यमः पाण्डवोऽर्जुनः ॥ १७१ ॥ मदीय–सुहृदश्चन्द्रा–वतंसतनुजन्मनः । अर्पय श्रियमागत्य, मार्गणा मार्गयन्ति मे ॥ १७२ ॥ नो चेदमी पुरस्तावत्, कलान्तरपदे शिरः । भवदीयं ग्रहीष्यन्ति, ततोऽनु सुहृदः श्रियम् ॥ १७३ ॥ तन्निशम्य वचः स्माह, स क्रोधान्धभविष्णुधीः । भूमिगोचरकीटोऽय–मरे ! को नाम सोऽर्जुनः ? ॥ १७४ ॥ द्रुममेवार्जुनं विद्मः, स चेत् कश्चिदिहागतः । तस्योच्छेदाय जागर्ति, सैष कौक्षेयको मम ॥ १७५ ॥ मद्दोर्वीर्यानलस्याद्य, मणिचूडं दिधक्षतः । भविष्यति ध्रुवं सोऽय–मर्जुनः प्रथमेन्धनम् ॥ १७६ ॥ तदरे ! सत्वरं गत्वा, ब्रूहि त्वं निजमर्जुनम् । अयमायात एवास्मि, रणाय प्रगुणो भव ॥ १७७ ॥

इत्युदीर्य स दोर्वीर्य-गर्वज्वरितमानसः । अनभिज्ञातदैन्यानि, सैन्यानि समवर्मयत् ॥१७८॥ दूतोऽपि वाग्निकारं[3] त–मागत्याऽऽख्यत् किरीटिने । रिपोरनात्मनीनेन, तेनाभूत् सोऽपि सस्मितः ॥१७९॥ पार्थोऽपि नातिसंरम्भा–दनीकं समनीनहत् । मृगोच्छेदेऽपि किं कामं, सिंहः संरम्भते क्वचित् ? ॥१८०॥ विद्युद्वेगोऽथ निर्गत्य, नगरात् पृतनाभरैः । क्षणादरौत्सीद्बीभत्सुं,

१ भयरहितं यथा तथा । २ बाणाः । ३ वाचाऽपमानम् । ४ आत्मनोऽहितेन ।

मणिचूड-
स्य विद्या
साधनम् ।
विद्युद्वेगो-
परि द्वयोर्ग
मनम् ॥

घनैरिव रविं नभः ॥ १८१ ॥ साक्षेपः प्रतिचिक्षेप, पार्थोकस्तान् सुदुःसहैः। आदायेर्षमिवेष्वासं, मार्गणैः किरणैरिव ॥१८२॥ ततः कार्मुकमारोप्य, रोषात् कोपारुणेक्षणः। खेचरः स्वयमारेभे, बीभत्सुमभिवर्षितुम् ॥१८३॥ ववर्ष शरधाराभि-रब्दवत् स यथा यथा। प्रकर्षमगमल्लक्ष्मी-रर्जुनस्य तथा तथा ॥ १८४ ॥ पाण्डवेयस्य दोर्दण्ड-चण्डिमानं विलोकयन्। भीतचेतास्ततः सोऽभू-दितिकर्तव्यविक्लवः ॥ १८५ ॥ काममुत्थातुकामोऽपि, मणिचूडो रणाङ्गणे। जिष्णोः सर्वरिपूज्जिष्णो-र्न लेभेऽवसरं क्वचित् ॥ १८६ ॥ वीरव्रतविपर्यास-संपन्नतृणलाघवः। पक्षवातैरिव क्षिप्तः, क्वापि कौन्तेयपत्रिणाम् ॥ १८७ ॥ विद्युद्वेगो रणक्षोणेः, पलायामास रंहसा। संवर्तमारुतावर्ते, कियद्दीपः प्रदीप्यते ॥ १८८ ॥ प्राणत्राणाय संभूय, बीभत्सुमभयंकरम्। आगत्य विगलन्मान-मानेमुस्तच्चमूचराः ॥ १८९ ॥

मणिचूडं पुरस्कृत्य, विजयो विजयोर्जितः। पुरं विवेश पौराणां, मनश्चानन्दमेदुरम् ॥ १९० ॥ प्रविश्य तत्र धात्रीशधाम्नि सत्यप्रतिश्रवः। मणिचूडं पदे सद्यः, सोऽभ्यषिञ्चत पैतृके ॥ १९१ ॥ स प्राप्य पुनरात्मीयां, संपदं संमदप्रपाम्। चकाशेऽधिकमम्भोद-मुक्तराकामृगाङ्कवत् ॥ १९२ ॥ तैस्तैस्तद्भक्तिकल्लोलैः, प्रथमानैः पृथासुतः। बहून्मुहूर्तवत् तत्र, वासरानत्यवाहयत् ॥ १९३ ॥

मणिचूडमथान्येद्यु-र्मन्युपयश्रुलोचनम्। आपपृच्छेऽप्यनिच्छन्तं, पार्थस्तीर्थदिदृक्षया ॥ १९४ । ततो विमानमारुह्य, जिष्णुर्वर्धिष्णुधर्मधीः। एनःसेनाभिरस्पृष्ट-मष्टापदगिरिं ययौ ॥ १९५ ॥ भगवानादितीर्थेशो, यत्र पत्रलभूरुहि। चिरं

१ आश्विनमासम्। २ मानरहितं यथा तथा। ३ हर्षस्य प्रपारूपाम्। ४ राकामृगाङ्कः-पूर्णिमाचन्द्रः। ५ मन्युः-शोकः। ६ पापसमूहैः।

विश्रान्तिमातेने, निर्वाणनगराध्वगः ॥ १९६ ॥ किंनरीः कान्तकेलीषु, तमस्तोमाभिलाषिणीः । खेदयन्ति सदोद्द्योता, यस्य काञ्चनकन्दराः ॥ १९७ ॥ नाभेयदर्शिनः काम्य–कन्दरोद्यानखेलिनः । स्वर्गित्रर्गस्य भाग्यानां, जन्मभूर्भोगभूश्च यः ॥ १९८ ॥ तस्मिन् पवितुमात्मान–मायातैस्तोयदैरिव । आनीलबहलच्छायैः, काननैः परिवेष्टितम् ॥ १९९ ॥ लीलावापीभिरभ्यस्त–क्षीरोदक्षीरकेलिभिः । स्मेरदम्भोजखण्डाभि–र्मण्डितोपान्तभूतलम् ॥२००॥ ददर्श दर्शनोन्मृष्ट–निःशेषजनकल्मषम् । प्रासादमादिनाथस्य, पार्थो भरतकारितम् ॥ २०१ ॥ (त्रिभिर्विशेषकम्) सपरीवार एवायं, राजीववनराजिनि । दीर्घिकावारिणि स्नान–माततान ततः सुधीः ॥ २०२ ॥ हेमाम्भोजततीर्दिव्य–शाखिनां कुसुमानि च । अथावचाययांचक्रे, परिवारनभश्चरैः ॥ २०३ ॥ धीमानवस्त पर्यस्त–दुग्धोदलहरीमदे । स धौतवाससी दिव्ये, निजं मन इवामले ॥ २०४ ॥ सर्वस्वर्गिगणाकीर्णे, सर्वाश्चर्यनिकेतने । सर्वरत्नमये तस्मिन्, स विवेश जिनौकसि ॥ २०५ ॥ यथाविधि सुधीस्तिस्रः, कृतपूर्वी प्रदक्षिणाः । समाहितमनाः सोऽय–मानर्च वृषलाञ्छनम् ॥ २०६ ॥ मृदङ्गपणवादीनि, रचितोच्चण्डताण्डवाः । स्वच्छन्दं वादयामासु–रातोद्यानि नभश्चराः ॥ २०७ ॥ खेचरेषु क्षणान्नीचैः, कलसंगीतशालिषु । अथाभिष्टोतुमारेभे, नाभेयं जिनमर्जुनः ॥ २०८ ॥ देव ! दुःखाग्निनिर्दग्ध–जगत्पीयूषवारिद ! । फलेग्रहि विलोक्य त्वां, नेत्रनिर्माणमद्य मे ॥ २०९ ॥ तद्भाग्यमपि भूयोभि–र्भाग्यैरेवोपलभ्यते । येन त्वं दर्श्यसे देव !, शेवधिः शिवसंपदाम् ॥ २१० ॥ स्वामिन् पुरातनैर्भाग्यै–र्बभूव तव दर्शनम् । त्वद्दर्शनभवैर्भावि, यत्तु किं तस्य कथ्यते ? ॥ २११ ॥ कृतस्तुतिरिति प्रह्व–चेताः श्वेताश्ववाहनः ।

१ उन्मृष्टं–ध्वस्तम् । २ ततिः–श्रेणिः । ३ पर्यदधात् । ४ पर्यस्तः–निरस्तः । ५ अर्जुनः ।

विद्युद्वेगं जित्वा मणिचूडस्य राज्याभिषेकं कृत्वा अर्जुनोऽष्टापदं गतः ॥

नमस्यति स्म नाभेय-मवनिन्यस्तमस्तकः ॥ २१२ ॥ प्रत्येकं स्वस्वसंस्थान-मानवर्णादिशालिनः । ननमश्चकार तीर्थेशान्, त्रयोविंशतिमप्यसौ ॥ २१३ ॥

भ्रश्यद्भवभ्रमीसादः, प्रासादकमनीयताम् । निर्गत्यालोकयञ्श्लाघां, कुर्वन् भरतसंपदः ॥ २१४ ॥ मूर्तं धर्ममिव ज्ञान-ज्योतिर्विध्वतमोपहम् । चारणं मुनिमेकान्त-लीनमेकं ददर्श सः ॥ २१५ ॥ युग्मम् ॥ सोऽभिवन्द्य तमानन्दा-दुपविश्य तदन्तिके । भवाम्भोधितरीकल्पा-मश्रौषीद्धर्मदेशनाम् ॥ २१६ ॥ धर्मोऽयं यैः श्रियो रक्षा-कोविदः सौविदः कृतः । चिराय ते भजन्त्येता-मखण्डितसतीव्रताम् ॥२१७॥ जगद्भयंकरः स्मेर-मुखः संसारकेसरी । धर्मद्रुमाधिरूढानां, यदि न प्रभवत्यसौ ॥ २१८ ॥ सिच्यन्ते धर्मकुल्याभि-र्मुक्तिशर्ममहीरुहः । तासां तटतृणायन्ते, सुरासुरनरश्रियः ॥ २१९ ॥ अयं च निर्ममे धर्म-स्तथा प्राग्जन्मनि त्वया । निःशेषभुवनोर्जस्वी, यथेदानीमजायथाः ॥२२०॥ इदं च जगदाधाय, दोस्तम्भैरकुतोभयम् । भवि-ष्यसि भवेऽत्रैव, मोक्षलक्ष्मीस्वयंवरः ॥२२१॥ इत्याकर्ण्य गिरं कर्ण-कीर्णपीयूषविप्रुषम् । आनन्दाम्भोधिनिर्मग्न-मन्तरात्मान-मुद्वहन् ॥ २२२ ॥ मुनिमानम्य तं मौलि-लालिताङ्घ्रिसरोरुहः (हम्) । विमानेन ततः पार्थः, प्रतस्थे मरुतां पथा ॥ २२३ ॥ (युग्मम्) शिवश्रीदत्तसंकेतैः, संमेतप्रभृतिष्वसौ । तीर्थेष्ववन्दत ध्वस्त-समस्तवृजिनाञ्जिनान् ॥ २२४ ॥

अतीत्य तीर्थसेवाभिः, सोऽथ द्वादशहायनीम् । प्रत्यचालीच्चिरोत्कण्ठा-विहस्तो हस्तिनापुरम् ॥ २२५ ॥ पृथुकीर्तिः पृथासूनु-र्गच्छन् गगनवर्त्मना । आक्रन्दमिश्रमश्रौषी-दधस्तात्तुमुलध्वनिम् ॥२२६॥ स वीरः सपदि प्रैषीत्, तदानुपदिकीं

१ सादः—खेदः । २ अन्तःपुररक्षकः । ३ धर्मकुल्यानाम् । ४ 'सकेत—संमेत' इति एकप्रतिपाठः साधुः । ५ वृजिनं—दुःखम् ।

दशम् । ईक्षांचक्रे च शोकार्त-लोकसंकुलितं वनम् ॥ २२७ ॥ खेचरं केसरं नाम, तस्योदन्तं स वेदितुम् । प्राहिणोत् करुणावेश्म, गत्वाऽभ्येत्य च सोऽभ्यधात् ॥ २२८ ॥

हिरण्यपुरमित्यस्ति, पुरमिन्द्रपुरोपमम् । स्वामिंस्तस्मिन्नरिग्राम-गदो हेमाङ्गदो नृपः ॥ २२९ ॥ प्रेयसी तस्य निःशेष-सतीसीमन्तमौक्तिकम् । देहद्युतिजितस्वर्ण-प्रभासंपत् प्रभावती ॥२३०॥ तामद्य यामिनीशेषे, चन्द्रशालाऽधिशायिनीम् । केलविङ्कीमिव श्येनः, कोऽप्यकस्मादपाहरत् ॥ २३१ ॥ आर्यपुत्रार्यपुत्रेति, तदीयकरुणध्वनिः । समं हृदयशोकेन, राजानमजजागरत् ॥ २३२ ॥ भ्रुकुटीभीषणः कर्षन्, कृपाणमकृपाशयः । दधावे भूधवश्चौर ! तिष्ठ तिष्ठेति विब्रुवन् ॥२३३॥ अपश्यंश्च पुरः किंचि-द्धावित्वा कियतीं भुवम् । फालच्युत इव द्वीपी, तस्थौ दोःस्थाम निर्विदन् ॥ २३४ ॥ ततो रिपुमपाकर्तुं, प्रत्याहर्तुं च वल्लभाम् । तेन संवर्मयांचक्रे, चक्रं शक्रसमश्रिया ॥ २३५ ॥ ततः कुतोऽप्यविज्ञात-दयितादस्युपद्धतिः । किंकर्तव्यविमूढात्मा, स तस्थौ पृथिवीपतिः ॥ २३६ ॥ स्त्रीजातिस्नेहसंक्रान्त-दुःखेवाथ निशीथिनी । जगाम तां धराधीश-प्रेयसीमनुधाविता ॥२३७॥ तत्याज राजलोकस्य, हृदयेष्विव सर्वतः । संक्रान्तः क्षणदाध्वान्तो, रोदसीकन्दरोदरम् ॥ २३८ ॥ प्रियापहारिणं हन्तु-मुद्यतस्य महीपतेः । प्रतिग्रहमिवाधातु-मधावत पतिस्त्विषाम् ॥ २३९ ॥ तस्याः शिथिलधम्मिल्ल-माल्यश्रेणीं निपेतुषीम् । करैरदर्शयन् भास्वान्, कृपयेवावनीपतेः ॥ २४० ॥ चचाल पृथिवीपाल-स्तया कुसुमलेखया । दर्शिताध्वा चमूध्वानै-र्मद्यु

१ शत्रुसमूहे व्याधिरूपः । २ चटकाम् । ३ 'निर्विदन्'-निन्दन् इत्येकप्रतिपाठः साधुः । ४ पद्धतिः-मार्गः । ५ स्वीकार-साहाय्यमिति यावत् ।

अर्जुनस्य हस्तिनापुरे गमनम् । मार्गे खेचरस्य मीलनम् ॥

कुक्षिंभरिर्दिशाम् ॥ २४१ ॥ इयतीं भुवमायातः, स पुष्पश्रेणिमाश्रयन् । अभाग्यस्य निधिश्रीवत्, तस्याऽदृश्याऽत्र साऽप्यभूत् ॥२४२॥ तस्मिन्नस्तोकशोकार्ति-विक्लवे विफलक्रियम् । कान्दिशीकं ततोऽनीकं, भ्राम्यतीदमितस्ततः ॥ २४३ ॥

सुदुःश्रवामुपश्रुत्य, केसरस्येति भारतीम् । कपिकेतुः किमप्यन्त-श्चिन्तयन्निदमब्रवीत् ॥२४४॥ हिरण्यपुरभूपाल-हेमाङ्गदसधर्मिणी । प्रभावती न खल्वेषा, मणिचूडस्य सोदरा ॥ २४५ ॥ हन्त स्वसा ममैवेय-मपरा वाऽस्तु साऽपि मे । कृपालोर्ननु सोदर्या, वार्या व्यसनवारिधेः ॥ २४६ ॥ तथाहि ब्रूहि राजानं, मा स्म खेदं वृथा कृथाः । अर्जुनः पाण्डवेयोऽयमाहर्ता तव गेहिनीम् ॥ २४७ ॥ जानीहि हृत एवाय-मिदानीमहितस्तव । तिग्मद्युतेः परित्रस्त-स्तमःस्तोमः क्व लीयते ? ॥२४८॥ क्षणं तद्भवताऽत्रैव, स्थेयमव्यवसायिना । इत्युदीर्य पुनर्जिष्णुः, प्रेषयामास केसरम् ॥२४९॥ सोऽपि प्रियावियोगार्ति-प्रतप्ताय महीभुजे । कथयित्वा यथाऽऽदिष्ट-मुपार्जुनमुपागमत् ॥ २५० ॥ किंवदन्तीं प्रभावत्याः, सर्वां संविदे विद्यया । व्योमाध्वना दधावेऽथ, क्रोधाध्मातः कपिध्वजः ॥ २५१ ॥ धनुर्धरैकधौरेये, विद्याविस्फूर्जितोर्जिते । प्रियोपलम्भं संभाव्य, जिष्णौ नाग्रेऽगमन्नृपः ॥ २५२ ॥

अथ केऽप्यग्रकान्तारे, गत्वा हृदयपीडया । भूवल्लभमभापन्त, प्रत्यागत्य तुरङ्गिणः ॥ २५३ ॥ दिष्ट्या त्वं वर्धसे देव, झगित्यागम्यतां पुरः । अस्ति प्रभावती देवी, कुर्वाणा कुसुमोच्चयम् ॥ २५४ ॥ संपन्नहृदयाश्वासः, सोऽथ त्वरितमभ्यगात् । मनोभीष्टे हि नेदिष्ठे[3], को न धावति वस्तुनि ? ॥ २५५ ॥ पुरः प्रभावतीं देवी-मपश्यत् काश्यपीधवः । परं चानन्दसंदोहं,

१ कथाम् । २ ज्ञात्वा । ३ समीपस्थे ।

गाहते स्मान्तरात्मना ॥ २५६ ॥ [1]प्रस्तौति प्रणयालापं, यावदभ्येत्य भूपतिः । अकस्माद्दन्दशूकस्ता–मदशत्तावदुत्फणः ॥ २५७ ॥ आर्यपुत्रार्यपुत्राहं, दष्टा दुष्टात्मनाऽहिना । इति प्रलापवाचाला, बाला मूर्च्छालतामगात् ॥ २५८ ॥ ततः क्षितिपतिः क्षोभा–दवधीरितधीरिमा । क्रन्दन् विषागदंकारा–ञ्जगादाह्वास्त विह्वलः ॥ २५९ ॥ यावत् किंचिदुपक्रान्तं, प्रचण्डैराहितुण्डिकैः । तावत् तेषामचैतन्यं, पश्यतामेव साऽभ्यगात् ॥ २६० ॥ क्षणप्रीतस्य राज्ञोऽथ, शोकः शतगुणोऽभवत् । कृतविध्यातदीपस्य, तमो हि बहुलायते ॥ २६१ ॥ ततो विस्रस्तधम्मिल्लः, क्षिप्तक्षौमो लुठद्भुजः । निमीलिताक्षो मूर्च्छालः, क्ष्मापालः क्ष्मातलेऽपतत् ॥ २६२ ॥ अथ द्विगुणशोकस्य, कोकस्येव दिनात्यये । लोकस्य दूरमुत्तस्थु–राक्रन्दध्वनयोऽधिकाः ॥ २६३ ॥ वीजितः परिवारेण, वनान्तकदलीदलैः । कथंचित् कलयामास, चैतन्यमवनीपतिः ॥ २६४ ॥ ततः प्रियतमां प्रीत्या, कुर्वन्नुत्सङ्गसङ्गिनीम् । रोदयन्नदवीसत्त्वान्, विललापेति भूपतिः ॥ २६५ ॥

हन्त ! हेमाङ्गदे धातः !, कुतोऽपि कुपितोऽसि चेत् । ततः [2]प्रथममस्यैव, प्राणान् हरसि किं न हि ? ॥ २६६ ॥ प्राणेश्वर्याममुष्यां वा, सत्यां हर्तुमनीश्वरः । मन्ये पूर्वं तदेतस्या, जीवितव्यमपाहरः ॥ २६७ ॥ देवि ! बुध्यस्व बुध्यस्व, दीनो जल्पत्ययं जनः । किंकरं न कदाचिन्मां, त्वमवज्ञातपूर्विणी ॥ २६८ ॥ कोपश्चेत् कोऽपि ते किंचि–न्न [3]स्वमागः स्मराम्यहम् । पुरावधीरितश्चास्मि, नापराधशतैरपि ॥ २६९ ॥ किं नाम तदकाण्डेऽपि, न पश्यसि दृशाऽपि माम् । आसतां भवदुद्दाम–प्रेमपल्लविता गिरः ॥ २७० ॥ परं [4]निरनुरोधाऽसि, मयि त्वं न कदाचन । किं त्वेतत्ते हरत् प्राणान्, दैवमेवापराध्यति ॥ २७१ ॥

१ 'प्रीणाति प्रणयालापैः' इत्येकप्रतिपाठः । २ 'प्रथममस्या मे' प्रत्यन्तरपाठोऽपि साधुः । ३ अपराधम् । ४ अननुकूला ।

ममाप्यमीभिः किं प्राणै–स्त्वद्वियोगमलीमसैः[1]। वैरङ्गिको मृगाङ्कोऽपि, कौमुदीरेचितः सताम् ॥ २७२ ॥ भूपालमतिवाचाल–मित्यादिपरिदेवितैः। काममुद्यच्छमानं च, जीवितान्ताय कर्मणे ॥ २७३ ॥ पौरामात्यादयः पाद–पीठाऽऽलुठितमौलयः। मुहुः प्रसादयामासुः, साश्रुनेत्रममृत्यवे ॥ २७४ ॥ (युग्मम्)

ततो विदन्निदं भूमि–विडौजस्त्वं विडम्बनाम्। जानञ्जीवितमप्येत–दापदं च पदे पदे ॥ २७५ ॥ प्रेयसीविप्रयोगार्तः, प्रकाममवमन्य तान्[3]। चितामासूत्रयामास, मेदिनीपतिरात्मने ॥ २७६ ॥ युग्मम् ॥ ततः पताकिनीलोकः, समस्तोऽपि पृथक् पृथक्। निर्ममेऽनुमहीपालं, देहत्यागोचिताश्रिताः ॥ २७७ ॥ अर्घमुत्क्षिप्य घर्मांशो–रर्थिभ्योऽर्थं वितीर्य च। प्रदक्षिणयति स्माग्निं, चित्यमौचित्यविन्नृपः ॥ २७८ ॥ चितामध्यं ततो लोके, हाकारमुखराननै। प्रियामुत्सङ्गमारोप्य, विशति स्म विशांपतिः ॥ २७९ ॥ अपरोऽपि महीपाल–प्रसादविवशाशयः। अन्तश्चितं चमूलोकः, प्रवेष्टुमुपचक्रमे ॥ २८० ॥ चितासप्तार्चिषि ज्वाला, यावद्भूपस्य नोदगुः। तावत् सह प्रभावत्या, पार्थोऽभ्यागान्नभोऽध्वना ॥ २८१ ॥ विभ्राणं नवसंवर्त–पुष्करावर्तविभ्रमम्। व्याप्तान्तरिक्षमद्राक्षी–द्धूमस्तोमं कपिध्वजः ॥ २८२ ॥ शुश्राव दुःश्रवाः सैन्य–लोकाक्रन्दगिरोऽर्जुनः। विश्राणयन्तीरश्रूणि, वनान्तर्वयसामपि ॥ २८३ ॥ स्वकीयैरिव विध्याय–मानाः शोकाश्रुवारिभिः। धूमायमानाः सोऽपश्यत्, कोटिशो रचिताश्चिताः ॥ २८४ ॥ सममश्रुजलोत्पीडैः, कश्चिदर्घाञ्जलिं जनः। रवेरुदस्यन्नुत्पश्यः, फाल्गुनेन विलोकितः ॥ २८५ ॥

१ विरागवान्–कान्तिरहित इत्यर्थः। २ ज्योत्स्नारहितः। ३ पौरामात्यादीन्। ४ सेनाजनः। ५ चितासंबन्धिनं वह्निं। ६ चिताग्नौ। ७ वनमध्यपक्षिणाम्।

जानन् जलमिव ज्वालां, चितावह्निं कियानपि। लोकः प्रदक्षिणीकुर्वन्, वीक्षितः सितवाजिना ॥ २८६ ॥ देवि! तीर्णासि चेत् कृच्छ्रा-दपहारमहोदधिम्[1]। किमिदानीं दर्शयं ते?, विधेरहह वामता ॥ २८७॥ स्वर्लोकपथिकीं देवि!, राजापि त्वामनुव्रजन्। आनृण्यमिच्छति प्रीतेः, का कथा मादृशां पुनः ? ॥ २८८ ॥ देवि ! त्वद्विरहे प्राणाः, क्षणं न स्थातुमीशते। ततस्तवैव सार्धेन, प्रार्थयन्ते त्रिविष्टपम् ॥ २८९ ॥ एतावतो जनस्यास्य, प्राणान् हर्तुमनाः समम्। कोऽप्यहिच्छद्मना मन्ये, देवो दैत्योऽथवाऽऽगतः ॥ २९० ॥ निशम्येति परीवार-परिदेवितभारतीम्। कौन्तेयस्याभवत् कामं, द्विधेव हृदयं तदा ॥ २९१ ॥

तदुद्वीक्ष्य क्षणान्मर्म-च्छेदमूर्च्छालमानसा। इत्यचिन्तयदुद्भूत-दुःखभारा प्रभावती ॥ २९२ ॥ हा विधे! विदधे किं नु, भवतेयं प्रभावती ?। विहिताऽपीयतः किं वा, कृता दुःखस्य भाजनम् ? ॥ २९३ ॥ प्रतारितस्तया दुष्ट-विद्यया तस्य पाप्मनः। कृतज्ञो मत्कृते प्राणान्, प्रियस्तत्याज मे ध्रुवम् ॥ २९४ ॥ तमनु प्रस्थिता नूनं, सर्वेऽप्येतेऽनुजीविनः। शोषिते हि न पाथोधौ, जीवन्ति जलजन्तवः ॥ २९५ ॥ तन्मे प्राणेश्वरः प्राप्तः, किंचिदत्याहितं[2] यदि। मङ्क्षु मोक्ष्यति तन्नूनं, प्रभावत्यपि जीवितम् ॥ २९६ ॥ विकल्पानिति कुर्वन्त्यां, तस्यां पर्यश्रुचक्षुषि। विशदाश्वोऽपि निश्वासान्, विमुञ्चन्नित्यचिन्तयत् ॥ २९७ ॥ ममाफलित एवाय-मुपकारमहीरुहः। हा! किमुन्मूलयांचक्रे हतेन विधिदन्तिना ? ॥ २९८ ॥ बभूव भूपतेः किंचि-द्यदि तावदमङ्गलम्। तदसावप्यसून्मुञ्चेत्, सत्यो हि दयितानुगाः ॥ २९९ ॥ विपत्तिर्दर्शिताऽनेन[3], भगिन्या भगिनीपतेः। तज्जीवितेन किं नाम, फाल्गुनोऽपि करिष्यति ? ॥ ३०० ॥ एवमालोचयन्नुच्चै-रन्तः श्वेतहयो

१ अपहार एव महासमुद्रस्तम्। २ प्राणत्यागरूपमनर्थम्। ३ 'विपत्तिदर्शिनाऽनेन' प्रतित्रयपाठः।

प्रभावती-विरहे तत्पतेः हेमाङ्गद-स्यावस्था॥

ययौ । तत्कालज्वलितोदर्चि-र्महीपतिचितान्तिकम् ॥ ३०१ ॥ मन्त्रपूतैः प्रभावत्याः, पाणिसंस्पर्शपावितैः । भूमिभर्तु-श्चिताऽम्भोभिः, सिषिचे सव्यसाचिना ॥ ३०२ ॥ राजलोकस्य सर्वस्य, तत्क्षणोत्थितहेतयः । तेने व्योमचरैरन्याः, सेचयांचक्रिरे चिताः ॥ ३०३ ॥ प्रभावत्याश्च जिष्णोश्च, साकं शोकहविर्भुजा । ततः प्रशान्ति तत्काल-मालम्बे हुताशनः ॥ ३०४ ॥ विमुक्तस्फारफेत्कारा, तदोत्सङ्गान्महीपतेः । पलायामास वेगेन, सा प्रपञ्चप्रभावती ॥ ३०५ ॥

ततो विश्वंभराभर्ता, विस्मयस्मेरलोचनः । निर्जगाम चितामध्यात्, प्रेयसीविरहादिव ॥ ३०६ ॥ वियोगार्तिमनु प्राप्तः, शोक एव परासुताम् । न तु प्रभावती देवी, न चान्यः कोऽपि तामनु ॥ ३०७ ॥ प्रमोदाविष्टया, दृष्ट्या भूयः (पः) संभाव्य वल्लभाम् । पीयूषह्रदनिर्मग्न-मिवात्मानममन्यत ॥ ३०८ ॥ केसरश्च पुरोभूय, भूमिवल्लभमभ्यधात् । अर्जुनः पाण्डुपुत्रोऽय-मानिनाय तव प्रियाम् ॥ ३०९ ॥ ततः स सहसाऽभ्येत्य, बीभत्सुमभिषस्वजे । तदीयाङ्गपरिष्वङ्गैः, स्वमङ्गं पावयन्निव ॥ ३१० ॥ वृत्तान्तेन ततस्तेन, प्रेङ्खोलितमनास्तदा । किमेतदिति बीभत्सु-मन्वयुङ्क्त महीपतिः ॥ ३११ ॥ अथास्मै कथयामास, पार्थादेशेन केसरः । वदेयुरवदानं[3] हि, सन्तो नात्मीयमात्मना ॥ ३१२ ॥

तदानीं त्वामवस्थाप्य, राजञ्जिष्णोर्निदेशतः । पुनस्त्वरितमेतस्य, पादान्तिकमुपागमम् ॥ ३१३ ॥ विमानरत्नमारूढो, मनसोऽप्यधिकत्वरम् । किरीटी हेमकूटाख्यं, क्षणादद्रीन्द्रमासदत् ॥ ३१४ ॥ तत्रैकच्छत्रसाम्राज्य-सगर्वतिमिरे क्वचित् । वृक्षलक्षपरिक्षिप्ते, प्रभुर्नः कन्दरेऽविशत् ॥ ३१५ ॥ मर्त्यकीटेन ते देवि !, कृतसर्वाङ्गसङ्गतेः । मां विधाय धवं धातु-रघ

१ हेतिः-अग्निशिखा । २ अर्जुनेन । ३ पराक्रमम् ।

पाप्मा विलुप्यताम् ॥ ३१६ ॥ देवि ! विद्याधरीपाणि-पल्लवोद्धूतचामरम् । वैडूर्यपुरसाम्राज्य-मुपभोक्तुं प्रसीद मे ॥ ३१७ ॥ सद्यः कन्दलिते विद्या-वैभवेन नवे नवे । प्रासादपर्वतोद्याने, देवि ! क्रीड मया सह ॥ ३१८ ॥ देवि ! हित्वा प्रतीपत्वं, द्वीपशैलाननेकशः । व्योमयानेन वीक्षस्व, मदुत्सङ्गैकसङ्गिनी ॥ ३१९ ॥ इति प्रभावतीं तत्र, मेघनादः प्रसादयन् । ददृशे खेचरो वैरि-केतुना कपिकेतुना ॥ ३२० ॥ (पञ्चभिः कुलकम्) .

आः पाप ! चापलं मुञ्च, जीवितं विजहासि किम् ? । मम पत्युः पुरो हन्त !, पुरुहूतोऽपि कातरः ॥३२१॥ मत्कान्तराज्ये स्वाराज्य-गर्वसर्वंकषे सति । स्तुतेर्विद्याधरादीनां, न पदं राज्यसंपदः ॥ ३२२ ॥ नानाश्चर्यमयद्वीप-शैलालोकनकौतुकम् । चिरायुर्मणिचूडो मे, सोदरः पूरयिष्यति ॥ ३२३ ॥ निद्राणे मत्प्रिये चौर !, मामहार्षीस्त्वमक्षतः । मृगारौ जागरूके हि, का मृगस्य प्रभूष्णुता ? ॥ ३२४ ॥ पारदारिक ! चेत् पाणिं, मदङ्गे लगयिष्यसि । तेनैव पाप्मना मङ्क्षु, भस्मसात्त्वं भविष्यसि ॥ ३२५ ॥ सिद्धविद्यः स चेद्विद्या-न्मद्बन्धुप्रियबान्धवः । पार्थः कथां कुतोऽप्येनां, ततस्त्वमसि किं क्वचित् ? ॥३२६॥ विद्याधरं तमित्यादि, विब्रुवाणां प्रभावतीम् । निध्याय मुदमध्यास्त, स्फारयामास फाल्गुनः ॥ ३२७ ॥ (सप्तभिः कुलकम्) कोऽयं हेमाङ्गदो नाम ?, कः सोऽपि कपिकेतनः ? । मणिचूडोऽपि कस्तन्वि !, तन्माने मयि धन्विताम् ? ॥३२८॥ स्वयं दीर्घाक्षि ! दास्याय, जनोऽयमनुमन्यताम् । पठन् हठकठोरस्त्वं, पुनः केन निषेत्स्यते ? ॥ ३२९ ॥ इत्यादिभिर्वचोभिस्तं, भीपयन्तं प्रभावतीम् । जगाद जगतां सीद-हरः श्वेतहरिः क्रुधा ॥ ३३० ॥ (त्रिभिर्विशेषकम्) दूरतो भव रे विद्या-धरस-

केमरेण कथितोऽर्जुनस्य पराक्रमः ॥

१ पापम् । २ प्रतिकूलताम् । ३ सामर्थ्यम् । ४ 'पुरः' प्रतित्रयपाठः । ५ दुःखहरः ।

न्तानपांसन ! । मैतां पतिव्रतां श्वास–पवनैरपवित्रय ॥ ३३१ ॥ पतिव्रतामयं ज्योति–रिमामपहरिष्यतः । वपुस्तव क्षणादेव, किं बभूव न भस्मसात् ? ॥३३२॥ बन्धुः पतिर्वा यद्यस्या, गणितौ नावलेपतः । त्वयाऽन्तश्चिन्तिताः किं न, फाल्गुनस्यापि बाहवः ? ॥ ३३३ ॥ सतीचिन्तामणेरस्या–स्तनुसंस्पर्शपाप्मनः । प्रायश्चित्तं विधाता ते, क्षणात् कौक्षेयको मम ॥ ३३४ ॥

तदा प्रमोदकल्लोलै–राकुलीकृतमानसा । इत्यन्तश्चिन्तयामास, फुल्लचक्षुः प्रभावती ॥३३५॥ चेतस्त्वं वर्धसे दिष्ट्या, मम भ्रातुः प्रियः सुहृत् । कुतोऽप्यत्र बताऽऽयातः, स एवायं धनंजयः ॥ ३३६ ॥ प्रभावोऽस्ति प्रभावत्याः, सत्यं सुकृत-संपदः । सतीव्रतसरःसेतुः, कपिकेतुर्यदागमत् ॥ ३३७ ॥ सरलैकस्वभावोऽयं, मा स्म मायाविनाऽमुना । खेचरेण रणे शान्तं, यद्वा नन्वेष फाल्गुनः ॥३३८॥ सर्वाः संभूय बीभत्सो–र्भवत्यः कुलदेवताः । शरीरमधितिष्ठन्तु, यथा स्याद्विजयी युधि ॥ ३३९ ॥ पतिव्रताव्रतस्यास्य, कोऽपि मे महिमाऽस्ति चेत् । किरीटिना दुरात्माऽयं, जीयतां तन्नभश्चरः ॥ ३४० ॥ अस्यामभूदशानल्प–विकल्पाकुलचेतसि । उवाच विजयो वाचं, खेचरापसदं पुनः ॥ ३४१ ॥

गृहाण रे क्षणात् पाणौ, किमप्यायुधमात्मनः । खड्गोऽयं दुष्ट ! ते रुष्ट–स्तदेष न भविष्यसि ॥ ३४२ ॥ ऊचे च फाल्गुनं वल्गु, स वल्गन् समराङ्गणे । रे ! मनुष्यकृमे ! नश्य, किमु रोदयसि प्रियाम् ? ॥ ३४३ ॥ विद्याधरवधूवर्ग–वैधव्यव्रतदीक्षिता । कष्टं कृपाणयष्टिर्मे, पतन्ती त्वयि ॥ ३४४ ॥ बालां को नाम मत्पाणे–रेतामाच्छेतुमिच्छति ? । को हि कण्ठीरवाक्रान्तां, मृगीमाक्रष्टुमीश्वरः ? ॥ ३४५ ॥ ममामर्षहुताशेऽस्मि–न्नाहुतीयन्मुधा ततः । कथं मनुष्यलोकस्य, कौतु-

१ पांसनः–अधमः । २ विद्याधराधमम् ।

कान्यपनेष्यसि ? ॥ ३४६ ॥ इत्युदीरयति स्वैरं, तस्मिन् वक्ति स्म पाण्डवः । रे ! न शौण्डीरिमा वाचि, भुजेष्वेवावतिष्ठते ॥ ३४७ ॥ किं तु दुर्दान्तवृत्तीनां, शासनाय भवादृशाम् । उद्यता अपि नो पूर्वं, प्रहरन्ति कुरूद्वहाः ॥ ३४८ ॥ ततः स्थेमान-मानीय, मानसं साध्वसाकुलम् । निपातयतु निस्त्रिंशं, नृशंस ! प्रथमं भवान् ॥३४९॥ इत्याक्षेपगिरा सोऽपि, दूरोज्जागरपौरुषः। अपकोशमसिं कृत्वा, प्रजहार कपिध्वजम् ॥ ३५०॥ तेन गाढप्रहारेण, दक्षिणेर्मा धनंजयः । तमूर्जितभुजं दृष्ट्वा, कष्टजय्य-ममन्यत ॥ ३५१ ॥ ततः कपिध्वजो धौत-धारेण तरवारिणा । बाह्वोः सर्वाभिसारेण, तं हन्तुमुदतिष्ठत ॥३५२॥ निहतः स तथा शत्रुः, स्कन्धकोटौ किरीटिना । यथा पपात मूर्च्छालः, शुष्कतालुर्भुवस्तले ॥३५३॥ चेलान्ततालवृन्तेन, तमुपानीय चेतनाम्। सुधीः मधैर्यप्रागल्भ्य-मभ्यधत्त धनंजयः॥३५४॥ हंहो ! विद्याधराधीश !, दूरमालम्ब्य दोर्बलम्। पुनः प्रहर निःशङ्कं, मा कलङ्कय पौरुषम् ॥ ३५५ ॥ इत्यवष्टम्भसंरम्भं, विभाव्य भयभङ्गुरः । विहाय सहसा खड्ग-मानमत् खेचरोऽर्जुनम् ॥३५६॥ नीचैरूचे च तं वीर !, व्यलीकं क्षम्यतामिदम् । भूर्भुवःस्वस्त्रयीलोक-त्राणशौण्डा हि पाण्डवाः ॥ ३५७ ॥ शौण्डीरचूडारत्नेन, परस्त्रीप्रियबन्धुना । सर्वथैव त्वया नाथ !, विजिग्येऽहमनीदृशः ॥ ३५८ ॥ चारणेभ्यो भुजस्तम्भ-स्फूर्तयस्ते मुहुः श्रुताः । खलीकृतोऽसि विश्वेश !, साक्षात्कर्तुं मयाऽद्य ताः ॥३५९॥ परं बद्धरणारम्भ-संरम्भे हरिणद्विपि । न द्विपेन्द्रोऽप्यलं स्थातुं, का कथा हरिणस्य तु ? ॥३६०॥ धर्म-न्याय-सदाचार-परोपकृतयस्तव । सहायास्तत्त्वया वीर !, जगज्जितमहं तु कः ? ॥३६१॥ किं चोपकृतमप्यस्या-मिदं भावि तवाफलम् । यदि पथ्याद्वने देव !, संप्रत्येव न धावसि ॥ ३६२ ॥ मुक्ताऽस्ति मार्गकान्तारे,

केऽम्बरेण कथितोऽर्जुनस्य पराक्रमः

१ पराक्रमः । २ भयाकुलम् । (३ दक्षिणे ईर्मं व्रणमस्येति ।) ४ अपराधः । ५ 'तथा' 'तमा' इति प्रत्यन्तरपाठो न सम्यक् ।

माया मेधाविना मया । विद्या प्रभावतीरूप-धारिणी यत् प्रतारिणी ॥३६३॥ सर्वोऽप्यनुपदी लोक-स्तया हन्त प्रतारितः । विनङ्क्ष्यति क्षणादेव, छद्मना को न वञ्च्यते ? ॥ ३६४ ॥ तदुपादाय दीर्घाक्षी-मेतां गत्वा च सत्वरम् । भ्रातस्त्रायस्व विश्वस्य, जन्तुजातस्य जीवितम् ॥३६५॥ अहं तु गन्तुमिच्छामि, भावज्ञ ! त्वदनुज्ञया । नातः परं तवाप्यस्मि, मुखं दर्शयितुं क्षमः ॥३६६॥ ततो विसृज्य तं प्रीत्या, प्रणिपत्य प्रभावतीम् । यानमारोप्य च स्वैरं, दधावे श्वेतसैन्धवः ॥३६७॥ भवत्प्राणपरित्यागा-शङ्कातरलिताशयः । देवस्त्व (व ! त्व) रितमेवाय-मुद्देशमिममागमत् ॥ ३६८ ॥ कपिध्वज-प्रभावत्यो-र्ईष्टैतत्तच वैशसम् । भूपाल ! यद्भूदुःखं, जानीतस्तदिमौ परम् ॥३६९॥ नश्यति स्म ततो देवी-पाणिपूताम्बुसेकतः । विघ्यातायाश्रितायास्ते, सेयं विद्या प्रतारिणी ॥ ३७० ॥

परप्रमोदसंभार-संभूतपुलकाङ्कुरः । ततो हेमाङ्गदो राजा, व्याजहार कपिध्वजम् ॥ ३७१ ॥ शङ्के परोपकाराय, सृष्टिर्भुवि भवादृशाम् । "निर्माणं हि सहस्रांशो-र्जगदालोकहेतवे" ॥३७२॥ वीरोत्तंस ! त्वया देवी-मिमामाहरताऽधुना । इयतो जन्तुजातस्य, संहारः परिरक्षितः ॥ ३७३ ॥ कोटिशः श्रुतमद्वैतं, त्वद्भुजस्तम्भवैभवम् । साक्षात्कृतमिदानीं तु, दैवादेवमिदं मया ॥ ३७४ ॥ वस्तु नास्त्येव तद्येन, तव स्यात् प्रत्युपक्रिया । जनोऽयमनुमन्तव्यः, किंकरत्वाय केवलम् ॥३७५॥. इति व्याहृत्य भूपेन, प्रश्रयेण गरीयसा । अनुनीय तदा निन्ये, हिरण्यपुरमर्जुनः ॥ ३७६ ॥ उत्सवैकमयं स्मेर-दानन्दलहरीमयम् । सर्वसंपन्मयं स्वर्ग-सर्वाङ्गीणकलामयम् ॥३७७॥ प्रत्याहर्ता प्रभावत्या, वतायमयमर्जुनः । इति निर्दिश्यमानो-

१ विघ्नम्-हिंसाम् इत्यर्थः । २ कथयित्वा ।

ऽसौ, लोकैः प्रीत्याऽविशत् पुरम् ॥३७८॥ (युग्मम्) राज्ञा च राजपत्न्या च, राजवेश्मन्यनुद्रुतः । विवेश विक्रम-श्रीभ्यां, मूर्ति-
मञ्चामिवार्जुनः ॥३७९॥ तत्र सिंहासने हैमे, निवेश्य विवशो मुदा । जगाद पार्थिवः पार्थ-मित्थं विनयवामनः ॥ ३८० ॥
प्रीतिक्रीतानिमान् प्राणान्, [1]भुजक्रीतीरिमाः श्रियः । गुणक्रीतमिदं राज्यं, कृतार्थय यथारुचि ॥ ३८१ ॥ पार्थोऽब्रवीदसामा-
न्य-सौजन्यस्वजने त्वयि । स्वर्गाधिपत्यमप्येत-न्ममैव किमिवापरम् ? ॥ ३८२ ॥

प्रौढप्रणयमन्योऽन्य-मित्युल्लापवतोस्तयोः । क्षणेन मणिचूडोऽपि, तत्र व्योमाध्वनाऽऽगमत् ॥ ३८३ ॥ प्रणिपत्य
यथौचित्यं, तानशेषान् विशेषवित् । स खेचरपतिः पार्थ-मुवाच रचिताञ्जलिः ॥३८४॥ भगिनीहरणोद्भूतं, जयोदाहरणं तव ।
उपगीतमुपश्रुत्य, खेचरैरहमागमम् ॥३८५॥ एकैकमर्घदानं ते, वागीशस्यापि नेशते । गरीयस्यो गिरो वक्तुं, किं पुनर्मादृशा-
मिमाः ? ॥३८६॥ कृते किं तु प्रभावत्याः, प्रत्यानयनकर्मणि । राज्यदानाधमर्णोऽहं, ब्रवीमि किमतः परम् ? ॥ ३८७ ॥
तमूचेऽथ पृथासूनु-रहो ! किमिदमुच्यते ? । [2]आत्मन्येवात्मनः किं स्या-दुत्तमर्णाधमर्णता ? ॥३८८॥ किं च मामुल्लसत्प्रीति-
र्भगिनीयं प्रभावती । शश्वत्त्रैलोक्यजैत्राभि-राशीर्भिरभिनन्दतु ॥३८९॥ ततस्तद्भक्तिसंभार-रज्जुसं[3]दानिताशयः । निनाय
दिवसान् पाण्डु-पुत्रस्तत्रैव कांश्चन ॥ ३९० ॥

कश्चिदप्यन्यदा पूर्व-संस्तुतो हस्तिनापुरात् । अभ्येत्य रभसोत्फालः, फाल्गुनाय व्यजिज्ञपत् ॥३९१॥ कुमार !
चारचक्रेभ्यो, निशम्य त्वामिहागतम् । स्नेहादाह्वातुमह्नाय, पिता ते प्रजिघाय माम् ॥ ३९२ ॥ वार्द्धकार्हाः क्रियाः कर्तुं,

अर्जुनस्य हेमाङ्गद-नगरे गमनम् । तत्र मणि-चूडस्यागमनम् ॥

१ पराक्रमः । २ 'आत्मनैवा०' प्रत्यन्तरम् । ३ सदानितः-बद्धः ।

स्वर्गं रावणे सपत्नुतम् । अभिषेकुमनाः काम-मुर्वीशस्त्वामपेक्षते ॥ ३९३ ॥ प्रतिभ्रातरपश्यन्ती, कुन्ती त्वद्वदनं पुनः । मत्स्यसमसाश्रु-गर्भवालजटिले दृशौ ॥ ३९४ ॥ इत्युपश्रुत्य तद्वाप-मानान्तद्वृदगो मुदा । पित्रोः स्नेहेन बीभ-त्सु-र्जितमैत्रीक्षणः ॥ ३९५ ॥ ततस्तमाह श्रीभरत-राजे पाण्डुजाये जिनम् । नगरक्षलाकमागात, एव त्वं तु पुरो गच्छ ॥ ३९६ ॥ इति संप्रेष्य तं पाण्डु-जगं पति धनंजयः । सार्धं भूतेश्वरेणाभ्यां, भजति स्म गिरागतः ॥ ३९७ ॥ तारैस्तत्परमया भक्त्या, [illegible]जिनेश्वरम् । प्राप्तस्ताभ्यां कृष्ण-नन्दीनोत्कण्ठितोऽर्जुनः ॥३९८॥ मत्स्युजगाम गोविन्द-सावासान्ते मनोऽस्ता । लोकनेत्र [illegible] मत्स्यो नन्दीश्वरम् ॥ ३९९ ॥ तो [illegible] परिरेभाते, प्रणयागतिलालितम् । अश्रुस्नपयद्भुजः, [illegible] ॥ ४०० ॥ [illegible], [illegible] । [illegible] भाग, [illegible]-मर्जुनम् ॥ ४०१ ॥ [illegible] पुरस्ताते [illegible] । [illegible] ॥ ४०२ ॥ कृष्णोऽस्य स्वागतीनके, [illegible] । [illegible] ॥ ४०३ ॥ [illegible]-तीति-[illegible] । [illegible] ॥ ४०४ ॥ [illegible] जिष्णो-र्महाभूयोऽप्यतिरतः । [illegible] इति [illegible] ॥ ४०५ ॥ [illegible]-जिष्णुः कृष्णानुरोधतः । उत्तरीकमयान् [illegible] ॥ ४०६ ॥

[illegible], सार्धं [illegible] सुभद्रया । हस्तिनापुरसोरकण्ठः, [illegible] ॥ ४०७ ॥ ततः स

१ [illegible] । २ [illegible] ।

खेचरानीक-विमानैस्तिरयन्नभः । चचाल मणिचूडेन, समं हेमाङ्गदेन च ॥ ४०८ ॥ विमानमनुकामीन-मध्यासीनो विलोकयन् । सरः-सरि-न्नगा-राम-पुर-ग्राममयीं महीम् ॥ ४०९ ॥ खेचरेन्द्र-नरेन्द्राभ्यां, श्रिताभ्यामभितोऽन्तिके । दत्ततालं मिथस्तास्ताः, कुर्वन् प्रमदसंकथाः ॥ ४१० ॥ पुष्यन्तं चादवीयस्त्वा-त्तापैस्तीव्रैर्विवस्वतः । शुष्यन्तं च दधत्स्वेदं, वंहीयोभिर्नभोऽनिलैः ॥४११॥ वहन् हर्षभरोल्लुण्ठ-मुत्कण्ठतरलं मनः । आसीदत् सीददानन्दं, हस्तिनापुरमर्जुनः ॥ ४१२ ॥ (चतुर्भिः कलापकम्) धावन्तः खेचराः काम-महंपूर्विकया ततः । आयान्तं पृथिवीभर्तुः, पृथासूनुमचीकथन् ॥ ४१३ ॥ शोकमानन्दतां निन्ये, मेदिनीशस्य तद्वचः । शुद्धः सिद्धरसः शुल्वं, महारजततामिव ॥ ४१४ ॥ हर्षाश्रुबिन्दुसंदोहः, स्थाने शोकाश्रुविप्रुषाम् । पृथायाः पप्रथे कृत्स्नो, ज्योत्स्नेव तमसां पदे ॥ ४१५ ॥ बभूव रभसाचेतः, सोदराणां विकस्वरम् । भास्वत्युदीयमाने हि, किमु जीवति नाम्बुजम् ? ॥ ४१६ ॥ आदिश्य पुरि तत्काल-मुत्सवं सपरिच्छदः । तनूजं मनसः पश्चा-द्भूपतिः प्रत्युदव्रजत् ॥४१७॥ मेदिनीपतिमा(रा)गत्य, पुरद्वारवनावनौ । अनेदीयांसमुद्द्योत-संभारं भृशमैक्षत ॥ ४१८ ॥ मार्तण्डमण्डलैः पूगै-स्तिथैरिव मरुत्पथः । व्याप्यमानो विमानौघै-स्ततः क्ष्मापेन वीक्षितः ॥ ४१९ ॥ क्षणादैक्ष्यन्त सामन्त-मायूरातपवारणैः । सैन्यानि पितुरुद्यान-भ्रमं पुष्णन्ति जिष्णुना ॥४२०॥ महीयोभिर्महःपुञ्जै-र्मुहुर्मेअरयद्दिशः । विमानमवनम्यैक-माजिहीत महीतलम् ॥४२१॥ नरेन्द्र-खेचरेन्द्राभ्यां, ताभ्यां तस्मादनुद्रुतः । नितान्तमुदितस्वान्तः, कपिकेतुरवातरत् ॥ ४२२ ॥ पित्रोः क्रमात् क्रमाम्भोज-माकुलालिकुलायितैः । ममार्जविर्जयन्मौलिं, कौन्तेयः

द्वारकां गतस्यार्जुनस्य सुभद्रया विवाहः । ततो हस्तिनापुरे गमनम् ॥

१ इच्छानुसारि । २ ताम्रम् । ३ पूगीफलतुल्यैः ।

कुन्तलोच्चयैः ॥ ४२३ ॥ उत्थाप्य रभसात्ताभ्या–मानन्दाश्रुकणोत्करैः । सिच्यमानतनुः स्वैर–मालिलिङ्गे धनंजयः ॥४२४॥ तीर्थतोयाभिषेकोत्थ–पावित्र्यस्येव काम्यया । ताभ्यां कपिध्वजो मूर्ध्नि, मुहुर्मुहुरचुम्ब्यत ॥ ४२५ ॥ समस्तजाह्नवेयादि-गुरुवर्गे समन्ततः । प्रतिपेदे यथौचित्य–माचारः सव्यसाचिना ॥४२६॥ स ननाम क्रमाज्ज्येष्ठ–बान्धवान् विश्वबान्धवः । श्लिष्यति स्म च सानन्दं, वन्दमानान् कनीयसः ॥ ४२७ ॥

भूपतिप्रमुखं सर्वं, ततः स्वजनमण्डलम् । आरोहयद्विमानं तत्, स्वयमप्यारुरोह सः ॥ ४२८ ॥ झणज्झणिति माणिक्य–किङ्किणीमालभारिणा । मार्जनोर्जस्वलस्वर्ण–वैजयन्तीविराजिना ॥ ४२९ ॥ सौरभोदारमन्दार–कुसुमोच्चूलशालिना । अनत्य-न्तीनया नीचै–र्गत्या तेनाथ गच्छता ॥४३०॥ प्रमोदविशदैः पौर–नेत्रैर्नीराजितोऽर्जुनः । अविशद्दिव्यसंवाद्य–शृङ्गारमधुरं पुरम् ॥ ४३१ ॥ (त्रिभिर्विशेषकम्) विस्मयस्मेरनेत्राभिः, खेचराणामितस्ततः । विमानानि मृगाक्षीभि–र्निरीक्षांचक्रिरेत-राम् ॥ ४३२ ॥ दध्वान दुन्दुभिर्बाढं, हतो विद्याधरैर्दिवि । तत्संहर्षादिव क्षोणी–पीठे वैण्ठैश्च ताडितः ॥ ४३३ ॥ कौङ्कमी-नामपामाप्य, पांशवः संगमोत्सवम् । नालमुत्थातुमश्वीय–खुरक्षुण्णा अपि क्षितेः ॥ ४३४ ॥ राजवर्त्मध्वजा रेजु–र्मरुद्रेल्लित-पल्लवाः । विद्याधरविमानानां, कुर्वन्तो गणनामिव ॥४३५॥ पश्यन्तः परितः पौर–योषितः पोषितश्रियः । हस्तिनापुरमेव धा-ममन्वत नभश्चराः ॥४३६॥ निध्यायन्तः सरोमाञ्चं, मञ्चान् गगनचारिणः । विमानेषु मनश्चक्रु–रनास्थाशिथिलं मुहुः ॥४३७॥

पार्थमेकमनेकासां, पौरसारङ्गचक्षुषाम् । नेत्रपत्रैः पिबन्तीनां, युक्तं यन्नाशितंभवः ॥ ४३८ ॥ इभालोकभिया भ्रष्ट–नीविः

---

१ अनतित्वरया । २ 'मधुरः' प्रतिद्वयपाठः । (३ भृत्यैः ।) ४ तृप्तिः ।

अर्जुनस्य हस्तिनापुरे प्रवेशः ॥

स्रस्तोत्तरीयका । काऽप्युच्चैर्दर्शयांचक्रे, खेचरैः सस्मितैर्मिथः ॥ ४३९ ॥ वदनाम्भोजसौरम्य–भ्रमद्भृङ्गकुलाकुला । नर्तयन्ती करौ काचित्, खेलयामास खेचरान् ॥४४०॥ पार्थालोकनलाम्पट्यात्, पणांस्तांस्तान् प्रतिश्रुतान् । गाढाश्लेषमुखान् पत्या, काचिदस्मार्यताधिकम् ॥४४१॥ प्रतिस्थानमथ स्यूत–चूतपल्लवतोरणम् । रम्भास्तम्भपरीरम्भ–मीलत्तरणिदीधिति ॥ ४४२ ॥ प्रतिद्वारमलिन्देषु, मुदा गोत्राङ्गनाजनैः । मौक्तिकस्वस्तिकोदात्त–दत्तकुङ्कुमगोमुखम्[1] ॥ ४४३ ॥ कक्षान्तरगवाक्षस्थ–पाञ्चाली-लोचनैर्मुहुः । प्रत्युद्यातः शनैर्भेजे, राजमन्दिरमर्जुनः ॥ ४४४ ॥ (त्रिभिर्विशेषकम्)

सत्कृत्यवित् पुरस्कृत्य, भूपतिप्रभृतीन् गुरून् । जगन्मानसमारूढो, विमानादवतीर्णवान् ॥ ४४५ ॥ प्रीत्या कुन्त्या कृतं तत्त–दवतारणमङ्गलम् । प्रतिगृह्य प्रतीहारै–र्दूरमुत्सारितप्रजः ॥ ४४६ ॥ सर्वतः खेलदुत्ताल–वन्दिकोलाहलाकुलम् । मध्यमु-र्वीन्द्रसौधस्य, विशति स्म धनंजयः ॥ ४४७ ॥ आस्थानीपीठमास्थाय, पाण्डुश्चण्डांशुतेजसा । स्नेहालापैश्चिरं तस्थौ, भक्तिनम्रेण सूनुना ॥४४८॥ तयोरानम्रताभाजोः, सुतस्य प्रियमित्रयोः । आवासौ स निजावास–देशीयावदिशन्मुदा[2] ॥४४९॥

स्वस्थानं मेदिनीभर्तु–रादेशाद्गतयोस्तयोः । प्रणम्य प्रणयप्रह्वः, पार्थः स्वावसथं ययौ ॥४५०॥ आग्रहात् प्रतिजग्राह, तत्र दाक्षिण्यदीक्षितः । पौर-जानपदा-मात्य–सामन्तोपायनान्यसौ ॥ ४५१ ॥ हर्षसोत्कर्षमाभाष्य, विसृज्य निखिलं जनम् । प्रेमपल्लवितः सोऽथ, सैरंध्रीसौधमाविशत्[3] ॥४५२॥ चेतसा प्रथमं पार्थ–मभ्युत्तस्थौ ततो दृशा । देहेन तदनु स्वेद–रोमाञ्च-मचिवेन मा ॥४५३॥ अनीशाऽपि भृशोन्मील–त्साध्वसा प्रतिपत्तये । कामं बहुमता जज्ञे, याज्ञसेनी किरीटिनः ॥४५४॥

[1] गोमुखं–लेपः । [2] निजावासतुल्यौ । [3] द्रौपदीसौधम् ।

बलादातन्वतोर्नेत्र-प्रवर्तन-निवर्तने । पश्यन्त्यां तं रणस्तस्या-मौत्सुक्य-त्रपयोरभूत् ॥ ४५५ ॥ कृष्णा जिष्णौ चिराद्देह-मुपेयुषि ददौ मुदा । कटाक्षपटलव्याजा-दर्घ्यमिन्दीवरैरिव ॥ ४५६ ॥ क्षेप्तुकाम इवात्यन्त-मन्तर्देहं कपिध्वजः । भुजोपपीडं प्रक्रीड-त्प्रीतिरालिङ्गति स्म ताम् ॥ ४५७ ॥ तदाश्लेपसुखास्वाद-निमीलितविलोचनः । चिरप्रवसनक्लेश-मपनिन्ये धनंजयः ॥ ४५८ ॥ साऽपि विश्वत्रयीं मेने, तदा तत्संगमोत्सवे । सुधामयीमिवानन्द-परिस्पन्दमयीमिव ॥४५९॥ अध्यासामास पल्यङ्कं, तुल्यः कुसुमधन्वना । जिष्णुरध्यासयांचक्रे, तां च प्रतिकृतिं रतेः ॥ ४६० ॥ प्रेमवार्तास्तया सार्धं, तास्ताः कुर्वन् कपिध्वजः । तदमन्यत निःशेष-महोरात्रमपि क्षणम् ॥ ४६१ ॥ हेमाङ्गदश्च भूपालो, मणिचूडश्च खेचरः । चिरं सितहयप्रीत्या, पुरे तस्मिन्नतिष्ठताम् ॥ ४६२ ॥

मेदिनीपतिरन्येद्यु-राहूय विजयं रहः । विश्वस्य कुशलोदर्कं, वितर्कं स्वमचीकथत् ॥ ४६३ ॥ वत्स ! वीक्षस्व कर्णान्त-पलितंकरणीं जराम् । इयं प्रवर्तयत्यद्य, धर्मकर्मणि मां बलात् ॥ ४६४ ॥ विषयाः सहवास्तव्याः, श्यामलैरेव कुन्तलैः । सितीभूतैः पुनर्धर्मः, सख्यं हि समशीलयोः ॥ ४६५ ॥ जरस्यपि मनः कुर्व-न्नरो भोगाभिलाषुकम् । प्राकृतैरपि हस्येत, किं पुनर्विशदाशयैः ? ॥ ४६६ ॥ धर्मपीयूषकूपस्य, पीतपूर्वी पयः पुमान् । मृत्युं मरुमिवातीत्य, याति मुक्तिपुरीं सुखम् ॥४६७॥ तन्निक्षिप्य क्षमाभारं, सर्वज्येष्ठे युधिष्ठिरे । धर्म्या एव क्रियाः कामं, कर्तुमिच्छति मे मनः ॥ ४६८ ॥ प्रह्वीभूतस्तथा लोको, गुणौघैर्धर्मजन्मनः । तत्कथाभिर्यथा जज्ञे, नित्यमुज्जागरः पुरे ॥ ४६९ ॥ गुणैरस्येन्दुदायादै-र्मनोवेश्मनिवासिभिः । अर्वे-

१ कामदेवेन । २ कुशलपरिणामम् । ३ चन्द्रसदृशैः । ४ मूल्यम् ।

क्रय इव प्रीतिः, प्रकृतीनामदीयत ॥ ४७० ॥ गाङ्गेय-धृतराष्ट्राद्या, ज्यायांसोऽपि तपःसुते । राज्यधुर्योऽयमेवेति, सर्वे मनसि मन्वते ॥ ४७१ ॥ अस्तु राजन्वती भूमि-स्तदेतेन चिरादियम् । सर्वस्याप्यस्य लोकस्य, पूर्यन्तां च मनोरथाः ॥ ४७२ ॥ वत्स ! प्रतीक्षितोऽसि त्व-मेतावन्ति दिनानि तु । मधोरभ्युदयः श्रेयान्, विना न मलयानिलम् ॥ ४७३ ॥

उभाकर्णीदमाकर्ण्य, वचः प्रीत्या महीपतेः । सव्यसाची ततो वाच-मुवाच विनयान्विताम् ॥ ४७४ ॥ इदं तातस्य को नाम, वचो न बहु मन्यते ? । "कोविदः को हि कुर्वीत, मीमांसामागमोक्तिषु ? " ॥ ४७५ ॥ प्रियंकरा च नो कस्य, श्रीसंक्रान्तिस्तपःसुते ? । " श्रयन्तीह सुधारश्मिं, न मुदे कस्य कौमुदी ? " ॥४७६॥ गिरमेतां च तातस्य, यः प्रमाणयिता न हि । मामकास्तस्य मूर्द्धानं, सहिष्यन्ते न सायकाः ॥४७७॥ इत्यात्मजन्मनो वाचा, प्रीतचेताः क्षितीश्वरः । धर्मात्मजाभिषेकाय, तत्कालमुपचक्रमे ॥ ४७८ ॥

कृष्णादीनवनीपालान्, दूतैराह्वाययन्नृपः । दूरात् पुष्पंधयान् पुष्प-सौरभैरिव भूरुहः ॥ ४७९ ॥ निवासाः क्ष्माभुजां रेजुः, परितो हस्तिनापुरम् । सर्वतोऽपि तुषारांशु-मालिनं तारणा (का) इव ॥४८०॥ तूर्यप्रणादमेदस्वि-नारीमङ्गलगीतिभिः । शब्दाद्वैतमयस्तस्मिन्, पुरे प्रावर्ततोत्सवः ॥ ४८१ ॥ व्योमलक्ष्मीविनीर्मीय-माणनिर्माजनश्रियः । वैजयन्त्यो जनैस्तस्मिन्, समुच्चिक्षिपिरे पुरे ॥ ४८२ ॥ हर्षाकुलचलच्चेटी-कुचसंघट्टचूर्णितैः । राजवेश्मभुवो हारै-श्चक्रिरे बद्धसैकताः ॥ ४८३ ॥ तोरणानि जनैः स्वस्व-मन्दिरेषु चिकीर्षुभिः । निष्पत्राश्चक्रिरे केलि-काननाम्रवणश्रियः ॥ ४८४ ॥ प्रतिमन्दिरमुत्क्षिप्त-कदलीस्त-

१ विचारणाम् । २ भ्रमरान् । ३ चन्द्रम् ।

अर्जुनसंमत्या युधिष्ठिरराज्याभिषेकोपक्रमः ॥

म्भकान्तिभिः । नगरं तन्महानील–शिलामयमिवाबभौ ॥ ४८५ ॥ राजते स्म जनैर्दिव्य–नेपथ्याभरणोज्ज्वलैः । तत्पुरं सामरैरेव द्यौ–रवतीर्णा महीतलम् ॥ ४८६ ॥ नानाग्रामागतग्राम्य–सैणपाणिंधमाध्वनि । अपूर्यत पुरे तस्मिन्, पौराणां नेत्रकौतुकम् ॥ ४८७ ॥ मिलन्निखिलभूपाल–तुरङ्गखुरखण्डितम् । अभिषेकजलप्लाव–भियेव द्यां ययौ रजः ॥ ४८८ ॥ गान्धारी–माद्रिकामुख्य–मालोक्यान्तःपुरीगणम् । रचितानेकरूपेव, मन्यते स्म शची जनैः ॥ ४८९ ॥

तपःसुताभिषेकाय, माणिक्यमयमद्भुतम् । विमानं मानवेन्द्रेण, पर्यकल्प्यत शिल्पिभिः ॥ ४९० ॥ तत्र धात्रीपतिर्विप्रैः, कृतनीराजनाविधिम् । वशी निवेशयामास, भद्रपीठे युधिष्ठिरम् ॥ ४९१ ॥ पुरोहितं पुरस्कृत्य, मंत्रसंस्कारपावितैः । पार्थिवस्तीर्थपाथोभि–रभ्यषिञ्चत्तपःसुतम् ॥ ४९२ ॥ सर्वेऽप्युर्वीभृतः स्वर्ण–कलशावर्जितैस्ततः । सहर्षमभ्यषिञ्चन्त, वारिभिर्धर्मनन्दनम् ॥ ४९३ ॥ पतन्तः पयसामोघा–स्तस्य मूर्ध्नि विरेजिरे । प्रावृषेण्यपयोवाह–प्रभवा इव भूभृतः ॥ ४९४ ॥ चित्रं तस्यारिभूमीभृ–द्वंशदाहहविर्भुजः । अभिषेकजलैर्लक्ष्मी–मगाहत महः परम् ॥ ४९५ ॥ प्रवाहः पयसां धर्म–पुत्रगात्रपवित्रितः । पुपूषुरिव तत्कालं, पपात स्वःसरिज्जले ॥ ४९६ ॥ मूर्तैरिव यशोबीजै–र्दूर्वाङ्कुरकरम्बितैः । अवाकिरंस्तमाचार–लाजै राजीवलोचनाः ॥ ४९७ ॥ गम्भीरमधुरैस्तूर्य–निनदैरुच्छ्रितोच्छ्रितैः । कल्याणशंसिभिः प्रीति–रजागर्यत कस्य न ? ॥ ४९८ ॥ गोत्रपालीशसंतान–स्तुतिपूतास्तपःसुतः । शुश्राव श्रवणानन्द–स्यन्दिनीर्वन्दिनां गिरः ॥ ४९९ ॥

१ शोभया द्यौः–स्वर्ग इव । (२ अन्धकाराघृते ।) पाणिं धमतीति पाणिंधमः । ३ अकार्यत । ४ 'तत् कामम्' इति पाठान्तरे तत्–गङ्गाजलं, कामं–अतीव इत्यर्थः कर्तव्यः ।

११

अर्थिभ्यः स ददौ ताव-द्रव्यमव्याहताशयः। यावता जज्ञिरे तेऽपि, शश्वदर्थिजनार्थिनः ॥ ५०० ॥ मुञ्चन् सत्कृत्य
घाराल-वैरक्रूरान्रिपूनपि। स क्षणादकरोत् कारा-विशोधनमधिद्युतिः ॥ ५०१ ॥ अधर्मद्रुमसंतान-च्छेदनादभ्रमावहः। दीयते
स्म तदादेशा-दमारिपटहः पुरे ॥ ५०२ ॥ दग्धकर्पूरधूमोत्थ-नवमेघालिमालिषु। स पुरेऽकारयज्जैन-मन्दिरेषु महोत्सवम्
॥ ५०३ ॥ निधीशनिधिसर्वस्व-भ्रमकारीणि भूभुजाम्। मङ्गलोपायनान्यस्य, प्रविशन्ति स्म वेश्मनि ॥ ५०४ ॥
ततस्तमभिषेकान्ते, कक्षान्तरनिवेशिनम्। दिव्यैः प्रसाधिकास्तैस्तै-र्नेपथ्यैरुपतस्थिरे ॥ ५०५ ॥ तास्तस्य भ्रमरश्यामा-
न्यद्भिर्निबिरीसंताम्। केशानुद्धापयामासु-र्धूमैरगरुजन्मभिः ॥ ५०६ ॥ तस्य मूर्द्धनि धम्मिल्लं, मल्लिकादामगर्भितम्। मुक्ता-
वलयितोपान्तं, रचयन्ति स्म तास्ततः ॥ ५०७ ॥ छादितादित्यमत्यच्छं, शरदभ्रं जिगीषुभिः। चन्दनैश्च तदीयाङ्गं, व्यलिम्पं-
श्चम्पकद्युति ॥ ५०८ ॥ शरज्ज्योत्स्नासमुच्छेक-च्छेदच्छेकतरद्युती। ताः पर्यधापयन्नेनं, दुकूले हंसलक्ष्मणी ॥ ५०९ ॥ उदया-
द्रिशिरश्चुम्बि-चण्डरोचिर्विडम्बनम्। कार्तस्वरकिरीटं च, तदीये मूर्द्धनि न्यधुः ॥ ५१० ॥ तथ्यगीरथदेश्याऽस्य-चक्रद्वयम-
नोरमे। न्यस्यन्ति स्म तथा तस्य, कर्णयो रत्नकुण्डले ॥ ५११ ॥ माणिक्यनिष्कसध्रीची-मामुञ्चन् हारवल्लरीम्। कण्ठे चास्य
मितां कीर्ति, प्रतापकलितामिव ॥ ५१२ ॥
अथोत्थाय ततो वार-स्त्रैणचालितचामरः। मृगाङ्कमण्डलाकार-श्वेतच्छत्रविराजितः ॥ ५१३ ॥ मुदितैर्बन्दिसंदोहै-रुदी-
रितजयध्वनिः। धावद्दौवारिकव्रात-विहितालोकनिःस्वनः ॥ ५१४ ॥ तत्कालं फाल्गुनादेशा-न्मणिचूडेन निर्मिताम्। सभां

(१ सान्द्रताम्।) २ निष्कम्-वक्षोभूषणविशेषः।

युधिष्ठिरस्य राज्याभिषेकः।

रत्नमयीं दिव्या-मध्यतिष्ठद्युधिष्ठिरः ॥ ५१५ ॥ (त्रिभिर्विशेषकम् ।) नभःस्फटिकभित्तीनां, यस्यामविदितान्तरः । तमसीव करस्पर्शा-दालोकेऽप्यचलज्जनः ॥ ५१६ ॥ ज्वलन्माणिक्यतेजोभि-रलक्षितनतोन्नताः । यस्यामन्तःपतन्तः के, नागमञ्जनहास्यताम् ? ॥ ५१७ ॥ द्युतिसादृश्यदुर्लक्ष्य-जले नीलाश्मकुट्टिमे । दिव्या यस्यामभून्मत्त-मधुपालिर्मृणालिनी ॥ ५१८ ॥ इन्द्रनीलक्षितिर्यस्या-मर्काश्मपरिवारिता । बभौ ज्योत्स्नाभिरावृत्य, रुद्धेव तिमिरावलिः ॥ ५१९ ॥ नानारत्नान्तरस्तम्भकान्तिसंक्रान्तितो बभुः । यस्यां ज्योतीरसस्तम्भाः, सर्वरत्नमया इव ॥ ५२० ॥ आश्रितानेकवर्णाढ्य-वितानप्रतियातना[1] । सवितानेव भाति स्म, यस्यां भूरप्यधस्तनी ॥ ५२१ ॥ रत्नस्तम्भेषु विश्रान्त-सर्वाङ्गप्रतिमास्तदा । यस्यां वारविलासिन्यः, पाञ्चालीतुलनां दधुः ॥ ५२२ ॥ नरः स भूपतिस्तस्यां, मणिसिंहासनं महत् । आक्रान्तवान् सुनासीरः, सुधर्मायामिवाबभौ ॥ ५२३ ॥ प्रणेमे मणिकोटीर-कोटिकुट्टितकुट्टिमैः । स राजाऽभिनवो भूपै-राज्ञाभारानतैरिव ॥ ५२४ ॥

ततः सचिवसामन्त-पौरजानपदादयः । तं रत्नाश्वकरिप्रायै-रुपतस्थुरुपायनैः ॥ ५२५ ॥ सेवायातैर्दिशामीशै-रिव सामीप्यवर्तिभिः । बभौ साक्षादिवोपायैः[2], स चतुर्भिः सहोदरैः ॥ ५२६ ॥ अथ तस्य पयोराशि-रसनायामपि क्षितौ । आज्ञालेखा विनिर्जग्मुः, प्रतापा इव जङ्गमाः ॥ ५२७ ॥ मयि सत्यपि को नाम, जगत्यस्मिन्निनोऽपरः[3] ? । इतीवाश्वखुरोत्खात-पांशुपीतार्कमण्डलः ॥ ५२८ ॥ खेचरा अपि पश्यन्तु, राजपाटीक्रमं मम । इतीव दन्तिदानाम्भः-शमिताशेषभूरजाः ॥ ५२९ ॥ मा स्म दिक्कुञ्जरेन्द्रेभ्यः, कुप्यन्तु मम दन्तिनः । इतीव सैन्यमायूर-च्छत्रच्छन्नदिगन्तरः ॥ ५३० ॥

---

१ प्रतियातना-प्रतिमा-प्रतिकृतिरित्यर्थः । २ साम-दाम-दण्ड-भेदाः एते चत्वार उपायाः । ३ स्वामी ।

नयनाञ्जलिभिः पौर-नारीभिश्चालिताञ्चलम् । पीयमानो मुहुः प्रीत्या, हास्तिनं सोऽत्यहस्तयत् ॥ ५२१ ॥ (चतुर्भिः कलापकम्) बन्धुप्रीत्या गुरूणां च, पर्यालोचेन तत्क्षणात् । दुर्योधनं स राजान-मिन्द्रप्रस्थेऽभ्यषिञ्चत ॥ ५२२ ॥ अन्येषामपि बन्धूनां, धृतराष्ट्रात्मजन्मनाम् । पार्थिवः स यथौचित्यं, ददौ देशान् पृथक् पृथक् ॥ ५२३ ॥ उत्सर्पदुत्सवमयं स विभुः समाप्य, राज्याभिषेकमहमिद्धमहःप्ररोहः । सत्कृत्य कैटभरिपुप्रभृतीन्नरेन्द्रान्, रत्नोत्करैर्निजनिजान् प्रजिघाय देशान् ॥ ५२४ ॥ इति जितपुरुहूतः स्फीतपुण्योपहूतः, [1]प्रतिनततनृपतिश्रीसेव्यमानाङ्घ्रिपद्मः । ससुरभिगुणमालो मालतीदामकुन्द-स्तवकविशदकीर्तिः [2]पूगमक्षां निनाय ॥ ५२५ ॥

इति मलधारिश्रीदेवप्रभसूरिविरचिते पाण्डवचरित्रे महाकाव्ये पार्थतीर्थयात्रा-
युधिष्ठिरराज्याभिषेकवर्णनो नाम पञ्चमः सर्गः ॥

अथ षष्ठः सर्गः ।

अथ पाण्डुर्विमुक्तश्री-रात्मारामैकमानसः । मुक्तावुत्थातुकामोऽपि, तत्रैवास्थात् सुताग्रहात् ॥ १ ॥ धृतराष्ट्रं पुनः सूनु-भक्तमानी सुयोधनः । इन्द्रप्रस्थं [3]व्यवस्थावि-न्निनाय सममात्मना ॥ २ ॥ युधिष्ठिरगुणग्राम-कामसंदानिताशयाः ।

---

१ 'प्रतिनव०' प्रतित्रयपाठः । २ समूहम् । ३ 'व्यवस्थायै' प्रतिद्वय० ।

गाङ्गेय-विदुर-द्रोणा, ह्यास्तिने ऽध्यवतस्थिरे ॥ ३ ॥ पाण्डोस्तपःसुते वाढं, रेजिरे राज्यसंपदः । भृशायन्ते हि तेजांसि, प्रदीपे जातवेदसः ॥ ४ ॥ सौम्ये च दुःप्रधर्षे च, तस्मिन् पल्लविता भृशम् । वनराजीव राज्यश्रीः, शिशिरोष्णे मधाविव ॥५॥ प्रतापदुःसहे तस्मिन्, पुष्णाति स्म तरङ्गितः । कीर्तिकल्लोलिनीर्धर्मों, घर्मर्ताविव नीरधिः ॥६॥ तत्तेजोऽग्निस्तनूर्भूपाः, प्रताप्य विरसा द्विषाम् । तारैर्यशोभिराश्चर्यं, पूरयामास रोदसी ॥ ७ ॥ ध्वान्तध्वंसिनि सत्येव, गलद्वयसि राजनि । भास्वत्युदित्वरे तस्मि-न्ननन्दुरधिकं प्रजाः ॥ ८ ॥

दिग्जिगीषाकृतोन्मेषं, तस्य ज्ञात्वा मनोऽन्यदा । कनीयांसः समं नत्वा, चत्वारोऽपि बभाषिरे ॥ ९ ॥ किं नाम जग-दुद्द्योत-हेवाकेषु गभस्तिषु । तमःसंभारभेदाय, भानुरुद्यच्छते स्वयम् ? ॥ १० ॥ देव ! दक्षिणवाते-न्दु-वसन्तादिषु सत्स्वपि । मानिनीमानभङ्गाय, कामः किं धावति स्वयम् ? ॥ ११ ॥ पुरःसरेषु किं नाम, तरङ्ग-समिरो-र्मिषु । जलाशयः स्वयं पान्थ-खेदच्छेदाय सादरः ? ॥ १२ ॥ सत्सु तत्रिजगज्जैत्र-भुजेषु निजबन्धुषु । दिशां जयाय देवेन, न प्रस्थातव्य-मात्मना ॥ १३ ॥ इत्याकर्ण्य वचस्तेषां, जहर्ष जगतीपतिः । निदेश्यैर्हि जयो राज्ञां, कीर्तिमावहते पराम् ॥ १४ ॥ क्रमा-म्भोजनतान्नीति-चतुरश्चतुरोऽपि तान् । अंसयोरामृशन् प्रीत्या, स दिशो जेतुमादिशत् ॥ १५ ॥ राजाज्ञेत्यन्वमन्यन्त, चतुरङ्गां चमूममी । मृगेन्द्रः करिणो हन्ति, किं मृगैः परिवारितः ? ॥ १६ ॥

कुन्ती-माद्र्यादिभिर्गोत्र-वृद्धाभिः कृतमङ्गलाः । तेऽथ प्रतस्थिरे सैन्यै-श्चत्वारोऽपि पृथक् पृथक् ॥१७॥ भीमः प्राचीं दिशं जिष्णु-रपाचीं नकुलः पुनः । प्रतीचीं सहदेवस्तु, किलोदीचीमशिश्रियत् ॥ १८ ॥ चतुर्भिरप्यनीकैस्तै-राक्रान्तां

परितः क्षितिम् । बभार समभारत्वात्, सुखमेव फणीश्वरः ॥१९॥ एभिः प्रसभमारब्धाः, कुर्युः किं नाम भूमिपाः ? । इतीव द्रष्टुमुच्चैर्या-मारोहद्वाहिनीरजः ॥ २० ॥ निःशेषारिवधूनेत्र-सलिलैः कूलमुद्रुजाः । स्रवन्तीनाँभिरुत्तेरु-स्ते गुल्फद्वयसीरपि ॥ २१ ॥ दिग्निकुञ्जेषु मूर्च्छन्त-स्तेषां निस्वाननिस्वनाः । भूभृतां दारयामासु-र्दरीश्च हृदयानि च ॥ २२ ॥ आत्मीयमपि ते चाह्रो-रूष्माणमसहिष्णवः । केतनालिच्छलान्मन्ये, कदलीवनसेविनः ॥ २३ ॥ क्षुण्णा हरिखुरैर्दन्ति-पादपातैर्मतीकृताः । भुवस्तत्कीर्तिबीजानां, वापयोग्या इवाबभुः ॥ २४ ॥

अथ भीमः क्रमात् काम-रूपान् भीमभुजो ययौ । सैन्यदन्तिमदस्पर्द्धि-कालागुरुरसस्रुतीन् ॥२५॥ तदीया श्रियमादाय, स ततार सुरापगाम् । लम्भयन् कुम्भिनां दानै-र्यमुनासंगमोत्सवम् ॥२६॥ ततोऽङ्गान् भक्तिनम्राङ्गान्, सुह्माञ्जिह्मितविक्रमान् । स्वानमाद्वङ्गवद्वाङ्गान्, स चकार भुजौजसा ॥ २७ ॥ स वितेने रणारम्भ-निष्कलानुत्कलानपि । कलिङ्गानपि निर्मुक्त-राजलिङ्गानसूत्रयत् ॥ २८ ॥ अथारोप्य जयस्तम्भान्, गङ्गासागरसंगमे । उन्मूलयन् स पाञ्चाल-डहालादीन्यवर्तत ॥ २९ ॥ अर्जुनोऽप्यर्जुनच्छाय-मर्जयन्मार्गणैर्यशः । नतेष्वक्षुण्णदाक्षिण्यो, दक्षिणामाविशद्दिशम् ॥ ३० ॥ भ्रष्टराष्ट्रान् महाराष्ट्रान्, कर्णाटांश्चाढुकारिणः । तिलङ्गानङ्गुलिव्यङ्गान्, कुर्वाणः स रणे शरैः ॥ ३१ ॥ केरली-कुरलान् लुम्पन्, वैदर्भीविभ्रमान् हरन् । द्रमिलीकेलिमुल्लुम्प-न्मलयोपत्यकां ययौ ॥ ३२ ॥ (युग्मम् ।) तस्यामालानितैस्तस्य, चन्दनद्रुम-

१ सैन्यधूलिः । २ तटभेदिन्यः । ३ ध्वजश्रेणिमिषात् । ४ समीकृताः ' मनीकृताः ' ' मलीकृता ' इति प्रत्यन्तर० ५ मुति -स्रवः । ६ " स्वानमान्यङ्गवद्वङ्गान् "-" स्थानमान्वङ्गवद्वाङ्गान् " प्रत्यन्तर० ।

युधिष्ठिरानुज्ञया भीमादीनां दिग्यात्रागमनम् ॥

कानने। नामसाम्यादिव क्रुद्धै-र्नागैर्नागा निरासिरे ॥ ३३ ॥ तत्र तस्य लवङ्गै ला-लवलीस्वादलालसाः। सल्लकी-पल्लवप्रासे, वैमुख्यमभजन् गजाः ॥ ३४ ॥ पाण्डवः सह मुक्ताभिः, पाण्ड्यानामाहरन् यशः। ताम्रपर्णीयुजि प्राप, दक्षिणाम्भोधिरोधसि ॥ ३५ ॥ तत्रोत्तम्भ्य जयस्तम्भान्, सेतुबन्धैकबन्धुरे। द्वैराज्यं रामकीर्तीनां, चकार निजकीर्तिभिः ॥ ३६ ॥ स्वादं नागरखण्डानां, वनवासस्थलीपु सः। लम्भयन् सैनिकांस्तस्थौ, कुन्तलीलोलुपश्चिरम् ॥ ३७ ॥ कौङ्कणी-कङ्कणान् भञ्ज-न्नालिकेरीद्रुमैः सह। लाटीकटाक्षलुण्टाकः, सोऽथ व्यावर्तत क्रमात् ॥ ३८ ॥

यशः कुसुमसौरभ्यवासितक्षितिमण्डलः। नकुलोऽपि विवेशान्तः, प्राचेतस्या दिशस्तदा ॥ ३९ ॥ प्रापयन्नन्तमत्यन्त-मावन्तीनयनाञ्जनम्। उच्छिन्दन् बहलच्छायाः, सौराष्ट्रीपत्रवल्लरीः ॥ ४० ॥ महार्णव-सरस्वत्योः, प्रियमेलकपावितम्। प्रभासक्षेत्रमक्षोभ्य-बलोर्मिर्नकुलो ययौ ॥ ४१ ॥ (युग्मम्) प्रक्षाल्य मलमुद्वीक्ष्य, तत्र चन्द्रप्रभप्रभुम्। जयस्तम्भान् महारम्भो, न्यस्यति स्म स धीरधीः ॥ ४२ ॥ शृण्वन् स द्वारिकालोक-गीतं कंसजितो यशः। पूगपूगवता कच्छान्, कच्छेनैवाम्बुधेर्ययौ ॥ ४३ ॥ गापयित्वा निजां कीर्ति-विस्फूर्तिं तत्र चारणान्। पारसीकाननीकेन, स चकारात्मकिङ्करान् ॥४४॥ तत्रास्य पिण्ड-खर्जूर-स्वादमेदस्विसंमदैः। चिरमध्यूषिरे कच्छाः, सैनिकैः पश्चिमाम्बुधेः ॥ ४५ ॥ यवनीवदना-म्भोज-विकासतुहिनोत्करः। शकीसंभोगशृङ्गार-समुद्रकलशोद्भवः ॥ ४६ ॥ माद्यत्पञ्चनदस्त्रैण-मदामोदमलिम्लुचः। सैन्धवीवर्गवैधव्य-व्यसनी स न्यवर्तत ॥ ४७ ॥

---

१ कुन्तलदेशस्त्रीपु लुब्धः। २ कृष्णस्य। ३ पूगवृक्षसमूहवता। ४ तीरेण। ५ कलशोद्भवः—अगस्त्यः।

सहदेवोऽपि देवेन्द्र–देश्यशौण्डीरिमक्रमः । व्यगाहत महाबाहुः, कुबेरचरितां[1] दिशम् ॥ ४८ ॥ संदिशन् हारसंहारि–जाङ्गलीनामभमङ्गलम् । आस्कन्दति स्म काम्बोजा–नोजस्विभुजविक्रमः ॥ ४९ ॥ उपनीय हयानुच्चै–र्यश्चितोच्चैःश्रवःश्रियः । तदुर्वीपतिरात्मान–मवति स्म कुरूद्वहात् ॥ ५० ॥ तस्य नेपालभूपालः, केलिकस्तूरिकामृगान् । उपदीकृत्य पाति स्म, श्रियं पूर्वक्रमार्जिताम् ॥ ५१ ॥ क्षुण्णकुङ्कुमकेदार–पांशुपूरपिशङ्गिताः । कश्मीरेषु हयास्तस्य, बिभ्रति स्मैकवर्णताम् ॥ ५२ ॥ हिमालयमथारुह्य, पार्वतीयान् विजित्य च । निचखान जयस्तम्भां–स्तदुच्छ्रायं विवर्धयन् ॥ ५३ ॥ नानाश्चर्यमयात्तस्मा–दवरुह्य गिरेः शनैः । आदिदेश स हूणीना–मुरःकुट्टनपाटवम् ॥५४॥ पिबन् कीरयशःक्षीरं, ग्वसश्रीरसमाहरन् । नितान्त-पुष्टसर्वाङ्गः, स प्रत्यावृत्ते ततः ॥ ५५ ॥

इत्यादाय दिशां लक्ष्मीं, नगरे नागसाह्वये । तपःसूनोः कनीयांस–श्चत्वारोऽप्याययुः समम् ॥ ५६ ॥ दिकुक्षिंभरिभिः सैन्यैः, राजा प्रत्युज्जगाम तान् । प्रवाहानिव सिन्धूना–मूर्मिभिर्मकराकरः ॥५७॥ तेन बन्धुबलौघास्ते, चत्वारोऽप्यालुलोकिरे । पयोधय इवायाताः, सेवितुं तमिव स्वयम् ॥ ५८ ॥ ततो निलीयमानानि, सैन्ये महति भूपतेः । ब्रह्मणीव स्फुलिङ्गौघा–स्तानि सैन्यानि रेजिरे ॥ ५९ ॥ तान्यनीकानि पञ्चापि, तत्र प्राप्तानि संगमम् । शरीरिणां शरीरेषु, भूतानीव बभासिरे ॥ ६० ॥ प्रीतिप्रह्वाः प्रणेमुस्ते, कनीयांसस्तपःसुतम् । तानालिङ्ग्य मुदा सोऽपि, ब्रह्मानन्दमिवान्वभूत्[2] ॥ ६१ ॥ मरुत्प्रे-ङ्खोलितानेक–ध्वजताण्डवमण्डितम् । कस्तूरीमिश्रकाश्मीर–सिक्तघण्टापथ[3]क्षिति ॥ ६२ ॥ उज्जृम्भिदुन्दुभिध्वान–प्रतिध्वानि-

१ उत्तराम् । २ ('ब्रह्मास्वादम्' इति ख. ग.) प्रतिश्रयपाठः । ३ घण्टापथो–राजमार्गः ।

भीमादयो दिग्यात्रां कृत्वाऽऽगताः ॥

तमन्दरम् । दीप्यमानमनोराग–नागरोत्सर्पदुत्सवम् ॥ ६३ ॥ विमानलक्ष्मीलुण्टाक–मञ्चरोमाञ्चितप्रजम् । स्मेरपौरवधूवर्ग–नेत्रकैरवकाननम् ॥ ६४ ॥ वारसारङ्गनेत्राभिः, प्रीतिचालितचामराः । सिन्धुरेन्द्राधिरूढास्ते, निजं नगरमाविशन् ॥ ६५ ॥ (चतुर्भिः कलापकम्) सिंहासने निवेश्याथ, राजानं मन्दिराजिरे । पादपङ्केरुहोत्सङ्गे, भृङ्गीकृत्य शिरोरुहान् ॥ ६६ ॥ गीर्वाणगिरिदायादाः, पुरस्तस्यानुजन्मभिः । दिगन्तसंपदां कूटा–स्त्यक्तकूटैर्वितेनिरे ॥ ६७ ॥ (युग्मम्) विश्वे विश्वंभराभर्तु–स्ते परीणाहशालिनः । वेदिका इव भान्ति स्म, प्रमोदपृथिवीरुहाम् ॥ ६८ ॥ विशांपत्युर्यशःक्षीर–नीरराशेर्विसारिणः । सर्वैरभ्रंकषैरेतै–रभ्यन्तरगिरीयितम् ॥ ६९ ॥ अपि पुण्यजनाधीश–मप्यनेकनिधीश्वरम् । राजराजमपि ख्यात–मपीश्वरसुहृत्तया ॥ ७० ॥ भूपः सुपर्वधर्मत्वा–द्विश्वाशाः परिपूरयन् । जिगाय मैर्त्यधर्माण–मुत्तराशावलम्बिनम् ॥ ७१ ॥ (युग्मम्)

समुत्पेदे तदाऽन्योऽपि, नृपस्यानन्दकन्दलः । पार्थवध्वाः सुभद्राया–स्तनूजो यदजायत ॥ ७२ ॥ कृतार्थानर्थिनः कृत्वा, स्वापतेयैर्यथेप्सितैः । काश्यपीपतिरस्याख्या–मभिमन्युरिति व्यधात् ॥ ७३ ॥ सिञ्चञ्श्रद्धाजलैर्धर्म–फलाकाङ्क्षी प्रतिक्षणम् । सप्तक्षेत्र्यां वसून्येष, वपति स्म गतस्मयः ॥ ७४ ॥ दध्ने जन्मान्तरद्वीप–क्षेमगामिन्यनारतम् । स सहस्रगुणीकर्तुं, धर्मपोते श्रियो न्यधात् ॥ ७५ ॥

अवाप्तजन्मनस्तत्र, तत्र वृद्धिमुपेयुपः । तत्रैव चक्रवर्तित्व–लक्ष्मीदीक्षादिशालिनः ॥ ७६ ॥ नानारत्नैरधःकुर्वन्, गर्वं गीर्वाणवेश्मनाम् । विहारः कारयांचक्रे, तेन शान्तिजिनेशितुः ॥ ७७ ॥ (युग्मम्) ज्वलत्कनकमाणिक्य–मयमालोक्य तं जनः ।

१ 'मन्दिरं' इति प्रतिद्वय० । २ वेश्याभिः । ३ मेरुतुल्याः । ४ विस्तारशालिनः । ५ कुबेरम् । (६ धनैः ।)

चकार गुरशैलेन्द्र-दिदृक्षाशिथिलं मनः ॥ ७८ ॥ इन्द्रनीलमयद्वार-शाखांशुश्रेणिकैतवात् । सान्द्रच्छायोल्लसत्तीर-वनराजी-
विराजिनी ॥ ७९ ॥ तत्र स्फटिकसोपान-प्रभाव्याजेन जाह्नवी । रेजे पवितुमात्मान-मागतेव तरङ्गिता ॥ ८० ॥ (युग्मम्)
शातकुम्भीयकुम्भौघ-प्रतिबिम्बैर्व्यडम्बयत् । नीलाश्मकुट्टिमं तस्मिन्, सहेमकमलां यमीम् ॥८१॥ ज्योतीरसमयक्षुद्र-जैन-
वेश्मपरिष्कृतः । मुक्तानद्धः क्षितेः कर्ण-तादङ्क इव स व्यभात् ॥ ८२ ॥ शश्वदभ्रंलिहे तस्य, स्फाटिकस्य शशी निशि ।
ज्योतिर्जालजले मज्जन्, सस्मार क्षीरनीरधेः ॥८३॥ तत्रालोक्य ध्रुवं रूप-शालिनीः शालभञ्जिकाः । अमरैरमरीरूप-शिल्पी
काममनिन्द्यत ॥ ८४ ॥ यदि वा नास्ति तत् स्वर्गे, नावनौ न रसातले । यदुपैत्युपमानत्वं, तस्य यच्चोपमेयताम् ॥ ८५ ॥
विश्वाद्भुतश्रियस्तस्य, ध्वजारोपणपर्वणि । दूतैराह्वाययामास, सर्वं राजा स राजकम् ॥ ८६ ॥ प्रहित्य नकुलं प्रौढ-
प्रश्रयप्रवणाशयः । प्रीत्या निमन्त्रयामास, केशवं धरणीधवः ॥ ८७ ॥ बन्धुवात्सल्यसोल्लास-मना दुर्योधनं पुनः । सह-
देवेन भूमीन्द्रः, मत्वान्धमजूहवत् ॥ ८८ ॥ स्वस्वदेशप्रसूतानि, तस्य चेतःप्रसत्तये । उपायनान्युपादाय, तत्राजग्मुर्महीभुजः
॥ ८९ ॥ पराभूताभ्रमातङ्गैः, पौरस्त्याः पृथिवीभुजः । मदामोदिकपोलैस्तं, करीन्द्रैरुपतस्थिरे ॥ ९० ॥ वज्रवैडूर्यमुक्तादि-
रत्नजातमथिद्युति । आदाय तमुपासीदन्, दाक्षिणात्याः क्षितिक्षितः ॥ ९१ ॥ दिव्यैः कौशेयवासोभि-र्भूषणैश्च हिरण्मयैः ।
अपरान्तमहीपाला-स्तमभ्येयुर्भयापहम् ॥९२॥ स्वस्वदेशोद्भवैस्तैस्तैः, सुरसैन्धववान्धवैः । उपसेदुस्तमश्वीयै-रौत्तराहा महीभृतः
॥ ९३ ॥ मनुष्यमयमश्वेभ-मयं लक्ष्मीमयं च तत् । बभूव सर्वभूपालैः, संगतैर्नगरं तदा ॥ ९४ ॥

(१ शातकुम्भं स्वर्णम् ।) २ यमुनाम् । ३ राजानः । ४ सैन्धवः-अश्वः ।

अभिमन्यु जन्म । शान्ति-जिनचैत्य निर्माणम् ॥

अथ लग्नदिने धास्मि, षोडशस्य जिनेशितुः । बिंबं संगमयांचक्रे, राजचक्रं महीपतिः ॥ ९५ ॥ समं तैः सर्वसामन्तै-रुत्सवेन गरीयसा । पार्थिवस्तीर्थनारीणि, पीवरप्रीतिरावहत् ॥ ९६ ॥ रक्षामन्त्रादिसंस्कार-क्रियाकन्दलितद्युतः । तत्कालं ते कलामैन्द्रीं, सत्यामेवाश्रयन्नृपाः ॥ ९७ ॥ कृपाणपाणयः केऽपि, प्रतिष्ठाक्षोभशान्तये । तत्क्षणं दिक्षु सर्वासु, भूनेतारोऽवतस्थिरे ॥ ९८ ॥ वेदिरक्षाकृते केचि-द्दधतो वैणवीं लताम् । कुर्वन्तस्तद्वीयांसं, लोकं तस्थुर्महीभृतः ॥ ९९ ॥ उदस्तकलशाः केचि-ज्जलाहरणहेतवे । इतस्ततः ससंरम्भं, धावन्ति स्म धराधवाः ॥ १०० ॥ स्नानीयानि जलस्यान्त-रौषधानि न्यधुः परे । ऊचुरत्युगकैरन्ये, स्नात्रसूक्तानि भूभृतः ॥ १०१ ॥ भूमीभृतश्चतुःषष्टि-र्ध्वजदण्डं हिरण्मयम् । स्नपयांचक्रिरे स्नेरं, वारानष्टादश क्रमात् ॥ १०२ ॥ स्नात्रान्तरेषु व्योमान्तः-स्नपितामोदितोयदम् । धूपमुत्क्षिपुः केऽपि, कर्पूरागुरुसंभवम् ॥ १०३ ॥ तिलकानपरे चक्रुः, सरसैश्चन्दनद्रवैः । पुष्पस्रजं वितन्वन्तः, स्नात्राणामन्तरान्तरा ॥ १०४ ॥ मन्त्रैर्यथोदितैस्तैस्तै-राहूताखिलदैवतम् । नन्दावर्तं परे यत्ना-द्रक्षन्ति स्म क्षितीश्वराः ॥ १०५ ॥ दधिरे चामरान् केचि-दपरे दर्पणं दधुः । धारयामासुरन्ये तु, सर्पि-र्दध्यादिभाजनम् ॥ १०६ ॥ इतरे ढौकयामासु-र्द्राक्फलाफलिकादिकम् । गन्ध-सर्वौषधी-वृद्धि-ऋद्ध्यादि दधिरे परे ॥ १०७ ॥ इति भूमीन्दुसंदोहे, विश्वव्यापारहारिणि । शुभायां लग्नवेलाया-मनुकूलग्रहाश्रयात् ॥१०८॥ श्रीबुद्धिसागराचार्य-स्तत्र श्रीशान्तिवेश्मनि । अचीकरद्ध्वजारोपं, यथाविधि सुधिष्ठिरः ॥ १०९ ॥ (युग्मम्) स निरेजे ध्वजः मेरु-न्मरुत्कल्लोललोलितः । रजो विश्वभ्रमासक्तं, तत्कीर्तेर्विनयन्निव ॥ ११० ॥ विस्मयस्मेरराजन्य-वीक्षितं क्षितिवासवः ।

१ 'गिगुप्रन्तः' प्रतिग्रय० ।

शान्ति-जिन-प्रतिष्ठा। युधिष्ठिरस्य दिव्य-सभायां दुर्योधन-प्रवेशः ॥

दाक्षाहिकोन्नतं चक्रे, संपत्संभारभासुरम् ॥ १११ ॥ ततः प्रवर्धमानेन, श्रद्धाशुद्धेन चेतसा । सङ्घमभ्यर्चयांचक्रे, यथौचित्यं स कृत्यवित् ॥ ११२ ॥ सत्कृत्य वस्तुभिस्तैस्तै-स्तदानीतोपदाधिकैः । अथ भूमीभुजो राजा, प्रैषीद्देशं निजं निजम् ॥ ११३ ॥ समुद्रविजयादीना-दुत्सुकं धर्मनन्दनः । औचितीचञ्चुरभ्यर्च्य, विससर्ज गदाग्रजम् ॥ ११४ ॥ दुर्योधनं पुनर्बन्धु-प्रेमप्रह्लादिताननः । दिनानि कतिचित्तत्र, धात्रीपतिरधारयत् ॥ ११५ ॥ साकं शकुनिना तत्र, मातुलेन सुयोधनः । पाण्डवस्फातिनिर्लेप्योऽपि, गूढाकारोऽवसच्चिरम् ॥ ११६ ॥ लीलाशिलोच्चय-क्रीडा-वापी-केलिवनादिषु । चिक्रीड पाण्डवैः सार्धं, सुमनोभिः स दुर्मनाः ॥ ११७ ॥

सिसिक्षुपरिवारेण, पूर्वमुर्वीभृतार्थिताम् । अपरेद्युः सभां दिव्यां, विवेश धृतराष्ट्रसूः ॥ ११८ ॥ तत्राप इति विज्ञाय, नवस्फटिककुट्टिमे । दुकूलाञ्चलमुत्क्षिप्य-न्नहस्यत स किङ्करैः ॥ ११९ ॥ स्थलाब्जिनीधिया धाव-न्नादातुमरविन्दिनीम् । स गूढे तज्जले मज्ज-न्नहस्यत वायुसूनुना ॥ १२० ॥ ततः स्मेरकपोलाक्ष-स्तत्क्षणादनुजीविभिः । तस्यापराणि वासांसि, काश्यपीपतिरर्पयत् ॥ १२१ ॥ तेनाङ्कुरितकोपोऽपि, निगूह्याकृतिं निजाम् । अनालोकितकेनैव, स धीमांस्तानि पर्यधात् ॥१२२॥ दृग्विभ्रमापि क्वापि, जानन्नुर्वीमनुन्नताम् । स्खलित्वा स पतन्नुच्चै-रुपाहस्यत जिष्णुना ॥ १२३ ॥ अपावृतादपि द्वारा–

१ स्फटिकनिर्मितभूमिः । २ शिलोच्चयः-पर्वतः । ३ " कपोलवाल्मध्येऽसौ, विरोधद्रुरिवाङ्कवान् । बभौ फलाय कस्मैचि-द्विलक्षस्मितपुष्पितः ॥ २० ॥ धिग्गताऽस्मि समक्ष्मा-पतिक्षयनिमित्तताम् । इत्यन्तःपतिते तत्र, चकम्पे केलिवापिका ॥ २१ ॥ " इति श्लोकद्वयमेतस्यां प्रतावधिकं दृश्यते ।

क्राभिराश्रुतशङ्कया । व्यावृत्तं हसतः स्मेरं, दत्ततालं मिथो यमौ ॥ १२४ ॥ इत्याद्यैः पाण्डवेयाना-मुपहासैर्मुहुर्मुहुः । कौरवाधिपतेरन्त-रुज्जजागार मत्सरः ॥ १२५ ॥

सत्कृत्य प्रणयार्द्रेण, प्रेषितः पाण्डुसूनुना । इन्द्रप्रस्थं प्रतस्थेऽथ, सोऽभिमानी समातुलः ॥ १२६ ॥ स दीनवदनाम्भोजः, शून्यात्मा निश्वसन् मुहुः । यदा किंचिद्ददौ कामं, जल्प्यमानोऽपि नोत्तरम् ॥ १२७॥ तदा सविधमभ्येत्य, मातुलः सौबलो बलात् । जगाद पथि गच्छन्तं, करे धृत्वा सुयोधनम् ॥ १२८॥ किमेतत् ते मुखं धत्ते, प्रातः शीतरुचो रुचम् ? । इति जल्पन्तमस्वल्पं, गान्धारेयस्तमभ्यधात् ॥ १२९ ॥ जीवेज्जगति किं नाम, वर्तते मम मातुलः ? । एवमत्यन्तमृध्यन्ति, पश्यतो यस्य शत्रवः ॥ १३० ॥ सहस्रशो मणिज्योति-र्निर्मिताऽमरकार्मु(मु)का । सुधर्मामप्यधःकृत्य, जृम्भते भुवि सा सभा ॥ १३१ ॥ दिगन्तसंपदः संप्र-त्यहंपूर्विकयाऽखिलाः । धर्मनन्दनमायान्ति, द्वीपवत्य इवार्णवम् ॥ १३२ ॥ आक्रम्य सत्करैर्ग्रीष्म-भास्वानिव श्रियः । सांप्रतं परितो वर्धन्, दुर्गस्थरिपुशालिनाम् ॥ १३३ ॥ कुबेरीकृतनिःशेष-नागैकपुलाः श्रियः । तस्य न्यक्कुर्वते गर्वं, गीर्वाणेन्द्रश्रियामपि ॥ १३४ ॥ विहाय हेमकोटीरं, मूर्ध्नि सन्मानशालिते । उत्तंसीकुर्वते यस्य, शासनं मेदिनीभृतः ॥१३५॥ ध्वजारोपोत्सवे तत्र-स्तगाऽम्भाऽोकितं तथा । मयाऽस्य पश्यमानेऽपि, राजभिः किङ्करायितम् ॥ १३६ ॥ तथाऽस्य सर्वथा जज्ञे, काश्यपी पक्षपातिनी । करैः पतद्भिरस्थाने-ऽप्यसौ नोज्झितो यथा ॥ १३७ ॥ एतदुरगमतः सर्वे,

---

१ तस्यामे स्फाटिकी भित्ति-र्गच्छाम्यागच्छतः । गच्छतः स्खलिते मौलौ, ते पुनर्जहसुर्जनाः ॥ २६ ॥" इति श्लोकः पञ्चमो प्रत्यधिको दृश्यते । २ "जीवज्जग० मातुल !" इति प्रतिलम्भाठोऽपि साधुः । (३ नवीपको शाखकः ।)

प्राप्तनिष्ठं युधिष्ठिरे । कामं ममान्तरात्मानं, दहतीव हुताशनः ॥ १३८ ॥ बलीयः पुण्यमेवैकं, न पुनः पौरुषं क्वचित् । पाण्डवा हन्त जीवन्ति, यन्निर्मूलयतोऽपि मे ॥ १३९ ॥ इदानीमप्यहं शत्रूंस्तानुच्छेत्तुमलंतमाम् । सहायमद्भुतं कंचित्, किं तु पश्यामि नात्मनः ॥ १४० ॥ इमामुद्वीक्षितुं लक्ष्मीं, विपक्षाणामशक्नुवन् । अत्रैवात्मानमुद्बध्य, तन्मरिष्याम्यसंशयम् ॥१४१॥ त्वं पुनर्मे पितुर्गत्वा, सर्वमेतन्निवेदयेः । इत्युक्त्वा विरते तस्मिन्, पुनः शकुनिरब्रवीत् ॥ १४२ ॥

धार्तराष्ट्र ! न खल्वेत-दाभिजात्योचितं[1] वचः । सन्तो हि स्फुटदानन्द-कन्दलाः स्वजनोदये ॥१४३॥ पैत्र्यमेव क्षितेः खण्डं, पाण्डवैरुपभुज्यते । मनागपि न तद्यून-मुपभुङ्क्ते भवानपि ॥ १४४ ॥ भुवनाद्भुतसौभाग्यै-र्भोग्यैरेतावतीं यदि । तल्लक्ष्मी-रगमत् कोटिं, नामर्षस्तेऽत्र सांप्रतम् ॥ १४५ ॥ भ्रातृभिर्यदि भूभर्तु-स्तस्य संगरमङ्गुराः । किङ्करीचक्रिरे भूपाः, किमानन्दाय ते न तत् ॥ १४६ ॥ यत्तु व्याकुरुषे ताद्दक्सहायो नास्ति कोऽपि मे । नानुमोदामहे वाचं, तामेतां ते मनागपि ॥ १४७ ॥ जगतीगीतदोःकीर्ति-प्रबन्धा बान्धवास्तव । पयोधय इवोद्वेलाः, पृथिवीप्लावनक्षमाः ॥ १४८ ॥ तेष्वप्यरातिभूपाल-मौलिलालितशासनः । रणे दुःशासनः पाक-शासनेनापि[2] दुःसहः ॥ १४९ ॥ तव प्रत्युपकारैक-लम्पटः सुभटाग्रणीः ॥ सर्वारिहृदयोत्कीर्णः, कर्णः प्राणाञ्जिहासति ॥ १५० ॥ अहमेकधुरीणस्ते, समरेषु ससोदरः । तत् सहायैरिमामेतैः स्वच्छन्दं मेदिनीं जय ॥ १५१ ॥

अथाह कौरवस्तर्हि, विजये पाण्डवान् पुरः । एतैर्जितैर्जितैवेय-मखिलाऽपि वसुंधरा ॥१५२॥ सौबलोऽप्यभ्यधाद्भूपः,

१ कुलीनोचितम् । २ इन्द्रेण ।

दुर्योधनस्य पाण्डवोपरि द्विष्टस्य शकुनिना सह मन्त्रः॥

रेयं मिथ्या मतिस्तव । न सोऽप्याखण्डलः पाण्डु-पुत्रैजैत्रायुधो युधि ॥१५३॥ निहन्ति यत्प्रतापोऽपि, शौण्डीरजडिमज्वरम् । कः सहेत तमभ्यर्णं, तपःसुतरविं रणे ? ॥१५४॥ भीमेतिनामसाधर्म्य-शङ्कितैरिव कुञ्जरैः । युद्धे गजासुराकारैः, प्रणेशे पवनात्मजात् ॥१५५॥ खन्यते विशिखैर्जिष्णो-र्वैरिवक्षःस्थलक्षितिः । अम्भःसिरास्तु जृम्भन्ते, नेत्रयोस्तन्मृगीदृशाम् ॥१५६॥ ॥ कालिन्दीसोदरं कान्त्या, करवालं यमोपमम् । धारयन्तौ करे युद्धे, दुर्नियम्यौ यमावपि ॥ १५७ ॥ विष्वक्सेनादयस्तेषां, सुहृदस्तु रणे मुहुः । असृक्पानोत्सवं चक्रु-र्द्वयेषामपि पैत्रिणाम् ॥ १५८ ॥ तदित्यजय्यदोर्दण्ड-ताण्डवाः खलु पाण्डवाः । शस्त्राशस्त्रि विनाऽप्येकः किं तूपायोऽस्ति तज्जये ॥ १५९ ॥

अथोत्फुल्लमुखाम्भोज-मभ्यधत्त सुयोधनः । को नामायं झगित्येव, कथ्यतां कथ्यतामिति ॥ १६० ॥ बभाषे सौबलः श्रीमन् !, देवता इव देवनाः । परं मयि प्रसीदन्ति, नातिक्रामन्ति मे मनः ॥ १६१ ॥ नित्यं दुरोदरक्रीडा-त्यक्तव्रीडो युधिष्ठिरः । असौ क्रीडितुमाहूतः, क्षणं न स्थातुमीहते ॥ १६२ ॥ देवितुं च न वेत्त्येव, वीर ! खिद्यस्व मा स्म तत् । केनापि छद्मना स्वस्मि-न्नयमाहूयतां पुरे ॥ १६३ ॥ तल्लक्ष्मीमखिलां येन, करमारोहयामि ते । परं सर्वोऽप्ययमालोचः, पितुः स्वस्य निवेद्यताम् ॥ १६४॥ दुर्योधनोऽभ्यधात्साह-माख्यातुमिदमीश्वरः । सर्वमेतन्महीभर्तु-स्त्वमेव कथयिष्यसि ॥१६६॥

इत्यन्योऽन्यकृतालोच-च्चित्रितोपायनिर्णयौ । शकुनिर्धार्तराष्ट्रश्च, ताविन्द्रप्रस्थमीयतुः ॥ १६६ ॥ प्रविश्य सहसा तत्र, धृतराष्ट्रमहीपतिम् । न्यञ्चत्पञ्चाङ्गमानम्य, तावुपाविशतां पुरः ॥ १६७ ॥ मुखकूलंकपोत्ताल-निःश्वासलहरीमुचम् ।

१ जैत्र-जेतृ आयुधं यस्य सः । २ बाणानां सिचानकपक्षिविशेषाणां च । ३ द्यूतक्रीडाः । ४ विचारः ।

दुर्योधनं प्रियं पुत्रं, धरित्रीपतिरब्रवीत् ॥ १६८ ॥ वत्स ! वल्गन्ति निःश्वासा, दीर्घदीर्घाः किमद्य ते ?। प्रस्तुतस्तत्र केनापि, किं तवापि पराभवः ? ॥ १६९ ॥ जातवेदसि को दातुं, झम्पासंपातमीहते ?। आच्छेत्तुमिच्छति स्वैरं, कः फणीन्द्रफणामणिम् ? ॥ १७० ॥ ततः शकुनिरह्नाय, महीपतिमवोचत । राजन् ! सुतं तवेन्द्रोऽपि, पराभवितुमप्रभुः ॥ १७१ ॥ अन्यत्किमपि तद्दुःख–मस्त्यन्तस्तनयस्य ते । येनैष म्लानिमानिन्ये, तरुवत् कोटराग्निना ॥ १७२ ॥ उवाच भूपतिर्वाचं, चिन्ताचान्तमनाः पुनः । चिन्तयन्नपि पश्यामि, न ते दुःखस्य कारणम् ॥ १७३ ॥ विनयाञ्चितमूर्धानो, बान्धवाः सुहृदोऽप्यमी । गुरोर्गिरमिवाश्रान्तं, नातिक्रामन्ति ते वचः ॥ १७४ ॥ दूरापास्तकिरीटेषु, गलन्माल्येषु मौलिषु । वत्सेदानीं तवाज्ञेव, भूभृतामवतंसति ॥ १७५ ॥ किं च ते पुरमप्येतत्, कुबेरपुरजित्वरम् । जुगुप्सिताप्सरोरूपा–स्तव शुद्धान्तयोषितः ॥ १७६ ॥ जितदिग्दन्तिसंतान–मिदमस्त्येव हास्तिकम् । अश्वीयमपि देवाश्व-देशीयं जृम्भते तव ॥ १७७ ॥ तव श्रीवेश्मनि स्मेर–प्रभापिञ्जरिताम्बराः । दृश्यन्ते सुरशैलेन्द्र–सपत्ना रत्नराशयः ॥ १७८ ॥ तव सौधं विनिर्धूत–विमानं मानवेश्वर ! । अश्नासि च यथास्वादु, स्वैरं परिदधासि च ॥१७९॥ तदित्यालोचयन् खेद–निदानं ते न वेद्म्यहम् । अन्यत् किमपि चेत् कथ्यं, कथ्यतां वत्स ! तन्मम ॥ १८० ॥

व्याजहाराथ नीहार–स्पृष्टपङ्केरुहाननः । मन्युसंभारसोत्कम्प–वपुरुच्चैः सुयोधनः ॥ १८१ ॥ तात ! यत् सत्यमस्त्येव, श्रीर्ममेयमनुत्तरा । शश्वन्मनसि वास्तव्या, यस्य त्वत्पादपांसवः ॥१८२॥ तृणाय सर्वमप्येतत्, किं तु मन्येऽहमात्मनः । झल-

शकुनि-दुर्योधन-योर्धृतराष्ट्र-समीपे गमनम् ॥

१ 'स्तन्नु' इत्येकस्यां प्रतौ ।

ज्वलायितां दृष्ट्वा, तपस्तनयसंपदम् ॥ १८३ ॥ नदी मोदयते ताव-द्यावन्नालोक्यतेऽर्णवः । तावदालोककृद्दीपो, यावन्नोदेति भानुमान् ॥ १८४ ॥ किंश्रियो यासु नोत्कर्ष-तारतम्यस्य विश्रमः । किंशूरः समरे यस्मै, तिष्ठतेऽन्योऽपि दोर्मदात् ॥१८५॥ चित्ररूपाऽपि मे संपत्, सर्ववर्णमनोरमा । चण्डैः पाण्डुसुतोन्नत्य-धूमैर्घ्यामलिताऽधुना ॥ १८६ ॥ क्षीयेऽहमसिते पक्षे, यामिनीकामिनीशवत् । विरोधिनस्तु वर्धन्ते, तमस्तोमा इवान्वहम् ॥ १८७ ॥ हेमन्तहिमसंभारे, स्फारीभवति वैरिणि । भाति मेऽर्कोऽपि निर्लज्जो, निस्तेजाः स्वं प्रकाशयन् ॥ १८८ ॥ स्तुमो जलधिमेवैक-मशेषितजलाशयम् । वल्गत्यपि रिपौ ग्रीष्मे, यस्याभ्युन्नतिरीदृशी ॥ १८९ ॥ नानारत्नप्रभाजाल-दत्तसंध्याभ्रविभ्रमाम् । संसदं तां तपःसूनो-र्वासवोऽप्यभिलाषुकः ॥ १९० ॥ ध्यायन्ति हृदये नित्यं, विस्मृताशेषदेवताः । परब्रह्मेव भूपाला-स्तस्याज्ञामेव केवलम् ॥ १९१ ॥ नमन्नृपतिकोटीर-मणीनामपि दुर्धराः । सहन्ते न महस्तस्य, पादाम्भोजरजःकणाः ॥ १९२ ॥ हर्म्याङ्गणे नृपास्तस्य, मण्डलीबन्धशालिनः । प्रेक्षाक्षणं प्रतीक्षन्ते, प्रस्तुतान्योऽन्यसंकथाः १९३ ॥ भूपालोपायनायातै-र्गजैस्तन्मन्दिराजिरम् । श्यामलीक्रियते दान-निर्जितैरिव नीरदैः ॥१९४॥ तत्तुरङ्गखुरोत्खातैः, पांशुभिस्तलिनाऽवनिः । बभूव भूभृतोऽप्यास-न्नत्युच्चाः शृङ्गसङ्गिभिः ॥ १९५ ॥ तद्वेश्मन्युपदारत्न-कूटकान्तिविरोहितः । लक्ष्यतेऽभ्युदितोऽप्यर्कः, सभाकमलिनीस्मितैः ॥ १९६ ॥ तदेतत्तात ! निःशेषं, पश्यतस्तस्य मन्दिरे । द्विधेव हृदयं मेऽभू-च्छिदलत्संधिबन्धनम् ॥ १९७ ॥

---

१ 'शूरसमरे' प्रतिद्वयपाठो न साधुः । २ चन्द्रवत् । ३ 'जलाशये' इत्येकप्रतिपाठोऽपि साधुः । ४ 'देवते' इत्येकप्रतिपाठोऽपि साधुः । ५ कृशा ।

धृतराष्ट्रेण कृतो दुर्योधनस्योपदेशः ॥

अथाभ्यधत्त संरम्भा-द्धृतराष्ट्रः सुयोधनम् । धिग्वत्स ! मत्सरः कोऽय-मस्थाने ते गरीयसः ? ॥ १९८ ॥ लक्ष्मी-रसंस्तुतानाम-प्यानन्दाय महीयसः । किं पुनः प्रेम सर्वस्व-शालिनां कुलजन्मनाम् ? ॥१९९॥ वलक्षमुदये भानोः, पुण्डरीकं विकस्वरम् । मलिनं पश्य संकोच-मन्दमिन्दीवर पुनः ॥ २०० ॥ ममैवेति तपःसूनोः, किं न चिन्तयसि श्रियः ? । प्रथन्ते मन्मथस्यैव, वसन्तस्य हि संपदः ॥ २०१ ॥ नन्वात्मनीन एवाय-मात्मीयानां खलूदयः । किं नाम्भोधिः स्पृशेल्लक्ष्मी-मुदये मृगलक्ष्मणः ? ॥ २०२ ॥ तदानन्दपदे वत्स !, विषादस्ते न सांप्रतम् । कोऽयं राकानिशीथिन्या-मन्धकारः प्रगल्भते ? ॥ २०३ ॥ इत्यूचिवांसमाह स्म, धराधीशं सुयोधनः । न तथा बाधते तात !, तल्लक्ष्मीर्मामनुत्तरा ॥ २०४ ॥ यथा तस्यां सभायां तैः, पाञ्चालीसचिवैः कृतः । प्रहासो बाधते तं च, मातुलः कथयिष्यति ॥ २०५ ॥ युग्मम् ॥

अथाख्यद्धृतराष्ट्राय, मूलतः सौबलस्तदा । यथा यथा हसन्ति स्म, पाण्डवेयाः सुयोधनम् ॥ २०६ ॥ दुर्योधनोऽभ्यधाद्भूयः, कृष्णया सममाददे । संपदं यदि तेषां तत्, तात ! जीवामि नान्यथा ॥२०७॥ किं गण्यते स जीवन् ? यः, परिक्लिष्टोऽपि जीवति । किमिन्दोरुदयः सोऽपि, यः पयोदैस्तिरोहितः ? ॥२०८॥ खञ्जिताङ्घ्रिर्वने देवा-द्धतविक्रमतेजसः । वरं मृत्युर्मृगाराते-र्न करिभ्यः पराभवः ॥ २०९ ॥ इति व्याहरति क्रोधात्, तस्मिन्नीर्ष्यामलीमसे । धृतराष्ट्रः पुनर्वाच-मुवाच गरिमोचिताम् ॥ २१० ॥ पाण्डवेयैः सहास्माकं, शस्त्राशस्त्रिकथामपि । कुर्वतां खर्वति क्षिप्रं, कीर्तिर्लज्जा तु दीर्घति ॥ २११ ॥ स्ववंश्यैः समरारम्भ-नूतनाम्भोदवारिभिः । करोपि कुरुवंशेऽस्मिन्, किं कलङ्कनवाङ्कुरम् ? ॥ २१२ ॥ वैपी-

१ उज्ज्वलम् । २ अतिवृद्धः ।

यानपि भूपालः, पुत्रंवात्सल्यपिच्छिलः । नूनं जातस्तनूजानां, यच्छिनत्ति न मत्सरम् ॥ २१३ ॥ इति विश्वेऽपि किं विश्वे, परीवादं ददासि मे । तदेतस्मादपस्मारा-द्विनिवर्तितुमर्हसि ॥ २१४ ॥ (युग्मम्) सर्वैरप्यात्मनो मा गाः, सहायैस्त्वमहंयुताम् । नयेयुः पाण्डवेया हि, वीरलक्षानपि क्षयम् ॥ २१५ ॥

इति भाषिणि भूमीन्दौ, जगाद शकुनिः शनैः । एकमौपयिकं वेद्मि, स्वीकारे पाण्डवश्रियः ॥ २१६ ॥ पतन्ति पत्रिणो यस्मि-न्नाङ्गे कस्यापि संगरे । अकीर्तिश्च न विस्फूर्ति-मियर्ति जगति क्वचित् ॥ २१७ ॥ द्यूतक्रीडामहं वेद्मि, न पुनस्तपसः सुतः । तया हरामि तल्लक्ष्मी-मनुजानाति चेद्भवान् ॥२१८॥ धार्तराष्ट्रोऽब्रवीत् तात !, त्वमनुज्ञातुमर्हसि । आविष्कृतसुखोपाया-मिमां मातुलभारतीम् ॥२१९॥ ऊचे नृपतिराहूय, विदुरं गजसाह्वयात् । तस्यालोचेन निश्रेण्ये, स्थितो यस्यास्मि शासने ॥ २२० ॥ खिन्नः सुयोधनोऽप्याह, त्वं[3] चेदालोचयिष्यसि । न दास्यति मतं तेऽसौ, ततो मृत्युर्मम ध्रुवम् ॥ २२१ ॥ मृते च मयि राजेन्द्र !, विदुरेण सुखी भव । उभावपि समेतौ च, भुञ्जीयाथां महीमिमाम् ॥ २२२ ॥ उन्नमय्य मुखं स्नेहात्, पाणिना शिरसि स्पृशन् । अथ रुष्टमभाषिष्ट, धृतराष्ट्रस्तनूद्भवम् ॥ २२३ ॥ लक्ष्मीस्ते हास्तिकप्राज्या, स्वाराज्यस्यापि जित्वरी । धर्मात्मजन्मनो लक्ष्म्याः, किंचनापि न हीयते ॥ २२४ ॥ अथाद्भुता सभा तादृ-ङ्मम नास्तीति खिद्यसे । मा खिद्यस्व तथा कुर्वे, यथा स्याः पूर्णवाञ्छितः ॥ २२५ ॥

तनूजं सान्त्वयित्वेति, धृतराष्ट्रोऽतिशायिनीम् । सभां निर्मातुमादिक्षत्, तत्क्षणं स्थपतीश्वरान् ॥२२६॥ निर्ममे

१ पुत्रवात्सल्येन पिच्छिलः-अम्लकांजीसदृशः मूढ इति यावत्। २ गर्विष्ठताम् । ३ 'तं' प्रतिद्वय० ।

तैस्तपःसूनु–सभासब्रह्मचारिणी । शतद्वारा मणिस्तम्भ–सहस्रसुभगा सभा ॥२२७॥ सर्वसंदेहसंदोह–भिदुरं विदुरं ततः । अक्षैराकारयामास, भूपतिर्हस्तिनापुरात् ॥ २२८ ॥ आगत्य प्रणयप्रह्वः, प्रणम्य चरणाम्बुजम् । क्षितीशितुरुपाविक्षत्, प्राञ्जलिर्विदुरः पुरः ॥ २२९ ॥ सुत-सौबलयोः सर्वं, कैतवाकूतपांसुरम् । ततः क्षोणिपतिस्तस्य, तमालोचमचीकथत् ॥ २३० ॥ अथोचे विदुरस्तीव्र–विषादच्छिदुराशयः । युष्मन्मन्त्रोऽयमन्त्राणि, हहा ! मेऽन्तर्निकृन्तति ॥ २३१ ॥ वचो विद्यानवद्यानां, नान्यथा भवति क्वचित् । कुलारण्यैकदावाग्नि–रुत्थितोऽयं सुयोधनः ॥२३२॥ किं न श्रुतं यथापूर्वं, नल–कूबरयोरपि । अनर्थफल एवाय–मभूद् द्यूतविपद्रुमः ॥ ॥ २३३ ॥

तथा हि कोसलेष्वस्ति, कोशास्तधनदैर्जनैः । अलकाविजयप्रौढ–कौशला कोशला पुरी ॥ २३४ ॥ तस्यामासीद्यशोम्भोभिः, प्लावितारोषभूतलः । कृतवैरिवधूहार–निषेधो निषधो नृपः ॥ २३५ ॥ तस्याभूत् तनयो वैरि–कुलकालानलो नलः । द्वितीयः खण्डिताराति–डम्बरः कूबरः सुतः ॥ २३६ ॥ वेत्रिणाऽऽवेदितोऽन्येद्यु–रुपगम्य प्रणम्य च । दूतः कश्चिन्महीपालं, मीलिताञ्जलिरब्रवीत् ॥२३७॥ विदर्भेषु भुवः कर्ण–कुण्डलं कुण्डिनं पुरम् । देवास्ति देवदेशीय–स्तस्मिन् भीमरथो नृपः ॥२३८॥ तस्य निःसीमरूपश्री–र्दमयन्तीति विश्रुता । तनयाऽस्ति जगन्नेत्र–कुमुदाऽऽनन्दकौमुदी ॥ २३९ ॥ नेत्रपीयूषवापीं तां, निर्माय नियतं विधिः । स एवाहमुतान्योऽस्मि, विस्मयादित्यचिन्तयत् ॥२४०॥ हित्वा जलाशयान् हंसाः, कैलाससरसीमिव । गुणाः स्वयं श्रयन्ति स्म, संश्रयस्पृहयैव ताम् ॥ २४१ ॥ तनोति नित्यमद्यापि, देवी वाचामधीश्वरी । अंक्षावलिच्छ-

१ 'यशोम्भोधिप्ला०' प्रतिद्वय० । २ जपमालामिषात् ।

लात् तस्या, गुणौघगणनामिव ॥२४२॥ शश्वन्मनसि कुर्वाणा, केवलं धर्ममार्हतम् । तत्यजे तद्भयेनेव, पापवातीभिरप्यसौ ॥ २४३ ॥ अनुरूपो वरः कश्चि–द्दुहितुर्मे भवत्विति । स्वयंवरमुपाक्रंस्त, तत्कृते भीमभूपतिः ॥ २४४ ॥ सर्वानाह्वातुमुर्वीशा–नन्यान् वैदर्भभूपतिः । प्राहिणोदपरान् देव–दूतानाकूतकोविदान् ॥ २४५ ॥ अहं तु देवपादाना–मन्तिके मेदिनीभृता । प्रहितः परमात्मेव, स्वस्वरूपे मुमुक्षुणा ॥ २४६ ॥ तन्निजाभ्यां कुमाराभ्यां, सहाभ्येत्य स्वयंवरम् । भूमीन्दो ! भीमभूपाल–मानन्दयितुमर्हसि ॥ २४७ ॥ मेदिनीशोऽथ तद्वाच–मोमिति प्रतिपद्य ताम् । आदिदेश विदर्भेषु, प्रस्थानाय वरूथिनीम् ॥ २४८ ॥ प्रजासंजनितत्रासं, निग्रहीतुमिवान्तकम् । प्रत्यपाचीं दिशं सैन्यैः, प्रतस्थेऽथ प्रजापतिः ॥२४९॥ क्रमात् प्रत्युद्गतः प्रीत्या, विदर्भपृथिवीभुजा । विवेश क्षोणिपद्खण्ड–मण्डनं कुण्डिनं नृपः ॥ २५० ॥ नलं विलोक्य कंदर्प–कल्पद्रुनवकन्दलम् । दैर्भीयति स वैदर्भ–जनोऽन्यानवनीभुजः ॥ २५१ ॥ कुण्डिनेशनिदेशेन, नेदीयः केलिकानने । निवासानग्रहीत् प्रीत्या, महीपतिपताकिनी ॥ २५२ ॥ यथौचित्यधृताकल्पा–स्तेऽथ कल्पद्रुमा इव । मञ्चानुच्चैरलंचक्रुः, क्षोणिशक्राः स्वयंवरे ॥ २५३ ॥ कोशलापतिरप्येकं, माणिक्यमयमद्भुतम् । कुमाराभ्यां समारोह–न्मञ्चमुच्चूलशालिनम् ॥२५४॥ क्षत्रियाणामगाल्लक्ष्मी–र्नक्षत्राणामिव क्षणात् । विश्वभास्वत्युपारूढे, मञ्चपूर्वाचलं नले ॥ २५५ ॥

नवपर्युप्तवैडूर्य–मौक्तिकप्रायभूषणा । मधुव्रतकुलाकीर्ण–पुष्पास्तीर्णेव माधवी ॥ २५६ ॥ हर्षोत्फुल्लचलच्चेटी–कृतालोकध्वनिस्ततः । लक्ष्मीर्मूर्तेव वैदर्भी, विवेशान्तःस्वयंवरम् ॥ २५७ ॥' (युग्मम्) इमां रति-शची-लक्ष्मी–पार्वतीरूपजि-

१ 'प्रजामञ्जरितत्रासं' प्रतित्रयपाठः, तत्र भजायाः मञ्जरितः—विकसितः त्रासः यस्मात्तम् इत्यर्थः । २ तृणीयति ।

त्वरीम् । निर्माय महतो जज्ञे, निर्वादस्य पदं विधिः ॥ २५८ ॥ स्मरे-न्द्र-मुरजि-त्कण्ठे-काललीलाजयी न यत् । अनेन निर्ममे कश्चि-दित्यतर्कि जनैस्तदा ॥ ॥ २५९ ॥ (युग्मम्) मनोभिः सर्वभूपानां, वितन्वद्भिर्गतागतम् । अन्तराध्वा तदङ्गानां, तदा पार्णिधमोऽभवत् ॥ २६० ॥ शृङ्गाररसपूर्णायां, केदारभुवि शालिवत् । जातः स्तम्बकरिस्तस्या-मभिलापो महीभुजाम् ॥२६१॥ तां वीक्ष्य पुण्यतारुण्यां, नलोऽप्यन्तरचिन्तयत् । कात्यायन्या[1] तपस्वी धि-ग्मृडः[2] कामं विडम्बितः ॥२६२॥

अथ तस्याः स्मरोद्रेक-सूत्रितानेकविभ्रमान् । नामग्राहं महीपालान्, दर्शयामास वेत्रिणी ॥ २६३ ॥ देवि ! तैस्तैर्गुणैः सोऽय-मगाधो मगधाधिपः । वपुर्लावण्यकल्लोलै-र्जितानङ्गोऽयमङ्गराट् ॥ २६४ ॥ एप विद्विषतां लुप्त-सत्काङ्गो वङ्गभूपतिः । वारितारिकुरङ्गाक्षी-शृङ्गारोऽयं कलिङ्गराट् ॥ २६५ ॥ असौ मत्तरिपुस्त्रैण-कङ्कणः कुङ्कणेश्वरः । शत्रुवित्रासनाट्यैक-नटोऽयं लाटनायकः ॥२६६॥ प्रत्यर्थिप्रार्थितत्राण-त्राणोऽयं हूणदैवतम् । असौ जनितविद्वेपि-डिम्बः कम्बोजभूमिभुक् ॥ २६७॥ इत्थमस्यास्समेतेषु, सिन्दुवारेष्विवालिनीम् । दृशमुद्वीक्ष्य वैदर्भ्याः, पुनर्दौवारिकी जगौ ॥२६८॥ देवि ! पश्य पुरः सोऽयं, निपधाया विशेपकः । विवेक-विक्रम-न्याय-निधिर्निपधभूपतिः ॥ २६९ ॥ एतौ च पुरतोऽमुष्य, तनयौ नल-कूबरौ । शम्भोरक्षयेवाभूद्, द्विमूर्तिरिव मन्मथः ॥२७०॥ सारिणीवारिवच्चक्षु-स्तस्याः सिञ्चन्नृपद्रुमान् । पपात वृहदावाले, शाखिनीव नले चिरम् ॥ २७१ ॥ उच्चरत्प्रौढरोमाञ्च-मथ सैतदचिन्तयत् । देवः किमागतः कामः, स्वयमेव स्वयंवरम् ? ॥ २७२ ॥ अनेकविरहिस्त्रैण-हत्यापातकिनोऽथवा । कुतस्तस्येदृशी मूर्ति-र्मालतीदलकोमला ? ॥ २७३ ॥ प्रकामकमनी-

१ दुर्गादेव्या । २ शिवः ।

येऽस्मि-न्निर्मितेऽम्भोजेभूर्ध्रुवम् । अनुरूपगुणग्राम-निर्माणे विक्लवोऽभवत् ॥ २७४ ॥ नमोऽस्तु विधये तस्मि-न्नोपकारो ममापरः । कृतार्थयितुकामेन, येन माममयमादधे ॥२७५॥ चिन्तयन्तीदमानन्दा-द्दमयन्ती सवेपथुः । वरमालां निचिक्षेप, नलस्य गलकन्दले ॥ २७६ ॥

तत्पाणिनखमाणिक्य-मयूखैररुणीकृता । गुम्फितेव बभौ पुष्पैः, सोऽनुरागद्रुमोद्भवैः ॥२७७॥ उल्लङ्घ्य भूभृतः सर्वान्, वैदर्भीसरिता श्रिते । नलाम्भोधौ बभूवुस्ते, श्यामास्तत्सैवलैरिव ॥ २७८ ॥ भीमस्य निषधस्यापि, स्वजनप्रीतिगङ्गया । द्विपद्प्रीतिकालिन्द्या, तत्प्रयागीयितं सदः ॥ २७९ ॥ कोशलेश्वर-भीमाभ्यां, यथामनसमुच्चकैः । आरेभे नल-वैदर्भ्यो-र्विवाहमहिमोत्सवः ॥ २८० ॥ अतःप्रभृति जन्मान्तं, प्राणा अपि ममैव ते । इतीव दक्षिणं पाणि-माददातामिमौ मिथः ॥ २८१ ॥ मन्ये विलीय निर्गत्य, पाणिपीडनपर्वणि । तयोरगच्छतामैक्यं, मनसी स्वेदकैतवात् ॥ २८२ ॥ प्रदक्षिणीकृते वह्नौ, हस्तमोचनपर्वणि । भीमो नलाय दत्ते स्म, रत्ना-श्वे-भादिकं बहु ॥ २८३ ॥ निषधापतिरादाय, सवधूकमथात्मजम् । भीमेनानुगतो हर्षा-दचलत् कोशलां प्रति ॥ २८४ ॥

कांचिदप्यवनीं गत्वा, निदेशात् कोशलेशितुः । निवृत्तः कुण्डिनाधीश-स्तनूजामन्वशादिति ॥ २८५ ॥ व्यसनेऽपि भवेर्वत्से, पतिवर्त्मानुवर्तिनी । पतिमेव परं प्राहु-र्दैवतं हि मृगीदृशाम् ॥ २८६ ॥ प्रतिगृह्य नमन्मौलि-रनुशिष्टिमिमां पितुः । नलस्य रथमारुह्य, प्रतस्थे भीमनन्दिनी ॥ २८७ ॥ नलः कान्तावपुःस्पर्श-लालसः किल वर्त्मनि । स्यन्दनं सादिनाऽव-

१ ब्रह्मा । २ वरमाला । ३ नृपान्, पक्षे पर्वतान् ।

न्या-मुद्वातिन्यामनाययत् ॥ २८८ ॥ ज्ञातेऽप्यगोदिकप्रश्ने, गद्गदे तद्वचःप्रियः । किं ब्रवीपीति भूयोऽपि, भैमीं वक्ति स्म नैपधिः॥२८९॥ अनुरागो नले भैम्या, दिनान्ते या ममाधिकः ?। इति ज्ञातुमिवागच्छत्, संध्या सैन्यस्य गच्छतः ॥२९०॥ अपायन्दिग्रहात् काम-माकर्षन्ती विदर्भजाम् । आगात्तमी तमःसैन्यैः, सखीव हृदयंगमा ॥ २९१ ॥ नवं नलकरस्पर्श-चुम्बना-लिङ्गनादिकम् । वेत्रीव दर्शयन् भैम्या, जजृम्भे तिमिरोत्करः ॥ २९२ ॥ तथापि पथि नाऽऽवासा-नग्रहीन्निषधा-पतिः । स्वपुरं प्रति लोकाना-मुत्कण्ठा हि बलीयसी ॥ २९३ ॥

नलो दमयन्त्या वृतः। कोशलां प्रति गमनम्॥

नलेन दमयन्त्या च, व्रजद्भ्यामथ वर्त्मनि । कर्णामृतमिवाश्रावि, रोलम्बतुमुलध्वनिः ॥ २९४ ॥ नलं भैमी बभाषेऽथ, नाथ! नात्र विभाव्यते । रम्या द्रुमावलिः काचित्, तत् किं कोलाहलोऽलिनाम् ? ॥२९५॥ रम्भोरु! तिमिरैः किंचित्, कारणं नावगम्यते । निवेदिते नलेनेति, भैमी भालं स्वमामृशत् ॥ २९६ ॥ तदैवाविरभूत् तस्या-स्तिग्मदीधितिबान्धवः । भ्रामयन् सैन्यलोकस्य, लोचने तिलकोऽलिके ॥ २९७ ॥ ततोऽपृच्छन्नलस्तन्वि !, किमेतदिति विस्मितः । साऽप्युवाच मम स्वामि-ञ्जन्मसब्रह्मचार्यसौ ॥ २९८ ॥ तदुद्योतेन मत्तालि-कुलदंशस्रुतासृजम् । तौ मुनिं कंचिदैक्षेतां, दम्पती प्रतिमास्थितम् ॥ २९९ ॥ गण्डकण्डूमपाकर्तुं, केनचिद्वनदन्तिना । घट्टितोऽयं स्फुटं ध्यान-स्थेमवान् स्थाणुशङ्कया ॥ ३०० ॥ तदीयमदसंसक्ते-र्द्विरेफैरप्यनुद्रुतः । समाधेर्नायमभ्रश्यत्, तद्वहत्यस्य कस्तुलाम् ? ॥ ३०१ ॥ इत्यन्तस्तर्कयन्तौ त-माधाय निरुपद्रवम् । उल्लसत्प्रीतिकल्लोल-विक्लवौ तौ प्रणेमतुः ॥ ३०२ ॥ (त्रिभिर्विशेषकम्) प्रतिमामुपसंहृत्य, मुहूर्त्तेन महामनाः ।

---

१ विषमायाम् । २ पर्वतादिसंबन्धिप्रश्ने । ३ तस्या वचः प्रियं यस्य । ४ रोलम्बः-भ्रमरः । ५ 'भासयन्' एकप्रति० । ६ असृग्-रुधिरम् ।

जगाद स मुनिर्ज्ञानी, धर्मस्थेमकरीं गिरम् ॥ ३०३ ॥ न धर्मो नूतनः कोऽपि, युवयोरुपदिश्यते । ययोर्भूतं भवद्भावि-जन्मधर्मैकबन्धुरम् ॥ ३०४ ॥ चतुर्विंशतिमुद्दिश्य, दमयन्ती जिनेश्वरान् । तपश्चक्रे ददौ रत्न-तिलकांश्च पुरा भवे ॥ ३०५ ॥ तेनास्याः शाश्वतं भाल-स्थलालङ्करणं नवम् । अस्मिञ्जन्मनि मार्तण्ड-विडम्बी तिलकोऽभवत् ॥ ३०६ ॥ जन्मान्तरे तथा सिक्तः, कुमार ! भवताऽप्यसौ । धर्मद्रुः फलितः शश्व-ज्जज्ञे तैस्तैः फलैर्यथा ॥ ३०७ ॥ अधिगम्याऽर्हतं धर्म-मागामिन्यपि जन्मनि । सर्वकल्याणकल्लोल-पारावारौ भविष्यथः ॥ ३०८ ॥ तामित्यमृतसध्रीचीं, तौ निशम्य मुनेर्गिरम् । प्रतस्थाते रथारूढौ, प्रौढप्रह्लादमेदुरौ ॥ ३०९ ॥

पुरीपरीसराऽऽराम-मुपेयुषि नृपे क्रमात् । नलः प्रमोदसंफुल्लः, प्रेयसीमित्यवोचत ॥ ३१० ॥ देवि ! पश्य निजश्रीभिर्जयन्तीममरावतीम् । तव श्वशुरसंतान-राजधानीमिमां पुरीम् ॥ ३११ ॥ इतः क्रीडातडागानि, केलिधात्रीधरा इतः । इतो लीलावनश्रेणि-रितः प्रमददीर्घिकाः ॥ ३१२ ॥ इत्यादि तत्तदुन्मील-त्प्रमोदलहरीजुषः । अदर्शयन्नयादर्शो, विदर्भदुहितुर्नलः ॥ ३१३ ॥ (युग्मम्) वधूवरं पुरस्कृत्य, प्रारब्धविविधोत्सवम् । विवेश निषधः शक्र-संकाशः कोशलापुरीम् ॥ ३१४ ॥ तस्यामुद्वीक्ष्य वैदर्भी, जिनवेश्मानि भूरिशः । पत्या नलेन मेने स्वं, पुमर्थत्रयशालिनम् ॥ ३१५ ॥ समं नलस्य निर्व्रीडं, क्रीडतः कान्तया तया । दिनैर्यामायितं कामं, क्षणदाभिः क्षणायितम् ॥ ३१६ ॥ क्रीडाद्रिललितैर्जातु, जातु काननकेलिभिः । दोलालीलायितैर्जातु, जातु वारिविगाहनैः ॥ ३१७ ॥ कुसुमावचयैर्जातु, जातु मालाभिगुम्फनैः । उत्तंसरचनैर्जातु, नयतः

१ .अमृततुल्याम् । २ क्रीडापर्वताः । ३ 'त्सवाम्' एकप्रति० ।

म्म दिनानि तौ ॥ ३१८ ॥ युग्मम् ॥

अथान्यदा नलं न्यस्य, राज्ये निषधभूपतिः। कूबरं यौवराज्ये च, परिव्रज्यामुपाददे ॥ ३१९ ॥ तस्मिन्राज्ञि प्रजाः सर्वा-स्वरक्षितधनोदये। अध्यारोहन् परां लक्ष्मीं, तपात्यय इवापगाः ॥ ३२० ॥ चूर्णीकृत्य प्रतापाग्नौ, रिपुस्त्रीहारवल्लरीम्। स कामं धवलीचक्रे, यशःप्रासादमात्मनः ॥ ३२१ ॥ प्रतापमिव कल्पाग्नि-संपन्नमसहिष्णवः। ममज्जुर्द्विषदुर्वीश-श्रियस्तत्स्वामिवारिणि ॥ ३२२ ॥ स सैन्यैः साधयामास, भरतार्धमधिद्युतिः। करैरुष्णांशुमालीव, गगनार्धमशेषतः ॥ ३२३ ॥ भरतार्धाधिराजस्य, राजानस्तस्य तेनिरे। संभूय भूरिसंभार-मभिषेकं हरेरिव ॥ ३२४ ॥

कूबरः क्रूरचेतास्तु, तस्य राज्याभिलाषुकः। रन्ध्राण्यन्वेषयामास, मृगारेरिव जम्बुकः ॥ ३२५ ॥ नलस्तु सह तेनैव, बान्धवप्रीतिबन्धुरः। नित्यं दुरोदरक्रीडां, तनोति विशदाशयः ॥ ३२६ ॥ अन्येद्युस्तु गम-चर-बन्ध-मोक्षसुधीरपि[1]। कूबरं देवनैर्दीव्या-ञ्जेतुं नालं नलोऽभवत् ॥ ३२७ ॥ नलस्य काङ्क्षितो नाक्षः, पतति स्म कथंचन। मारयामास तच्छारीन्, भूयोभूयस्तु कूबरः ॥ ३२८ ॥ नगर-ग्राम-खेटादि, हारयन्नभवन्नलः। गललक्ष्मीः क्रमात् पक्षे, शशीव विशेदेतरे[2] ॥ ३२९ ॥ विषसाद जनः सर्वः, कूबरस्तु मुदं ययौ। "दुःखी ध्वान्ते हि लोकोऽय-मुलूकः पुनरुन्मदः" ॥ ३३० ॥

आकर्ण्य लोकहाकार-कोलाहलमुदित्वरम्। अभ्यधान्नलमभ्येत्य, सभयं भीमनन्दिनी ॥ ३३१ ॥ स्वामिन्! कोऽयं विपर्यासः, संप्रत्यभिनवस्तव ?। विनोदमात्रमेवैत-द्दुरोदरमुदीरितम् ॥ ३३२ ॥ त्वादृशा अपि चेदस्मिन्, मज्जेयुर्व्यसनार्णवे।

नलस्य राज्याभिषेकः। कूबरेण सह द्यूतक्रीडा च।

१ (गमचरावक्षद्यूतप्रभेदौ,) गमे च चरे च बन्धे च मोक्षे च निपुणः। २ कृष्णे।

ततस्तारयिता कः स्या-न्मज्जतां मन्दमेधसाम्? ॥३३३॥ प्रतिपक्ष इवाक्षोऽयं, तवाद्य प्रातिलोमिकः। इयत्यपि गते तस्मा-दपाकुरु दुरोदरम् ॥ ३३४ ॥ अभिषिञ्च स्वयं राज्ये, भ्रातरं कूबरं वरम्। प्रसह्य हृतराज्यस्तु, बाढमुत्प्रासयिष्यसे ॥ ३३५॥ गिरमित्यादिकामुच्चै-रुच्यमानां नलस्तया। न विन्दति स्म गम्भीरै-र्वेदीव निशितां शृणिम् ॥ ३३६ ॥ अथाप्तपुरुषैर्भैमी-निदेशाज्जगदे नलः। वृथैव पृथिवी किं नु, हार्यते कृच्छ्रतोऽर्जिता? ॥ ३३७ ॥ किं न द्यूतं परित्यज्य, जीवयस्यनुजीविनः?। शुष्के हि सरसि ग्रीष्मे, कियन्नन्दन्ति दर्दुराः? ॥ ३३८ ॥ इत्येषामप्यनादृत्य, वचश्चिक्रीड नैषधिः। "विपर्येति भृशं पुंसां, बुद्धिः क्रुद्धे हि वेधसि" ॥ ३३९ ॥

नलस्ततोऽवरोधेन, समं भैमीमहारयत्। तारकाभिः सह प्रातः, कौमुदीमिव चन्द्रमाः ॥ ३४० ॥ हारयामास भूपालः, शरीराभरणान्यपि। वसन्तस्य व्ययारम्भे, कुसुमानीव चम्पकः ॥ ३४१ ॥ जगर्ज जगतीनाथ-श्रीलाभे कूबरोऽधिकम्। दुर्धराः सरितामोघाः, प्राप्तौ ह्यम्भोदसंपदः ॥ ३४२ ॥ राज्यभ्रंशे भुवो भर्तुः, प्रजाश्चक्रन्दुरुच्चकैः। कुलायभूरुहो भङ्गे, पक्षिणामिव पङ्क्तयः ॥ ३४३ ॥

कूबरो नलमित्यूचे, मदीयां मुञ्च मेदिनीम्। पिता दत्ते स्म ते राज्यं, ममेदानीं तु देवनः ॥ ३४४ ॥ गर्वं कमपि मा कार्षी-र्न दूरे दोर्भृतां श्रियः। इत्युक्त्वाऽम्बरखण्डैक-मात्रश्रीरचलन्नलः ॥ ३४५ ॥ मया जिताऽसि मा यासी-र्मदन्तःपुरमाश्रय। नलानुयायिनीं भैमी-मित्यवोचत कूबरः ॥३४६॥ ततस्तमूचिरे पौराः, किमेतां प्रतिषिध्यसि?। मृत्युमाप्नोति

१ दुर्धरहस्तीव। २ 'नाथः' प्रतिद्वय०। ३ नीडवृक्षस्य निवासवृक्षस्येति यावत्।

शार्दूल्याः, पतीयन् मृगधूर्तकः ॥ ३४७ ॥ मातृवद्दयितां भ्रातु-स्तत्त्वमेतां महासतीम् । प्रणम्य रथमारोप्य, प्रेषय प्रेयसा सह ॥ ३४८ ॥ इत्युक्तस्तैर्नमस्कृत्य, वैदर्भी रथमार्पयत् । अलं तव रथेनापि, नलेनेति न्यषेधि सः ॥ ३४९ ॥ नृपागारात् पुरस्कृत्य, प्रेयसीमतिधीरधीः । नलोऽचलन्मुखाम्भोजात्, पदार्थ इव भारतीम् ॥ ३५० ॥ प्रियानुव्रज्य यातस्य प्रस्थितस्य शनैःशनैः । प्रयाणपटहैर्जात-माक्रन्दैरनुजीविनाम् ॥ ३५१ ॥ लीलाकुरङ्गक-क्रीडा-सारिका-केलिबर्हिणः ! । गृहपारावताः ! सद्म-कीर-वापीसितच्छदाः ! ॥ ३५२ ॥ प्रेयांसमनुगच्छन्ती-मनुजानीत मां मनाक् । वदन्तीति तदा भैमी, कस्यार्द्रं नाकरोन्मनः ? ॥ ३५३ ॥ (युग्मम्) पुरे पौरवधूनेत्रैः, प्रारब्धप्रावृषि क्षणात् । तस्याः प्रियानुगामिन्याः, प्रमसुः प्रीतिवीरुधः ॥ ३५४ ॥ धिग्विधिं यो नलस्यापि, दशामेतामदर्शयत् । न धिग्वाऽस्य स्वभावोऽयं, चन्द्रमस्यपि दृश्यते ॥ ३५५ ॥ चिकीर्षेयं तवासीचेत्, किं विधे ! भरतार्धभुक् । चक्रे नलस्त्वया ? यद्वा, "महाऽऽरोहो महापदे" ॥ ३५६ ॥ यां मर्तीं शापशङ्कीव, करैः सूरोऽपि नास्पृशत् । सहते सा कथं भैमी, पादचङ्क्रमणक्रमम् ? ॥३५७॥ विक्कूबरं कुतोऽस्यापि, स्थैर्यमेष्यन्ति संपदः । भ्रातरं भ्रातृजायां च, य एवं निरवासयत् ॥ ३५८ ॥ इति व्रजति वैदर्भी-सहाये नलभूपतौ । अन्तर्नगरमुच्चेरु-र्नागराणां गिरस्तदा ॥ ३५९ ॥ (पञ्चभिः कुलकम् ।)

तदा भैमीक्रमस्पर्श-पूतंमन्येव मेदिनी । धावत्पौरजनोद्भूत-रजोव्याजाद्दिवं ययौ ॥ ३६० ॥ पौरामात्यादिभिर्लोकै-रुपनीतानि कोटिशः । निराकुर्वन्नलो याना-न्यगच्छन्नगराद्बहिः ॥ ३६१ ॥ सह प्रस्थास्नवः कामं, कुलामात्याः क्षमाभृता । तैस्तैर्वाक्यैः समं पौरै-र्न्यवर्त्यन्त कथंचन ॥ ३६२ ॥ दुःखादभ्येत्य वैदर्भ्या, विभाव्य मुखमुज्ज्वलम् । पौर्यः पुनर्यशुर्धाम,

द्यूते हारितस्य नलस्य प्रवासः ॥

तत्सतीत्वविकस्वराः ॥ ३६३ ॥ भीमात्मजानिभाल्लक्ष्मी-मिवादाय नलोऽचलत् । गतेऽस्मिन् सर्वमप्यासी-न्निर्लक्ष्मीकं कुतोऽन्यथा ? ॥ ३६४ ॥ पुरीपरिसराराम-चारिमाद्यैर्विनोदयन् । चिदर्भदुहितुश्चक्षु-र्नलोऽगच्छत् पुरः पुरः ॥ ३६५ ॥ भैम्याः पुराऽभवत् प्रीति-रातपत्रैर्न तावती । पत्या धृतोत्तरीयायाः, सातपे पथि यावती ॥ ३६६ ॥ पार्थिवस्तां पथि श्रान्तां, यत्र तत्रोपवेशिनीम् । निर्व्याजं वीजयामास, स्वेदिनीं सिचयाञ्चलैः ॥३६७॥ क्वापि श्रमेण विश्रान्तां, संवाह्य चरणौ चिरम् । पार्थिवः प्रार्थयांचक्रे, पुरस्ताद्गमनाय ताम् ॥ ३६८ ॥ तां क्वचिन्मार्गखेदेन, तरुच्छायानिपादिनीम् । नलोऽब्जिनीदलानीतं, पयः शीतमपाययत् ॥ ३६९ ॥ क्वचिच्च सत्त्वमालम्ब्य, पादसंवाहनोद्यता । भूपालेन बलाद्भैमी, स्मितपूर्वमवार्यत ॥ ३७० ॥ अतीयतुः फलैस्तैस्तै-स्तौ मध्याह्नं कृताह्निकौ । सेव्यमानौ सरस्तीरे, शिशिरैरूर्मिमारुतैः ॥ ३७१ ॥ अन्योऽन्यनिबिडाऽऽश्लेष-वीतचङ्क्रमणक्रमौ । तौ लतामण्डपे क्वापि, निन्यतुः पथि यामिनीम् ॥ ३७२ ॥

अन्येद्युरुन्मदोत्फाल-व्यालव्याकुलितोदराम् । एकच्छत्रद्रुमच्छाया-मीयतुस्तौ महाटवीम् ॥ ३७३ ॥ तामवस्थामिवोष्णांशु-स्तयोरीक्षितुमक्षमः । विधौ क्रोधादिवाताम्रो, जगामास्तनगान्तरम् ॥ ३७४ ॥ अधावन्नभितो दिग्भ्य-स्ततोऽस्तिमिरवीचयः । वनान्तगहनध्वान्त-बन्धुस्नेहोत्सुका इव ॥ ३७५ ॥ कान्तारसरितं कांचि-द्गत्वा धौताऽऽस्य-दोःक्रमौ । ततो भूपश्च भैमी च, यथेच्छं पपतुः पयः ॥ ३७६ ॥ विश्रामाय लतावेश्म-क्रोडे कङ्केल्लिपल्लवैः । नलः शिलातले रम्ये, क्वापि तल्पमकल्पयत् ॥ ३७७ ॥ वृन्तैरपि वपुर्ग्लानि-र्वैदर्भ्या मा स्म भूदिति । उत्तरीयपटप्रान्तं, स व्यधत्तोत्तरच्छदम् ॥ ३७८ ॥

---

१ निभात्-मिषात् । २ चारिमा-सौन्दर्यम् । ३ व्यालः-सर्पः । ४ विस्तृताः ।

समुच्चार्य ततः पञ्च-परमेष्ठिनमस्क्रियाम् । तौ स्म संविशतस्तस्मिन्, मिथः, संसक्तदोर्लतौ ॥ ३७९ ॥

अथाभाग्यभरैर्भैम्याः, क्ष्मापालोऽन्तरचिन्तयत् । गन्तव्याया भुवः क्रान्तो, विन्दुरस्त्यर्णवः पुरः ॥ ३८० ॥ देवीनव्यश्च गन्तास्मि, तस्य पारीणतां कुतः ? । पथि स्वच्छन्दचारस्य, प्रत्यूहो हि स्त्रियो महान् ॥ ३८१ ॥ तद्याम्येतां परित्यज्य, वनेऽस्मिन् सुखशायिनीम् । प्रातर्गच्छेदियं वेश्म, पितुर्वा कूबरस्य वा ॥ ३८२ ॥ इत्यालोचयतस्तस्य, निद्राति स्म विदर्भजा । "मार्गसंपातखिन्नानां, निद्रा ह्यभ्यर्णवर्तिनी" ॥३८३॥ ततः शनैः परीरम्भ-मुद्रां[१] निर्भिद्य नैषधिः । कृष्टुकामो निजं भैमी-भुजसंवलितं भुजम् ॥ ३८४ ॥ गाढविश्रम्भसंरम्भा-दतिस्वच्छन्दशायिनीम् । तामजागरयन्नूचे, नीचकैर्निषधापतिः ॥ ३८५ ॥ (युग्मम्) मुञ्च मुञ्च नलं मुग्धे, चण्डालं कुलपांसनम् । स्पर्शेनाप्यस्य पापस्य, पातकैरुपलिप्यसे ॥ ३८६ ॥ सुप्तामेकाकिनीमेव, वने निश्वस्तमानसाम् । प्रेमामृतस्रवन्तीं य-स्त्वामपि त्यक्तुमिच्छति ॥ ३८७ ॥ कल्पद्रुमभ्रमान्मुग्धे, श्रिताऽसि विषपादपम् । तदनामुहि निःशेषं, फलं तस्यात्मकर्मणः ॥ ३८८ ॥ धिग्धातः ! कुर्वता मूढ !, वैदर्भीनलसंगमम् । हंसीकाकोलयोः कोऽयं, त्वयाऽकारि समागमः ? ॥ ३८९ ॥ यदि वा सर्वदैवासि, त्वमनौचित्ययोगकृत् । अमेध्यदोहदश्चक्रे[२], केतक्या (क्याः) कथमन्यथा ? ॥३९०॥ इत्याकृष्य भुजं भूयो, मन्दं मन्दं नलोऽवदत् । देवीकान्तमिदं गात्र-श्छेत्तुं वाहो ! प्रसीद मे ॥ ३९१ ॥ यद्वा पूर्वं त्वमेवास्या, व्यापृतोऽसि करग्रहे । जातस्त्वमेव सर्वाङ्ग-सौरभ्यप्रथमातिथिः ॥ ३९२ ॥ तेन मन्येऽहमेतस्यां, दाक्षिण्यं दक्षिणस्य ते । सदा सध्रीचि[३] किं नाम, नलेऽसि त्वमदक्षिणः ? ॥३९३॥

१ आलिङ्गनमुद्राम् । २ विष्ठाया, दोहदः । ३ सहचारिणि ।

तद्विधायानुरोधं त्व-मसिधेनुमलंकुरु । क्षुरिकायामिति स्वैरं, क्षितीशः पाणिमक्षिपत् ॥ ३९४ ॥ तामूचे च मया कोशः, समं राज्येन तत्यजे । तत्ते केयं मदीयायाः, कोशेऽप्यत्यागवासना ? ॥ ३९५ ॥ मम पाणिग्रहे यद्वा, त्वमपि त्यागशङ्किनी । मूढासि न हि भैमीव, भवत्यप्यङ्घ्रिशृङ्खला ॥ ३९६ ॥ इत्याकृष्य स्वतेजोभि-स्तमःकल्पान्तशिल्पिभिः । हसन्तीमिव तां चक्रे, पटसंश्लेषिणीं नलः ॥३९७॥ पुनर्जगाद तां देवी-क्रान्तस्य मम वाससः । छेदाय क्षुरिके ! देवि !, प्रसीदायं कृतोऽञ्जलिः ॥३९८॥ यद्वा स्त्रीजातिकारुण्य-विक्लवा न व्यवस्यति(सि) । कारुण्यं किं हि निस्त्रिंश-सुतायास्तव ? कथ्यताम् ॥३९९॥ इति चिच्छेद मेदस्वि-पतदश्रुकणाङ्कितम् । मन्युसंभारनिर्भिन्न-चेताश्चेलाञ्चलं नलः ॥ ४०० ॥ अब्रवीच दृशौ देव्याः, कामं निद्रे ! निमीलयेः । मा स्म भून्मम हिञ्जीरः, स्निग्धमस्या विलोकितम् ॥४०१॥ अस्मि त्यक्तस्त्वया देवि !, न व्यलीकशतैरपि । निर्व्यलीकामपि त्वां तु, हा ! दुरात्मा त्यजाम्यहम् ॥ ४०२ ॥ मन्ये मे नेदमप्याग-स्त्वय्यागस्त्वं गमिष्यति । नाविर्भवति कौमुद्यां, कज्जलस्यापि कालिमा ॥४०३॥ इयमापृच्छ्यसे देवि !, प्रणामोऽयमपश्चिमः । त्वामपि क्षेप्तुमिच्छामि, नात्मीयव्यसनार्णवे ॥ ४०४ ॥ सतीव्रतपवित्रायाः, कोऽपि नोपद्रवस्तव । परं पूजैव ते गेहे, पितुर्वा श्वशुरस्य वा ॥ ४०५ ॥ इत्युक्त्वा तत्पटप्रान्ते, लिखति स्म निजासृजा । अक्षराणि क्षरद्बाष्प-बिन्दुक्लिन्नाननो नलः ॥ ४०६ ॥

वामतोऽयं वटेनाध्वा, विदर्भामुपतिष्ठते । दक्षिणेन पुनः स्मेरैः, किंशुकैः कोशलां पुरीम् ॥४०७॥
देवि ! तत्र व्रजेर्यत्र, कुत्रापि प्रातिभाति ते । अहं तु खलु न क्वापि, मुखं दर्शयितुं क्षमः ॥४०८॥

---

१ "मामक्यास्तव केयं तत्" इति प्रतिद्वयपाठः । २ (निगडः) बन्धनशृङ्खलेति यावत् ।

पर्णालिं लिखित्वेति, चचाल वलिताननः । पश्यन् भैमीं तथा सुप्तां, मन्दं मन्दं रुदन्नलः ॥ ४०९ ॥ पुनर्व्यावृत्य वैदर्भी—मुखमालोक्य निर्भरम् । जगाद दैवदुष्कर्म—विद्धमर्मा महीपतिः ॥ ४१० ॥ हा विधे ! विहितेयं चे—दीदग्विश्वातिशायिनी । तत्किमेतावतीं दीना—मवस्थां लम्भिता त्वया ? ॥ ४११ ॥ नान्योऽपि स्वयमारोप्य, छिनत्ति बदरीमपि । फलिताशेषसंकल्पां, किं पुनः कल्पवल्लरीम् ? ॥ ४१२ ॥ यदि वा जड एवासि, मन्येऽम्भोजनिवासतः । तेनेन्दुमपि निर्माय, कदर्थयसि राहुणा ॥४१३॥ मम विज्ञापनां सर्वाः, शृण्वन्तु वनदेवताः । दुर्बुद्धिविधिवद्देव्या—मस्यां मा भूत निर्दयाः ॥४१४॥ तथा कुरुत केनापि, यथोपद्रूयते न हि । मार्गं च विन्दति प्रात—रसौ स्वजनवेश्मनः ॥ ४१५ ॥ इत्युदीर्य मुहुर्जायां, पश्यन्नावृत्तकन्धरः । गच्छति स्म नलस्ताव—द्यावदागाददृश्यताम् ॥ ४१६ ॥ वन्यसत्त्वोद्भवः शङ्के, स्यादस्याः कोऽप्युपद्रवः । तल्लतावृत एवैतां, रक्षाम्येकाङ्गशायिनीम् ॥ ४१७ ॥ प्रबोधसमये प्रात—र्गमिष्यामि यथारुचि । गच्छत्वेषाऽपि केनापि, मदावेदितयोः पथोः ॥ ४१८ ॥ इत्यालोच्य निवृत्त्याशु, नलस्तस्थौ लतान्तरे । तथाभूतां च तां दृष्ट्वा, पुनरन्तरचिन्तयत् ॥ ४१९ ॥ अहो नलस्य शुद्धान्त—मसूर्यंपश्यमीदृशम् । वासवेश्मनि शेते च, कीदृश्युच्चूलशालिनी ॥ ४२० ॥ हा दुरात्मन्नल ! क्षिप्रं, कथं यासि न भस्मसात् । इत्याद्यालोचयत्यस्मिन्, विरराम विभावरी ॥४२१॥ निलीनमिव तत्कालं, नलस्य मनसोऽन्तरे । सर्वतोऽपि दिगन्तेषु, तुच्छत्वमगमत् तमः ॥४२२॥ उदेति न रविर्याव—द्यावज्जागर्ति न प्रिया । साश्रुनेत्रो नलस्ताव—दगाम त्वरितक्रमम् ॥ ४२३ ॥

१ 'नाम्नो' प्रतिद्वय० । २ मूढदैववत् ।

नलेन कृतो दमयन्त्या त्यागः ॥

गच्छन्नच्छिन्नसंचार-मथ तस्मिन् वनान्तरे । धूमस्तोमं स वर्द्धिष्णुं, विन्ध्यस्पर्द्धिनमैक्षत ॥४२४॥ भीमास्तदन्तरुत्तस्थु-र्ज्वालाः कालानलोपमाः । निर्गता रत्नगर्भायाः, गर्भरत्नप्रभा इव ॥ ४२५ ॥ क्षणेन व्यानशे सर्वं, वनं तद्दावपावकः । मानसं कोशलाभर्तु-रिव शोकहुताशनः ॥ ४२६ ॥ जन्तूनां दह्यमानाना-माक्रन्दानुपकर्णयन् । मानुषीं गिरमश्रौषी-न्नलो गच्छंस्त-दन्तिकम् ॥ ४२७ ॥ ऐक्ष्वाक ! नलभूपाल !, जगत्यार्तैकबान्धव ! । दावाग्निदह्यमानाङ्गं, महात्मन्नक्ष रक्ष माम् ॥ ४२८ ॥ तस्या वाचोऽनुसारेण, नलः प्रहितलोचनः । वल्लीवलयमध्यस्थं, ददर्शैकं भुजङ्गमम् ॥ ४२९ ॥ तं सोऽभ्यधाद्भुजङ्गेन्द्र !, मम नामान्वयौ कथम् । जानासि त्वं ? कथं चेत्थं, ब्रूषे मनुजभाषया ? ॥४३०॥ आह साहिर्मनुष्योऽह-मभूवं पूर्वजन्मनि । तत्संस्काराद्भवेऽप्यस्मिन्, मानुषी मे सरस्वती ॥ ४३१ ॥ निर्बाधमवधिज्ञान-मप्यस्ति मम भूपते ! । करस्थमिव पश्यामि, तेन विश्वं चराचरम् ॥४३२॥ तत्रायस्व जगत्त्राण-सत्र ! धूमध्वजादितः । त्वां प्रत्युपकरिष्यामि, निरपेक्षमपि क्षणात् ॥४३३॥ तेनेत्युक्ते भुजङ्गेन, नलः कारुण्यनीरधिः । अन्तर्लतावितानं स्व-मुत्तरीयमलम्बयत् ॥ ४३४ ॥ स भोगी वपुषा वृक्षं, वल्लीव तद्वेष्टयत् । उदपानाद्वरत्रांव-चकर्षोर्ध्वं च नैषधिः ॥ ४३५ ॥ भूतले तृणकाष्ठादि-रचिते तममुञ्चत । यावदुर्वीपतिस्ताव-द्दश्यते स करेऽमुना ॥ ४३६ ॥ नलः क्षोणीतले पाणि-माच्छोट्य तमपातयत् । विषादाचाब्रवीत् सेयं, तव प्रत्युपकारिता ॥ ४३७ ॥ यद्वा हन्यान्मृगारिस्तं, य एवोन्मीलयेद्दृशौ । य एव पाययेत् क्षीरं, स्वजात्याऽपि स दश्यते ॥ ४३८ ॥ इत्यादि निगदन्नेव, तदीयविषवैभवात् । अधिज्यधनुराकारं, कलयामासिवान्नलः ॥ ४३९ ॥ तया कुब्जतयाऽत्यन्तं, राजा वैराग्य-

१ पृथिव्याः । २ रज्जुवत् ।

मीयिवान् । जीवितव्यानपेक्षोऽभू-द्व्रतादानमनाः क्षणात् ॥ ४४० ॥

ततोऽपश्यदहिस्थाने, नलः कन्दलितप्रभम् । तमःपद इवोद्योतं, दिव्यमूर्तिं पुरः सुरम् ॥ ४४१ ॥ जल्पति स्म स भूपालं, कथं वत्स ! विषीदसि ? । हितैकबद्धहेवाक-स्तवास्मि निषधः पिता ॥४४२॥ तदा व्रतमुरीकृत्य, तपस्तप्त्वाऽतिदुस्तरम् । कृतानशनकर्माऽन्ते, ब्रह्मलोके सुरोऽभवम् ॥ ४४३ ॥ परिज्ञायावधिज्ञाना-दिमं ते व्यसनोदयम् । आयातोऽहमिदं सर्वं, मम मायाविजृम्भितम् ॥ ४४४ ॥ तदात्मनीनमेवैत-द्विद्धि वैरूप्यमात्मनः । अनेनानुपलक्ष्यं त्वां, नोपद्रोष्यन्ति शत्रवः ॥ ४४५ ॥ अधुनैव व्रतादान-स्पृहामपि हि मा कृथाः । भोक्तव्यमेव तेऽद्यापि, तावदेवावनीतलम् ॥ ४४६ ॥ यदा वत्स ! परिव्रज्या-समयस्ते भविष्यति । ज्ञापयिष्यामि दैवज्ञ, इवाभ्येत्य स्वयं तव ॥ ४४७ ॥ फलं तु श्रीफलस्येद-मिमां चापि करण्डिकाम् । गृहाण द्वयमप्येतत्, कामं रक्षेः प्रयत्नतः ॥ ४४८ ॥ यदा च रूपमास्थातु-मात्मीयं ते स्पृहा भवेत् । निर्भिद्य श्रीफलं दिव्य-दुकूलानि तदाऽऽकृपेः ॥ ४४९ ॥ अस्याः करण्डिकायाश्च, हाराद्याभरणोत्करम् । क्षणादमीभिरामुक्तै-र्निजं रूपमवाप्स्यसि ॥ ४५० ॥ (युग्मम्) इत्युक्त्वा तद्द्वयं देवः, समर्प्य पुनरब्रवीत् । किं भ्राम्यसि वने ? स्थानं, नयामि त्वां यियासितम् ॥ ४५१ ॥

नलोऽप्युवाच मां तात, सुंसुमारपुरे नय । इति जल्पन् स्वमैक्षिष्ट, तस्य द्वारि पुरस्य सः ॥ ४५२ ॥ यावच्चचाल विस्मेर-मानसः पुरसंमुखम् । तावद्बहलमश्रौषी-ज्जनकोलाहलं नलः ॥ ४५३ ॥ पलायध्वं पलायध्वं, सर्वतस्त्वरितं जनाः । क्षणादित्यश्ववाराणां, ध्वनिं शुश्राव नैषधिः ॥४५४॥ किमेतदिति संचिन्त्य, यावत् तस्थौ क्वचिन्नलः । तावन्निर्मुक्तदृग्मार्गः,

पितृदेवकृतो नलस्य रूपपरावर्तः, सुंसुमारपुरे गमनं च ॥

प्रतिकारैरपि द्रुतम् ॥ ४५५ ॥ तिर्यक्प्रवृत्तदानाम्भः–स्नपितप्रतिमानकः । स्वच्छायायामपि क्रोध–क्रूरः परिणमन्मुहुः ॥ ४५६ ॥ नभस्वन्तमपि स्वैरं, विधुन्वन्नासनस्पृशम् । मुहुर्विहङ्गमस्यापि, धावन् विस्फुरतः पुरः ॥ ४५७ ॥ मठा-ट्टालक-शाला-ट्ट–मन्दिरादीनि पातयन् । कल्पान्तमातरिश्वेव, भञ्जन्नुद्यानपादपान् ॥४५८॥ प्राकारगोपुरारूढै–र्वीक्षितश्चकितैर्जनैः । निशिताऽऽराकरैः पश्चा–दारिकैः परिवारितः ॥ ४५९ ॥ दत्तझम्पान् द्रुमान्तेभ्यो, हिंसन् हस्तिपकाग्रणीन् । अग्रतः कृष्टबा-ल-स्त्री–वृद्धः कौतुकिभिर्नरैः ॥ ४६० ॥ फूत्कारसीकराऽऽसार–कृतझञ्झासमीरणः । धूननोद्धूतसिन्दूर–पूरपिञ्जरिताम्बरः ॥ ४६१ ॥ सप्तस्रोतःस्रवद्दान–पङ्किलीकृतभूतलः । गतो मातङ्गरूपेण, समवर्तीव मूर्तताम् ॥ ४६२ ॥ दूरतो दधिपर्णेन, राज्ञाऽनुगतपद्धतिः । नलेनोन्मूलितालानः, कोऽप्यदृश्यत कुञ्जरः ॥ ४६३ ॥ (नवभिः कुलकम्) तं कस्मिन्नपि नागेन्द्रं, वशीकर्तुमनीश्वरे । ऊर्ध्वीकृत्य भुजं राजा, व्याजहारेति भारतीम् ॥ ४६४ ॥ वारणेन्द्रमिमं व्यालं, यः कोऽपि कुरुते वशे । अवश्यं तस्य वश्यत्वं, लक्ष्मीमेतां नयाम्यहम् ॥ ४६५ ॥

इत्युक्तवति भूपाले, नलः कल्लोलिविक्रमः । अस्पृशन्निव पादाभ्यां, भुवं वेगादधावत ॥ ४६६ ॥ निवर्तस्व निवर्तस्व, कुब्ज ! माऽऽविश माऽऽविश । इति लोकैर्निषिद्धोऽपि, नलः सिंह इवाविशत् ॥ ४६७ ॥ नलो नागमभाषिष्ट, लेष्टुना प्रणि-हत्य तम् । रे ! रे ! मातङ्ग एवासि, स्त्री-बालादीनुपद्रवन् ॥ ४६८ ॥ तदेतत्सर्वमुत्सृज्य, ममैवानुपदीभव । अयमग्रेऽस्मि ते दान–पृष्टवग्रहदुर्ग्रहः ॥ ४६९ ॥ इत्युक्तः सोऽप्यधाविष्ट, क्रोधादन्धंभविष्णुदृक् । साक्षाद्विन्ध्य इवोत्पात–वातैर्धूतो नलं

१ हस्तिपकैः । २ प्रतिमानः–गण्डस्थलाधोभागः । ३ कल्पान्तवायुः । ४ यम इव । ५ मृत्पिण्डेन । ६ अवग्रहः–प्रतिबन्धः ।

प्रति ॥ ४७० ॥ धावञ्जातु भ्रमञ्जातु, लेष्टुभिर्जातु ताडयन् । पतञ्जातु लुठञ्जातु, वचोभिर्जातु भर्त्सयन् ॥ ४७१ ॥ जातु पुच्छान्तमालम्ब्य, चक्रवभ्रमयन्मुहुः । नलस्तैस्तैः प्रकारैस्तं, खेदयामास दन्तिनम् ॥४७२॥ (युग्मम्) हर्षकोलाहलैर्जातु, जातु हाहारवोत्करैः । जनानां पश्यतामासी–च्छब्दाद्वैतं पुरे तदा ॥४७३॥ खिन्नस्यापि भृशं कोपाद्, कुञ्जरस्यानुधावतः । क्षिपति स्म पुरः क्षिप्र–मुत्तरीयपटं नलः ॥ ४७४ ॥ पपात पुरतो रूप–मित्यस्मिन् परिणामिनः । नताग्रवपुषः स्कन्ध–मास्कन्द्दन्तिनो नलः ॥ ४७५ ॥ ततः कण्ठवरत्रायां, प्रक्षिप्य चरणौ नलः । आस्फालयन् करैः कुम्भे, कुञ्जरं तमसान्त्वयत् ॥ ४७६ ॥ पश्चादेत्य प्रतीकारै–रादायोल्लालितां सृणिम् । नलो दन्तावलेन्द्रं त–मन्वालानमचालयत् ॥ ४७७ ॥

मायाकुब्जः सुरः कोऽपि, किमेष भुवमागतः ? । यश्चक्रे हस्तिमल्लस्य, प्रतिमल्लमिमं वशे ॥ ४७८ ॥ इत्यन्तर्विस्मितो राजा, स्वयमारुह्य गोपुरम् । रत्नदाम न्यधात् कण्ठे, तस्याधस्तादुपेयुषः ॥ ४७९ ॥ कुब्जावदानमेदस्वि–हर्षवाष्पायितेक्षणाः । बभूवुर्जयशब्दैक–मुखराः सर्वतः प्रजाः ॥ ४८० ॥ श्रमानुत्तानमालाने, गजमाकलयन्नलः । सर्वपौरजनानां तु, प्रमोदमधिमानसम् ॥ ४८१ ॥ ततः सलीलमुत्तीर्य, कुब्जः कक्षावरत्रया । अभ्यर्णे दधिपर्णस्य, न्यस्यन्नदुपाविशत् ॥ ४८२ ॥ अलंकारान् दुकूलानि, तुष्टस्तस्मै ददौ नृपः । स्वान्तिकेऽस्थापयच्चैनं, गौरवेण गरीयसा ॥ ४८३ ॥ अभ्यधात् संविधासीनं, तमन्येद्युर्महीपतिः । कलेयं गजशिक्षायां, कुब्ज ! कौतस्कुती तव ? ॥४८४॥ कश्चासि ? क च वास्तव्यः ?, कुत्र चाभिजनस्तव ? । कला नियतमन्याऽपि, काऽपि संभाव्यते त्वयि ॥ ४८५ ॥ कुब्जेनाभिदधे राज–ञ्जन्मभूर्मम कोशला । सर्वः स्वजनवर्गोऽपि, श्व-

१ श्रमेण नम्रमुखम् । २ समीपे स्थितम् ।

नलेन गजो वशीकृतः॥

सत्रैव वर्तते ॥ ४८६ ॥ हुण्डिकः सूपकारोऽस्मि, नलस्य पृथिवीपतेः । स एव हि कलाः सर्वाः, प्रीतिपात्रे मयि न्यधात् ॥ ४८७ ॥ किं न वेत्ति स वा सूर्य-पाकां रसवतीं भुवि । अहं वा तत्पदोपास्ति-प्रसादाद्वेद्मि नापरः ॥ ४८८ ॥ सोऽधुना कूबरे बन्धौ, क्षोणिं मंक्षु दुरोदरे । हारयित्वा सदारोऽपि, जगाम जनवर्द्धनम् ॥ ४८९ ॥ विपेदे तत्र स त्वां तु, कलानिलय-मागमम् । श्रितोऽहमविशेषज्ञं, मायिनं न तु कूबरम् ॥४९०॥ आकर्ण्य दधिपर्णस्तां, नलमृत्युकथामथ । रुरोद प्रेतकृत्यं च, चकार सपरिच्छदः ॥ ४९१ ॥

जातुचित् सूर्यपाकायां, रसवत्यां कुतूहली । हुण्डिकाय नृपः शालि-प्रमुखं सर्वमार्पयत् ॥४९२॥ स स्थालीरातपे न्यस्य, विद्यां चैवस्वतीं स्मरन् । चक्रे रसवतीं दिव्या-मशेषरसपेशलाम् ॥ ४९३ ॥ तया च भोजयामास, राजानं सानुजीविनम् । प्रीतश्चास्मै ददौ सोऽपि, वस्त्रालंकरणादिकम् ॥ ४९४ ॥ लक्षमेकं च टङ्कानां, ग्रामपञ्चशतीमपि । सर्वमेतद्विना ग्रामान्, हुण्डिकोऽप्यग्रहीत्तदा ॥ ४९५ ॥ ततो भूयोऽपि भूपालः, प्रीतिमांस्तमभाषत । कुब्ज ! सर्वं ददे तत्ते, यदन्यदपि वाञ्छसि ॥ ४९६ ॥ इत्युक्तः क्षोणिपालेन, कुब्जः स्मेरेक्षणोऽवदत् । राजन् ! यावद्भुवः खण्डं, भुजादण्डः प्रशास्ति ते ॥४९७॥ द्यूतं मद्यं मृगव्यं च, तावति प्रतिषिध्यताम् । इत्यस्य वचसा सर्वं, तच्चकार धराधवः ॥ ४९८ ॥ (युग्मम्) तत्रैव परमं राज-प्रसादमधिजग्मुषः । वसतस्तस्य भूयांसि, हायनान्यतिचक्रमुः ॥ ४९९ ॥

परेद्यवि सरस्तीरे, द्रुमच्छायां निषेदुषः । कुब्जस्याभ्यर्णमभ्येत्य, विप्रः कश्चिदुपाविशत् ॥ ५०० ॥ सोऽथ सर्वाङ्गमा-

१ सूर्यसंबन्धिनीम् ।

लोक्य, कुब्जमाकूणितेक्षणः । जगौ श्लोकद्वयीमेतां, नलनिन्दाविशारदाम् ॥ ५०१ ॥

निर्घृणानामलज्जानां, निःसत्त्वानां दुरात्मनाम् । नलस्यैव धुरीणत्वं, सुप्तां तत्याज यः प्रियाम् ५०२

सुप्तामेकाकिनीं स्निग्धां, विश्वस्तां दयितां सतीम् । गतः किं न वने त्यक्तु–काम एव न भस्मसात्? ५०३

इत्युपश्रुत्य तद्गीतं, कुब्जः पर्यश्रुलोचनः । तमभ्यधादहो रक्त–कण्ठोऽसि द्विजसत्तम ! ॥ ५०४ ॥ गीतेनानेन ते काम–मुधत्करुणवीचिना । ममाप्येताः कृताः पश्य, चक्षुषोरश्रुविप्रुषः ॥ ५०५ ॥ ततः कथय कोऽसि त्वं ?, कुतश्चागम्यतेऽधुना ? । दुर्धियश्च नलस्याय–मुदन्तः क्व त्वया श्रुतः ? ॥५०६॥ सोऽप्याख्यत् कुशलाख्योऽस्मि, कुण्डिनाच्चाहमागमम् । तत्रा–श्रौषमिमां सर्वां, नलभूमीपतेः कथाम् ॥५०७॥ कुब्जोऽभ्यधात्ततो विप्र–द्विकाशविशदे दृशौ । श्रुता ब्रह्मन्! पुराणीयं, भैमी-त्यागावधिः कथा ॥ ५०८ ॥ ततः परं यदातेने, भीमभूर्विरहातुरा । तत्स्वरूपं समस्तं मे, निवेदयितुमर्हसि ॥ ५०९ ॥

जगादाथ द्विजो भैमीं, परित्यज्य गते नले । निशि प्रभातप्रायायां, स्वप्नमेवं ददर्श सा ॥ ५१० ॥ यदहं पत्रलं बद्ध–मञ्जरीकं सपट्पदम् । फलितं चूतमारूढा, तत्फलान्यादमिच्छया ॥५११॥ तं चाभ्येत्य करी कश्चि–दकस्मादुदमूलयत् । अहं च तत्परिभ्रष्टा, पतिताऽस्मि भुवस्तले ॥ ५१२ ॥ ततो जागरिता प्रात–रदृष्ट्वा प्रियमन्तिके । दिक्षु चक्षुर्निचिक्षेप, भीमभूर्भयविक्लवा ॥ ५१३ ॥ अचिन्तयच्च मे दैव–मद्यापि प्रातिलोमिकम् । व्यालाकीर्णे वनान्तेऽस्मिन्, मां प्रियोऽपि यदत्यजत् ॥ ५१४ ॥ यद्वा सलिलमानेतु–मास्यक्षालनहेतवे । प्रयातः सरसि क्वापि, प्राणेशो मे भविष्यति ॥ ५१५ ॥ रन्तुं

दधिपर्णसमीपे तस्थुषो नलस्य द्विजेन कथितो दमयन्तीवृत्तान्तः।

विद्याधरी काचित्, काऽपि वा वनदेवता । सुभगं तमपाहार्षीत्, सोऽन्यथा न जहाति माम् ॥ ५१६ ॥ नर्मणा वा किमस्त्येष, प्रतत्यन्तरितः क्वचित् । तत्समुत्थाय पश्यामि, क्व गन्ता स ममाग्रतः ? ॥ ५१७ ॥ इत्युत्थाय प्रतिक्षोणी-रुहमुद्वीक्षणादपि । निजं कान्तमपश्यन्ती, रुदत्युच्चैर्जगाद सा ॥ ५१८ ॥ एह्येहि त्वरितं नाथ !, याति मे हृदयं द्विधा । चिरं न खलु नर्मापि, शर्मदं भवति क्वचित् ॥ ५१९ ॥ इत्याद्यैर्वचनैः कान्ते, दृग्गोचरमनीयुषि । विदर्भदुहितेत्यन्तः, स्वप्नस्यार्थं व्यचारयत् ॥५२०॥ यश्चूतो मत्प्रियः सोऽयं, राज्यं पुष्पफलादिकम् । तद्भोगश्च फलास्वादः, षट्पदाश्च परिच्छदः ॥५२१॥ मूलादुन्मूलनं यच्च, चूतस्य वनदन्तिना । मदीयप्रेयसो राज्या-द्भ्रंशनं कूबरेण तत् ॥ ५२२ ॥ यच्चाहं पतिता चूतात्, प्रियेण विरहः स मे । तत्स्वप्नेनामुना नूनं, वल्लभो दुर्लभोऽधुना ॥ ५२३ ॥ इत्यालोच्य ययौ मूर्च्छां, दुःखसंभारनिर्भरा । उच्चैश्च प्राप्तचेतन्या, रुरोद व्यलपच्च सा ॥ ५२४ ॥ हा ! नाथ ! किं तवाभूवं, हताऽहं भारहेतवे ?। स्थूले अपि निजे शृङ्गे, भाराय वृषभस्य किम् ? ॥ ५२५ ॥ न दृष्टः क्वाप्ययं पन्थाः, सात्त्विकानां विवेकिनाम् । यदीदृशि वने पाणि-गृहीती त्यज्यते प्रिया ॥ ५२६ ॥ नैष ते यदि वा दोषो, मत्कर्मैवापराध्यति । भवेन्मतिविपर्यास-स्त्वादृशामपि किं क्वचित् ? ॥ ५२७ ॥ जल्पं जल्पमितिप्रायं, तारं पूत्कुर्वती मुहुः । अरोदयद्वने भैमी, श्वापदान् पादपानपि ॥ ५२८ ॥ पटप्रान्ते चिरात् कान्य-प्यक्षराणि निरीक्ष्य सा । वाचयामास सानन्दं, दध्यौ चान्तःस्मिताशया ॥ ५२९ ॥ दिष्ट्याऽद्याप्यस्मि तच्चेतः-केतकीकाननालिनी । ददौ मे गमनाऽऽदेशं, यत्स्वयं लिखिताक्षरैः ॥ ५३० ॥ तन्न्यग्रोधाध्वनाऽनेन, पितुर्वेश्म व्रजाम्यहम् । नारीणां

---

१ हास्येन । २ अभावे सति ।

पतिशून्यानां, पितैव हृदयार्तिहृत् ॥ ५३१ ॥ पतिं विना तु तद्गेहे, वसन्त्या निस्तनूरुहः । साध्व्या अपि कुरङ्गाक्ष्याः, पराभूतिः पदे पदे ॥ ५३२ ॥

इत्यालोच्य पितुर्गेहं, प्रत्यचालीन्नलप्रिया । कांदिशीका दृशौ दिक्षु, प्रक्षिपन्ती मुहुर्मुहुः ॥ ५३३ ॥ दर्भसूचिव्यथोद्भूतशोणितारुणितक्रमा । पाटितोभयजङ्घा च, क्षुद्रकैर्बदरीवणैः ॥ ५३४ ॥ मलीमसांशुका स्वेद-मेदुरा रेणुरूषिता । । विकीर्णकुन्तला वक्त्र-मभितस्तरलेक्षणा ॥५३५॥ प्रेयोविरहपीडाभि-र्निगीर्णनिखिलव्यथा । दरिद्रस्त्रीव सा मार्गे, त्वरितं त्वरितं ययौ ॥ ५३६ ॥ (त्रिभिर्विशेषकम्) जाङ्गुलीमिव भोगीन्द्राः, सिंहीमिव वनद्विपाः । वह्निज्वालामिव व्याघ्रा-स्तां सतीं वीक्ष्य दुद्रुवुः ॥ ५३७ ॥ यान्ती चाचिन्तयद्यावत्, सार्थः कश्चिद्भवेद्यदि । तेन साकमरण्यस्य, पारमस्य व्रजाम्यहम् ॥ ५३८ ॥ तावत्पुरः पराभोग-भासुरं लोकसंकुलम् । संकटं शकटव्रातैः, सार्थं कंचिदुदैक्षत ॥ ५३९ ॥ (युग्मम्) तमासाद्याभवद्भैमी, यावत् स्वस्थमना मनाक् । तावत् स रुरुधे हक्का-मुखरैर्दस्युभिः क्षणात् ॥५४०॥ सा तानूर्ध्वभुजाऽवादी-दरे रे! यात तस्कराः! । आरम्भोऽस्मिन् मया त्राते, सार्थेऽनर्थफलो हि वः ॥५४१॥ तामवज्ञाय भूतात्ता-मिव वातकिनीमिव । यदा लुण्टयितुं सार्थ-स्तैर्बलादुपचक्रमे ॥ ५४२ ॥ ध्वस्तद्विपदहंकारान्, हुंकारान् साऽमुचत्तदा । सिंहीरवैरिवामीभि-स्ते कुरङ्गा इवानशन् ॥ ५४३ ॥ ततो नः पात्यसौ नूनं, काऽप्यस्मत्कुलदेवता । इति सार्थपतिर्भक्त्या, तां ससार्थजनोऽनमत् ॥५४४॥ पृच्छति स्म च

१ 'निवसन्त्यासनूरुहः' प्रतिद्वय० । २ निगीर्णा-अन्तर्भाविता निखिला व्यथा यया सा । ३ जाङ्गुली विषविद्या । ४ 'पुराभोग०' प्रतित्रय० ।

द्विज-कथितो दमयन्ती-वृत्तान्तः॥

कल्याणि !, काऽसि त्वं महिमैकभूः ? । अस्मिन्नेकाकिनी किं वा, वने भ्राम्यसि निर्जने ? ॥ ५४५ ॥ ततोऽस्मै बान्धवायेव, भारत्या दैन्यशून्यया । भीमभूरानलद्यूता-न्निजामकथयत् कथाम् ॥ ५४६ ॥ रक्षणान्नलपत्नीत्व-ज्ञानाच्चैप विशेपतः । प्रीतिमन्तर्वहन् भैमीं, निन्ये पटकुटीं निजाम् ॥५४७॥ स्नान-भुक्त्यादिना तत्र, हृतश्रान्तिमधारयत् । स तैस्तैरुपचारैस्ता-माराध्यदेवतामिव ॥ ५४८ ॥

अथ प्रववृते प्रावृ-ड्गर्जामुरजनिस्वनैः । जनेभ्यः शिखिनां नृत्तं, दर्शयन्ती वने वने ॥ ५४९ ॥ ततो मुशलधाराभिः, पुष्करावर्तकोपमाः । विरामरहितं मेघा-स्त्रिरात्रं ववृपुस्तराम् ॥ ५५० ॥ तदा शकटसंचार-भङ्गमञ्जरितोर्जितः । चिक्रीड विपिने पङ्कः, क्षोभयन् पथिकव्रजान् ॥ ५५१ ॥ चिरावस्थानमाशङ्क्य, सार्थस्य नलवल्लभा । केनाप्यविदिता वृष्टि-पर्यन्ते निर्ययौ ततः ॥ ५५२ ॥ यान्ती च पुरतो रौद्र-मञ्जनाचलसोदरम् । फेत्कारनिर्यदास्योल्का-निरस्तसतडिद्घनम् ॥५५३॥ नरास्थिभूषणं दंष्ट्रा-करालं कर्त्रिकाकरम् । साक्षादिव यमं भैमी, कंचिदैक्षिष्ट राक्षसम् ॥ ५५४ ॥ (युग्मम्) भाषते स्म स तां भीति-कल्लोलतरलेक्षणाम् । क्व यासि ? भक्षयिष्यामि, त्वामेष क्षुधितश्चिरात् ॥५५५॥ ततः सौष्ठवमालम्ब्य, जगाद नलगेहिनी । निशम्य मद्गिरं कुर्या-स्तुभ्यं यदिह रोचते ॥ ५५६ ॥ न नाम परमार्हत्याः, किंचिन्मृत्युभयं मम । "मृत्योर्हि संभृतानेक-सुकृतो नाभिशङ्कते" ॥५५७॥ किं तु मामनिशं पूत-मानसां परमेष्ठिभिः । पराङ्गनां स्पृशन्नेव, भद्र ! यास्यसि भस्मसात् ॥ ५५८ ॥ राक्षसस्तामवष्टम्भ-मयीमाकर्ण्य तद्गिरम् । ऊचे कल्याणि ! तुष्टोऽस्मि, सत्त्वेनैव तवामुना ॥ ५५९ ॥

---

१ 'लक्षणा०' प्रतिद्वय० । २ 'माराध्यन् देव०' प्रतित्रय० । ३ उल्का-तेजोविशेपः ।

ब्रूहि तत्किमिदानीं ते, मनोऽभीष्टं करोम्यहम् । निशम्येति वचस्तस्य, कुण्डिनेशसुताऽवदत् ॥५६०॥ यदि तुष्टोऽसि मे सत्यं, राक्षस ! व्यन्तरेश्वर ! । तदाचक्ष्व कदा भावी, पत्या मम समागमः ? ॥५६१॥ विलोक्यावधिना सद्य-स्तामवोचन्निशाचरः । अतिक्रम्य परित्याग-दिनाद्द्वादशहायनीम् ॥ ५६२ ॥ पितृधाम्नि स्थितायास्ते, भविता पतिसंगमः । तदादिशसि चेत्त्वां, तत्र वेगान्नयाम्यहम् ॥ ५६३ ॥ (युग्मम्) अथोचे भीमभूर्भर्तृ-समागमनिवेदनात् । किं नाम नोपचक्रे मे, त्वया दाक्षिण्यसिन्धुना ? ॥ ५६४ ॥ किं त्वन्यपुरुषैः साकं, क्वचिन्नैव व्रजाम्यहम् । तद्गच्छ स्वस्ति ते भूया-द्धर्मगृह्यो भवेश्चिरम् ॥५६५॥ ततः प्रेङ्खत्प्रभाजाल-मालोलमणिकुण्डलम् । दर्शयित्वा निजं रूपं, तस्यै रात्रिंचरोऽगमत् ॥ ५६६ ॥

अथ द्वादशवर्षान्ते, विज्ञाय पतिसंगमम् । भैमी सतीव्रतोत्तंसा-नग्रहीदित्यभिग्रहान् ॥ ५६७ ॥ रक्तवासांसि ताम्बूलं, कुसुमाभरणानि च । विकृतीश्च ग्रहीष्येऽह-मर्वाग्न प्रियदर्शनात् ॥ ५६८ ॥ सा चलन्ती पुरो नाना-फलितद्रुमशालिनीम् । चेतःस्वास्थ्यकरीं प्राप, कंदरां कस्यचिद्गिरेः ॥५६९॥ तत्राम्भोदागमं नेतु-मवस्थानं चकार सा । प्रतिमां मृन्मयीं शान्ते-स्तत्कोणे च न्यवीविशत् ॥ ५७० ॥ स्वयंगलितपुष्पैस्ता-मर्चयन्त्यनुवासरम् । धर्मध्यानामृताम्भोधि-स्नानसानन्दमानसा ॥ ५७१ ॥ चतुर्थादि तपः शश्व-द्वितन्वाना निरत्ययम् । कुर्वाणा पारणां वृक्ष-फलैः स्वरसपातिभिः ॥ ५७२ ॥ एकाकिन्यपि निर्भीका, स्मरन्ती चार्घमर्पणम्[1] । परमेष्ठिनमस्कार-मन्त्रं सा कालमत्यगात् ॥ ५७३ ॥ (त्रिभिर्विशेषकम्)

सोऽथ सार्थपतिः सार्थे, तामपश्यन्नितस्ततः । मा स्म भूत् क्वचिदक्षेम-मित्यानुपदिकोऽभवत् ॥ ५७४ ॥ कंदरां तां

१ पापनाशनम् ।

क्रमादेत्य, भैमीं कुशलशालिनीम् । अर्चयन्तीं जिनस्यार्चां, स निध्याय दधौ मुदम् ॥ ५७५ ॥ नत्वा चोपाविशत् पार्श्वे, भीमजाऽपि समाप्य ताम् । देवार्चां स्वागतप्रश्न-पूर्वकं तमवार्तयत् ॥५७६॥ सोऽथ पप्रच्छ तां कस्य, देवस्यार्चेयमर्च्यते ? । साऽपि शान्तिजिनेशस्य, षोडशस्येत्यचीकथत् ॥५७७॥ आकर्ण्यैतां तयोर्वाच-मन्योन्यालापशालिनीम् । आसन्नाश्रमवास्तव्या-स्तत्रायान्ति स्म तापसाः ॥ ५७८ ॥ सार्थेशाय ततो भैमी, तेषु संनिधिवर्तिषु । विशुद्धमार्हतं धर्म-महिंसाद्यमुपादिशत् ॥ ५७९ ॥ सोऽप्युन्मीलन्मनोभाव-स्त्रुट्यत्कर्मततिस्ततः । भैमीमेव गुरूकृत्य, तं धर्मं प्रत्यपद्यत ॥५८०॥ ऊचे चाहं पुरा नाम्ना, वसन्तोऽस्म्यधुना पुनः । सत्यीकृतस्त्वया धर्म-तिलकस्यास्य सौरभैः ॥५८१॥ तत्रान्तरे च धाराभिः, सगोत्राभिः शरोत्करैः । वर्षितुं कलितोत्कर्ष-मारेभे स्तनयित्नुभिः ॥५८२॥ ताभिरम्भोदधाराभि-राहतास्ते तपस्विनः । वव्रयामः पयः क्वेत-दित्यभूवन् भयाकुलाः ॥५८३॥ ततो मा भैष्ट मा भैष्ट, तापसा ! इति वादिनी । कुण्डिनेशात्मजा कुण्डं, यष्ट्या तान् परितोऽकरोत् ॥५८४॥ उच्चैरूचे च यद्यस्मि, सती यद्यस्मि चार्हती । ऋजुस्वान्ता च यद्यस्मि, माऽस्मिन् वर्षतु तद्घनः ॥५८५॥ तत्तथैवाभवत्तेऽथ, तापसा इत्यचिन्तयन् । काचिद्देवीयमन्यस्याः, शक्ति-रूपे न हीदृशी ॥५८६॥ वृष्टेरुपरमे धर्मं, निन्दन्तः स्वं दयोज्झितम् । विस्मितास्ते तदाख्यातं, धर्मं सम्यक् प्रपेदिरे ॥ ५८७ ॥ पुरमुद्दामरश्रीकं, तत्र सार्थपतिर्व्यधात् । चैत्यं च शान्तिनाथस्य, काम्याकारमकारयत् ॥५८८॥ यतः पञ्च शतान्यस्मिन्, प्रत्यबुध्यन्त तापसाः । तेन ख्यातिमगाद्धात्र्यां, तत्तापसपुराख्यया ॥ ५८९ ॥ नैगमप्रमुखाः सर्वे, पुरुपार्थनिकेतने । तत्राभ्येत्य वसन्ति स्म, स्वैरमुच्चावचाः प्रजाः ॥५९०॥

---

१ दृष्ट्वा । २ मेघैः । ३ 'सर्वेपु०' प्रतिद्वय० ।

स च सार्थपतिस्ते च, तापसाः सा च भीमसूः। प्रजास्ताश्चावसंस्तस्मि–न्नर्हद्धर्मपराश्चिरम् ॥ ५९१ ॥

अन्यदा जितमार्तण्ड–मण्डलद्युतिरैक्ष्यत। मध्यरात्रे शिरस्यद्रे–रुद्द्योतो नलकान्तया ॥ ५९२ ॥ उत्पतन्तः पतन्तश्च, तत्राऽथ विहगा इव। विस्मयस्मेरमैक्षन्त, सुरा–सुर–नभश्चराः ॥ ५९३ ॥ तत्संपातभवैः कोला–हलैर्जागरिताः क्षणात्। तानुत्पश्यद्दृशः पौरा, अप्यपश्यन् सविस्मयाः ॥ ५९४ ॥ ततः सार्थपतिर्भैमी, ते च सर्वे तपस्विनः। पौरा अप्यखिलाः शैल–शिरस्यारुरुहुः क्षणात् ॥ ५९५ ॥ सिंहकेसरिणः साधो–र्नवकेवलसंपदः। कुर्वतो महिमानं ते, ददृशुः सुर–खेचरान् ॥५९६॥ ततः कन्दलितानन्दा, नत्वा केवलिनं पुरः। भैमी च सार्थवाहश्च, पौराश्च समुपाविशन् ॥ ५९७ ॥ तदानीं श्री-यशोभद्र–सूरयो गुरवो मुदा। तं केवलिनमानम्य, न्यविक्षन्त तदन्तिके ॥५९८॥ यथौचित्यमथासीने, जने सुर–नरादिके। कर्ममर्माविधं धर्म–देशनां केवली व्यधात् ॥ ५९९ ॥ संसारेऽस्मिन्न नित्यानि, जीवित यौवनं श्रियः। सक्तैरेष्वेव हा मूढै–र्मानुषं जन्म हार्यते ॥ ६०० ॥ अस्य मानुष्यकल्पद्रोः, फलं मुक्तिसुखं परम्। उत्तिष्ठध्वं जनास्तस्मै, विमुच्य मृगतृष्णिकाम् ॥ ६०१ ॥ देशनान्ते पुनः स्माह, केवली संशयच्छिदे। तेषां तपस्विनां तस्य, सार्थेशस्य च धीमतः ॥ ६०२ ॥ यदास्य-द्दमयन्तीयं, धर्मतत्त्वमनुत्तरम्। तत्तथैव न कर्तव्यः, संशयोऽस्मिन्मनागपि ॥ ६०३ ॥ इयं हि धार्मिकी सत्य–पूतवाक् पर-मार्हती। सती सर्वजनीना[1] च, जातु जल्पति नान्यथा ॥ ६०४ ॥ दस्युनाशादिरम्भोद–वृष्टिस्तम्भादिकोऽपि च। कस्को नाम प्रभावोऽस्याः, प्रत्यक्षोऽभून्न वः पुरा ॥ ६०५ ॥ अस्मिन्नपि वने व्याघ्र–भिल्ल-भल्लूकसंकुले। प्रभावपरिपीताप–न्निर्वि-

१ सर्वलोकहितकारिणी।

शङ्का वसत्यसौ ॥ ६०६ ॥ इत्येतया मुनेस्तस्य, गिरा संवेगभाग्भृशम् । प्रीतो ययाचे विमल-मतिः कुलपतिर्व्रतम् ॥ ६०७॥ मुनिरूचे यशोभद्र-सूरिरेष महामतिः । दीक्षां दास्यति ते भद्र !, गुरुर्यस्मान्ममाप्यसौ ॥६०८॥ ततः कुलपतिर्भूयो, बभाषे स्मेरविस्मयः । गृह्णीते स्म कथं नाम, प्रव्रज्यां भगवन् ! भवान् ?॥ ६०९ ॥

अथाख्यत् केवली राजा, कोशलायां नलोऽभवत् । यदीया दमयन्तीयं दयिता पतिदेवता ॥६१०॥ कनीयान् कूबरो नाम, बान्धवस्तस्य विश्रुतः । शास्तीदानीं तदीयं यो, राज्यमुज्ञागरोर्जितः ॥ ६११ ॥ तस्याहं तनयः सिंह–केसरी सांप्रतं त्वहम् । राज्ञः केसरिणः भृङ्गा-पुरीशस्य यशस्विनः ॥ ६१२ ॥ पाणौकृत्य सुतां बन्धु–मतीं गच्छन् पुरीं निजाम् । रम्यामुपेत्यकामस्य, गिरेरध्यासिषि क्रमात् ॥ ६१३ ॥ (युग्मम्) भाग्यैरत्र यशोभद्र–सूरीनेतानवन्दिषि । चक्रुश्च देशनामेते, संसारानित्यतामयीम् ॥६१४॥ तदन्ते मे कियत् स्वामि–न्नायुरित्युदिता मया । ज्ञात्वा पञ्च दिनानीति, ज्ञानिनो मां बभाषिरे ॥ ६१५ ॥ ततो मृत्युभयादीन–मुखं संभ्रान्तलोचनम् । मां विलोक्यावदन्नेते, विश्ववात्सल्यवार्धयः ॥ ६१६ ॥ मा भैषीर्वत्स मा भैषी–र्व्रतमादत्स्व संप्रति । जन्म-मृत्युभयं हन्ति, कृतमेकाहमप्यदः ॥ ६१७ ॥ तदैवैतद्गिरा लक्ष्मीं, प्रियां बन्धुमतीमपि । हित्वाऽमीषां पदाम्भोज–मूलेऽहं जगृहे व्रतम् ॥ ६१८ ॥ एतदादेशतः शैल–शृङ्गमारूढवानिदम् । निहत्य घातिकर्माणि, केवलालोकमासदम् ॥ ६१९ ॥ इत्युक्त्वा सृत्रयन् योग–निरोधं स मुनीश्वरः । निरंशीकृत्य कर्माणि, जगाम परमं पदम् ॥ ६२० ॥ तत्कायस्याग्निसंस्कारं, पुण्यक्षेत्रे व्यधुः सुराः । व्रतं कुलपतिः पार्श्वे, यशोभद्रस्य चाग्रहीत् ॥ ६२१ ॥

२ पर्वतस्यासन्नां भूमिम् ।

वैदर्भीं याचमानां च, व्रतं स गुरुरब्रवीत् । त्वं भोगान् भोक्ष्यसेऽद्यापि, तद्दीक्षा ते न युज्यते ॥ ६२२ ॥

प्राग्भवे हि नलो राजा, मम्मणोऽभून्महीपतिः । त्वं तु वीरमती नाम, तस्याभूर्दयिता किल ॥ ६२३ ॥ युवाभ्यां जातु गच्छद्भ्यां, क्रीडया मृगयावने । सार्थेन सार्धमागच्छन्, संमुखं मुनिरैक्ष्यत ॥६२४॥ कोपादशकुनं सोऽय–मिति स्वैः पत्तिभिस्तदा । तं संग्राह्य निवृत्त्याशु, युवामागमतं गृहम् ॥ ६२५ ॥ कथंचिदपि विस्मृत्य, कोपमाकार्य तं मुनिम् । क्व गन्तासि ? कुतश्चागा ? इत्यवार्तयतं युवाम् ॥ ६२६ ॥ ततस्तद्गिरमाकर्ण्य, शमामृततरङ्गिताम् । सान्द्रानन्दं तमभ्यर्च्य, मुनिं व्यसृजतं युवाम् ॥ ६२७ ॥ युवाभ्यां यत्तदा रुद्धः, साधुर्द्वादशनाडिकाः । तेनायं विरहो जज्ञे, युवयोर्द्वादशाब्दिकः ॥ ६२८ ॥ वर्षस्य द्वादशस्यान्ते, तेन पत्या समेयुषी । पुनस्त्वं तादृशानेव, भोगान् वैदर्भि ! भोक्ष्यसे ॥ ६२९ ॥ गतायामथ यामिन्यां, यशोभद्रगुरुर्गिरेः । उत्तीर्यालंकरोति स्म, तत्तापसपुरं पुरम् ॥६३०॥ शान्तेश्चैत्यं प्रतिष्ठाय, स तस्मिन् देशनाम्बुधिः । सम्यक्त्वारोपणं चक्रे, पौरलोकस्य कोटिशः ॥ ६३१ ॥ विदर्भजन्मनस्तत्र, निवसन्त्या गुहागृहे । अतीयाय जिनोपास्ति–परायाः सप्तहायनी ॥ ६३२ ॥

अन्यदा कश्चिदभ्येत्य, तद्गुहाद्वारमध्वगः । सुधामुचमिमां वाच–मवोचन्नलवल्लभाम् ॥ ६३३ ॥ वैदर्भि त्वत्पतिर्नोति–दूरे देशे मयेक्षितः । उत्सुकोऽहं तु गन्तास्मि, सार्थो मे न प्रतीक्षते ॥ ६३४ ॥ इत्युदीर्य प्रयाति स्म, स पान्थस्त्वरितक्रमम् । साऽपि तच्छब्दमाकर्ण्य, गुहातो निरगाज्जवात् ॥६३५॥ भद्र ! भद्र ! त्वया सोऽयं, क्व दृष्ट ? इति भाषिणी । पान्थं तमनुधावन्ती, भीमभूर्विपिनेऽपतत् ॥ ६३६ ॥ गच्छन्त्याश्च पुरस्तस्या, निःस्वाया इव शेवधिः । पान्थः सोऽगाद-

दृश्यत्वं, ततो न्यावर्तते स्म सा ॥ ६३७ ॥ कंदरायाः पुनर्मार्ग-मज्ञात्वा गह्वने वने । भीमभूरुभयभ्रष्टा, दुःखक्लिष्टेत्यचिन्तयत् ॥ ६३८ ॥ अहो ! किमपि मे दैव-मपकारि पदे पदे । येनाभवदिदानीं मे, न पान्थो न च कंदरा ॥ ६३९ ॥ किं करोमि क्व गच्छामि, घोरेऽस्मिन् पतिता वने ? । भावी मृत्युरपि श्रेया-नार्तध्यानस्पृशोऽत्र मे ॥६४०॥ इत्याकुलमनास्तस्मि-न्नश्रुपूराऽऽविलेक्षणा । ययौ तस्थावुपाविक्ष-न्नलुठन्नलपच्च सा ॥६४१॥ भ्राम्यन्तीं च वने काचि-त्तामपश्यन्निशाचरी । मा स्म गा भक्षयिष्यामि, भवन्तीमित्युवाच च ॥६४२॥ तां वीक्ष्य भयसंभ्रान्ता, बभाषे भीमनन्दिनी । नलादन्यं पुमांसं चेत्, स्पृशत्यपि न मे मनः ॥६४३॥ ममार्हन्नेव देवश्चे-द्गुरवश्चेत् सुसाधवः । रतिश्चेज्जैनतत्त्वे च, हताशा भव राक्षसि ! ॥ ६४४ ॥ (युग्मम्) इति तस्या गिरा मन्त्र-वाचेव च्युतविक्रमा । ययौ नक्तंचरी नत्वा, "सत्यो हि दुरतिक्रमाः" ॥६४५॥ ततो दत्तजलभ्रान्ति-र्भूमिमतिसिकताचिताम् । क्वचिद्गिरिनदीं कांचि-द्दमयन्ती जगाम सा ॥ ६४६ ॥ तामनम्भसमालोक्य, सा जगाद तृषार्दिता । मनो मे यदि सम्यक्त्व-सौरभ्यसुरभीकृतम् ॥ ६४७ ॥ तदेतस्यां पयः प्रादु-रस्तु द्रागमृतोपमम् । इत्युक्त्वा पार्ष्णिना स्वैरं, महीतलमताडयत् ॥६४८॥ (युग्मम्) साऽभूत् कूलंकषाऽन्वर्थ-नामाऽम्भोभिस्तदुत्थितैः । स्नात्वा पीत्वा पयश्चास्यां, भैमी निन्ये परिश्रमम् ॥ ६४९ ॥ पुरो यान्ती च सा खिन्ना, न्यग्रोधस्य तले क्वचित् । निविष्टा पथिकैः कैश्चित्, सार्थाऽऽयातैरभाष्यत ॥ ६५० ॥ भद्रे ! काऽसि ? किमत्रासि, वटस्याधो निषेदुषी ? । ईदृगद्भुतरूपा त्वं, काचिन्नु वटदेवता ? ॥ ६५१ ॥ अथाह भीमभूर्नाहं, देवता किं तु मानुषी । वणिक्पुत्री समं पत्या, यान्त्यभूवं पितुर्गृहे ॥६५२॥

---

१ उदकमिच्छन्ती । २ नदी ।

सुप्तामेकाकिनीमत्र, मां संत्यज्य पतिर्ययौ । बान्धवा ! गमयध्वं मां, तत्तापसपुराध्वना ॥ ६५३ ॥ तेऽप्यूचुर्यत्र सूर्योऽस्त-मेत्यध्वाऽस्य पुरस्य सः । तं तु दर्शयितुं नाल-मिदानीमुत्सुका वयम् ॥ ६५४ ॥ आगताः स्म इहाम्भोऽर्थं, सार्थादायासि तत्र चेत् । कुत्रापि वसतिस्थाने, नयामस्त्वां सुखेन तत् ॥ ६५५ ॥ साऽथ तैः सह सार्थेऽगा-द्धनदेवस्य तेऽपि ताम् । कथामाख्याय तत्प्रोक्तां, सार्थनेतुरदर्शयन् ॥६५६॥ सार्थेशोऽपि ममासि त्वं, सुता नेष्यामि तद् सुखम् । त्वां स्थाने वसतीत्युक्त्वा, स्नानादिभिरनन्दयत् ॥ ६५७ ॥

तामारोप्याद्भुते याने, सार्थेशोऽथाचलत् प्रगे । नीत्वाऽचलपुरद्वारि, क्रमाचैनां मुमोच सः ॥ ६५८ ॥ तत्राध्वचङ्क्रम-क्लान्ता, वाप्यां कस्यांचिदप्यसौ । प्रविश्य जलपानादि, विधाय बहिरागमत् ॥६५९॥ आकाशपतितेवासौ, पावयन्ती दृशा पुरम् । किंकर्तव्यजडा वापी-द्वारवेद्यामुपाविशत् ॥ ६६० ॥ ऋतुपर्णो जनाकर्ण्य-कीर्तिस्तत्र नृपस्तदा । चन्द्रोपमयशाश्चन्द्र-यशाश्चास्य प्रियाऽभवत् ॥ ६६१ ॥ तस्याश्चेट्यस्तदा वाप्यां, नीरमाहर्तुमागताः । तामपश्यञ्जगचेतो-हारिरूपां सविस्मयम् ॥ ६६२ ॥ वाप्यन्तर्वलितग्रीवं, ताः पश्यन्त्योऽथ तां मुहुः । शनैःशनैर्विशन्ति स्म, निरीयुश्च शनैःशनैः ॥६६३॥ गत्वा कौतुकिताश्चन्द्र-यशसे तां न्यवेदयन् । आनेतुं साऽपि तां प्रीत्या, भूयोऽपि प्रजिघाय ताः ॥६६४॥ एत्य तास्तत्र तामूचु-र्देवी चन्द्रयशाः शुभे ! । त्वामाह्वयति भूयस्या, पुत्रीप्रीत्या नृपप्रिया ॥ ६६५ ॥ एत्य तत्प्रेमपीयूषै-स्तापं निर्वापयाऽऽत्मनः । त्वं स्थिताऽत्र पुनः शून्य-चेताः स्थलमवाप्स्यसि ॥ ६६६ ॥ इत्यासां वचनैर्भैमी, प्रह्वीभूतमना मनाक् ।

१ निर्जलप्रदेशम् ।

प्रेमगोद्गारविक्याभि-स्ताभिः परिवृताऽचलत् ॥६६७॥ मम चन्द्रयशा मातुः, पुष्पवन्त्याः सहोदरा। इति ज्ञातेयमज्ञासी-न्न जातु नलवल्लभा ॥ ६६८ ॥ जामेयी दमयन्ती मे-ऽस्तीत्यजानान्नृपप्रिया। तदानीं बाल्यदृष्टत्वात्, तां नोपालक्षयत् पुनः ॥ ६६९ ॥ साऽभ्येत्याऽऽलिङ्गदायान्तीं, पुत्रीप्रेम्णा तथापि ताम्। तत्त्वेनाविदितेऽप्यर्थे, प्रमाणं हि मनः मताम् ॥६७०॥ प्रक्षिप्तशिरसं मातृ-स्नेहेनाङ्घ्रिसरोरुहे। उत्थाप्य साऽवदद्भैमीं, प्रीतिकल्लोललोलिता ॥६७१॥ वत्से! त्वमसि मे पुत्र्या-श्चन्द्रवत्याः प्रियस्वसा। उभे अपि युवां लक्ष्मीं, तत्कृतार्थयतं मम ॥ ६७२ ॥ परमात्मस्वरूपं मे, कथयेत्युदिताऽनया। सार्थपुंसां यदाख्यातं, तदेवाख्यन्नलप्रिया ॥ ६७३ ॥ दीनानाथकृते चन्द्र-यशोदेव्याः पुराद्बहिः। वर्तते गुरुचोद्धारं, सत्रागारमचारितम् ॥६७४॥ भैम्यूचे तां ततः सत्रे, दानं दास्येऽहमन्वहम्। यदि नाम पतिं वीक्षे, जात्वस्मिन् भोजनार्थिनम् ॥६७५॥ ओमित्युक्ते तया भैमी, सत्रे दानं ददौ स्वयम्। तेन तोषं विशेषेण, कलयामासुरर्थिनः ॥ ६७६ ॥

साऽपश्यत् कंचिदन्येद्युः, सत्रस्था वध्यमग्रतः। चौरमारक्षकैर्नीय-मानमाहतडिण्डिमम् ॥ ६७७ ॥ स तां वीक्ष्यावदद्दीनं, रक्ष मां देवि! रक्ष माम्। सा कृतं किमनेनेति, पप्रच्छारक्षकांस्ततः ॥ ६७८ ॥ तेऽप्यूचुरमुना चन्द्र-वत्या रत्नकरण्डिका। जह्रे तेनैष वध्यत्वा-न्नीयते वधभूमिकाम् ॥ ६७९ ॥ ततः साऽवोचदारक्षा-नेनं मुञ्चत मुञ्चत। सर्वशोत्तरमेतस्य, कर्तास्मि कियतः परम्? ॥६८०॥ इत्युक्तेऽपि तया यावत्, ते न मुञ्चन्ति तस्करम्। तावत् साऽऽच्छोटयद्बन्धां-स्तस्याम्भश्चुलुकैस्त्रिभिः ॥६८१॥ ते सटित्युटंस्तस्य, तत्सतीत्वप्रभावतः। नागराणां ततो जज्ञे, हर्षकोलाहलो महान् ॥६८२॥ तमुपश्रुत्य संभ्रान्त-स्तत्र

१ प्रेमोद्गारि गुरुं यासां ताभि.। २ प्रक्षिप्तं शिरो यया ताम्।

राज्ञाऽप्युपागमत् । तद्वीक्ष्य कौतुकं भैमीं, दृष्टोऽप्येवमुवाच सः ॥ ६८३ ॥ धर्मः क्षोणीभृतां शिष्ट–पालनं दुष्टनिग्रहः । मात्स्यो न्यायोऽन्यथा वत्से !, भवेद्भुवनघस्मरः ॥६८४॥ लोकेभ्यः करमादाता, चौरेभ्यस्तानरक्षिता । तदीयैर्लिप्यते राजा, पातकैरिति हि स्मृतिः ॥ ६८५ ॥ तन्मोचयसि चेदेनं, भविष्यत्यव्यवस्थितिः । इत्युक्ता भूभुजा भैमी, दयालुरिदमब्रवीत् ॥ ६८६ ॥ तात ! दस्युर्विपद्येत, यदि दृष्टोऽप्यसौ मया । तदर्हद्धर्मवेदिन्याः, केयं मम कृपालुता ? ॥ ६८७ ॥ तदाग्रहमिति ज्ञात्वा, राज्ञा दस्युममोचयत् । माननीया महासत्यो, हन्त भूमीभुजामपि ॥ ६८८ ॥ स दस्युस्तत्पदाम्भोज–मानम्येति तदाऽवदत् । देवि ! माताऽसि मे नव्य–जन्मदानादतःपरम् ॥ ६८९ ॥ इत्युक्त्वा स जगाम स्वं, स्थानमानन्दमेदुरः । अभ्येत्य चानमत्सत्यं, मातेत्यस्याः क्रमाम्बुजम् ॥ ६९० ॥

पृष्टोऽन्यदा स वैदर्भ्या, स्वं स्वरूपमचीकथत् । वसन्तः सार्थवाहोऽस्ति, यस्तापसपुरप्रभुः ॥ ६९१ ॥ तस्याहं पिङ्गलो नाम, दासस्तत्सदनेऽन्यदा । खात्रं दत्वाऽपहृत्याथ, रत्नजातं पलायितः ॥६९२॥ मार्गेऽन्यैर्लुण्टितश्चौरैः, "क्षेमं दुष्टात्मनां कुतः ? ।" अत्रायातः क्रमेणाहं, राजसेवामसूत्रयम् ॥६९३॥ परेद्यवि नृपावासे, संचरन्ननिवारितः । वीक्ष्य शून्यामपाहार्षं, तां माणिक्यकरण्डिकाम् ॥ ६९४ ॥ वेगाद् प्रक्षिप्य कक्षायां, तां सर्वाङ्गावगुण्ठनः । राज्ञा निर्यन्नलक्ष्येऽहं, दक्षा हीङ्गितवेदिनः ॥६९५॥ समर्प्यारक्षकाग्रण्यः सोऽथ मां वध्यमादिशत् । तत्पुंभिर्नीयमानं च, हन्तुं स्वामिन्यमोचयः ॥६९६॥ नदेवि ! त्वत्प्रसादस्य, क्वापि नानृण्यमस्ति मे । कादम्बिन्याः कथं नाम, जीवलोकोऽनृणी भवेत् ? ॥ ६९७ ॥

१ एको महामत्स्योऽन्यं लघुमत्स्यं खादति, तं चान्यः, तं चान्य इति न्यायः ।

द्विज-
कथितो
दमयन्ती-
वृत्तान्तः ॥

अपरं च यदा देवि !, त्वं तापसपुराद्गता । सार्थवाहस्तदा दुःखा-त्पुक्तिमप्यत्यजत् सुधीः ॥ ६९८ ॥ बोधितः श्रीयशोभद्र-गुरुणाऽन्यैर्जनैश्च सः । सप्ताहाद्बुभुजे सार्थ-वाहो निर्वाहिसंगरः ॥ ६९९ ॥ उपायनमुपादाय, रत्नस्वर्णाद्यनेकशः । नृपं कूबरमद्राक्षीत्, कोशलामेत्य सोऽन्यदा ॥ ७०० ॥ तया चोपदया तुष्ट-स्तं तापसपुरेश्वरम् । राजानमकरोद्भूप-श्छत्रचामरलाञ्छितम् ॥ ७०१ ॥ नाम्ना चैनं वसन्तश्री-शेखरं स विनिर्ममे । प्राहिणोच्च पुरे प्रीत्या, भम्भया ताड्यमानया ॥ ७०२ ॥ प्रविश्योत्सवसोत्साहः, शास्तीदानीं पुरं स तत् । साऽपि त्वन्महिमप्रौढिः, स्वामिन्येवं श्रियोऽस्य यत् ॥ ७०३ ॥ ऊचेऽथ भीमभूर्वत्स !, पाप्मनोऽस्य छिदाकरीम् । दीक्षामादत्स्व सोऽप्यङ्गी-चक्रे तद्वचनं मुदा ॥ ७०४ ॥ शुद्धैः सत्कृत्य पानान्नै-र्मुनिद्वितयमन्यदा । भैमी वक्ति स्म यद्यस्ति, पिङ्गलस्यास्य योग्यता ॥ ७०५ ॥ तदस्मै व्रतदानेन, भगवन्तौ प्रसीदतम् । मुनी अप्यूचतुर्दीक्षा-योग्य एवैष पिङ्गलः ॥ ७०६ ॥ प्रार्थितावथ तेनापि, चैत्ये नीत्वा तदैव तम् । प्रव्राज्य तौ मुनी सार्ध-मेतेनान्यत्र जग्मतुः ॥ ७०७ ॥

हरिमित्रोऽन्यदा विप्रः, कुण्डिनात् पूर्वसंस्तुतः । एत्य भूमिपतिं दृष्ट्वा, ययौ चन्द्रयशोऽन्तिके ॥७०८॥ बद्धाञ्जलिं निविष्टं त-मग्रे भूपप्रियाऽभ्यधात् । विदर्भभूभुजः क्षेमं, पुष्पदन्त्याश्च, मे स्वसुः ? ॥ ७०९ ॥ दम्पत्योरनयोर्देवि !, क्षेमलक्ष्मीः सनातनी । नलस्य दमयन्त्याश्च, सा तु चिन्त्याऽस्ति सांप्रतम् ॥ ७१० ॥ संभ्रान्तया किमात्थेति, तयोक्तः सोऽब्रवीत् पुनः । जातु शुश्राव नः स्वामी, लोकाख्यातामिमां कथाम् ॥७११॥ यथा नलो महीमक्षैः, कूबरेण स्वबन्धुना । हारितो निरगाद्भैमीं, पुरस्कृत्य पुरान्निजात् ॥ ७१२ ॥ तामरण्ये परित्यज्य, सोऽगमत् तदनन्तरम् । वार्ताऽपि न तयोर्विद्मे,

काऽपि कुत्रापि वर्तते ॥७१३॥ तदुपश्रुत्य नः स्वामी, स्वामिनी पुष्पदन्त्यपि । वज्राहताविवोन्मील-दुःखभारौ मुमूर्च्छतुः ॥ ७१४ ॥ मूर्च्छान्ते विलपन्तौ च, समन्वेष्टुमितस्ततः । जामातरं तनूजां च, प्राहैष्टां तौ तदैव माम् ॥ ७१५ ॥ प्रत्यरण्यं प्रतिग्रामं, प्रतिपत्तनमप्यहम् । भ्राम्यन् क्रमान्महीमेता-मिहेदानीमुपागमम् ॥ ७१६ ॥ न तयोः पुनरद्राक्षं, वार्तामात्रमपि क्वचित् । तत्क्लेशफलमेवैत-द्बभूव भ्रमणं मम ॥ ७१७ ॥ श्रुत्वेति गिरमाक्रन्द-मुच्चैश्चन्द्रयशा व्यधात् । नलस्य कुर्वती निन्दां, तां तां भैम्याः स्तुतिं पुनः ॥ ७१८ ॥ क्रन्दद्भिरनु तां लोकैः, शोकाद्वैतं तदाऽखिले । जातं राजकुले नेतु-रनुगा ह्यनुजीविनः ॥ ७१९ ॥ ततः स विप्रः क्षुत्क्षाम-कुक्षिः क्षितिपमन्दिरात् । निर्गत्य भोजनाकाङ्क्षी, दानशालां जगाम ताम् ॥ ७२० ॥ तत्र सोऽधिकृतां प्रेक्ष्य, भैमीमुत्फुल्ललोचनः । प्रधाव्य रभसा तस्याः, पादपङ्केरुहेऽपतत् ॥ ७२१ ॥ ऊचे च दिष्ट्या दृष्टाऽसि, भ्राम्यता भुवनं मया । अद्य स्वस्त्यस्तु सर्वेषां, भवज्जीवितजीविनाम्[१] ॥७२२॥ अथैत्य स जवाच्चन्द्र-यशोदेवीमवर्धयत् । तच्छोकाश्रुपदेऽभूवन्, क्षणात् प्रीत्यश्रुविप्रुषः ॥ ७२३ ॥ सत्रागारमुपेत्याथ, सा मुदाऽऽलिङ्गय भीमजाम् । माश्रुरूचे बलिस्तुभ्यं, क्रियेऽस्यां चावतारणम् ॥ ७२४ ॥ हा हा धिग्मामियत्कालं, न मयाऽप्युपलक्षिता । जगद्विलक्षणाऽपि त्व-मेतलैर्रूपपूर्णैर्गुणैः ॥ ७२५ ॥ वञ्चिताऽस्मि कथं वत्से !, त्वया कृत्वा स्वगोपनम् ? । मातृस्वसापि मातैव, तत्पुरः का खलु त्रपा ? ॥ ७२६ ॥ किं त्यक्ताऽसि नलेन त्वं ?, नलस्त्यक्तस्त्वयाऽथवा ? । यदि वा न पतिं जातु, त्यजसि त्वं पतिव्रता ॥ ७२७ ॥ विडम्बितसहस्रांशु-र्ललाटतिलकः क्व ते ? । सेति मार्ष्टि स्म तद्भालं, सनिष्ठीवेन पाणिना ॥ ७२८ ॥

१ भवत्या जीवितेन जीविनाम्. (भवतीशब्दस्य पुंस्त्वमत्र चिन्त्यम् ।

प्रादुरास ततस्तस्याः, स भालतिलकः क्षणात् । यस्यान्तेवासितामन्य-तेजांसि दधतेऽन्वहम् ॥ ७२९ ॥ तां धृत्वाऽथ करे नीत्वा, वेश्मन्युर्वीशवल्लभा । स्वयमस्नापयद्गन्ध-वारिभिर्देवतामिव ॥ ७३० ॥ परिधाप्य दुकूले च, ज्योत्स्नासब्रह्मचारिणी । तैस्तैः प्रेमोपचारैस्तां, राज्ञी काममनन्दयत् ॥ ७३१ ॥ तां चालम्ब्य करे गत्वा, राज्ञोऽभ्यर्णमुपाविशत् । सोऽप्यपृच्छत् ततो भैमीं, राज्यभ्रंशादिकां कथाम् ॥ ७३२ ॥ साऽप्युदश्रुश्चुचे तस्मै, साश्रुराख्यदधोमुखी । नल-कूबरयोः सर्वां, तां कथामादुरोदरात् ॥ ७३३ ॥ राजाऽप्युन्मार्जयन्नश्रु, तस्याः प्रावारवाससा । ऊचे खिद्यस्व मा वत्से !, बली को नाम कर्मणाम् ? ॥ ७३४ ॥ तमोभिस्तिरयन् विश्वं, तदा चास्तं रविर्ययौ । चकास्ति स्म प्रकाशस्तु, मध्येसंसत्तथैव सः ॥ ७३५ ॥ रात्रौ किमयमुद्योत ? इति विस्मितमानसम् । राज्ञी चन्द्रयशाः स्मेर-वक्त्रा भूपालमभ्यधात् ॥ ७३६ ॥ वैदर्भीतिलकस्यास्य, देव ! लीलेयमद्भुता । भैमीभालं पितेवाथ, पाणिना पिदधे नृपः ॥ ७३७ ॥ सभान्तरस्फुरद्ध्वान्तः, सूचिभेद्यश्च तत्क्षणात् । पुनः पाणिमपाकर्षत्, स विस्मयमना नृपः ॥ ७३८ ॥

तदा कश्चिद्दिवोऽभ्येत्य, संसदि द्युतिभासुरः । भूमिलन्मौलिरानम्य, भैमीमित्यवदत् सुरः ॥७३९॥ देवि ! त्वया पुरा ज्ञात-श्चौरो यः पिङ्गलाभिधः । प्रतिबोध्य सुधाकल्पै-र्वाक्यैश्चाग्राहत व्रतम् ॥ ७४० ॥ क्रमेण विहरन् भूमौ, स तापसपुरं ययौ । तत्र प्रतिमया तस्थौ, स्मशाने निशि जातुचित् ॥ ७४१ ॥ तदा चाभ्यर्णमायाते, चितावह्निभवे दवे । स सात्त्विकशिरोरत्नं, व्यधादाराधनां स्वयम् ॥ ७४२ ॥ समाधेरच्युतः सोऽहं, ज्वालासंवलितस्ततः । वपुः संत्यज्य सौधर्मे, सुरोऽभूवं

१ शिष्यत्वम् । २ ज्वालया व्याप्तः ।

महर्द्धिकः ॥ ७४३ ॥ तत् प्रबोध्य तदा चेन्मां, व्रतं नाग्राहयिष्यथाः । गतस्य नरके तन्मे, काभविष्यन्निमाः श्रियः ? ॥ ७४४ ॥ सर्वस्तव प्रसादोऽयं, चिराय विजयस्व तत् । इत्युक्त्वाऽगात् सुरो हेम्नः, सप्त कोटीः प्रवृष्य सः ॥७४५॥ साक्षात्कृत्य महीनाथो-ऽप्यर्हद्धर्मस्य तत्फलम् । प्रत्यपद्यत तं हर्ष-भरव्याप्तान्तराशयः ॥ ७४६ ॥

अथावसरमासाद्य, हरिमित्रोऽभ्यधान्नृपम् । स्थिताऽत्र सुचिरं भैमी, यात्विदानीं पितुर्गृहे ॥ ७४७ ॥ पुष्पदन्ती च सा माता, पिता च स विदर्भराट् । प्रवासश्रवणादस्या-स्तिष्ठतो देव ! दुःखितौ ॥ ७४८ ॥ ततश्चन्द्रयशोदेव्या, मतमादाय तत्क्षणात् । ओमित्युक्त्वा ततो भैमीं, प्राहिणोत् सह सेनया ॥ ७४९ ॥ तामायान्तीं सुतां श्रुत्वा, भीमभूपतिरभ्यगात् । निरीक्ष्य पितरं साऽपि, दूरतो यानमत्यजत् ॥ ७५० ॥ धावित्वा रभसाद्भैमी, पादयोरपतत् पितुः । तयोः प्रीत्यश्रुवर्षेण, पङ्किला तत्र भूरभूत् ॥ ७५१ ॥ मातरं च सहाऽऽयातां, वीक्ष्याश्लिष्यत् प्रमोदिनीम् । तस्याः कण्ठे लगित्वा च, तारतारं रुरोद सा ॥ ७५२ ॥ सुतां भूपः पुरं क्लृप्त-महोत्सवमवीविशत् । मुदा च गुरुदेवार्चां, सप्तरात्रमकारयत् ॥ ७५३ ॥ पृष्टा भूमीभुजा कुब्ज !, जातुचिन्मम पश्यतः । तामेतां भीमभूः सर्वां, निजामकथयत् कथाम् ॥ ७५४ ॥ ऊचे च पृथिवीनाथ-स्तां स वात्सल्यया गिरा । वत्से ! विदधती धर्मं, वसास्मत्सदने सुखम् ॥ ७५५ ॥ करिष्यते तथा कश्चि-दतः परमुपक्रमः । यथा कुतश्चिदभ्येत्य, पतिस्तव मिलिष्यति ॥ ७५६ ॥ ददौ च हरिमित्राय, ग्रामपञ्चशतीं नृपः । तुष्टोऽभ्यधाच्च राज्यार्धं, तुभ्यं दास्ये नलागमे ॥ ७५७ ॥

अन्यदा दधिपर्णस्य, भूपतेः स्नेहवर्त्मना । दूतस्तत्र ययौ धीमान्, सुंसुमारपुरादितः ॥ ७५८ ॥ स जातु वार्ता-

प्रस्तावे-ऽकथयच्छ्रीमभूभुजः । यथाऽस्मत्स्वामिनः पार्श्वे, प्राप्तोऽस्ति नलसूपकृत् ॥ ७५९ ॥ स वेत्ति सूर्यपाकाया, रसवत्या विधिं सुधीः । वक्ति चास्यामुपाध्यायो, बभूव नल एव मे ॥ ७६० ॥ श्रुत्वैतच्छ्लोकतो भैमी, भूपमेत्य व्यजिज्ञपत् । न तां रसवतीं तात !, वेत्ति कश्चिन्नलं विना ॥ ७६१ ॥ तत् प्रेष्य कंचिज्जानीहि, किंरूपः किंफलश्च सः । अवश्यं गोपितात्मैव, नल एव स वल्लभः ॥ ७६२ ॥ मामाहूय ततो दत्त्वा, शिक्षां प्रैपीद्विदर्भराट् । क्रमादत्रैत्य भद्र ! त्वां, पृच्छन् पृच्छन्निहागमम् ॥ ७६३ ॥ एवंरूपं च वीक्ष्य त्वां, विषादादित्यचिन्तयम् । काचे मरकतभ्रान्ति-वैदर्भ्याः किमभूदियम् ? ॥७६४॥ नलः क दिविषद्देश्यः ?, कुब्जश्चायं क्व सूपकृत् ? । क सर्षपः ? क मेरुश्च ?, क खद्योतः ? क चार्यमा ? ॥ ७६५ ॥ तथाऽप्येनं परीक्षिप्ये, विचिन्त्येति पठंस्त्वया । नलाक्षेपमयौ श्लोका-वापृच्छयेऽहं कथामिमाम् ॥ ७६६ ॥ तदस्तु स्वस्ति ते यामि, व्यावृत्य नगरं निजम् । यथादृष्टं च वैदर्भ्या-स्त्वत्स्वरूपं निवेदये ॥ ७६७ ॥ भैमीस्मरणसंभूतं, कथंचन ततः सुधीः । बाष्पपूरं निरुन्धानः, कुब्जः कुशलमब्रवीत् ॥ ७६८ ॥ पूज्योऽसि कथयन् विप्र !, पुण्यपात्र ! कथामिमाम् । तदागच्छ ममाऽऽवासं, गृहाण मम सत्कृतिम् ॥ ७६९ ॥ इत्युदीर्य द्विजन्मान-मानीय स गृहे निजे । रसवत्या तया सूर्य-पाकया तमभोजयत् ॥ ७७० ॥ अभूच्च भूपवाक्लब्धं, यद्वङ्काभरणादिकम् । तत् प्रदायाखिलं कुब्जो-ऽनुमेने गमनाय तम् ॥ ७७१ ॥

सोऽथ विप्रो विदर्भायां, समभ्येत्य विषादवान् । भैमी-भूमीभुजोः कुब्ज-स्वरूपं तदचीकथत् ॥ ७७२ ॥ स्वयं रसवतीं तां च, भुक्तामाख्याय स द्विजः । टङ्कलक्षादि तत्सर्वं, कुब्जदत्तमदर्शयत् ॥ ७७३ ॥ सुंसुमारजनाऽऽख्याताः, करीन्द्रदमनादिकाः । कुब्जस्य ताः कला राज-प्रसादं च न्यवेदयत् ॥ ७७४ ॥ अथाऽऽह भीमभूस्तात !, त्वज्जामातैव स ध्रुवम् ।

कुब्जत्वमगमत् सैष, नूनं केनापि हेतुना ॥ ७७५ ॥ यतः सा रसवत्येताः, कलाः सेयमुदारता । त्रैलोक्येऽपि न कस्यापि, तव जामातर विना ॥ ७७६ ॥ तत् कथंचिदिहानीय, वीक्ष्यते स खलु स्वयम् । इङ्गितैर्लक्षयिष्यामि, यद्यस्ति नल एव सः ॥ ७७७ ॥ यमाषे भूपतिर्वत्से, पुनर्गतपतेस्तव । कृत्वा स्वयंवरव्याजं, दधिपर्णो निमन्त्र्यते ॥७७८॥ निशम्यैतत् स कुब्जोऽपि, तेन सार्धं समेष्यति । न खल्वात्मप्रियां यान्ती-मन्यत्र सहते सुधीः ॥ ७७९ ॥ भूपः सोऽभूत्त्वदाकाङ्क्षी, प्राक्तनेऽपि स्वयंवरे । त्वया वृते नले त्वेष, विलक्षोऽभूद्भृशं तदा ॥ ७८० ॥ तदासन्नदिनाऽऽहूतं, तूर्णमागन्तुमक्षमम् । ताम्यन्तं त्वत्कृते काम-मारोप्य जविनं रथम् ॥ ७८१ ॥ तं चेदानेष्यते कुब्जः, स ध्रुवं नल एव तत् । हृदयं हि तुरङ्गाणां, वेत्ति नान्यो विनाऽमुना ॥ ७८२ ॥ युग्मम् ॥ इत्यालोच्य वितीर्याथ, शिक्षामक्षामधीगुणः । भूभुजे दधिपर्णाय, दूतं प्रातिष्ठिपन्नृपः ॥ ७८३ ॥

स तन्नगरमासाद्य, कुब्जे संनिधिवर्तिनि । आचख्यौ दधिपर्णाय, भीमभूपालवाचिकम् ॥ ७८४ ॥ यथा न ज्ञायते तावत्, स क्वचिन्नलभूपतिः । करिष्यति ततो भैमी, देव ! भूयः स्वयंवरम् ॥ ७८५ ॥ चैत्रस्य शुद्धपञ्चम्यां, प्रातः स भविता ध्रुवम् । यथाऽस्मिन्नुपतिष्ठेथाः, कुर्यीथास्त्वं तथा नृप ! ॥ ७८६ ॥ इत्याख्याय गते दूते, स कुब्जोऽन्तरचिन्तयत् । महच्चित्रमहो कुर्या-द्वैम्यप्यपरं वरम् ॥७८७॥ स्यादेवमपि वा जातु, बलीयान् खलु मन्मथः । जीवतो मम वैदर्भीं, कः पुनस्तां ग्रहीष्यति ॥ ७८८ ॥ किं नु केनापि गृह्यन्ते, जीवतोऽपि हरेः सटाः ? । तक्षकस्य फणारत्नं, कृष्यते श्वसतोऽपि

१ चेष्टितैः । २ दत्त्वा । ३ आगच्छे. । ४ सिंहस्य ।

किम् ? ॥ ७८९ ॥ सोऽथ तं पृथिवीपालं, निर्मीलन्मुदमभ्यधात् । जृम्भते भूप ! किं नाम, दौर्मनस्यं तवाप्यदः? ॥ ७९० ॥ यस्य सोऽहं सहायोऽस्मि, सर्वकर्मीणतास्पदम् । तस्यापि तत्किमप्यस्ति, नैव यत् करगोचरम् ? ॥ ७९१ ॥ यामाः स्वयंवरादर्वाक्, षट् सन्त्यद्यापि तद्यदि । मनस्ते भीमजन्मानं, तां मृगीदृशमिच्छति ॥ ७९२ ॥ तदर्पय रथं कंचि–दृढं जात्यांश्च वाजिनः । दर्शयामि यथा प्रात–र्ध्रुवं कुण्डिनमण्डिताम् ॥ ७९३ ॥ युग्मम् ॥ गृहाण स्वेच्छयेत्युक्तः, क्षितीशेन स बुद्धिमान् । जग्राह रथमश्वांश्च, सर्वलक्षणलक्षितान् ॥ ७९४ ॥

सज्जीकृत्य रथं युक्त–वाहमाधाय च क्षणात् । इहाऽऽरोहेति तं कुब्जः, क्षोणिपालमभाषत ॥ ७९५ ॥ राजा स्थगीधरश्छत्र–धारश्चामरधारिणौ । कुब्जश्चेति षडारोह–न्नरास्तस्मिन् वरूथिनि ॥ ७९६ ॥ ततो बिल्वकरण्डौ यौ, दत्तौ निषधनाकिना । तावाबध्य कटौ कुब्जः, प्राजति स्म तुरंगमान् ॥ ७९७ ॥ कुब्जेन प्रेरितान् वीक्ष्य, वाहाननिलरंहसः । दधिपर्णनरेन्द्रोऽथ, विस्मयादित्यचिन्तयत् ॥ ७९८ ॥ अहो कश्चित् पुमानेष, मर्त्यानत्येति सर्वतः । अद्यापि रत्नगर्भेयं, वहते नाम सान्वयम् ॥ ७९९ ॥ क्वचिद्वेगानिलोद्धूते, प्रावारे पतिते भुवि । नृपोऽवोचत् पटीं गृह्ने, ध्रियन्तां कुब्ज ! वाजिनः ॥ ८०० ॥ कुब्जोऽप्यूचे स्मितास्यस्तं, यत्र ते पतिता पटी । ततः स्थानादतिक्रान्ता, पञ्चविंशतियोजनी ॥ ८०१ ॥ इमे हि मध्यमा एव, वाहाश्चेत्तु स्युरुत्तमाः । पञ्चाशद्योजनीं राज–न्नंह्रेरत्निपतं ततः ॥ ८०२ ॥ वृक्षमक्षाख्यमुद्वीक्ष्य, क्वाप्यथो फलमांसलम् । कुब्जं राजाऽभ्यधादात्म–कलोत्कर्षं विशेषयन् ॥८०३॥ फलानां भूरुहस्यास्य, संख्यामगणयन्नपि । वेद्म्यहं

१ दर्परहितम् । २ सर्वकर्मणि समर्थतास्पदम् । ३ प्रहराः । ४ रथे । ५ उत्तरीयवस्त्रे ।

कथयिष्यामि, व्यावृत्तः कुब्ज ! ते क्षणात् ॥ ८०४ ॥ कुब्जो ऽब्रवीदिदानीं त्वं, कालक्षेपाद्बिभेपि किम् ? । मा भैपीरधुनैवैतां, राजन्नाख्यातुमर्हसि ॥ ८०५ ॥ अष्टादश सहस्राणी–त्युक्ते भूपतिना ततः । आहत्य मुष्टिना कुब्ज–स्तं फलौघमपातयत् ॥ ८०६ ॥ रथादुत्तीर्य भूपेन, सूत्रिते गणनाविधौ । तावत्येवाभवत् संख्या, न च न्यूना न चाधिका ॥८०७॥ भूभुजे याचते विद्यां, तुरङ्गहृदयात्मिकाम् । दत्त्वाऽस्मादाददे संख्या–विद्यां कुब्जोऽथ विस्मयात् ॥ ८०८ ॥

अथाऽऽगादुदयप्रस्थे, स्यन्दनोऽनूरुसारथेः । विदर्भनगरद्वारि, कुब्जसूतो रथः पुनः ॥ ८०९ ॥ तदा झगिति निःशेषैः, सरोरुहवनैः समम् । अवाप दधिपर्णस्य, विकाशं मुखवारिजम् ॥ ८१० ॥ तस्मिन्नेव निशाशेषे, स्वप्नमैक्षिष्ट भीमजा । उत्थाय शयनीयाच्च, प्रीता पितुरचीकथत् ॥ ८११ ॥ अद्य प्रातर्मया स्वप्ने, प्रैक्षि निर्वृतिदेवता । तयेहानीय मे व्योम्नि, दर्शितं कोशलावनम् ॥ ८१२ ॥ रसालं फलपुष्पाढ्य–मारोहं तत्र तद्गिरा । विकचं शतपत्रं च, ममार्प्यत करे तया ॥८१३॥ पुराऽऽरूढो झटित्येव, विहगः कोऽपि भूतले । अकस्मादपतत्तस्मा–च्चूतादध्यासितान्मया ॥ ८१४ ॥ भीमोऽप्यूचे त्वया दृष्टः, पुत्रि ! स्वप्नोऽयमुत्तमः । तथा हि भाग्यसंभारः, प्रत्यक्षस्तव निर्वृतिः ॥ ८१५ ॥ कोशलाप्राभवं तद्यत्, कोशलोद्यानदर्शनम् । माकन्दपादपाऽऽरोहः, साक्षात् ते प्रियसंगमः ॥ ८१६ ॥ माकन्दाद्यस्त्वदाक्रान्ता–द्भ्रंशः कस्यापि पक्षिणः । पातः पातकिनो नूनं, साम्राज्यात् कूबरस्य सः ॥ ८१७ ॥ निशावसाने स्वप्नस्य, दर्शनान्नलसंगमः । अद्य भावी प्रभाते हि, स्वप्नः सद्यःफलेग्रहिः ॥ ८१८ ॥ तदोपेतं पुरद्वारि, दधिपर्णं ससंभ्रमः । अभ्येत्य मङ्गलो नाम, कोऽप्याख्यद्भीमभूभुजे ॥

१ याचमानाय । २ उदयाचलशिखरे । ३ सूर्यस्य । ४ कोशलायाः प्रभुत्वम् ।

दधिपर्णेन सह नलस्य विदर्भे गमनम् ॥

८१९ ॥ भीमोऽभ्येत्य तमायान्तं, प्रीत्याऽऽश्लिष्य वयस्यवत् । सौधार्पणाद्यमाधाय, स्वागतं चेत्यवोचत ॥ ८२० ॥ कुब्जस्ते सूपकृत् सूर्य-पाकां रसवतीमसौ । वेत्तीति श्रूयते तां मे, दर्शयास्ति कुतूहलम् ॥ ८२१ ॥

गिराऽथ दधिपर्णस्य, कुब्जो रसवतीं स ताम् । निष्पाद्याभोजयद्भीम-भूपालं सानुजीविनम् ॥ ८२२ ॥ दधिपर्णोपरोधेन, तत्स्वादं च परीक्षितुम् । आनाय्य भैम्यपि स्थाले, कृत्वा तां बुभुजे स्वयम् ॥ ८२३ ॥ तत्स्वादमुदिता भैमी, जगाद पितरं रहः । कुब्जः खञ्जोऽस्तु वा तात !, नलः सैष न संशयः ॥ ८२४ ॥ मुनिर्ज्ञानी ममाऽऽचख्यौ, पुरा ह्येतद्यथा भुवि । नलो रसवतीं सूर्य-पाकां जानाति नापरः ॥ ८२५ ॥ परीक्षान्तरमप्यस्ति, स्वसंवेदनसिद्धिकम् । संस्पर्शमात्रतोऽप्यस्य, स्यां सरोमाञ्चकञ्चुका ॥ ८२६ ॥ दधिपर्णमथाहूय, स्वगृहे सपरिच्छदम् । वैदर्भस्त्वं नलोऽसीति, कुब्जं वक्ति स्म सादरः ॥ ८२७ ॥ कुब्जोऽप्यूचे स्मितं कुर्व-न्नयं वः क इव भ्रमः ? । क्व नलः स्मरसंकाशः ?, क्व चाहं दृग्विपाञ्जनम् ॥ ८२८ ॥ भैम्यवोचत्ततस्तात !, मनागपि वपुर्मम । अङ्गुल्या संस्पृशत्वेष, कुर्वे येनास्य निर्णयम् ॥ ८२९ ॥ राजाऽऽदेशात्ततः कुब्ज-स्तस्याः सूक्ष्मनिपातया । वक्षश्चास्पृशदङ्गुल्या, जातं च पुलकाङ्कुरैः ॥ ८३० ॥ आः शठोऽसि परिज्ञातः, क्व यास्यसि ममाग्रतः ? । इत्याद्युदीर्य तं भैमी, बलादभ्यन्तरेऽनयत् ॥ ८३१ ॥ भैम्याः प्रेमोचितैस्तैस्तै-र्वाक्यैरार्द्रीभवन्मनाः । तस्माद्बिल्वात् करण्डाच्च, दुकूलाभरणानि सः ॥ ८३२ पर्यधाच्च समाकृष्य, रूपं चासादयन्निजम् । विरहोपचितप्रेमा, तामाश्लिष्यत् प्रियां नलः ॥ ८३३ ॥ युग्मम् ॥

१ प्रासादस्य अर्पणादिकम् ।

पुनर्द्वारि समायातं, परिरभ्योपवेश्य च। निजे सिंहासने भीम-स्तं कृताञ्जलिरब्रवीत् ॥ ८३४ ॥ एताः श्रिय इमे प्राणा-स्त्वदीया एव भूपते !। तत्कृत्यमादिशेत्युक्त्वा, भीमो वेत्रित्वमातनोत् ॥ ८३५ ॥ दधिपर्णोऽपि संभ्रान्तः, प्रणम्य नलमभ्यधात्। देव ! प्राचीनमज्ञाना-दपराधं क्षमस्व मे ॥ ८३६ ॥ त्यक्तकुब्जत्ववैरूप्यो, नलः स्वं रूपमास्थितः। निर्मुक्त इव भोगीन्द्र-स्तदानीं दिद्युतेतराम् ॥ ८३७ ॥ सार्थेशो धनदेवोऽथ, सोपायनकरस्तदा। कुतोऽपि भीमभूपालं, द्रष्टुकामः समागमत् ॥८३८॥ प्रा(प्राक्)कृतोपकृतेस्तत्त-द्बन्धुवत्तस्य गौरवम्। कृतज्ञा कारयामास, वैदर्भी भीमभूभुजा॥ ८३९ ॥ ऋतुपर्णनृपं चन्द्र-यशाश्चन्द्रवतीयुतम्। दूतैस्तं च वसन्तश्री-शेखरं भैम्यजूहवत् ॥ ८४० ॥ भीम-भूमीभुजा नित्य-मुपचारैर्नवैर्नवैः। ते कृतप्रीतयः सर्वे, निन्युर्मासं मुहूर्तवत् ॥ ८४१ ॥

अन्येद्युः कश्चिदभ्येत्य, भीमसंसदि कान्तिमान्। सुरः पश्यत्सु सर्वेषु, वैदर्भीमित्यवोचत ॥ ८४२ ॥ भैमि ! स्मरसि संबोध्य, यं पुरा तापसेश्वरम्। प्रापयिष्यसि सम्यक्त्वं, प्रव्रज्यां च शुभोदयाम् ॥ ८४३ ॥ सोऽहं तत्त्वा तपोऽत्युग्रं, सौधर्मे धर्मभाग्मृतः। श्रीकेसरसुरोऽभूवं, विमाने केसराह्वये ॥ ८४४ ॥ यस्त्वयाऽऽकृष्य मिथ्यात्वा-दर्हद्धर्मेऽस्मि रोपितः। तस्यैवैतत्फलं तन्मे, त्वमत्यन्तोपकारिणी ॥ ८४५ ॥ इत्युक्त्वा तपनीयस्य, सप्त कोटीर्विकीर्य सः। कृतज्ञचूडामाणिक्यं, यथागतमगात् सुरः ॥ ८४६ ॥ वसन्त-दधिपर्ण-र्तु-पर्णा, भीमोऽपरेऽप्यथ। अभ्यषिञ्चन्नलं राज्ये, महीयांसो महीभृतः ॥ ८४७ ॥ ते नलादेशमासाद्य, कम्पयन्तोऽथ काश्यपीम्। सर्वाणि स्वस्वदेशेभ्यः, सद्यः सैन्यान्यमेलयन् ॥ ८४८ ॥

१ कञ्चुकरहितः।

अथ प्रतस्थे दैवज्ञ-दत्तेऽह्नि सहितो नृपः। कोशलां प्रति लक्ष्मीं स्वां, ग्रहीष्यन् बलवान्नलः ॥ ८४९ ॥ स क्रमात्तिरयन् सैन्य-पांशुपूरैरहस्करम्। अभ्यतिष्ठदयोध्यायाः, काननं रतिवल्लभम् ॥ ८५० ॥ बहिरुद्यानमायात-माकर्ण्यातिबलं नलम्। कूबरस्य मनोऽकार्षीत्, संकथां मृत्युना समम् ॥८५१॥ तं दूतेन नलोऽवादी-द्दीव्यं भूयोऽपि देवनैः। त्वल्लक्ष्म्यः सन्तु मे हन्त, मल्लक्ष्म्यस्तव सन्तु वा ॥ ८५२ ॥ मृत्युभीतिमथापास्य, कूबरः प्रीतिबन्धुरः। भूयो द्यूतमुपाक्रंस्त, लब्धाऽऽस्वादो हि तत्र सः ॥८५३॥ क्षणात् कूबरतोऽजैपीत्, काश्यपीं निखिलां नलः। "पुंसां भाग्येऽनुकूले हि, सिध्यन्ति सकलाः क्रियाः" ॥ ८५४ ॥ राज्यं भूयोऽप्यलंचक्रे, नलोऽनलसविक्रमः। नभोऽङ्गणमिव प्रात-र्देवः कमलिनीपतिः ॥८५५॥ जितश्रीरपि दुष्टोऽपि, स्वबन्धुरिति कूबरः। राज्ञाऽऽर्द्रमनसा चक्रे, पूर्ववद्यौवराज्यभाक् ॥ ८५६ ॥ तत्तदाऽभून्नलः कामं, सतां श्लाघास्पदं परम्। कूबरः स पुनः क्रूर-कर्मा निन्दानिकेतनम् ॥ ८५७ ॥ प्राज्यभाग्ये नले भूयः, स्वराज्यमधितस्थुषि। माङ्गल्योपायनान्येयु-र्भरतार्धमहीभुजाम् ॥ ८५८ ॥ नलश्च दमयन्ती च, राज्यश्रीभिरलंकृतौ। बद्धोत्सवं ववन्दाते, कोशलाचैत्यमण्डलीम् ॥ ८५९ ॥ भरतार्धधराधीश-शिरोभिर्धृतशासनः। भूयांस्यब्दसहस्राणि, मेदिनीमभुनग्नलः ॥ ८६० ॥

आख्यातसमयोऽभ्येत्य, निषधस्वर्गिणा दिवः। पुष्कलाख्ये सुतेऽन्येद्यु-र्न्यस्य राज्यभरं नलः ॥८६१॥ जातसंसारवैराग्यो, वैदर्भ्या सह कान्तया। जिनसेनाभिधाऽऽचार्य-पादान्ते व्रतमग्रहीत् ॥ ८६२ ॥ युग्मम् ॥ अन्तेऽनशनमाधाय, मृत्युमाप्य समाधिना। नलः सुरः कुबेरोऽभू-ज्जज्ञे भैम्यपि तत्प्रिया ॥ ८६३ ॥

---

१ सूर्यः। २ आजग्मुः।

इतीयमम्बिकासूनो !, नलकूबरयोः कथा । मया ते कथिता तत्त्व–मस्याः सम्यग्विचार्यताम् ॥ ८६४ ॥ कूबरेण जिता द्यूत–च्छद्मनेयं वसुंधरा । न नाम स्थास्नुतामागात्, "कियत्क्रूरधियां श्रियः?" ॥८६५॥ प्रत्युताभूत् परा मान–ग्लानिरेतस्य दुर्धियः । "पदादभ्यामितात् पात–स्त्रपाकारी हि दोष्मताम्" ॥८६६॥ तदेवं कूबरस्येव, जयोऽप्यस्मिन् दुरोदरे । नाऽऽभाति मे शुभोदर्क–स्त्वदीयतनुजन्मनः ॥ ८६७ ॥ जितामपि महीमेते, पाण्डवा नार्पयन्ति चेत् । तदा को नाम गृह्णीया–दत्यन्त-बलवानपि ॥ ८६८ ॥ कर्ता वा कलहं कंचि–चेद्ग्रहीतुमहंकृतः । तत्तैर्घातिष्यते नूनं, सुतस्ते सह बान्धवैः ॥ ८६९ ॥ सत्य-वाक् तपसःसूनु–रर्पयेद्वा जितां महीम् । तथापि शाश्वती नास्य, जीवतो भीम–पार्थयोः ॥८७०॥ आच्छिन्नश्रीर्बलात्ताभ्यां, स कूबर इवोच्चकैः । यास्यति त्वत्सुतोऽवश्यं, लोकस्यैवास्य हास्यताम् ॥ ८७१ ॥ किं चेन्द्रप्रस्थमप्यस्य, तदा न स्थास्नु मन्यते । तल्लाभमिच्छतो मूल–क्षतिः शङ्केऽस्य भाविनी ॥ ८७२ ॥ न कश्चिन्नलतुल्योऽस्ति, कूबरस्येव यः पुनः । श्रियं तत्र तनूजस्य, क्रूरस्यापि प्रदास्यति ॥ ८७३ ॥ देशत्यागं तदा कुर्यात्, सैष युद्धा म्रियेत वा । प्रच्युतप्राभवैः स्थातुं, न शक्यं संस्तुते जने ॥ ८७४ ॥ तदेनं कथमप्यस्मा–न्निवर्तय कदाग्रहात् । द्यूतं हि नाऽऽयतिक्षेमं–करं कस्यापि दृश्यते ॥ ८७५ ॥ इत्यसौ विदुरस्योक्ति– र्धृतराष्ट्रहृदि क्वचित् । पूर्णेऽम्भोबिन्दुवत् कुम्भे, नावकाशं समासदत् ॥८७६॥ तावदासगिरो[3] धर्म–कृत्यमायतिचिन्तनम् । गृह्णाति देहिनां मोहो, यावन्मनसि न स्थितिम् ॥ ८७७ ॥ उदारदुःखसंभार–विभिन्नहृदयस्ततः । रचितोपेक्षमुत्थाय, स्वस्थानं विदुरो ययौ ॥ ८७८ ॥

१ नष्टप्रभुत्वैः । २ परिचिते ३ 'गिरा' इति प्रत्यन्तरे । ४ कृतोपेक्षं यथा स्यात्तथा ।

नलस्य राज्यप्राप्तिर्दीक्षया स्वर्गमनं च । विदुरो धृतराष्ट्रमुपदिश्य स्वस्थानं गतः ॥

गभावलोकनव्याजा–दथाह्वातुं तपःसुतम् । हास्तिनं नगरं प्रैषी–द्धार्तराष्ट्रो जयद्रथम् ॥ ८७९ ॥ हस्तिनापुरमभ्येत्य, स वेगाद्वाग्मिनां वरः । स्नेहदाक्षिण्यभूयिष्ठं, युधिष्ठिरमभाषत ॥८८०॥ देव ! दुर्योधनस्तुभ्यं, मया विज्ञापयत्यदः । बान्धवेषु समग्रेषु, त्वमेव मम जीवितम् ॥ ८८१ ॥ तन्ममाभिनवां दिव्यां, संसदं द्रष्टुमर्हसि । मनोज्ञमपि नाभीष्टै–रदृष्टं हि मुदे सताम् ॥ ८८२ ॥ इन्द्रप्रस्थं ततः प्रेस्थ–मेयानन्दं त्वदागमे । अद्यास्तु नूतनोत्सर्प–दुत्सवक्षीवतां गतम् ॥ ८८३ ॥ इत्याकर्ण्य तपःसूनु–र्जयद्रथसरस्वतीम् । इन्द्रप्रस्थं ततः प्रीत्या, चचाल सरलाशयः ॥ ८८४ ॥ सह द्रुपदनन्दिन्या, कनीयांसस्तमन्वयुः । पौरस्त्यमारुतं सार्धं, विद्युतेव पयोमुचः ॥ ८८५ ॥ तरङ्गपवनोद्धूत–मनुस्वर्धुनि गच्छतः । सहगामीव धर्मोऽस्य, विरेजे कैतकं रजः ॥ ८८६ ॥ तस्यासेदे बलैः संप–न्माद्यदुद्यानमण्डिता । अरिज्ञातमनःशल्यै–रिन्द्रप्रस्थोपशल्यभूः ॥८८७॥ तं प्रत्युदगमत् सैन्यैः, पृष्ठतो धृतराष्ट्रसूः । पूर्वं वामानिलानीत–स्तत्परागस्त्वभाग्यवत् ॥८८८॥ सहानीकैरजातारि–र्मनोरथ इवाङ्गवान् । प्राविशन्नगरं तस्य, तत्कालकलितोत्सवम् ॥ ८८९ ॥ बहिर्विकीर्णवात्सल्यं, धृतराष्ट्रं युधिष्ठिरः । सबान्धवोऽपि बाह्यार्द्रं, शमीतरुमिवानमत् ॥८९०॥ तथा दुर्योधनस्तस्य, तास्ताः स्वागतिकीः क्रियाः । करोति स्म यथा मेने, तस्मिन्नैकात्म्यमेव सः ॥ ८९१ ॥ भिद्यन्ते हि म्रदीयांसः, प्रेमभिः कृतकैरपि । दारवीयोऽपि नाराचो, भिनत्ति कदलीद्रुमम् ॥ ८९२ ॥ भीष्म–द्रोणादयो वृद्धाः, स्नेहग्रहिलचेतसः । चिरयत्यात्मजे पाण्डो–रिन्द्रप्रस्थमुपाययुः ॥ ८९३ ॥

---

१ प्रस्थः परिमाणविशेषः, तेन मेय आनन्दो यस्य यस्मिन् वा । २ क्षीवता–मत्तता । ३ अतिमृदवः । ४ काष्ठनिर्मितः ।

अथ कचन निःमज्ज–चतुरश्रदुरोदराम्। कचिद्धर्म–चरो–दार–शारक्रीडामनोहराम् ॥८९४॥ कचित् प्राप्तजयद्यूत–कारवा-गालतालिकाम्। कचिच्च कलितोत्कर्ष–शलाकाकेलिशालिनीम् ॥८९५॥ प्रतिपट्टं प्रतिस्तम्भं, प्रत्यस्रि प्रतिपुत्रिकम् । अशक्य-दर्शनामेक–देशमप्रेक्षणत्वतः ॥ ८९६ ॥ स्वरामणीयकाक्षिप्त–स्वःसदं संसदं निजाम् । दर्शयामास गान्धारी–तनयो धर्म-सूनवे ॥ ८९७ ॥ (चतुर्भिः कलापकम् ।) भ्राम्यन्तौ तौ ततस्तस्यां, वीक्षमाणावितस्ततः । युवां क्रीडिष्यथः किं ने–त्य-जल्पे(ल्प्ये)तां महाक्षिकैः ॥ ८९८ ॥ दुर्योधनोऽप्यभाषिष्ट, विष्टपश्रीविशेषक ! । माननीया महान्तोऽमी, दीव्यामो देवनैः क्षणम् ॥ ८९९ ॥ ओमित्युक्तेऽथ धर्मात्म–जन्मना तावुभावपि । क्रीडितुं प्रक्रमेते स्म, देवनैरितरेतरम् ॥ ९०० ॥ तदा गरलचेतोभि–र्भ्रातृभिः परिवारितः । रेजे धर्मात्मजः पारि–जातः कल्पद्रुमैरिव ॥ ९०१ ॥ धार्तराष्ट्रोऽप्यधाद्दुष्टै–रावृतः सौबलादिभिः । कण्टकिद्रुपरीतस्य, विलासं विषशाखिनः ॥ ९०२ ॥ द्वौ द्विकौ द्वौ चतुष्कौ च, दश चेत्यादिवादिनोः । गजद्यूतमनुस्यूतं, ततः प्रववृते तयोः ॥ ९०३ ॥ क्रीडामात्रकमित्यादौ, पत्रपूगादिकः पणः । ततोऽङ्गुलीयकाद्योऽभू–द्द्यूते वृद्धिमुपेयुषि ॥ ९०४ ॥ यदा यस्य जयस्तस्य, तदानीं पारिपार्श्वकाः । मोदन्ते स्म रविर्यत्र, तत्रैव कमलोत्सवः ॥ ९०५ ॥ ताम्बूलं वासरो रात्रि–र्भुक्तिपानादिकाः क्रियाः । जगाम विस्मृतिं सर्वं, तयो रङ्गेण दीव्यतोः ॥ ९०६ ॥ आसीज्जयस्तयोरन्य-तरस्याप्युभयोरपि । जज्ञे पराजयोऽप्येवं, यावद्द्यूतमभूदृजु ॥ ९०७ ॥

गान्धारीकुक्षिसूगृद्धैः, शकुनिप्रमुखैस्ततः । कौटिल्यसद्मभिश्छद्म–द्यूतं तैरुपचक्रमे ॥ ९०८ ॥ अन्धव–न्मन्त्रपिष्टन्ध–

१ गमाद्यो द्यूतभेदाः । २ युधिष्ठिरस्य संबोधनमिदम् । ' विशेपतः ' इति प्रत्यन्तरे । ३ ग्रथितम् ।

दिव्यसभावलोकनाय युधिष्ठिरस्य इन्द्रप्रस्थे गमनं, तत्र द्यूतक्रीडनं च ॥

दृष्टिव-द्वद्वपट्टवत् । पतितोऽपि ततो नैक्षि, स्वदायो धर्मसूनुना ॥ ९०९ ॥ गान्धारस्वामिना पूर्वो-पदिष्टात् करकैतवात् । अपातयत् पुनर्जैत्र-मेवाक्षं धृतराष्ट्रभूः ॥ ९१० ॥ समूर्द्धन्यमणीन्यङ्ग-भूषणानि तपःसुतः । मरुत्पथ इव भ्रात-र्भानि सेन्दून्यहारयत् ॥ ९११ ॥ कर्णादीनां ततः प्रीति-बीजैरुच्छ्वसितं मनाक् । कौशिका हि सहस्रांशु-व्यसनस्पृहयालवः ॥९१२॥ कियदेतदिति भ्रातृ-मण्डली पाण्डुजन्मनः । न विव्यथेऽलिमालेव, द्वित्रपुष्पव्यये वने ॥९१३॥ अहारयत् क्रमात् कोश-संभृतं वसु धर्मसूः । ग्रीष्मर्तुपिण्डितं चण्ड-धामेव जलदागमे ॥ ९१४ ॥ ततः संतापघर्मर्तु-रावसत् सुहृदां हृदि । विद्विषा-मुदमीलंस्तु, मनस्याह्लादमल्लिकाः ॥ ९१५ ॥ क्रीडारसात् पणीकुर्वन्, रथ्यां साश्वीयहास्तिकाम् । अभ्यधीयत संभ्रान्तै-र्गाङ्गेयाद्यैस्तपःसुतः ॥ ९१६ ॥ क्रीडामात्राय वां द्यूत-मस्माभिर्बह्वमन्यत । संप्रत्युन्मत्तमेतत्तु, नानुमन्यामहेतमाम् ॥ ९१७ ॥ द्यूताद्यैर्थैर्द्विजेष्यन्ते, व्यसनैस्त्वादृशा अपि । देवस्तदुष्णधामापि, तमोभिर्न्यक्करिष्यते ॥ ९१८ ॥ व्यसनैः सह वास्तव्याः, किं नाम स्युर्गुणाः क्वचित् ? । दृष्टं क्वाप्येकपात्रस्थं, पीयूषं च विषं च किम् ? ॥९१९॥ द्यूतदावानलादस्मात्, तन्निवर्तितुमर्हसि । ज्वलत्येवैष ते पश्य, हहा ! गुणमयः पटः ॥ ९२० ॥ इत्येतां न गिरं तेषा-मजातारिरजीगणत् । सतामपि विधौ क्रुद्धे, विपर्यस्यति शेमुषी ॥ ९२१ ॥ द्यूतासक्तमनीशास्त-मीक्षितुं केचिदत्यजन् । त्यजन्ति राजहंसा हि, मेघाऽलिमलिनं तमः ॥ ९२२ ॥ हारितेभरथाश्वीयः, स कर्णादीनमोदयत् । घनास्तग्रहतारेन्दु, व्योमेव तिमिरोत्करान् ॥ ९२३ ॥

अथाकर-पुर-ग्राम-समग्रमवनीतलम् । ग्लहीकुर्वति कौन्तेये, सभ्याः संभ्रान्तमभ्यधुः ॥ ९२४ ॥ न नाम भवति

१ घूकाः । २ धनं, पक्षे किरणसमूहम् । ३ रथसमूहम् ।

क्षोणि-पणोऽयमवधिं विना। हन्त दुर्योधनस्यापि, मद्रकारो[1]ऽवधिः[2] कृतः ॥ ९२५ ॥ सर्वथा निजसाम्राज्य-निराशान् पाण्डवानमून्। को निवारयिता विश्वे-ऽप्यपणीकुर्वतः पणम् ॥ ९२६ ॥ सूत्रिते त्ववधौ राज्य-प्रत्याशासुस्थिताशयाः। अन्यायं वाग्विपर्यास-लज्जयाऽपि न तन्वते ॥ ९२७ ॥ इत्याकर्ण्य गिरं कर्णः, सदस्यानामुदाहरत्। सीमा भूमिग्रहेऽमुष्मिन्नस्तु द्वादशवत्सरी ॥ ९२८ ॥ तां कर्णभारतीमोमि-त्युररीकृत्य देवितुम्[3]। पुनः प्रावर्तिषातां तौ, द्यूतकारावुभावपि ॥९२९॥

हारितायां क्षणादक्ष-कैतवेन क्षितावपि। चतुरोऽपि पणीचक्रे, बान्धवान् धर्मनन्दनः ॥ ९३० ॥ तैश्च दासेरवत् कर्म, कर्तव्यं द्यूतहारितैः। अधिमन्दिरमाजन्म, धृतराष्ट्राङ्गजन्मनः ॥ ९३१ ॥ दुःखस्फुटितहृन्मर्म-कीकस[4]ध्वनिबान्धवः। उदगात् पारिषद्यानां, महान् हाहारवो मुखात् ॥ ९३२ ॥ शरीरमिदमात्मीय-मस्त्येव हि पुनः क तत्। यत्र कुत्रचिदित्यन्तः, खेदिनस्तस्य नानुजाः ॥ ९३३ ॥ राधेय-सौबलादीना-मनिन्दन् केऽपि कैतवम्। निनिन्दुर्धार्तराष्ट्रस्य, केऽपि विश्वस्तघातिताम् ॥९३४॥ निन्दन्ति स्म तपःसूनोः, केचिदत्यार्जवं मुहुः। धृतराष्ट्रं सुतस्नेह-मोहितं केऽप्यनिन्दिषुः ॥९३५॥ (युग्मम्) क इवैतादृशो ज्येष्ठ-बन्धुः स्वाधीनजीवितः। इति वायुसुतादींस्तु, तुष्टाः सर्वेऽपि तुष्टुवुः ॥९३६॥ हारितेषु प्रतीपेन, वेधसाऽवरजेष्वपि। अजातरिपुरात्मानं, चकाराकृपणः पणम् ॥९३७॥ मा मेति परिषद्वाक्यै-राक्रन्दैरनुजीविनाम्। लोकशोकप्रवादैश्च, शब्दाद्वैतं तदाऽभवत् ॥ ९३८ ॥ भृङ्गाग्रवद्भिरेरापः, प्रतिषेधपरा गिरः। भीष्मादीनामवस्थानं, लेभिरे न युधिष्ठिरे ॥ ९३९ ॥ पणाभावात् पृथासूनु-रथाऽऽत्मन्यपि हारिते। आसीत्किंकार्यतामूढ-स्तरुभ्रष्टप्लवङ्गवत् ॥९४०॥

१ (मद्रकारः क्षेमंकर इति शब्दकल्पद्रुमः। २ 'कृतोऽवधिः' इति अन्वयः)। ३ क्रीडितुम्। ४ कीकसम्-अस्थि।

युधिष्ठिरेण द्यूते हारितम्॥

ततस्तं स्वजनीभूय, बभाषे सुबलात्मजः । पणस्तवास्ति पाञ्चाली, तयाऽऽत्मानं विमोचय ॥९४१॥ इत्युक्ते तेन वैकल्य–पल्यङ्कः सह कीर्तिभिः । द्रौपदीमपि कौन्तेयो, निनाय पणतां तदा ॥ ९४२ ॥ गान्धारीसुतगृह्याणा–मपि केषांचिदक्षिपु । तदाऽऽविरासन्नश्रूणि, गुणाः सर्वप्रियंकराः ॥ ९४३ ॥ दुर्जनैकधुरीणाय, तस्मै द्यूतसृजे नमः । येन कामप्यनीयन्त, महान्तोऽपीदृशीं दशाम् ॥ ९४४ ॥ द्रौपदीपणमाहात्म्या–द्यदि नाम तपःसुतः । इदानीं जयतीत्यादि, तदाऽन्योन्यं जगुर्जनाः ॥ ९४५ ॥ क्षणेनाथ भुजाऽऽस्फोट–नादकन्दलितोदयाः । जितं जितमिति स्वैर–मुच्चेरुः शकुनेर्गिरः ॥ ९४६ ॥ स्तम्भिता इव मूर्च्छाला, इव चित्रार्पिता इव । मृता इव ग्रहग्रस्ता, इव सभ्यास्तदाऽभवन् ॥ ९४७ ॥ शत्रवः पाण्डुपुत्राणां, हरन्तो राज्यसंपदम् । तेनुरुद्भूतसत्त्वानां, निःसपत्नां सुखश्रियम् ॥९४८॥ कौरवाः पर्यपूर्यन्त, संमर्दैः क्षयहेतुभिः । अन्यायसंभृताऽऽभोगै–र्विभवैरिव दस्यवः ॥ ९४९ ॥

अथ दुर्योधनादेशा–द्यावद्दुःशासनो मुदा । वासांसि पाण्डवेयाना–मपक्रष्टुमचेष्टत ॥ ९५० ॥ तावत्ते स्वयमुत्सृज्य, चीवराण्यम्बरश्रियः । धृताधोवसनाः पर्ष–द्युपाविक्षन्नवाङ्मुखाः ॥ ९५१ ॥ (युग्मम्) अत्रैवाऽऽनीयतां साऽपि, पुंश्चली पञ्चवल्लभा । इत्यादिशत् कनीयांसं, मन्दमेधाः सुयोधनः ॥ ९५२ ॥ ततो दुःशासनो लुप्त–गरीयःसाधुशासनः । स्मेरवक्त्राम्बुजोऽभ्येत्य, पाञ्चलीमित्यवोचत ॥ ९५३ ॥ तेन दुर्मेधसा पत्या, हारिताऽसि दुरोदरे । त्वं जिताऽसि च पाञ्चालि ! धार्तराष्ट्राग्रजन्मना ॥ ९५४ ॥ ततः स भवतीं प्रीति–प्रह्वमाह्वयति द्रुतम् । न चेदेष्यसि नेष्यामि, तद्बलादपि

१ क्रियाविशेषणमेतत् ।

भामिनि ! ॥९५५॥ पाञ्चालदुहिताऽवोच–न्नद्यास्मि रजस्वला । एकांशुका च तत्संसद्युपागच्छाम्यहं कथम् ? ॥९५६॥ किं च किंचन पृच्छामि, किंस्विदात्मनि हारिते। अहारिते वा तेनास्मि, हारिता जगतीभुजा ? ॥ ९५७ ॥ हारिताऽपि न तेनास्मि, हारिता हारिताऽऽत्मना । स्वकार्येऽप्यस्वतन्त्रस्य, का नाम प्रभविष्णुता ? ॥९५८॥ प्रातरुच्चण्डमार्तण्ड–रोचिराचान्तदीधितिः। जानीहि रजनीनाथो, रजन्या अप्यनीश्वरः ॥९५९॥

युधिष्ठिरेण द्यूते हारितम्॥

तामित्युक्तवतीं क्रुध्य–न्नूचे दुर्योधनानुजः । धिग्वाचालाऽसि पाञ्चालि !, पुरो भवसि किं न हि ? ॥९६०॥ धर्मस्थैर्ये त्वमेवासि, सांप्रतं किमधीतिनी ? । जाने त्वमपि जानासि, बृहस्पतिमकोविदम् ॥ ९६१ ॥ इत्युदीर्य स कस्तूरी–भराङ्कुरितकान्तिषु । चकर्ष विहितामर्षः, केशेषु द्रुपदात्मजाम् ॥९६२॥ आः ! पाप ! कुरुभूपाल–गोत्रकिंपाकपादप ! । किं मामेवं विधामेव, नेतासि गुरुसंनिधौ ॥९६३॥ नीरङ्गीस्थगितं यस्याः, कोऽपि नापश्यदाननम् । हा ! सर्वेऽनावृताङ्गीं तां, द्रक्ष्यन्ति गुरवोऽद्य माम् ॥९६४॥ दुरात्मन् ! किं भवत्कर्म, कर्मसाक्ष्य[3]पि नेक्षते ? । यन्न क्षणात्क्षिणोति त्वां, परस्त्रीस्पर्शपांशुलम् ॥ ९६५ ॥ क्रन्दन्तीति गलन्नेत्र–नीरैर्नीरजितक्षितिः । तेनाकृष्टा जनैर्दृष्टा, सा मृगीव मृगारिणा ॥९६६॥ शतशः शपमानानां, तदा दुःशासनं सताम् । नवसारस्वतोल्लास–लासिनी रसनाऽभवत् ॥९६७॥ तपःसूनोरपि ज्ञान–धर्म–न्याय–शमादिषु । जनः सावज्ञ एवाभूत्, क्लिश्यमानां विलोक्य ताम् ॥९६८॥ नेत्राश्रुसलिलैः कूलं–कषस्रोतस्विनीमयी । नूतना प्रावृडारेभे, लोकैः शोकाकुलैस्तदा ॥ ९६९ ॥ तामेकवसनामश्रु–विक्लवाक्षीं त्रपानताम् । निनाय न्यायशून्याऽऽत्मा, हठाद्दुःशासनः सभाम् ॥

१ 'धर्मशास्त्रे' इति प्रतिद्वय० । २ कृतक्रोधः । ३ सूर्यः । ४ नीरजिता रजोविनाकृता ।

९७०॥ उल्लसदैन्यमालिन्यां, सा मषीकूर्चिकामिव। तत्र व्यापारयामास, मुखेषु प्रेयसां दृशम् ॥९७१॥ तामालोक्य तथाभूतां, त्रपाकलुषिताऽऽशयाः। प्रेक्षामासुः सुताः पाण्डो–र्विविक्षव इव क्षितिम् ॥९७२॥ गृहेऽप्येतदरक्षन्तः, किं द्रष्टव्याऽऽनना वयम् ?। इतीव पिदधुर्वक्त्रं, ह्रिया भीष्मादयोंऽशुकैः ॥९७३॥ दृशो द्रुपदनन्दिन्यां, नवरागतरङ्गिताः। कौरवाधिपतेः पेतुः, कामपल्लविता इव ॥९७४॥ कृशोदरि ! चिरादासी–दनुरागो मम त्वयि। हन्तायमन्तरायोऽभूत्, पाण्डवैः पाणिपीडनम् ॥९७५॥ इदानीमप्युपागत्य, झटित्येवास्यतामितः। इत्यूरुं दर्शयामास, याज्ञसेन्याः सुयोधनः ॥ ९७६ ॥ (युग्मम्)

अथावोचत पाञ्चाली, कोपकम्प्रतराधरा। कुरुराजान्वयोदन्व–त्कालकूट ! कुलाशने ॥९७७॥ भस्मसात् किं न जातोऽसि, चिन्तयाऽप्यनया मयि ?। कोटरान्तर्गतोऽप्यग्नि–र्दहत्येव महीरुहम् ॥ ९७८ ॥ (युग्मम्) यदि गोत्रगरीयांसः, केऽपि स्यु–र्महिमोन्नताः। वल्लभा अपि केऽपि स्यु–र्यदि मे भुजशालिनः ॥ ९७९ ॥ मर्षयेयुस्तदेतस्य, किमेतदनुजस्य च। जीवितव्यकथाकन्था–मित्थमन्यायवर्तिनोः ॥ ९८० ॥ (युग्मम्) किं चान्तःस्वान्तमालोच्य, कथयन्तु सभासदः। हारितस्वात्मना भर्त्रा, भवेयं यदि हारिता ॥ ९८१ ॥

अथाभ्यधत्त राधेयः, सभ्यान् किमियमङ्गना। विजिते राज्यसर्वस्वे, न तदन्तर्गता जिता ? ॥ ९८२ ॥ अथैकवाससोऽमुष्या, मध्येसंसन्मतं न वः। बलादानयनं क्वाऽपि, नेयमप्यव्यवस्थितिः ॥ ९८३ ॥ एक एव पतिर्लोके, योषितामुपगी-

---

१ प्रवेष्टुमिच्छवः, प्रतित्रये 'विवक्षवः' इति पाठो दृश्यते, स न सम्यक्। २ कुले- वंशे अशनिः–वज्रसमानः, तत्सबुद्धौ। ३ 'क्वापि' प्रत्यन्तरपाठः।

यते। अनेकप्रेयसीयं तु, बन्धक्येव न संशयः ॥ ९८४ ॥ तदेकवसनत्वं वा, वस्त्राहित्यमप्यथ। पर्षदानयनं वाऽपि, नैतस्याः खल्वसांप्रतम् ॥ ९८५ ॥ इति कर्णोक्तिमाकर्ण्य, क्रोधाध्माताशया अपि। दुर्योधनभिया सभ्या–स्तूष्णीमेवालेलम्बिरे ॥ ९८६ ॥ गान्धारेयोऽभ्यधात् क्रोध–स्फुरदोष्ठपुटोऽनुजम्। जितैवेयं मया सभ्यै–रजल्पद्भिर्निवेदिता ॥ ९८७ ॥ तत् सतीमानिनीमेना–मुन्मोच्याग्रेतनाम्बरम्। परिधाप्य जरद्दण्डी–खण्डं दासीषु निर्दिश ॥ ९८८ ॥ इति दुःशासनो दुष्ट–ज्येष्ठबान्धवशासनात्। नितम्बादम्बरं पाण्डु–स्नुषायाः स्वैरमाकृषत् ॥ ९८९ ॥ मा मेति दीनजल्पाक्याः, प्रक्षिपन्त्या मुखेऽङ्गुलीः। रुन्धत्यास्तत्करौ कामं, पश्यन्त्याः पर्षदाननम् ॥ ९९० ॥ दुष्टात्मनांशुके कृष्टे, तेनास्या ददृशुर्जनाः। दैवतेनानुभावेन, तादृगेवान्यदंशुकम् ॥ ९९१ ॥ (युग्मम्) मनुष्यपांसनः क्षिप्र–माचकर्ष तदप्यसौ। भूयोऽप्याविरभूत्तादृ–क्तस्याः श्रोणितटेऽम्बरम् ॥ ९९२ ॥ इत्थमाकर्षतस्तस्य, बभूव वसनोत्करः। क्लान्तश्चायमपीयाय, दृष्टः स्मेराननैर्जनैः ॥ ९९३ ॥

अथ क्रोधोदयाताम्र–चक्षुरूर्द्ध्वजकुन्तलः[2]। रोमाञ्चकवची स्वेद–मेदुराङ्गः सवेपथुः ॥ ९९४ ॥ पाणिना पाणिमुत्पिपन्, सर्वतो वीक्ष्य संसदम्। विकाशिनासिकाकोशः, प्रत्यज्ञासीद्वृकोदरः ॥ ९९५ ॥ युग्मम् ॥ येनानीता सभां कृष्णा, बलादालम्ब्य कुन्तलैः। गुरूणां पश्यतां चास्याः, श्रोणेराकृष्टमम्बरम् ॥ ९९६ ॥ बाहुदण्डं न चेत्तस्य, मूलादुन्मूलयाम्यहम्। कवोष्णैश्चाभिषिञ्चामि, न वक्षःशोणितैः क्षितिम् ॥ ९९७ ॥ येन च सरकल्लोल–केलिभिर्लोलितात्मना। द्रौपद्या दर्शितः स्वैर–मूरुदेशो रिरंसुना ॥ ९९८ ॥ तस्योरुं गदया तूर्णं, चूर्णीभावं नये न चेत्। तत्र मे पाण्डुना जन्म, न च क्षत्रव्रतं क्वचित् ॥

द्रौपद्याश्च-वस्त्रा-कर्षणम् ॥

१ 'वावलम्बिरे' प्रतिद्वय०। २ 'रुद्धर्पिकुन्तलः' इत्येकप्रतिपाठः साधुः।

९९९ ॥ इत्युदीरितवत्युच्चै–र्भीमे संभावितौजसि । सभाक्षोभोऽजनि क्षीर–पाथोधिमथनोपमः ॥ १००० ॥

मध्येसभमथोत्थाय, धृतराष्ट्रमदुष्टधीः । जगाद विदुरः शोक–संभारभिदुराशयः ॥ १००१ ॥ प्रस्तुतमात्र एवायं, पुराऽऽख्यायि मयाऽपि ते । दुरात्मा कुलकल्पान्त–धूमकेतुः सुयोधनः ॥१००२॥ किमीदृक्क्रियते कर्म, चण्डालानां कुलेष्वपि । कैतवेन विजीयन्ते, भ्रातरोऽपि यदात्मनः ? ॥ १००३ ॥ पुरो गुरूणामानीय, केशैरादाय तत्प्रियाम् । तन्नितम्बस्थलाद्वासो, निःशङ्कं यच्च कृष्यते ॥१००४॥ तत् कथं सहतां नाम, भीमः कान्तापराभवम् ? । न प्रियागःसहास्तेऽपि, पक्षिणः किमु दोर्भृतः ? ॥ १००५ ॥ अदुःशासनमद्रोण–मकर्णमसुयोधनम् । अभीष्म–धृतराष्ट्रं च, राष्ट्रं भीमः करिष्यति ॥ १००६ ॥ तत् कथं सर्वसंहार–मिदानीमप्युपेक्षसे ? । घातय क्रूरकर्माण–मेनमेकं सुयोधनम् ॥ १००७ ॥ नैवं चेत्तदमुं पापं, पापादस्मान्निवर्तय । अमी वनाय गच्छन्तु, पाञ्चाल्या सह पाण्डवाः ॥ १००८ ॥ पुनरेत्यावधेरन्ते, भुञ्जन्तां जगतीं निजाम् । न चेत् कुटुम्बसंवर्त–स्तवाद्यायमुपस्थितः ॥१००९॥ इति भ्रातुर्गिरा भीति–प्रथमानाङ्गवेपथुः । बभाषे भृशमाक्रोशन्, धृतराष्ट्रः सुयोधनम् ॥ १०१० ॥ आः ! पापकर्मचाण्डाल !, सदाचारवनद्विप ! । निरपत्रप ! नाद्यापि, दुष्कर्मभ्यो निवर्तसे ? ॥१०११॥ विसृज स्वैरचाराय, बान्धवान् सह जायया । न चेन्मत्करवालोऽयं, शिरस्ते न सहिष्यते ॥१०१२॥

पितुर्गिरमिति श्रुत्वा, मनःकलुषमुच्चकैः । भीष्मादीनां च संभाव्य, भाषते स सुयोधनः ॥ १०१३ ॥ ममाप्येकं वचस्तर्हि, वर्षीयांसो ! भवत्वदः । नेतव्यं पाण्डवैः क्वापि, गुप्तैर्वर्षं त्रयोदशम् ॥ १०१४ ॥ निगूढानप्यमूंस्तस्मिं–श्चेज्जानामि

१ कुटुम्बप्रलयः ।

कथंचन । तन्मेदिनीमिमां भुङ्क्ष्वे, पुनर्द्वादशवत्सरीम् ॥ १०१५ ॥ अमीभिस्तु पुनस्तावद्-विधातव्या वने स्थितिः । इत्युक्तिं पाण्डवास्तस्य, गुर्वादेशात् प्रपेदिरे ॥ १०१६ ॥ निदेशाद्धृतराष्ट्रस्य, द्रोण-गाङ्गेययोरपि । आर्पयत् पाण्डुपुत्राणां, प्रावारान् कौरवाग्रणीः ॥ १०१७ ॥ गुरूणामनुरोधेन, पाण्डवेयानधोमुखान् । नित्ययौवनया सार्ध-मनुमेने वनाय सः ॥ १०१८ ॥ याज्ञसेनीं पुरस्कृत्य, मूर्तां धृतिमिवात्मनः । पदातयः सुताः पाण्डो-रिन्द्रप्रस्थात् प्रतस्थिरे ॥ १०१९ ॥ जाह्नवेयादयो वृद्धाः, स्नेहसंदोहमोहिताः । मन्यूर्मिमलिनास्यास्ता-नन्वगुः पादचारिणः ॥ १०२० ॥ संततास्रुपयःपूर-पङ्किलीकृतवर्त्मभिः । ते तथा पथि गच्छन्तो, निरीक्षांचक्रिरे जनैः ॥ १०२१ ॥

हारिताखिलनरेन्द्रसंपदः, पाण्डवाः स्फुरदखण्डतेजसः ।
मातरं च पितरं च वीक्षितुं, हस्तिनापुरमुपागमन् पुनः ॥ १०२२ ॥

इति मलधारिश्रीदेवप्रभसूरिविरचिते महाकाव्ये पाण्डवचरिते नलोपाख्यानद्यूत-वर्णनो नाम षष्ठः सर्गः ॥ ६ ॥

१ वस्त्राणि । २ मुखः प्रतिद्वय ।

अथ सप्तमः सर्गः ।

अथ धर्मसुतः सत्यं–निर्वाहस्पृहयालुना । मनसा वनवासाय, प्रतस्थे हस्तिनापुरात् ॥१॥ भीमादयः सह व्रज्या-व्रतसंनद्धबुद्धयः । स्वस्वशस्त्रादिसामग्री–समग्राश्चेलुरग्रतः ॥ २ ॥ पाण्डुश्च धृतराष्ट्रश्च, भीष्मश्च स्नेहमोहिताः । निर्यद्बाष्पजलोत्पीडाः, पाण्डवाननु वव्रजुः ॥ ३ ॥ सत्यवत्यादयः सर्वाः, शोकार्ता ज्येष्ठमातरः । दासीहस्तकृतालम्बा, बभूवुः पाण्डवानुगाः ॥ ४ ॥ भद्रं तवास्तु क्रीडाद्रे !, क्रीडावापि ! नमोऽस्तु ते । क्रीडावन ! तव क्षेमः, पुनर्वः संगमः कुतः ? ॥ ५ ॥ हंहो ! बर्हिन्नहो ! हंस !, हेले ! हरिणि ! हे शुक ! । कुशलं वोऽस्त्वसौ दैवा–द्याति वः परिचारिका ॥ ६ ॥ इत्यापृच्छय पतद्बाष्पा, केलिपात्राणि सर्वतः । बद्ध्वा परिकरं कृष्णा, कुन्तीपृष्ठस्थिताऽचलत् ॥ ७ ॥ (त्रिभिर्विशेषकम्) लोकोऽपि पुरवास्तव्यो, गुणगृह्यतया परम् । विहाय गृहसर्वस्वं, धर्मनन्दनमन्वगात् ॥ ८ ॥ सर्वैः साकं सशोकैस्तैः, पार्वणेन्दुसमाननः । धर्मात्मजः पुरान्निर्य–न्मूर्तो धर्म इवाबभौ ॥ ९ ॥ विसंकटेऽपि संघट्ट–संकटे पथि गच्छताम् । परस्परस्य लोकानां, मिथः पप्रथिरे कथाः ॥ १० ॥

निजं नलेन साम्राज्यं, पुरा द्यूते पणीकृतम् । हा ! हा ! युधिष्ठिरेणापि, तदिदानीमनुष्ठितम् ॥ ११ ॥ धिग्धिग्दुर्योधनं येन, महात्मा धर्मनन्दनः । कृत्वा द्यूतमयं छद्म, त्याजितो राज्यसंपदम् ॥ १२ ॥ दुर्योधनस्य न स्थास्नु, राज्यमा-

१ व्रज्या–प्रयाणं सैव व्रतम् । २ ' हला ' प्रतित्रय० ।

चमपि ध्रुवम् । यावद्विजयिनावेतौ, वृकोदर–किरीटिनौ ॥ १३ ॥ किं चान्यत् प्रतिपाञ्चालि, यदनेन प्रपञ्चितम् । ओंल-प्यालं तदस्माक–मेतस्यैव फलिष्यति ॥ १४ ॥ जनानां सानुरागाणा–मित्थमुक्तस्थिरे गिरः । केषां न पक्षपातः स्या–त्तादृशेषु महात्मसु ? ॥ १५ ॥

अथान्यमनसं कृष्णां, क्रूरः किर्मीरराक्षसः । अकस्मान्नभसोऽभ्येत्य, भापयामास वर्त्मनि ॥१६॥ मषीकृष्णवपुः पिङ्ग–विकीर्णघनमूर्द्धजः । स मौलिप्रज्वलद्दावो, विन्ध्याचल इवाबभौ ॥१७॥ गवलश्यामलो बिभ्र–दङ्गारसदृशौ दृशौ । जहास प्रलयाकाश–मुदिताङ्गारकद्वयम् ॥१८॥ भुजङ्गीतरलां जिह्वां, बिभ्राणं द्रौपदीपुरः । दन्तैः कृतान्तकुन्ताभै–र्भीमं स व्याददौ मुखम् ॥१९॥ ततो भयार्तमत्युच्च–मुच्चरत्प्रतिनिस्वनम् । द्रौपदी रोदसीभेद–कोविदं विदधे ध्वनिम् ॥ २० ॥ तेनाथ ध्वनिनाऽऽकृष्टः, कोपाटोपादुपेत्य तम् । भीमो निर्भर्त्सयांचक्रे, किमिदं पाप ! चापलम् ॥ २१ ॥ दीर्घाध्वपथिकीं श्रान्तां, प्रवासेन विपेदुषीम् । प्रियां भीषयसे मे त्व–मधुना भुङ्क्ष्व तत्फलम् ॥ २२ ॥ इत्याक्षिप्य गदाघातै–स्तं नीत्वाऽन्तं वृकोदरः । योऽस्ति दुर्योधने क्रोध–स्तन्मुष्टिं कृष्टवांस्तदा ॥ २३ ॥ दुर्योधनवधारम्भे, किर्मीरं तस्य वल्लभम् । निहत्यास्थापयद्भीमो, भद्रायोंकारमादिमम् ॥ २४ ॥ इमं किर्मीरवृत्तान्त–मविदन्नेव भूपतिः । आजगाम लतारम्यं, काम्यकं नाम काननम् ॥ २५ ॥ तदा विकर्तनः कर्तु–मात्मानमिव पावनम् । अध्यास्य नभसो मध्य–मास्यं तस्यास्पृशत् करैः ॥ २६ ॥ कुकर्मकर्मठेऽत्यन्त–क्रोधादिव सुयोधने । कर्मसाक्षी तदा मङ्क्षु, जज्वाल ज्वलनोपमः ॥२७॥ मातापितृजनः सर्वः, पादचारेण खिद्यते ।

१ उक्त्वाऽलम् । २ अङ्गारकः–भौमग्रहः । ३ खिन्नाम् । ४ सूर्यः । ५ सूर्यः ।

तत् पञ्चरात्रमत्रैव, देवावस्थीयतामिति ॥ २८ ॥ मुहुर्विज्ञापितो भीम-सेनेन वसुधाधिपः । सर्वेषामपि लोकाना-मभयाणं समादिशत् ॥ २९ ॥ (युग्मम्) अपाथेयो जनस्तत्र, तपनातपविक्लवः । बाहूपधानः सर्वोऽपि, सुष्वाप प्रतिपादपम् ॥३०॥ तादृशे वनवासेऽपि, तेषामात्मानुगामिनाम् । धृत्तिचिन्ता दुनोति स्म, धर्मनन्दनमानसम् ॥ ३१ ॥ ज्ञात्वा तादृग्मनो राज्ञः, पार्थः सस्मार सत्वरम् ॥ विद्यां मनोहराहार-समाहरणकोविदाम् ॥ ३२ ॥ ततस्तयोपनीतायां, रसवत्यां पृथाज्ञया । तं जनं भोजयामास, प्रमोदाद्द्रुपदात्मजा ॥ ३३ ॥ विनयान्निजबन्धूनां, राज्यसौख्यातिशायिनाम् । सुखेन धर्मसूनुस्तं, गमयामास वासरम् ॥ ३४ ॥

अपरेद्युर्महाबाहुः, पित्रादेशात् स्वदेशतः । पाञ्चालदुहितुर्बन्धु-र्धृष्टद्युम्नः समाययौ ॥ ३५ ॥ प्रणम्य धर्मपुत्रादी-नुपतस्थे स सोदराम् । अवादीच्च कथं दीन-मित्थं धत्से मुखं स्वसः !! ॥३६॥ हस्तिनापुरचारिभ्य-श्चारेभ्यश्छद्मना कृतम् । श्रुत्वा प्रवासमेवं व-स्तातेन प्रहितोऽस्म्यहम् ॥ ३७ ॥ इदानीमपि सोदर्ये !, निजशौर्येण विष्टपम् । अदुर्योधनमाद्ध्यां, मन्यते तु पतिर्न ते ॥ ३८ ॥ ततः सत्यजडो याव-द्वने द्वादशवत्सरीम् । नीत्वा ते पतिरभ्येति, तावदेहि गृहं पितुः ॥ ३९ ॥ इत्युक्ता प्रत्यभाषिष्ट, पाञ्चालनृपतेः सुता । दुर्योधनवधे विघ्नो, राजैव भीम-पार्थयोः ॥ ४० ॥ पाण्डवानां पदैर्यानि, पावनानि वनान्यपि । मह्यं तान्येव रोचन्ते, कृतं पितृगृहेण मे ॥ ४१ ॥ केवलं सरलान् बालान्, भागिनेयान्निजानमून् । पञ्चाप्यादाय पाञ्चालान्, व्रज त्वं विजयी भव ॥ ४२ ॥ एवमुक्तस्तया स्नेहा-द्धर्मसूनोरनुज्ञया । धृष्टद्युम्नः पतद्बाष्प-स्तान् गृहीत्वा गृहं ययौ ॥ ४३ ॥

अन्येद्युरभ्रमूंकान्त–कान्तदन्ताधलं बलम् । बिभ्रन्नारायणः प्रीत्या, युधिष्ठिरमुपाययौ ॥४४॥ प्रत्युद्गम्य तमायान्तं, प्रणमन्ति स्म पाण्डवाः । ववन्दे द्रुतमभ्येत्य, सोऽपि कुन्तीपदाम्बुजम् ॥ ४५ ॥ कंसध्वसी सुखासीनो, निविष्टं विष्टरे पुरः । मनःसंक्रान्ततद्दुःखो, धर्मनन्दनमभ्यधात् ॥ ४६ ॥ दुर्योधनकवीन्द्रेण, स्पष्टाभीष्टार्थदेष्टिना । दुरोदरप्रबन्धोऽयं, व्यधायीति श्रुतं मया ॥ ४७ ॥ दुर्योधननरेन्द्रस्य, द्यूतमन्त्रैकसाधने । उभावभूतां शकुनिः, कर्णश्चोत्तरसाधकौ ॥४८॥ अभविष्यन्निकारोऽयं, मयि संनिहिते न ते । रोहिणीरमणं राहु–र्ग्रसते न बुधान्तिके ॥ ४९ ॥ इमौ तु बिभितस्तुभ्यं, भीमौ भीम–धनंजयौ । अन्यथा कुतो हेतौ, वसुधामसुयोधनाम् ॥ ५० ॥ इदानीमप्यमुं हसं, रिपुमुच्छिन्दतो ध्रुवम् । तवायं सत्यनिर्वाह–अडिमैव ममार्गला ॥५१॥ यच्चु दुश्चरितं तस्य, पाञ्चाल्याः केशकर्षणम् । तदेतया ममाभीर्भि–र्बाष्पैः पश्य निवेद्यते ॥ ५२ ॥ नूतनो मम कोपाग्निः, पाञ्चालीनयनाम्बुभिः । ज्वलितोऽतीव गान्धारी–दुरपत्यं दिधक्षति ॥ ५३ ॥ ततः सतीतिरस्कार–पाप्मनामधुना फलम् । तं दुष्टं लम्भयिष्यामि, मा स्म प्रत्यूहमावह ॥ ५४ ॥

इत्युक्त्वा विरते विष्णौ, कृष्णाहृदयवल्लभः । मूर्ध्ना प्रणम्य सद्बुद्धि–र्बद्धाञ्जलिरदोऽवदत् ॥ ५५ ॥ कंसान्तक ! त्वयि क्रुद्धे, न हि शक्रोऽपि विक्रमी । मनुष्यकृमयः केऽमी, पुनर्दुर्योधनादयः ? ॥ ५६ ॥ सत्यातिक्रमकौलीनं, मदीयं किं तु लोकतः । समाकर्ण्य त्वमेवात्र, विश्वत्रातस्त्रपिष्यसे ॥५७॥ निषिद्धौ बान्धवावेतौ, मयाऽऽदेशवशंवदौ । त्वं तु व्यावर्त(र्त्य)से-

युधिष्ठिर-समीपे धृष्टद्युम्न-स्याग-मनम् । कृष्णोऽपि पश्चादा-गतः ॥

(१ कोपेपूपलभ्यमानस्याभ्रमुशब्दस्य ह्रस्वत्वाद्दीर्घत्वमत्र चिन्त्यम् ।) अभ्रमुकान्तः—ऐरावणः.

२ 'सिद्धिना' 'वृष्टिना' इति प्रत्यन्तरपाठ । ३ पराभवः । ४ चतुर्थी चिन्त्या । ५ दग्धुमिच्छति ।

ऽमुष्मा–दारम्भांचेत् प्रसीदसि ॥ ५८ ॥ इत्थं हरौ शमं नीते, विनीतो नीतिकोविदः। धर्मजो बान्धवैः सार्धं, भीष्मस्याभ्यर्णमभ्यगात् ॥५९॥ अब्रवीच्च बृहत्तात-गुरुभ्योऽपि गुरुर्भवान्। व्यसनत्रासिनीं शिक्षां, देहि मे पारिपार्श्विकीम् ॥ ६० ॥

अथाभापत भीष्मोऽपि, कुरुगोत्रशितद्युते !। विश्वत्रयीसंवननं[1], तवैवेदग्गुणार्जनम् ॥ ६१ ॥ मित्रा–मित्रपरीक्षार्थं, मन्ये व्यसनमप्यदः। त्वयैवात्तं स्वयं नो चेत्, क भवान् ? क दुरोदरम् ? ॥ ६२ ॥ जगज्जैत्रकलाः पार्थ, यस्यैते सन्ति बान्धवाः। सोऽपि द्यूते विजीयेत, स्यान्न चेद्भवितव्यता ॥ ६३ ॥ एकाकिनैव कान्तार–विहारस्पृहयालुना। नियतं त्यक्तुमारब्धा, वयमेकपदे त्वया ॥ ६४ ॥ भूत्वा समस्तवस्तूनां, संविभागपरः पुरा। इदानीं कथमेकाकी, भोक्ष्यसे वनसंपदम् ? ॥ ६५ ॥ तन्मामप्यनुजानीहि, सहागमनहेतवे। चूडाचन्द्रं महेशोऽपि, न जातु त्यजति क्वचित् ॥ ६६ ॥ कुर्वन्नित्याग्रहं भीष्मः, पादावाधाय मूर्धनि। विनयाद्धर्मपुत्रेण, वारितः पुनरब्रवीत् ॥ ६७ ॥ ग्राह्याः प्रतिभुवः[2] पञ्च, चौरास्तु त्रिगुणास्ततः। निग्राह्याः क्षोणिपालेन, श्रियःस्थेमानमिच्छता ॥६८॥ दान १ मौचित्यविज्ञानं २, सत्पात्राणां परिग्रहः ३। सुकृतं ४ सुप्रभुत्वं ५ च, पञ्च प्रतिभुवः श्रियः ॥६९॥ सदा वशंवदैरेतैः, प्रतिभूभिरभून्नृपः। एतेभ्यस्त्रिगुणान् वत्स !, विद्धि राज्यहरान् पुनः ॥७०॥ अरिषड्वर्गसंसर्गः[3] ६, प्रकृतौ ७ योग्यकर्मसु ८। नये ९ धर्मे १० प्रतापे ११ च, विमुखत्वमनारतम् ॥७१॥ अज्ञान १२ मनृतं १३ लज्जा, १४ निखिलव्यसनं १५ तथा। एते राज्यहृतौ वत्स !, स्युः पञ्चदश दस्यवः ॥ ७२ ॥ प्रत्येकमेषां राज्यश्री–हरणे प्रभविष्णुता। पश्यैकेनापि ते द्यूत–व्यसनेन कियत् कृतम् ? ॥ ७३ ॥ उच्छेदाय तदेतेषां, यते-

---

१ लोकत्रयवशीकरणम्। २ साक्षिणः। ३ कामः १ क्रोधः २ लोभः ३ मोहः ४ मदः ५ मत्सरश्च ६।

धास्तात ! सर्वथा । पुनराच्छिद्य तैरात्ता-माददीथाः श्रियं यथा ॥ ७४ ॥ वर्तेथाश्च तथा तात !, मानसेनाप्रमादिना । पूर्णेऽवधौ निवर्तेथाः, काननात् कुशली यथा ॥ ७५ ॥ इत्याभाष्य गृहान् भीष्मे, प्रत्यावृत्ते युधिष्ठिरः । द्रोणाचार्य-कृपाचार्या-वापृच्छत वनेच्छया ॥ ७६ ॥

द्रोणोऽवादीदविद्राण-वात्सल्यो वत्स ! वत्स्यसि । आकल्पममुना सत्य-व्रतेन हृदये सताम् ॥ ७७ ॥ वत्स ! धर्मेण सत्त्वेन, विनयेन नयेन च । अमुना भुवनस्यास्य, भवितासि निदर्शनम् ॥ ७८ ॥ द्रोणो गुरुरमी सर्वे, शिष्याः पाण्डव-कौरवाः । यद्यप्येवं तथाऽप्यस्मि, युष्मासु सविशेषदृक् ॥ ७९ ॥ तत्रापि पुत्रवात्सल्या-दस्त्रे निष्पादितस्तथा । मया पार्थो यथा तैस्तै-र्गुणैर्जयति मामपि ॥ ८० ॥ तदेतस्मिन् समीपस्थे, न ते प्रत्यूहसंभवः । दुस्तरे सन्तु कान्तारे, पन्थानः शिव-तातयः ॥ ८१ ॥ उपोषितानां पीयूष-बन्धुना दर्शनेन ते । अचिरेणैव भूयान्मे, नेत्राणां पारणोत्सवः ॥ ८२ ॥ इत्युदीर्य गते द्रोणे, सकृपे साश्रुलोचने । निर्व्याजं व्याजहारेति, धृतराष्ट्रं युधिष्ठिरः ॥ ८३ ॥

ज्येष्ठतात ! नमस्तुभ्यं, प्रसन्ना देहि नो दृशः । दुर्योधनस्य संदेशं, गतो व्याहर्तुमर्हसि ॥ ८४ ॥ भ्रातः ! कुरुकुलो-त्तंस !, तथैताः पालयेः प्रजाः । पूर्वजोपार्जिता कीर्ति-र्नाश्नुते म्लानतां यथा ॥ ८५ ॥ तस्य वैनयिकं पश्यन्, स्वस्नोर्दु-र्नयं पुनः । अपत्रपिष्णुस्तूष्णीको, धृतराष्ट्रः पुरं ययौ ॥ ८६ ॥ ज्यायस्यः सत्यवत्याद्याः, प्रसाद्य नतिपूर्वकम् । धर्म-जेन वने यातु-मन्वज्ञाप्यन्त मातरः ॥ ८७ ॥ अभिनन्द्य तमाशीर्भि-र्निर्भिन्नहृदया इव । अतुच्छशोकमूर्च्छाला-स्तास्ततः

१ 'तेभ्यस्त्वा०' प्रत्यन्तर० । २ प्रभूतवात्सल्यः । ३ कल्याणश्रेणयः । ४ चन्द्रेण ।

युधिष्ठिरेण कृतं भीष्मादीनां निवर्तनम् ॥

कथमप्यगुः ॥ ८८ ॥ अथ कार्यविदाकार्य, लोकमस्तोकमेकतः । नगराय निवर्तध्व-मिति भूपतिरादिशत् ॥८९॥ लोकोऽप्य-जल्पदाकल्प-मस्माकमनुजीविनाम् । पादा नन्दन्ति यत्रैते, तत्रैव नगरं प्रभो ! ॥ ९० ॥ आत्मानुयायिनीं छायां, व्यावर्तयसि चेदिमाम् । तदा वयं महीनाथ !, व्यावर्तेमहि नान्यथा ॥ ९१ ॥

तं तथा बद्धनिर्बन्धं, जनं जानन् युधिष्ठिरः । अनुगत्य सहायान्त-मवादीद्विदुरं ततः ॥ ९२ ॥ वितनोपि त्वमेवार्य !, प्रीतिमस्मासु पैतृकीम् । देवस्याजनि पाण्डोस्तु, केवलं जन्मकर्तृता ॥ ९३ ॥ एतावस्मद्वियोगार्ति-कातरौ पितरौ पुरः । सहैव नेतुं मोक्तुं वा, ब्रूहि किं मम सांप्रतम् ? ॥ ९४ ॥ जगाद विदुरो वत्स !, मत्सरी ते सुयोधनः । अतः सर्वकुटुम्बेन, समं गन्तुं न युज्यते ॥ ९५ ॥ तदत्रैव तटस्थेन, स्थेयं देवेन पाण्डुना । देवी स्थास्यति कुन्ती तु, नैव वो विरहासहा ॥ ९६ ॥ एनमादृत्य तन्मन्त्रं, नत्वा पाण्डुं युधिष्ठिरः । सबाष्पं स्थापयामास, विनीतो विदुरान्तिके ॥ ९७ ॥ अवियोगाद्वियो-गाच्च, तदानीं पुत्रभर्तृभिः । अवाप युगपत् कोटिं, कुन्ती हर्षविषादयोः ॥ ९८ ॥ तथासौ पर्यवस्थाता, न स्थाता स्वव्यव-स्थया । तद्भवेः सावधानस्त्व-मध्वनीनो वनाध्वनि ॥ ९९ ॥ इति धर्मसुतं स्नेहा-दनुशास्य सगद्गदम् । रुदन्तीं विदुरः कुन्ती-मनमन्नम्रमस्तकः ॥ १०० ॥ (युग्मम्)

अथ साश्रुमुखः पाण्डु-रभाषिष्ट युधिष्ठिरम् । कान्तारेषु कथं वत्स !, सकुटुम्बो भ्रमिष्यसि ? ॥ १०१ ॥ कथं च त्वद्वि-युक्तोऽहं, भविष्यामि हताशयः ? । विना चन्द्रं समुद्रस्य, दशा जायेत कीदृशी ? ॥ १०२ ॥ न शक्नोमि परं वत्स !, वचस्ते

१ न विरुद्धमाचरिष्यति ।

कर्तुमन्यथा । क्षेमशानचिरेणैव, दर्शयेर्मुखमात्मनः ॥ १०३ ॥ किंच रत्नमयीमेतां, स्फुरद्धामोर्मिमूर्मिकाम् । गृहाणार्तिप्रहाणाय, धारयेः पारिपार्श्विकीम् ॥ १०४ ॥ इत्युदीर्य निवेद्यास्याः, सर्वं संभवमादितः । प्रीतश्चिक्षेप पाण्डुस्तां, ज्येष्ठात्मजकराङ्गुलौ ॥ १०५ ॥ कुर्वीथाः पुत्रभाण्डेषु, देवि ! यत्नमिति ब्रुवन् । आपृच्छ्य प्रेयसीं पाण्डु-र्ययौ सविदुरः पुरम् ॥ १०६ ॥ मातस्तातमहोरात्रं, शुश्रूषस्वेति धर्मजः । उदीर्य सादरं माद्रीं, मुमोच पितुरन्तिके ॥ १०७ ॥ वत्सौ ! बान्धवसेवायां, कुर्यातं निश्चितं मनः । इत्यादिश्य यमौ सापि, जगाम सह पाण्डुना ॥ १०८ ॥

अथ प्रतस्थे पुरतः, पौरोपेतः पृथासुतः । केवलं केशवेनासौ, त्याजितः पादचारिताम् ॥ १०९ ॥ कोऽपि रंहस्विनं वाह-मारुरोह मनोहरम् । कोऽप्यात्माभिमतां मत्त-मतङ्गजमतल्लिकाम् ॥ ११० ॥ अन्ये विमानमन्यानि, याप्ययानानि लीलया । प्रासादरुन्दमानन्द-स्यन्दिनं स्यन्दनं परे ॥१११॥ युग्मम् ॥ स एवं वाहनारूढैः, प्रौढश्रीभिः स्वबान्धवैः । साकं नासिक्यनगरं, महितो हरिणाऽभ्यगात् ॥ ११२ ॥ तत्र निर्मापितां मात्रा, श्रीमच्चन्द्रप्रभप्रभोः । असौ मणिमयीमर्चा-मानर्च निकचाम्बुजैः ॥ ११३ ॥ गोविन्दः पुनरानन्द-बाष्पाविलविलोचनः । चिरं चन्द्रप्रभं देव-मुपासामास भक्तितः ॥ ११४ ॥ स्तोत्रैर्ग्रथितैरभिष्टुत्य, तौ कुन्ती-देवकीसुतौ । निजं सौधं समभ्यास्य, बुभुजाते जनैः सह ॥ ११५ ॥ जिनप्रभावनारम्भ-निशुम्भितनिजांहसः । ते सर्वे गमयामासु-र्वासराणि कियन्त्यपि ॥ ११६ ॥

उपेत्यान्येद्युरासीनं कृष्णाभ्यर्णे युधिष्ठिरम् । ऊचे पुरोचनो नाम, दुर्योधनपुरोहितः ॥ ११७ ॥ आवद्धपाणि-

१ स्फुरत्प्रभातरङ्गाम् । २ मुद्रिकाम् । ३ प्रासादसदृशम् ।

युधिष्ठिरः पितरं निवर्त्य कृष्णेन सह नासिक्य-नगरे गतः ॥

मुकुल-स्तव बन्धुः सुयोधनः । इदानीं मन्मुखेनेदं, विज्ञापयति सादरम् ॥ ११८ ॥ आर्य ! धुर्यस्त्वमार्याणा-मनार्याणामहं पुनः । त्वमग्रणीर्गुणवतां, निर्गुणानामहं पुनः ॥ ११९ ॥ उत्तंसः सज्जनानां त्वं, दुर्जनानामहं पुनः । धौरेयस्त्वं सुबुद्धीनां, दुर्बुद्धीनामहं पुनः ॥ १२० ॥ शेखरस्त्वं कृतज्ञानां, कृतघ्नानामहं पुनः । त्वमुत्तमानां माणिक्य-मधमानामहं पुनः ॥१२१॥ आदिमस्त्वं महेच्छाना-मल्पेच्छानामहं पुनः । त्वमाद्यः कृतविद्यानां, निर्विद्यानामहं पुनः ॥ १२२ ॥ मया विवेकशून्येन, यत्त्वापकृतं पुरा । प्राकृतेष्वपि तन्न स्यात्, कुरुवंशे तु का कथा ? ॥१२३॥ तानीदानीं व्यलीकानि, त्वं मम क्षन्तुमर्हसि । स्खलितं यत् कनिष्ठस्य, बन्धोर्ज्येष्ठस्य तन्मुदे ॥ १२४ ॥ भवन्त्युच्चावचा वाचो, याः काश्चन दुरोदरे । तासामनुपदी कः स्या-द्विशेषेण भवादृशः ॥ १२५ ॥ तत् प्रसीद समभ्येहि, गृहाननुगृहाण माम् । संचरस्व पुनः स्वैरं, हस्तिना हस्तिनापुरे ॥ १२६ ॥ यज्जज्ञे त्वय्यवज्ञाभिः, पुरा कितवकैतवे । स्वक्रमाम्भोजरजसा, रजस्तन्मे प्रमृज्यताम् ॥ १२७ ॥ सदाऽस्तु मालतीपुष्प-स्तवकप्रातिवेश्मिकी । अतः परं तवाज्ञा मे, मौलिपल्यङ्कखेलिनी ॥ १२८ ॥ अथ चेदार्य ! तेऽत्यन्तं, सत्यव्रत-विपर्ययात् । राज्योपभोगैर्लज्जेत, चेतः केतकनिर्मलम् ॥ १२९ ॥ सदाऽमुनाऽध्वना ये हि, साधवः संचरिष्णवः । स्यात्तेषां व्रतनिर्वाहे, जाड्यमुड्डामरं परम् ॥ १३० ॥ ततोऽनुग्रहमाधाय, संविधाय स्थिरं मनः । स्वस्थेन स्थेयमार्येण, नगरे वारणावते ॥ १३१ ॥ आर्यस्य सानुजस्यापि, स्वैरं तत्रापि तिष्ठतः । आत्मचेतोऽनुरूपाणा-मुपनेतास्मि संपदाम् ॥ १३२ ॥ इति विज्ञापितं तुभ्य-मधुना तेन बन्धुना । अन्वहं च नियुक्तोऽह-मादेशाग्रेसरस्तव ॥ १३३ ॥ इत्याख्याय स्थिते तस्मि-स्तूर्ष्णीं कृष्णादयो मुदा । अर्थः समर्थ एवाय-मेतस्येत्यनुमेनिरे ॥ १३४ ॥

अनुग्रजन्मनस्तेषां, तदानीं धर्मनन्दनः। वचः प्रमाणमेवेद-मित्युवाच पुरोचनम् ॥ १३५ ॥ स चचाल सुष्कृणोऽपि, पुरोचनपुरोगमः। बन्धुभिः सममारूढ-वारणैर्वारणावतम् ॥ १३६ ॥ तद्वास्तव्यः समस्तोऽपि, जनः प्रीतितरङ्गितः। मङ्गल्योपायनस्तस्य, संमुखीनः समागमत् ॥१३७॥ फुल्लवक्त्रारविन्देन, गोविन्देन समं पुरम्। प्रविवेश विशामीशः, स्वः-पतिः स्वःपुरे यथा ॥ १३८ ॥ स तत्र चित्रशालाभि-र्विशालाभिरलंकृतम्। सौधमद्भुतमध्यास्त, मध्यास्तविविधासनम् ॥ १३९ ॥ उपचर्याशतै(नै)स्तैस्तै-रजस्रं धर्मजन्मने। आत्मानं रोचयांचक्रे, चातुर्येण पुरोचनः॥ १४० ॥ अतिस्तुतिपदं वस्तु, समस्तं हस्तिनापुरात्। तेषां दुर्योधनो नित्य-मुपदीकुरुते तदा ॥ १४१ ॥ तथा पृथ्वीभुजा सर्वैः, सममाजग्मिवाञ्जनः। प्रसादितो यथा जातु, न सस्मार निजं गृहम् ॥ १४२ ॥ सवित्री पाण्डुपुत्राणां, दानैकरुचिमानसा। पाणिं व्यापारयामास, दीनोद्धरणकर्मणि ॥ १४३ ॥ प्रियेषु सानुरागेषु, मनीषितविधायिषु। नोदकण्ठत पाञ्चाली, कदाचिन्नृपतिश्रिये ॥ १४४ ॥ इत्थं कुटुम्बसौस्थ्येन, सुयोधनगिराऽपि च। अभूत् तत्रैव वासाय, स्थिरचेता युधिष्ठिरः ॥ १४५ ॥ हस्तिनापुरसाम्राज्य-सपिण्डां पाण्डवश्रियम्। दृष्ट्वा हृष्टो विसृष्टस्तै-र्जगाम द्वारकां हरिः ॥ १४६ ॥ मातुरुत्कण्ठिता सार्ध-मात्मजेनाभिमन्युना। सुभद्रा सह कृष्णेन, प्रहिता पाण्डुसूनुना ॥ १४७ ॥ तानथो सुस्थितंमन्यः, पौरानप्यश्रुवर्षिणः। कथंचिदपि संबोध्य, हास्तिनं प्राहिणोन्नृपः ॥ १४८ ॥

अन्यदा द्रुतमभ्येत्य, विदुरप्रहितो रहः। अन्वितं भीम-पार्थाभ्यां, तं जगाद प्रियंवदः ॥ १४९ ॥ देव! त्वां विदुरः प्राह, यदिहोपेयुषा मया। धृतराष्ट्रान्तिकस्थेन, रहो दुर्योधनः-स्थितः ॥१५०॥ कर्ण-दुःशासनादीनां, मन्त्रेण

दुर्योधन-संदेशेन पाण्डवानां वारणावते गमनम् ॥

विगतत्रपः । पुरोचनं ब्रुवन्नेवं, निगूढं शुश्रुवे स्वयम् ॥ १५१ ॥ (युग्मम्) परिच्छदबहुत्वेऽपि, निजत्वेन निरन्तरम् । मह्यं
त्वदपरः कश्चित्, पुरोचन ! न रोचते ॥ १५२ ॥ भद्र ! त्वमपि जानासि, पाण्डवान्मम वैरिणः । जीवत्सु तेषु राज्यं मे,
गन्धर्वनगरायते ॥ १५३ ॥ वह्नेरुद्दीपनैर्द्रव्यैः, सण-सर्जरसादिभिः । आचितं जातुषं सौधं, विदध्या वारणावते ॥ १५४ ॥
सकुटुम्बमवस्थाप्य, विनयात् तत्र कृत्रिमात् । कुर्यास्तं धर्मजं कृष्ण-चतुर्दश्यां कृशानुसात् ॥ १५५ ॥ सा परं न परिज्ञाता,
काऽपि कृष्णा चतुर्दशी । ततोऽवधानमाधेयं, प्रतिकृष्णचतुर्दशि ॥ १५६ ॥ इत्याख्यायि मया तुभ्य-मिदं विदुरवाचिकम् ।
प्रमादितां तदत्रार्थे, पृथिवीनाथ ! मा कृथाः ॥ १५७ ॥
तस्याकर्ण्य विपाकीर्णां, गिरमेतां युधिष्ठिरः । सक्रोधैर्बन्धुभिः सार्धं, परीक्षामास तद्गृहम् ॥ १५८ ॥ असौ सद्मभयं
छद्म, तन्निर्णीय गुणार्णवः । मातृभ्रातृकलत्राणां, प्रत्येकं मन्त्रमग्रहीत् ॥ १५९ ॥ पूर्वं भीमोऽभ्यधादार्य !, विदार्य हृदयं
रिपोः । आदिश द्रुतमभ्येमि, किमद्यापि विलम्बसे ? ॥ १६० ॥ अर्जुनोऽप्यब्रवीदार्य !, मम लघ्वार्यदर्शितः । पक्षोऽयमु-
चितो भाति, गूढं वा गम्यतेऽग्रतः ॥ १६१ ॥ प्रकाशमेव वा स्वैरं, व्योमयात्रैव स्तूयते । तव भ्रूक्षेपसापेक्षा, विमानानां यतः
श्रियः ॥ १६२ ॥ बन्धुभ्यामुद्धतं धीर-मुदीरितमिदं वचः । निशम्य सम्यगालोच्य, मनसाऽवोचदग्रजः ॥ १६३ ॥ वत्सौ !
यच्छौर्यधुर्याणा-मार्कल्पं तदजल्पता(त)म् । दुर्योधनवधे किं तु, सत्यं स्यान्मे मलीमसम् ॥१६४॥ गच्छन्तोऽपि पथि च्छन्न-
मुच्छेन्नानीकसौष्ठवाः । निर्लज्जेन वयं तेन, लक्ष्येमहि पदे पदे ॥ १६५ ॥ वशीकृतदिगन्तस्य, तस्यानन्तबलौजसः । वयमेका-

१ योग्यम् । २ नष्टं सैन्यसौष्ठवं येषां ते ।

किनः पान्थाः, स्थाने स्थाने न दुर्ग्रहाः ॥ १६६ ॥ न च विद्यावलेनापि, गन्तुं संप्रति युज्यते । सत्यस्य निकषो ह्येवं, न मे प्रादुर्भवित्क्षिपम् ॥ १६७ ॥ श्रूयतां तु ममाकूत-मवधाय मनोऽधुना । अतिगुप्तेङ्गिताकारै-रास्यतेऽत्रैव वेश्मनि ॥ १६८ ॥ यदा स्वामिनिदेशार्थ-मुत्सहेत पुरोचनः । तदाऽस्माभिरितो गेहा-न्निर्गन्तव्यं सुरङ्गया ॥ १६९ ॥ ततश्च दग्धान् विज्ञाय, कोऽप्यन्विष्यति नैव नः । तदेवमेकमस्माकं, श्रेयः स्यादपरं त्विदम् ॥ १७० ॥ पाण्डवेयाः प्रचण्डेन, ज्वालाजटिलमूर्तिना । सुखं मम प्रपञ्चेन, दन्दह्यन्ते स्म वह्निना ॥ १७१ ॥ मुदं मेदस्विनीमेतां, हृदि धत्ते सुयोधनः । गमयामः सुखेनेत्थं, वयं द्वादशवत्सरीम् ॥ १७२ ॥ (युग्मम्) निर्गमोऽस्तु सुरङ्गायाः, प्राच्यां द्वैतवनाध्वना । संप्रत्यालोक्यतां कोऽपि, सुरङ्गाखनकः पुनः ॥ १७३ ॥ इत्युक्ते धर्मपुत्रेण, भूयोऽवादीत्प्रियंवदः । प्रहितो विदुरेणास्ति, खनकः शुनकाभिधः ॥ १७४ ॥ अयं तव पितृव्यस्य, बहिर्मन इव स्थितम् । विश्रम्भस्य परा भूमि-रात्मेव वपुरन्तरे ॥ १७५ ॥ इत्याख्याय समाहूय, नृपाय तमदर्शयत् । ननाम सोऽपि भूपालं, भूतलन्यस्तमस्तकः ॥ १७६ ॥ भद्र ! भद्रां सुरङ्गां नः, स्वैरचारमनोहराम् । कुरुष्वेति पतिर्भूमेः, सप्रसादं समादिशत् ॥ १७७ ॥ पुरबाह्यगृहस्यान्तः, स्थित्वा सोऽपि प्रतिक्षपम् । दिवाऽन्यत् कर्म कुर्वाणः, खनति स्म शनैः शनैः ॥ १७८ ॥ अधस्ताद्भीमतल्पस्य, बिलद्वारं विधाय सः । निजव्यापारपारीणं, स्वं नृपाय न्यवेदयत् ॥ १७९ ॥ अविश्वासाः सविश्वासं, निर्मुदः समुदं तदा । लोकेभ्यो दर्शयामासु-रात्मानं तेऽपि पाण्डवाः ॥ १८० ॥ प्रतिप्रत्यूषमुत्थाय, जात्यमारुह्य वाजिनम् । चतुर्दिशं पथः सर्वान्, विदामास वृकोदरः ॥ १८१ ॥

विदुरसंदेशेन पाण्डवैः सुरङ्गा कारिता ॥

१ 'क्षिपम्' प्रतित्रयपाठोऽपि साधुः, क्षिपाशब्दोऽपि रात्रिपर्यायोऽस्ति कोषे ।

कुन्त्याश्च याज्ञसेन्याश्च, यमयोश्च कनीयसोः । अभ्यासार्थं पृथासूनुः, सुरङ्गान्तरदर्शयत् ॥ १८२ ॥ पञ्चापि चन्द्रशालायां, निषण्णास्ते नभोगतैः । नक्षत्रैः क्षत्रमार्तण्डा, निशि निश्चिक्यिरे पथः ॥ १८३ ॥ कुन्ती शुभाय पुत्राणा-माहारैः सुमनोहरैः । दीनानाथजनं सर्वं, प्रीणयामास सर्वतः ॥ १८४ ॥ अर्चामभ्यर्चयामास, श्रीशान्तेः शान्तकल्मषाम् । परमेष्ठिमयं मन्त्रं, ध्वस्तपापं जजाप च ॥१८५॥ विश्वस्तं बन्धुभिः सार्धं, दृष्ट्वा हृष्टं युधिष्ठिरम् । पूर्णामेव निजां मेने, रुचिं पापः पुरोचनः ॥१८६॥

अथ कृष्णचतुर्दश्यां, कस्यांचित् पञ्चभिः सुतैः । स्नुषया चैकया साकं, वृद्धा काचिदुपाययौ ॥ १८७ ॥ पञ्चपुत्रपवित्रां च, वृद्धामालोक्य तां पृथा । आत्मतुल्यतया मेने, भगिनीमिव सोदराम् ॥१८८॥ मधुरस्निग्धमाहारं, तां वृद्धामृजुमानसा । सात्मजां भोजयामास, कुन्ती देवी सगौरवम् ॥ १८९ ॥ आमृशद्भिर्मुहुस्तुन्दं, सुतैः सौहित्यशालिभिः[1] । सार्धं वृद्धाऽध्वना खिन्ना, तत्रैवाशेत निःसहा ॥ १९० ॥ दुर्निमित्तैस्तमीं[2] भीम-स्तां संभाव्य भयंकरीम् । सकुटुम्बं सुरङ्गायां, युधिष्ठिरमतिष्ठिपत् ॥ १९१ ॥ निर्विलम्बं कुटुम्बेन, समं जग्मुषि बान्धवे । भीमसेनः स्वयं तस्थौ, द्वारि संचारिलोचनः ॥ १९२ ॥ द्वारतो दीपयन्नुच्चै-रर्चिष्मन्तं पुरोचनः । उन्निद्रमनसा तेन, दुष्टो दृष्टः स्वचक्षुषा ॥ १९३ ॥ धूमैर्धूमध्वजो याव-न्नालिङ्गति नभोऽङ्गणम् । तस्य क्रोधानलस्ताव-ज्ज्वालाजालममुञ्चत ॥ १९४ ॥ ततः पुरोचनं धृत्वा, तं केशेषु विसंस्थुलम् । आचकर्ष हठेनासौ, हरिणं हरिणारिवत् ॥ १९५ ॥ तं नीत्वा मुष्टिना मृत्युं, स दम्भोलिसनाभिना[3] । प्रदीप्य जातुषागारं, चकार द्रुतमग्निसात् ॥ १९६ ॥ सोत्कण्ठमानसो वात-तनयोऽपि सुरङ्गया । एत्य संघट्टितः पश्चा-ज्झटित्येवाग्रजन्मना[4] ॥ १९७ ॥

१ तृप्तिशालिभिः । २ रात्रिम् । ३ वज्रसदृशेन । ४ ' जन्मनः ' प्रतिद्वय० ।

अचिरेणैव पुंनागा, नागलोकोपमाद्बिलात् ॥ विनिर्याय प्रयान्ति स्म, पथि ते रथवर्जिताः ॥ १९८ ॥ तेषां प्रदीपनोद्योतः, पृष्ठतस्तीव्रवेगतः । दिष्ट्या पुरोचनो दग्ध, इत्याख्यातुमिवाययौ ॥ १९९ ॥ अस्तं नीत्वा तमःस्तोमं, तेनालोकेन दर्शितः । हस्तदीपोपमेनैषा-मध्वा सौध इव ध्रुवम् ॥२००॥ संपत्पुटकिनी[1]खण्ड-मार्तण्डाः पाण्डवा इमे । त्वमेतान् किं मुधाऽधाक्षी, रे हताश! हुताशन! ॥२०१॥ आपन्नार्तिच्छिदाछेक-दोर्दण्डाः पाण्डवा इमे । एतान् हन्त दहन्नेवं, पुरोचन! किमाचरः? ॥ २०२ ॥ दीनानाथसमुद्धार-पण्डिताः पाण्डवा इमे । एतांस्ते[2] निघ्नतः कीदृक्, सुयोधन! धनार्जनम्? ॥ २०३ ॥ त्रैलोक्यत्राणशौण्डीर-कोदण्डाः पाण्डवा इमे। अमूनेवं तिरस्कुर्वन्, वैधेयोऽसि विधे! ध्रुवम् ॥२०४॥ परिदेवितवाक्यानि[3], लोकानामित्यनेकशः । कर्णावतंसीकुर्वन्तः, पुरतस्ते प्रतस्थिरे ॥२०५॥ (पञ्चभिः कुलकम्) भाग्यराशिरिवामीषा-मालोकः स तिरोदधे । बन्धुर्दुर्योधनस्येव, प्रादुरास तमश्चयः ॥ २०६ ॥ युगपद्धान्तमध्वा च, द्वयमेतदुपागतम् । तनोति स्म श्रमाह्लानं, तत्सवित्री-कलत्रयोः ॥२०७॥ आलोकशब्दमाधत्तः, पुरो भीम-किरीटिनौ । राज्ञः प्रथमपान्थस्य, तथाऽप्यस्खलतां क्रमौ ॥ २०८ ॥ नकुलः सहदेवश्च, पथि श्रान्तावुभावपि । ज्यायसां मा स्म खेदोऽभू-दिति तूष्णीमगच्छताम् ॥ २०९ ॥

पादचारं सदाचार-भूमीरुहभुवोरपि[4] । मातुः पत्न्याश्च निध्यायन्, दध्यौ विश्वंभराधिपः ॥ २१० ॥ यस्यां कथंचिन्नापैति, सुतानामधमर्णता । मयाऽद्य निष्क्रयो मातु-स्तस्याः क्लेशोऽयमर्प्यते ॥२११॥ कष्टं दृष्टं यया नैव, पितुर्भर्तुश्च वेश्मनि। मातेयममितं क्लेशं, मयैवमनुभाव्यते ॥ २१२ ॥ अहो! पाणिगृहीतीयं, पाण्डवानां महौजसाम् । दरिद्रगृहिणीचारं, चरत्येव

१ पुटकिनी-पद्मलता पद्मसमूहो वा । २ मूर्खः । ३ विलापवचनानि । ४ सदाचारवृक्षाणा स्थानयोः ।

वनावनौ ॥ २१३ ॥ पश्यतां पाण्डुपुत्राणां, कलत्रस्य कुशाङ्कुरैः । अम्भोजभेदं भिद्येते, हहा ! चरणपल्लवौ ॥ २१४ ॥ न जानाति प्रिया दुःख-मेकस्मिन्नपि भर्तरि । पञ्चस्वपि प्रियेष्वेका, क्लिश्यते द्रुपदात्मजा ॥२१५॥ इत्यस्मिंश्चिन्तयत्येवं(व), मार्गे दुर्गे तमोभरैः । श्रान्ता कुन्ती च कृष्णा च, निःसहं भुवि पेततुः ॥२१६॥ राज्यभ्रंशं भयं शत्रो, रात्रौ पद्भ्यां पलायनम् । धिग्विधिं यो व्यधादेवं, पाण्डवानां विडम्बनम् ॥ २१७ ॥ उष्णालुभिरपच्छत्रैः, शीतालुभिरनंशुकैः । बुभुक्षुभिरपाथेयैः, पन्थानो दुरतिक्रमाः ॥ २१८ ॥ शिरीषसुकुमाराङ्ग्यौ, निपतन्त्यौ पदे पदे । दुर्गकान्तारपारीणे, कथमेते भविष्यतः ? ॥ २१९ ॥ इति खेदपरं दृष्ट्वा, नृपमूचे वृकोदरः । आकुलो मा स्म भूर्देव !, पदातौ प्रगुणे मयि ॥२२०॥ (चतुर्भिः कलापकम्)

ततोऽम्बां दक्षिणे स्कन्धे, वामे प्रियतमां पुनः । अध्यारोप्य ययौ भीमो, भञ्जन् मार्गमहीरुहः ॥ २२१ ॥ उभावपि कनीयांसौ, पश्चाद्दूरान्तरस्थितौ । मार्गखेदोच्छलच्छ्वासौ, मन्दं मन्दमुपेयतुः ॥ २२२ ॥ व्यवस्थाप्य त्रिकस्थाने, तावुभावमितस्तदा । निन्ये भीमो भुजालम्बा-द्धर्मपुत्रा-र्जुनावपि ॥२२३॥ निशीथमारुतः शीतः, कुमुदामोदमेदुरः । आचचाम श्रमं तस्य, दयालुरिव दूरतः ॥ २२४ ॥ न निद्रोपद्रवस्तस्य, वैधुर्यं नान्धकारजम् । ललङ्घे पथपाथोधिं, पूर्ववत् पवनात्मजः ॥ २२५ ॥ विलोक्य क्लान्तिमायातौ, धर्मपुत्रा-र्जुनावपि । महेभ इव भीमस्तान्, सर्वान् पृष्ठेऽध्यरोपयत् ॥ २२६ ॥ महाध्वनि निमग्नाना-मगाधे जलधाविव । यानपातायितं तेन, स्वबन्धूनां महात्मनाम् ॥ २२७ ॥ आससाद सदारम्भ-संभृतश्रेयसो भृशम् । भीमस्याध्वतिरोधान-पापेनेव क्षपा क्षयम् ॥२२८॥ कुन्देन्दुसितकौन्तेय-कीर्तिविलासितैरिव । तमो-

१ 'राज्यभ्रंशो' इति प्रत्यन्तरपाठः साधुः । २ पृष्ठे ।

मिर्विरलीभूतं, प्रभूतैरपि मर्वतः ॥२२९॥ वृकोदरमुखाम्भोज–विलोकनकुतूहली । कर्मसाक्षी किलारोह–दुदयाचलचूलिकाम् ॥२३०॥ स्वबन्धुमक्तमीक्षध्वं, दूरादेत्य वृकोदरम् । इति स्वां जातिमाह्वातु–मिवाकूजन् विहंगमाः ॥ २३१ ॥ शङ्के पाण्डुकुटुम्बस्य, करालम्बनदित्सया । करान् व्यापारयामास, वासराणामधीश्वरः ॥ २३२ ॥ सुखदुःखे समं तेषा–मारोहति रवौ नमः । मार्गालोकाच्च तापाच्च, शनैः प्रादुर्बभूवतुः ॥ २३३ ॥ ते ललाटंतपे भानौ, खिन्नाङ्गाः पाण्डुसूनवः । वनोद्देशैकदेशस्था, रहः क्वापि विशश्रमुः ॥२३४॥ अथोचे विजयं राजा, वत्स! कष्टे महत्यपि । न स्मर्तव्या त्वया विद्या, प्रसिद्ध्येकनिबन्धनम् ॥ २३५ ॥ सन्तः स्रोतस्विनीस्रोतः–श्रितानालोक्य वेतसान् । दैवमेवानुवर्तन्ते, पुनरुन्नतिकाङ्क्षिणः ॥ २३६ ॥ उपनीतानि पार्थेन, कन्दमूलफलान्यथ । भोजयित्वा पतीन् श्वश्रूं, पाञ्चाली बुभुजे स्वयम् ॥ २३७ ॥

अथैवं पथि कष्टेन, पृथायाः सूनवः पुनः । मध्याह्नं गमयामासु–र्मेदुरस्वेदबिन्दवः ॥२३८॥ तृष्णातिशुष्कताल्वना–मुष्णालूनामनारतम् । पयो दवीयोऽप्यानीय, भीमस्तेपामढौकयत् ॥ २३९ ॥ क्रमेण वारुणीशैल–शिरःस्तकरे रवौ । वनमेकमनेकद्रु, प्रापुस्ते निरुपद्रवाः ॥२४०॥ भूरपि त्रासकृद्यत्र, रौद्राकारा द्रुमा अपि । मार्गोऽपि कीकसैर्दुर्गः, क्रूरा दूरं मृगा अपि ॥२४१॥ तत्र प्रविष्टमात्राणां, तेषामस्तं रविर्ययौ । क्रुद्धो विधिरुपाधत्ते, विपदो हि पदे पदे ॥२४२॥ साम्राज्यं पुनरुज्जृम्भि, विभाव्य तमसां तदा । आरोहमवरोहं च, विपदां तेऽपि जज्ञिरे ॥ २४३ ॥ भीषणेऽपि वने तत्र, ध्वान्तेनान्धंभविष्णवः । ते विश्रान्तिजुषस्तस्थु–र्निशाविश्रामकाम्यया ॥ २४४ ॥ कङ्केलिपादपस्याध–स्ते ध्यातपरमेष्ठिनः । पल्लवैर्भीमविन्यस्तान्,

१ सूर्यः । २ अर्जुनम् । ३ ' तथैव पथिकत्वेन ' प्रतिद्वय० । ४ अतिदूरस्थम् ।

स्स्तरानध्यशेरत ॥ २४५ ॥

आपृच्छ्य बन्धून् वात्सल्या–दुत्सहिष्णुमनास्ततः । जगाम जलमानेतुं, मध्यमः पाण्डुनन्दनः ॥ २४६ ॥ गव्यूतिमात्रमध्वान–मतिक्रम्य स विक्रमी । सारसस्वरनिर्णीत–माससाद पुरः सरः ॥२४७॥ उपेयिवानुपादाय, पयःपुटकिनीपुटे । अक्षामनिद्रमद्राक्षीत्, स्वकुटुम्बं वृकोदरः ॥ २४८ ॥ तत्तथाभूतमालोक्य, शोकेन विवशीकृतः । विललाप विमुच्यापः, स बाष्पाविललोचनः ॥ २४९ ॥ पल्यङ्कं यः सतूलीक–मध्युवास नृवासवः । धिग्विधिं सोऽधुनाऽध्यास्ते, ईथपुटं स्स्तरं भुवि ॥२५०॥ पुरोपतल्पं यस्यासी–न्निःसीमो गीतनिस्वनः । वर्तते सांप्रतं तस्य, भैरवः फैरवो रवः ॥२५१॥ कस्तूरीसंस्तुतैः पूर्वं, यस्याभूचन्दनद्रवैः । अङ्गे तस्याङ्गरागोऽयं, पांशुभिर्मार्गसंभवैः ॥ २५२ ॥ दृष्टौ कष्टेन यस्याङ्घ्री, सेवायातैर्नृपैरपि । नरव्याघ्रस्य जिघ्रन्ति, शृगालास्तस्य सांप्रतम् ॥ २५३ ॥ पूर्वं व्योम्नि विमानेन, यो बभ्राम सविभ्रमम् । रङ्कस्वापं स्वपित्येवं, कान्तारे सोऽयमर्जुनः ॥ २५४ ॥ द्विपद्यशस्तुपारांशु–राहवो यस्य बाहवः । सहते सोदरादेशात्, क्लेशं सोऽपि कपिध्वजः ॥ २५५ ॥ एतौ सदापि नः क्रोड–क्रीडादुर्ललितौ पुरा । हा ! शयाते कनीयांसौ, दरिद्रपथिकाविव ॥ २५६ ॥ पाण्डवानामियं माता, पत्नी पाण्डुमहीपतेः । क्रमचंक्रमणक्रान्ता, शेते कुन्ती हहा ! भुवि ॥ २५७ ॥ कथं सहिष्यते क्लेशं, नासौ यस्यास्तनूरुहाः । वयं प्रोद्दामशौण्डीर्य–प्रपञ्चाः पञ्च पाण्डवाः ॥ २५८ ॥ इयं निद्रायते भूमौ, कष्टं द्रुपदनन्दिनी । एतामवस्थामेतस्याः, पश्यन् भीमोऽपि जीवति ॥ २५९ ॥ अरण्यपान्थैरस्माभिः, पश्यत प्रेयसी निजा । असौ कान्तारसं-

१ बन्धुसमीपमागतः । २ विषमम् । १ वक्रोक्तिरियं प्रतिभाति ।

चार-शिक्षामप्याप्यते हहा ! ॥२६०॥

इत्युच्चैर्विलपन् भीमो, भीषणाकारधारिणीम् । एकां युवतिमायान्तीं, पिङ्गलाक्षीमुदैक्षत ॥ २६१ ॥ भीमस्यार्म्यर्णमभ्यागा-द्युवतिः सा यथा यथा । रूपं प्रकाशयामास, मनोहारि तथा तथा ॥ २६२ ॥ भीमः समीपमायातां, तामुवाच सुलोचने ! । काऽसि ? भीष्मं च सौम्यं च, रूपमप्यकृथाः कथम् ? ॥ २६३ ॥ बभाषे साऽपि सुश्रोणिः, सुभग ! श्रूयतां त्वया । अस्ति दत्तजगड्डिम्बो, हिडम्बो नाम राक्षसः ॥२६४॥ इदमस्याख्यया ख्यातं, हिडम्बवनमुत्कटम् । नास्मिन्मनुष्यजातीयः कश्चित् संचरते यथा ॥ २६५ ॥ कथंचिद्दैवदुर्योगा-देतस्यां वनसीमनि । नरः शूरोऽपि यद्येति, रक्षसाऽनेन भक्ष्यते ॥ २६६ ॥ अस्य चाहमहंकार-मन्दिरस्य सहोदरा । अनूढाऽस्मि हिडम्बेति, बन्धुगेहनिवासिनी ॥२६७॥ ममाप्यस्ति क्रमाऽऽयाता, विद्या सर्वाऽपि राक्षसी । इदानीं तु स्थितः सौधे, बन्धुर्मामभ्यधादिदम् ॥ २६८॥ अधुना मानुषो गन्धः, क्षुधं मे बोधयन्नयम् । प्रियंमविष्णुर्घ्राणस्य, कुतोऽप्येति सहोदरे ! ॥ २६९॥ तन्मानवानवेक्ष्यैतान्, कुतोऽप्यानय सत्वरम् । येनेयं चिररात्राय, शममभ्येति मत्क्षुधा ॥ २७० ॥ तदहं दहनज्वाला-लोले कृत्वा विलोचने । विधित्सुर्बान्धवादेशं, देशमेनमुपागमम् ॥२७१॥ वने मानवसंघात-मेनं निःसहविग्रहम् । निद्रायमाणमद्राक्षं, बुभुक्षोपशमक्षमम् ॥ २७२ ॥ विलोक्य त्वां च कन्दर्प-रूपदर्पापहं पुरः । विस्मृत्य भ्रातुरादेशं, सराऽऽदेशे स्थिताऽस्म्यहम् ॥ २७३ ॥ यज्जातोऽसि महाबाहो !, मम नेत्रसुधाञ्जनम् । असौ रूपपरावर्तः, प्रावर्तत जवात्ततः ॥ २७४ ॥ तदाधेहि प्रसादं मे, पाणिपीडनकर्मणि । सत्योपयाचिताः सन्तु, सकलाः

१ डिम्बः युद्धम् ।

कुलदेवताः ॥ २७५ ॥ तस्मान्मा स्म विलम्बस्व, पुरा नन्वेति राक्षसः । त्रपां विहाय मां रात्रि-चरीं सहचरीं कुरु ॥ २७६ ॥ मयि ते सहचारिण्या-मसौ दूरेऽस्तु राक्षसः । नान्येऽपि प्रभविष्यन्ति, प्रबला वनवैरिणः ॥ २७७ ॥

अथाभाषिष्ट भीमस्तां, भद्रे ! प्रेमार्द्रमभ्यधाः । पुण्यप्रागल्भ्यतो लभ्या, त्वादृशी स्वयंवरा ॥ २७८ ॥ सुगात्रि ! परमत्रार्थे, कारणं मे निशम्यताम् । ममैते बान्धवाः सन्ति, चत्वारोऽपि शयालवः ॥ २७९ ॥ ऋद्धा गुणैरियं वृद्धा, या तु स्वपिति निर्भरम् । जानीहि जननीमेना-मस्माकं सेरलोचने ! ॥ २८० ॥ एषा शिरीषमृद्वङ्गी, सुखं सोषुप्यते तु या । पञ्चानामपि साऽस्माकं, प्राणेभ्योऽपि प्रिया प्रिया ॥२८१॥ एकयाऽपि सधर्मिण्या, साधारण्याऽनया वयम्[1] । कृतार्थाः पुरुषार्थेषु, निखिलेष्वपि निर्मिताः ॥ २८२ ॥ अनुमन्यामहे नान्यां, प्रेयसीं श्रेयसीमपि । प्राप्य कल्पलतां स्वल्पाः, कोऽनुरुध्येत वीरुधः ॥ २८३ ॥ उपन्यस्तस्त्वया यस्तु, लोभः साहायकं प्रति । सोऽपि शौण्डीर्यचण्डानां, दोर्दण्डानां त्रपाकरः ॥ २८४ ॥ बाहुमाहात्म्यसापेक्षं, क्षणं वो मा स्म भून्मनः[2] । इत्यस्मासु स्वदोर्वीर्य-निष्ठं ज्येष्ठस्य शासनम् ॥ २८५ ॥ इति सा प्रतिषिद्धाऽपि, सदैन्यं पुनरभ्यधात् । मामात्मशरणां स्वामिन् ! यद्यपीत्थमपाकृथाः ॥ २८६ ॥ यावज्जीवं त्वमेवासि, जीवितेशस्तथापि मे । तद्यदा रोचते नाथ !, कुरु मामात्मसात्तदा ॥ २८७ ॥ किं त्वेतामधुना ताव-द्विद्यामादत्स्व चाक्षुषीम् । यया ते भविवोद्योत-स्तामसीष्वपि रात्रिषु ॥ २८८ ॥ सैवमाख्याय भीमाय,[3] संमदात्तामदात्तदा । तस्मै पठितमात्रैव, सा प्रकाशमथ्यत्रयत् ॥ २८९ ॥

---

१ अङ्गीकुर्महे । २ दर्शितः । ३ हर्षात् ।

अत्रान्तरे ददत्रास-मट्टहासेन भीषणः । आजगाम हिडम्बोऽपि, प्रेतनाथं विडम्बयन् ॥ २९० ॥ वेपथु-स्वेद-रोमाञ्चै-र्यामिमागम्य कामुकीम् । प्रसभं सोऽभ्यधादेनां, भ्रकुटीविकटाननः ॥ २९१ ॥ आः पापे ! प्रौढकंदर्पा-कुले ! कुलकलङ्किनि !। बुभुक्षितमुपेक्ष्यैवं, मामभूरिह कामुकी ॥ २९२ ॥ त्वां विधायेन्धनं पूर्वं, जाठरस्याशुशुक्षणेः । ततोऽमूनाहुतीभावं, लम्भयिष्यामि मानवान् ॥ २९३ ॥ एवमाक्षिप्य कोपेन, रक्तचक्षुः स राक्षसः । दूराच्चपेटामुत्पाट्य, दधावे सोदरां प्रति ॥ २९४ ॥ ततस्तमाह माहात्म्य-भूमिर्भीमः ससौष्ठवम् । निरागसं निजां यामि-मरे ! मोघं जिघांससि ॥ २९५ ॥ रक्षोवंशानुरूपं तत्, यद्भगिन्यपि हन्यते । उपेक्षितुं क्षमे साक्षा-न्न स्त्रीहत्यामहं पुनः ॥ २९६ ॥ उत्तिष्ठ निष्ठुरं कर्म, मुञ्चेदं किंचिदायुधम् । करे कुरु कुरुश्रेष्ठा, न हि घ्नन्ति निरायुधम् ॥ २९७ ॥ इति क्रोधादधिक्षिप्त-स्तामत्याक्षीत् स राक्षसः । एकं पादपमुद्यम्य, भीमं च प्रत्यधावत ॥२९८॥ भीमोऽपि गतभीरेकं, विधायाऽऽयुधमङ्घ्रिपम् । जाग्रतु भ्रातरो मेति, तूष्णीको युद्धमादधे ॥ २९९ ॥ चण्डौजसा हिडम्बेन, निर्विलम्बं बलीयसा । प्रहतः प्रसभं भीमः, क्षणाद्वृक्षेण वक्षसि ॥ ३०० ॥ पाण्डवोऽपि हिडम्बाय, ददौ पीडां प्रहारतः। यया तत्प्रथमं निन्ये, सोऽपि मूर्च्छारसज्ञताम् ॥ ३०१ ॥ मूर्च्छाविरामे स क्ष्वेडा-मव्रीडः क्रीडयाऽकरोत् । यया युधिष्ठिरादीना-मभून्निद्रादरिद्रता ॥ ३०२ ॥

कुन्ती पुरस्तादुद्वीक्ष्य, हिडम्बामिदमभ्यधात् । का त्वं पुत्रि ! कथं चात्र ?, तथ्यं मे कथ्यतामदः ॥ ३०३ ॥ साऽप्यस्यै निजमावेद्य, सर्वं वृत्तान्तमादितः । आख्याति स्म तनूजस्ते, युध्यते रक्षसा सह ॥ ३०४ ॥ उच्छलत्सिंहनादेन,

१ यमराजम् । २ अग्नेः ।

भीमहिडम्बयोर्युद्धम् ॥

रक्षसा प्रहतो हृदि। धाव्यतां देवि! पुत्रस्ते, हहा! पतति मूर्च्छितः ॥३०५॥ इत्युक्ते धर्मपुत्राद्या, भीमाभ्यर्णमुपाययुः। तं च मूर्च्छालमालोक्य, जननी पर्यदेवत ॥ ३०६ ॥ अस्माकं मार्गपङ्गूनां, वोढा त्वं प्रौढविक्रमः। दुष्टेन रक्षसा वत्स!, गमितः कामिमां दशाम्? ॥३०७॥ निरालम्बकुटुम्बस्य, करालम्ब! त्वया विना। दूरात् पानीयमानीय, तृषं नः कोऽपनेष्यति? ॥ ३०८ ॥ कुसुमानि समानीय, वन्यान्येतां तपस्विनीम्। नव्यधम्मिल्लबन्धेन, वधूं कोऽलंकरिष्यति? ॥ ३०९ ॥ तदक्षाय समुत्थाय, देहि प्रतिवचो मम। नयास्मान् पुरतोऽध्वानं, पुरोऽभ्येति रिपोश्रमूः ॥ ३१० ॥ इत्थं विलापवैधुर्य-धुर्यचेतसि मातरि। अश्वलव्यजनैश्चक्रे, भीमं प्रगुणमर्जुनः ॥ ३११ ॥

अथोत्थाय नियुद्धाय, स्पृहयालुर्वृकोदरः। प्रति प्रत्यर्थिनं धावन्, बभाषे ज्येष्ठबन्धुना ॥३१२॥ स्थिरो भव तव भ्राता, भुजभ्राजिष्णुरर्जुनः। अस्त्येव वत्स! तच्छत्रौ, दुष्टे कष्टायसे कथम्? ॥ ३१३ ॥ इत्युक्तः सोऽवदद्देव!, मम संप्रति दोर्बलम्। तव दृष्ट्या सुधावृष्ट्या, सिक्तं पल्लवितं पुनः ॥ ३१४ ॥ तवानुजस्य पुरतः, कोऽयं राक्षसपांसनः?। पुरो हि पौष्णः[2] पुष्णन्ति, न चयं ध्वान्तवीचयः ॥ ३१५ ॥ वीक्षमाणस्य देवस्य, प्रसन्नाक्षस्य राक्षसम्। एनं नयामि पञ्चत्वं, पञ्चानन इव द्विपम् ॥ ३१६ ॥ अमानुषप्रचारेऽस्मिन्, कानने निरुपद्रवः। प्रसादेन तवेदानी-मस्तु पन्थाः सुसंचरः ॥ ३१७ ॥ तदस्तु फाल्गुनः शत्रोः, करिष्ये फल्गु वल्गितम्। इति व्याहृत्य संहर्तुं, स रिपुं प्रत्यधावत ॥ ३१८ ॥ अथाहवं महाबाहो-र्बाहुबाहवि कुर्वतोः। तयोर्जयश्रीर्दोलेव, करोति स्म गतागतम् ॥ ३१९ ॥ पाण्डवश्च हिडम्बश्च, वल्गन्तौ क्षोणिरेणुभिः।

१ अशोचत्। २ सूर्यस्य।

तमांसि मांसलीभावं, लम्भयामासतुस्तदा ॥ ३२० ॥ दृष्ट्वा हिडम्बदोर्दण्ड-चण्डिमानं युधिष्ठिरः । अभीमं जगदद्येति, विदन्नर्जुनमभ्यधात् ॥ ३२१ ॥ त्वर्यतां त्वर्यतां वत्स !, गच्छ क्षपय राक्षसम् । दोर्दण्डाभ्यां हिडम्बेन, पीड्यतेऽसौ तवाग्रजः ॥ ३२२ ॥ जल्पत्येवं तपःसूनौ, भीमस्तं राक्षसं क्षणात् । ग्रीवायां बाहुपाशेन, पशुमारममारयत् ॥ ३२३ ॥ कुन्तीसुतस्य मानन्द-मुदतारयदञ्चलम् । भ्रातुर्वपुरजातारिः, सरजस्कममार्जयत् ॥ ३२४ ॥ अर्जुनाद्याः कनीयांस-स्तस्य चेलाञ्चलानिलैः । रणखेदभवस्वेद-च्छेदमातेनिरेतराम् ॥ ३२५ ॥ क्षणादेकान्तमासाद्य, भीमं रोमाञ्चशालिनी । स्तनोपपीडमालिङ्ग-दानन्दाद्द्रुपदात्मजा ॥ ३२६ ॥ कंदर्पेण हिडम्बाया-स्तदा बन्धुवियोगजः । शोकः शोकापनोदेन, गुरुणा विरलीकृतः ॥ ३२७ ॥ शुश्रूषा-बहुमानाभ्यां, निबिडाभ्यां हिडम्बया । कुन्ती-द्रुपदनन्दिन्यो-र्मनः परवशीकृतम् ॥३२८॥

अथो निशीथिनीशेषे, पन्थानं ते प्रपेदिरे । प्रमाद्येत् कः सविद्यो हि, महीयसि विरोधिनि? ॥ ३२९ ॥ आश्वासयन् कनीयांसौ, तेषां पृष्ठगमोऽर्जुनः । निजाग्रजन्मनो दत्त-बाहुर्भीमः पुरोगमः ॥ ३३० ॥ पृष्ठे वहन्ती कुन्ती च, कृष्णां च विनयान्विता । अम्बरेण हिडम्बा च, तेषां मध्यस्थिताऽचलत् ॥ ३३१ ॥ युग्मम् ॥ अन्यदा तु महाटव्या-मत्युत्कटपिपासया । भीष्मग्रीष्म(ष्मा)तपश्रान्ता, कुन्ती मूर्च्छामुपाययौ ॥३३२॥ बीभत्सुरेकतो वेगा-दन्यतस्तु वृकोदरः । प्रत्याशमतिसंभ्रान्तौ, तोयहेतोरधावताम् ॥ ३३३ ॥ मातरं मूर्च्छितां पश्य-न्मत्वेवाम्भोऽतिदुर्लभम् । निजाभ्यामेव नेत्राभ्या-मानिन्येऽम्बु युधिष्ठिरः ॥ ३३४ ॥ अचिन्तयच्च रे दैव !, सदैव प्रत्यनीकताम् । सर्वंकषां किमस्मासु, निर्वाहयसि केवलम् ? ॥ ३३५ ॥ दृशा पीयू-

१ 'वत्स !' प्रत्यन्तरे । २ 'कुन्तीं' प्रतिद्वय० ।

भीमेन कृतो हिडम्बघातः ॥

पवर्गिण्या, सिञ्चन्ती या प्रतिक्षणम् । हन्ति नः प्रत्यहं तापं, साऽपि प्रापदिमां दशाम् ॥ ३३६ ॥ प्रियापरिभवो राज्य–भ्रंशः पथपरिश्रमः । नैते तथा व्यथन्ते मां, यथा मातुरियं दशा ॥ ३३७ ॥ इति चिन्तातुरे राज्ञि, क्वाप्यप्राप्य पयस्तदा । आजग्मतुर्निरानन्दौ, वृकोदर–किरीटिनौ ॥ ३३८ ॥ एतावपि महाबाहू, विह्वलावुपरि स्थितौ । कदुष्णैर्नयनाम्भोभि–र्जननीं पर्यषिञ्चताम् ॥ ३३९ ॥ निराशमनसां तेषां, क्षिपतां दिक्षु चक्षुषी । आनीयोपानयन्नीरं, हिडम्बा बिसिनीदले ॥ ३४० ॥ तेषां नयनपात्रेभ्यो, निर्झरेभ्य इवाधिकम् । वाष्पैस्तथैव निर्यात–मानन्दशिशिरैः परम् ॥ ३४१ ॥ सस्यानामिव शुष्काणां, शोक–चिन्ता-तपक्रमात् । आपुरापस्तदा तेषां, ताः स्मारयम्बुविडम्बनाम् ॥ ३४२ ॥ अस्मत्कुटुम्बजीवातु–र्मातुरातुरघातिनी । निजेति तेषां चेतःसु, हिडम्बा प्रतिबिम्बिता ॥ ३४३ ॥ मातुः संवाहयन् पादौ, स्थाने स्थाने युधिष्ठिरः । पन्थानमतिचक्राम, प्रत्यहं सह बान्धवैः ॥ ३४४ ॥

एकदा क्वापि पश्यन्ती, कान्ताररमणीयताम् । द्रौपदी द्वीपिनं दृष्ट्वा, कान्दिशीका पलायत ॥ ३४५ ॥ प्रचण्डः पुण्डरीको ऽपि, पुण्डरीकविलोचनाम् । तामन्वगच्छदौत्सुक्यात्, क्रमः क्रूरात्मनामयम् ॥ ३४६ ॥ तदानुपदिके तस्मिन्, सा भयोत्थितवेपथुः । नितम्बस्तनभारेण, न शशाक पलायितुम् ॥ ३४७ ॥ दंष्ट्राकरालमुत्फाल–मालोक्य तमुपागतम् । साऽवतस्थे समालम्ब्य, धैर्यमूचेदमा पुरः ॥ ३४८ ॥ अत्रापि धर्मपुत्रो मे, त्रातेत्यालोच्य तत्पुरः । लीलालतिकया रेखां, सा विधायेदमभ्यधात् ॥ ३४९ ॥ यदि मे प्राणनाथेन, सत्यरेखा न लङ्घिता । तदा त्वमप्यमूं रेखां, मा स्म शार्दूल ! लङ्घय ॥ ३५० ॥ तयेत्युक्ते

१ व्याघ्रम् । २ व्याघ्रः ।

स तेष्वेव, पदेषु सपदि स्थितः । अहो! महानुभावानां, प्रभावो दुरतिक्रमः ॥ ३५१ ॥ मुक्ता विधुंतुदेनेव, द्वीपिना तेन पाप्मना । सितदीधितिलेखेव, सा भृशं शुशुभे तदा ॥ ३५२ ॥ त्रिभिर्विशेषकम् । प्रियोपस्थायिनं मार्ग-मविदन्ती मनागपि। यूथच्युतकुरङ्गीव, शून्यं बभ्राम सा वने ॥ ३५३ ॥ निःशूकं दन्दशूकेन, सा व्रजन्ती यदृच्छया । दुष्टेन दष्टुमारब्धा, तमप्येव-मवोचत ॥ ३५४ ॥ कायेन मनसा वाचा, चेत् पञ्चापि न वञ्चिताः । मया कदापि प्रेयांसः, सर्प ! सर्प तदान्यतः ॥ ३५५॥ इत्याधिक्षिप्तस्तया मङ्क्षु, ययौ सोऽपि भुजंगमः । वाचस्पतेरपि सती-महिमा न हि गोचरः ॥ ३५६ ॥ यदुष्णकिरणः कृष्णां, सतीं पादैरुपास्पृशत् । तन्मन्ये सद्य एवायं, मज्जति स्म तदाम्बुधौ ॥ ३५७ ॥

अथाचक्राम दिक्चक्र-मुच्छृङ्खलतमं तमः । सर्वातिशायी शोकश्च, पाञ्चालदुहितुर्मनः ॥ ३५८ ॥ प्रेयोभिर्विप्रयुक्तायाः, कथं यास्यति यामिनी । एषा ममेति सा चिन्ता-क्रान्ता यावदजायत ॥ ३५९ ॥ हिडम्ब्यां पुरतस्ताव-दालोकत कृताञ्ज-लिम् । व्यानशे च प्रमोदेन, सुधासेकसनाभिना ॥ ३६० ॥ फुल्लत्कपोलफलका, बभाषे सा हिडम्बया । आर्ये ! त्वद्विरहात् प्रापुः, पाण्डवाः शोकताण्डवम् ॥ ३६१ ॥ यदान्विष्य वनान्तस्त्वां, ते कुत्रापि न लेभिरे । ततो धूलीविलिप्ताङ्गा, वसुधां परिरेभिरे ॥ ३६२ ॥ तेषां संप्रति बाष्पाम्बु-धाराधोरणिभिः पुरः । जातानि जानुदघ्नानि, पल्वलानि भुवस्तले ॥ ३६३ ॥ श्वापदैरापदं रात्रौ, द्रौपदी नेष्यते ध्रुवम् । तां विना जीवितेनापि, पर्याप्तमधुनाऽमुना ॥ ३६४ ॥ इति निश्चित्य ते सन्ति, प्राणत्यागविधित्सवः । जीविते निःस्पृहा जज्ञे, पृथाऽपि तनयाऽनुगा ॥३६५॥ (युग्मम्) इत्थमर्त्यांहितं[3] तेषां, विलोक्याकुल-

१ निःशूकं निर्दयम् । २ गच्छ । ३ अनर्थम् ।

द्रौपद्या वने पाण्डवेभ्यो विश्लेषः ॥

॥

मानसा । कान्तारार्णवमालोक्य, तवाभ्यर्णमुपागमम् ॥ ३६६ ॥ इति वृत्तान्तमावेद्य, समुत्प्लुत्य विहायसा । सा द्रौपदीमुपादाय, पाण्डवानामुपानयत् ॥ ३६७ ॥ स्रोतस्विनीररण्यानी-स्ते बहूंश्च शिलोच्चयान्[1] । हेलयैव हिडम्बायाः, साहाय्येन ललङ्घिरे ॥ ३६८ ॥

अथाधमर्णमन्याभ्यां, हिडम्बायाः पदे पदे । निवेश्य कुन्ती-कृष्णाभ्या-मभ्यधीयत सा रहः ॥ ३६९ ॥ भद्रे ! तवोपकाराणा-मियत्तैव न विद्यते । आवां त्वस्यामवस्थायां, किं ते प्रत्युपकुर्वहे ? ॥ ३७० ॥ तथाऽपि ब्रूहि कल्याणि !, किंचिदीप्सितमात्मनः । काचिदानृण्यकरणा-द्यथा स्यात् प्रीतिरावयोः ॥ ३७१ ॥ अथोवाच हिडम्बाऽपि, कुन्तीं प्रति कृताञ्जलिः । विश्वोपकारिणि ! क्वाहं ?, क्व च त्वं पाण्डवप्रसूः ? ॥ ३७२ ॥ किं तवोपकरिष्यन्ति, राक्षस्यो देवि ! मादृशः ? । उपकुर्वीत किं नाम, दरिद्रश्चक्रवर्तिनः ? ॥ ३७३ ॥ उपकुर्वन्ति सन्तस्तु, पूर्वानुपकृता[2] अपि । केनाप्युपकृता किं नु, लोकं प्रीणाति चन्द्रिका ? ॥ ३७४ ॥ विज्ञापयामि तदपि, स्वं किंचन मनीषितम् । पुत्रस्ते दृष्टमात्रोऽपि, मया वव्रे वृकोदरः ॥ ३७५ ॥ तत् प्रसीद तथाऽऽधेहि, यथा स्यादेष मे वरः । एवं संबन्धमाधाय, स्वस्य मां कुरु किंकरीम् ॥ ३७६ ॥ इत्याख्याते तया कुन्ती, स्नुषाया मुखमैक्षत । साऽपि विज्ञा कृतज्ञा च, जगाद मुदितानना ॥ ३७७ ॥ प्राणैरपि प्रियं कर्तु-मेतस्याः स्पृहयाम्यहम् । तुच्छानां भर्तृभोगानां, संविभागे तु का कथा ? ॥ ३७८ ॥ ततः स्वयं समुत्थाय, ताभ्यामभ्येत्य चान्तिके । अनिच्छन्नपि भीमस्तां, प्रसह्य[3] परिणायितः ॥ ३७९ ॥ सर्वर्तुरमणीयानि, कृत्वोद्यानानि विद्यया । कृत्रिमं

१ पर्वतान् । २ पूर्वमनुपकृताः । ३ बलात् ।

गौप्यमाधाय, रेमे भीमेन सा समम् ॥३८०॥ सैकतेषु स्रवन्तीनां, शैलानां शिखरेषु च। नीत्वा यदृच्छया भीमं, रमयामास सा सुखम् ॥ ३८१ ॥ स्वाधीनपतिका प्राप्य, कामानतिमनोरमान्। क्रमादापन्नसत्त्वाऽसौ, जज्ञे पुण्यजनेश्वरी ॥३८२॥

अथ क्रमादतिक्रम्य, पन्थानं पाण्डुसूनवः। नगर्यामेकचक्रायां, काननान्तःकृतस्थितिम् ॥ ३८३ ॥ सुवर्णकमलासीनं, दिशन्तं धर्ममुत्तमम्। वपुष्मदिव चारित्रं, ज्ञानिनं ददृशुर्मुनिम् ॥ ३८४ ॥ (युग्मम्) मुनेर्दर्शनमात्रेण, सुधास्नपनबन्धुना। तेषां श्रद्धाजुषामध्व-श्रमः सर्वो व्यलीयत ॥३८५॥ तेऽन्तर्मलमपाकर्तु-मुत्तालमनसस्तदा। मुनिपादारविन्दस्य, वन्दनार्थमुपाययुः ॥ ३८६ ॥ भवभ्रान्तिपरिक्लान्त-जन्तुविश्रान्तिपादप !। परोपकारनिर्व्याज !, मुनिराज ! नमोऽस्तु ते ॥ ३८७ ॥ इत्यानन्दपदप्राप्त-मभिष्टुत्य युधिष्ठिरः। सभान्तः संकुचज्जानुः, सानुजः समुपाविशत् ॥३८८॥ दरिद्रपान्थवेषेषु, दिदिपन्मूर्तिधारिषु। तदानीं तेषु सभ्यानां, निपेतुर्युगपद्दृशः ॥ ३८९ ॥

अथाऽऽपदापर्णगोचारे, द्रोणीमिव दृशं क्षिपन्। तानाश्रित्य विशेषेण, मुनिराधत्त देशनाम् ॥३९०॥ एक एव पुमर्थेषु, धर्मश्चूडामणीयते। दया च सर्वसत्त्वेषु, तस्यापि तिलकायते ॥ ३९१ ॥ प्रावृट्पाथोदवीथी च, करुणा चाप्यकृत्रिमा। वनराजीं च राज्यं च, नवतां नयतः पुनः ॥३९२॥ दया प्राणिषु सर्वेषां, गदानामगदः परः। अनर्घ्यमायुर्दैर्घ्यस्य, कारणं करुणां विदुः ॥ ३९३ ॥ शुक्तिरुन्नतिमुक्तानां, मुक्तिसंगमदूतिका। दया नियतमेकाऽपि, सर्वकल्याणकारणम् ॥ ३९४ ॥ इत्याकर्ण्य हिडम्बाऽथ, राक्षमान्यपदुर्लभम्। निर्मन्तुत्रसजन्तूनां, प्रतिषेधं वधे व्यधात् ॥ ३९५ ॥ देशनाऽन्ते स्वयं कुन्ती, संशया-

१ नदीनाम। २ राक्षसी। ३ अमृतस्नानसदृशेन। ४ आपगा—नदी।

भीमहिडम्बयोः पाणिग्रहणम्। एकचक्रानगरीवने पाण्डवानां गमनम्, साधुदेशनाश्रवणं च ॥

पगमक्षमम् । मुनिं पर्यनुयुङ्क्ते स्म, विनयाद्विहिताञ्जलिः ॥ ३९६ ॥ पराभवसहस्राणां, पदमापदमीदृशीम् । किमेते निस्तरिष्यन्ति, कदापि मम सूनवः ? ॥३९७॥ त्रिलोकीं हस्तविन्यस्त–कुवलीफललीलया । पश्यन्मुनिरिमां वाचं, व्याजहार मनोहराम् ॥ ३९८ ॥ विभावय महाभागे !, भवितारः सुतास्तव । क्रमेणानुपमानाया, भुक्तेर्मुक्तेश्च भाजनम् ॥ ३९९ ॥ पुनरेव निजं राज्यं, कैश्चिदासाद्य वासरैः । ज्येष्ठोऽयं दुष्टसंहर्ता, कर्ता धर्मप्रभावनाम् ॥ ४०० ॥ क्रमात् कर्माणि निर्मूल्य, संयमाराधनादमी । पञ्चापि विश्वत्रातारो, यातारः पञ्चमीं गतिम् ॥ ४०१ ॥ इमां निशम्य ते वाचं, वाचंयमशिरोमणेः । पीयूषसेकसोदर्या–मासेदुः परमां मुदम् ॥ ४०२ ॥

तत्र ज्ञानसुधाम्भोधा–वन्यत्र प्रस्थिते मुनौ । धर्मानुरागिणीं ज्यायान्, हिडम्बां पाण्डवोऽभ्यधात् ॥४०३॥ निष्कारणोपकारिण्याः, शुभे ! साहाय्यकात्तव । अटवीतटिनीप्रायः, पन्था दुर्गोऽपि लङ्घितः ॥ ४०४ ॥ वयं नगर्यामेतस्यां, स्थास्यामः कतिचिद्दिनान् । तद्गच्छ भद्रे ! स्वभ्रातुः, सनाथां कुरु संपदम् ॥ ४०५ ॥ गर्भाभिधाने मद्धातु–र्निधाने यतमा तनु । पात्रे न्यासीकृता संप–दधिकां वृद्धिमश्नुते ॥ ४०६ ॥ स्मृता तु समये वत्से !, समुपस्थातुमर्हसि । मनोऽभ्युपेतनिर्वाहे, सावधानं महात्मनाम् ॥४०७॥ अथाङ्गीकृत्य तत्तस्थौ, हिडम्बा वनमेत्य सा । वीतरागसपर्यासु, पर्याकुलकराम्बुजा ॥४०८॥

मुद्रामादृत्य विप्राणां, तदाचारमनोहराम् । एकचक्रामुपाजग्मु–र्नगरीं पाण्डुनन्दनाः ॥ ४०९ ॥ अदृश्यन्त विशन्तस्ते, पुर्यामार्येण वर्त्मनि । द्विजेन जनतादत्त–शर्मणा देवशर्मणा ॥४१०॥ उपलभ्योपसंग्राह्यान्, गुणगृह्यः स तान् कृती । गत-

१ पृच्छति स्म । २ कुवलीफलं बदरीफलम् । ३ वन्दनयोग्यान् ।

न्छद्मा निजं सद्म, नीत्वा काममपूजयत् ॥ ४११ ॥ अभणच्च गुणश्रेष्ठं, ज्येष्ठं पाण्डवमादरात् । भो ! भूमिदेव ! दैवेन, योजितः किंचिदर्थ्यसे ॥ ४१२ ॥ इदं मे वेश्म तामेतां, पत्नीं सौजन्यशालिनीम् । इमं पुत्रमिमां पुत्रीं, जानीयाः सर्वमात्मनः ॥ ४१३ ॥ वसन् गेहे सुखेनात्र, पवित्रय पुरीमिमाम् । सरत्ना रत्नगर्भेति, जनो जानातु संप्रति ॥ ४१४ ॥ तथेति प्रार्थनां गुर्वीं, प्रतिश्रुत्य युधिष्ठिरः । चक्रे कुटुम्बसंमत्या, निवासं तस्य वेश्मनि ॥ ४१५ ॥ विप्राचारभृतो बाह्ये, स्वान्ते तु परमार्हताः । ते धर्मकर्मठास्तत्र, वासरानत्यवाहयन् ॥ ४१६ ॥ श्वश्रूशुश्रूषणप्रीत-चेताः पाञ्चालनन्दिनी । पुत्रीप्रीतिपरा तस्यां, कुन्ती चानर्चतुर्जिनम् ॥ ४१७ ॥ कुटुम्बस्यानुकूल्येन, प्रातिकूल्यं विधेस्तदा । न किंचित्ते विदांचक्रु-रेकचक्रानिवासिनः ॥ ४१८ ॥ सावित्री नाम तस्यास्ति, कलत्रं देवशर्मणः । तया वैनयिकात् कुन्त्या, मनः परवशीकृतम् ॥ ४१९ ॥ कुन्ती कृष्णासधर्माणं, स्नुषां तामप्यजीगणत् । पौत्रावेव च तत्पुत्रौ, गङ्गा-दामोदराभिधौ ॥ ४२० ॥ सा तेन महवासेन, विस्मृतात्मनिकेतना । अनेकान् गमयामास, मासानेकाहलीलया ॥ ४२१ ॥

अन्यदा पवमानस्य, तनये गृहवर्तिनि । अपरेष्वेकचक्रान्तः, स्वैरसंचारशालिषु ॥ ४२२ ॥ देवशर्मकुटुम्बस्य, कटुमाक्रन्दमुच्चकैः । आकर्ण्य कुन्ती कुन्तेन, भिन्नेव हृदयेऽभवत् ॥ ४२३ ॥ युग्मम् ॥ गत्वाऽथ देवशर्माणं, सा जगाद सगद्गदम् । तव वत्स ! कुतोऽमूल-मेतद्दुःखं सुदुःसहम् ? ॥ ४२४ ॥ अथासौ कथयामास, कथां कुन्त्याः सुदुःश्रवाम् । अस्यां पुरि पुरारिष्ट-मतिकष्टमजायत ॥ ४२५ ॥ पुरोपरि शिला गुर्वी, दर्शिताऽकाण्डविड्वरा । समालोकयत कल्पान्त-

१ पृथ्वी । २ पुत्री च पुत्रश्चेत्येकशेषे पुत्रौ ।

युधिष्ठिरादेशेन हिडम्बा गर्भवती स्वस्थानं गता । पाण्डवानामेकचक्रायां निवासो ब्राह्मणगृहे ॥

पुष्करावर्तसोदरा ॥ ४२६ ॥ युगान्तज्वलनोपज्ञ-धूमस्तोमोपमस्तदा । घोरान्धकारो विधुरं, पुरीजनमजीजनत् ॥ ४२७ ॥
खण्डयन् भूरुहां खण्डान्, ववौ चण्डः समीरणः । कनीयान् बान्धवो यस्य, किल कल्पान्तमारुतः ॥ ४२८ ॥ अदृष्टपर-
चक्रार्त्ति-मेकचक्रां पुरीं तदा । भयस्याभिज्ञतां निन्यु-स्तान्यरिष्टानि सर्वतः ॥ ४२९ ॥ अबलाभिश्च बालैश्च, प्राणान्तिक-
भयाकुलैः । भर्तॄणां च पितॄणां च, चक्रे कण्ठग्रहस्तदा ॥ ४३० ॥ प्रत्येकं कुलदेवीना-मीपुर्जानुस्थिताः पुरः । उपयाचित-
लक्षाणि, पुरीवृद्धपुरंध्रयः ॥ ४३१ ॥ नैमित्तिका निमित्तानि, ग्रहान् मौहूर्तिकाः पुनः । शकुनं शकुनज्ञाश्च, सर्वेऽप्यालोकयंस्तदा
॥ ४३२ ॥ नृपश्च पौरमुख्याश्च, बद्धाञ्जलिपुटाः समम् । धूपमुत्क्षिप्य निक्षिप्य, दशमूर्ध्वमथाभ्यधुः ॥ ४३३ ॥ यक्षो वा यदि वा
रक्षो, योऽस्ति क्रुद्धः पुरीं प्रति । अस्मास्वाज्ञाविधेयेषु, सांप्रतं स प्रसीदतु ॥ ४३४ ॥ अथाकस्मान्मपीकालः, कालरात्रिस-
होदरः । पिङ्गाक्षि-चिकुरः क्रूरः, कश्चित्तैर्ददृशे दिवि ॥ ४३५ ॥ भीतास्ते कम्पमानाङ्गा-स्तमूचुः प्रश्रयाश्रिताः । कोऽसि ?
ब्रूहि महाभाग !, देवो वा दानवोऽथवा ॥ ४३६ ॥ असौ संहारसंरम्भः, समारेभे कुतस्त्वया ? । तव नेतुं विना मन्तु-मन्तं
जन्तून सांप्रतम् ॥ ४३७ ॥ क्लिश्यन्ते हि महात्मानः, परोपकृतिकाम्यया । तरणेः कारणं किं नु ?, यद्भ्राम्यति नभोऽङ्गणे
॥ ४३८ ॥ दधत्यार्तं सुखीकर्तुं, कुलीनास्तापमात्मना । सुदुःसहं सहन्ते हि, तरवस्तपनातपम् ॥ ४३९ ॥ ततस्त्वमपि
विश्वस्य, शल्यमुद्धर्तुमर्हसि । एतत्कर्तुमकर्तव्यं, किं पुनस्तव युज्यते ? ॥ ४४० ॥ एवमुच्चैस्तरामुक्तः, सोऽभ्यधत्त नभःस्थितः ।
अरे ! विद्याधराधीशं, मां जानीत बकाभिधम् ॥ ४४१ ॥ रत्नशैलाभिधे शैले, पुरीसविधवर्तिनि । दुःसाधा साधयां-

१ व्याकुलम् । २ ऐच्छन् ।

चक्रे, मया विधाऽथ राक्षसी ॥ ४४२ ॥ ततः स्वविद्यामाहात्म्य–विलोकनकुतूहली । पुरीसंहारमधुना, विधित्सुरयमस्म्यहम् ॥ ४४३ ॥ अरे ! वराकाः झपदि, स्मरताभीष्टदेवताम् । शिलासंचूर्णितास्तूर्ण–मिदानीं न भविष्यथ ॥ ४४४ ॥ तेऽथ तेनैव-माधिक्षाः, पुनरेवं बभाषिरे । विद्या विद्याधराधीश !, किं न कुर्यादसंशयम् ? ॥ ४४५ ॥ नैतावतैव कार्येण, पुरीं संहर्तुमर्हसि । को नाम कीलिकाहेतोः, प्रासादोच्छेदमिच्छति ? ॥ ४४६ ॥ इदं विद्यापरीक्षायै, पुरीसंहरणं वृथा । भस्मने भस्मसात्कुर्यात्, को हि चन्दनकाननम् ? ॥४४७॥ तदेनमेनसामेकं, संक्रमं प्रक्रमं[1] त्यज । किं च त्रिलोकीत्राणाय, विद्या व्यापार्यतामियम् ॥ ४४८ ॥ सोपरोधमिति प्रोक्तः, सोऽभ्यधान्निष्कृपः पुनः । मांसैकलुब्धमनसो, दैन्यग्राह्या[2] न राक्षसाः ॥ ४४९ ॥ अस्ति युष्माकमेकस्तु, पणः प्राणप्रियंकरः । मम दत्तोपहारं चे–देकं मानवमन्वहम् ॥ ४५० ॥ मदीयपुरनेदीयः[3]–कान्तारे भैरवा-भिधे । मत्प्रसादार्थिभिः प्रांशुः, प्रासादश्च विधाप्यताम् ॥ ४५१ ॥ जातु नैवं कृतेऽवश्यं, भविता वः पराभवः । सदैव दैवते-भ्योऽपि, परचक्रात्तु का कथा ? ॥ ४५२ ॥ इदं वोऽस्तु पुरीं त्रातु–मेकमौपयिकं परम् । तदरे ! रोचते यद्व–स्तदाचरत संप्रति ॥ ४५३ ॥ इति व्याहृत्य विरते, दुर्नयाऽऽसेवके बके । अनिष्टामपि तां पौरा–स्तद्गिरं प्रतिशुश्रुवुः ॥ ४५४ ॥

अथेन्द्रजालिकेनेव, राक्षसेन्द्रेण तत्क्षणात् । अपासार्यत सर्वोऽपि, शिलादिर्दिवि डम्बरः ॥ ४५५ ॥ ततः कुमारिकाकृष्ट–नामपत्रनियोगतः । पर्यस्थाप्यत पर्यायः, पौरैः पुरनिवासिनाम् ॥ ४५६ ॥ बकमूर्तिसनाथश्च, प्रासादो निरमाप्यत । बलिनश्च विधातुश्च, नियोगः केन लङ्घ्यते ? ॥ ४५७ ॥ एकस्ततः प्रभृत्यम्ब ! पुमांस्तस्योपदीयते । असौ द्रोणप्रमाणश्च, शाल्योदन-

१ आरम्भम् । २ दैन्येन ग्रहीतुं शक्याः । ३ नेदीयः–समीपम् ।

बकासुरोपद्रवः ॥

मयो बलिः ॥ ४५८ ॥ तदेनं बलिमादाय, मातर्नृपनिदेशतः । पर्यायोपगतः सोऽहं, यास्यामि विपिनेऽधुना ॥ ४५९ ॥ तन्निराशं निरालम्बं, कुटुम्बं मम रोदिति । आश्रयद्रुमनाशे हि, दीनाः क्रोशन्ति पक्षिणः ॥ ४६० ॥ किं चान्यत् संकटं यन्मे, तन्मातः ! शृणु संप्रति । यदेषा ब्राह्मणी वक्ति, मामिदानीं पुनःपुनः ॥ ४६१ ॥ किं कार्यममुना नाथ !, त्वां विना जीवितेन मे । सापत्याऽपि भृशं लप्स्ये, त्वद्दते हि पराभवम् ॥ ४६२ ॥ ततोऽहमुपहाराय, तस्य यास्यामि रक्षसः । कल्पायुस्त्वं पुनर्भूया, भुञ्जानो भूयसीं श्रियम् ॥ ४६३ ॥ त्वत्प्राणत्राणकारिण्याः, कुलेऽस्तु कलशो मम । भर्तुर्विपदमाच्छेत्तु–मतिच्छेकाः कुलस्त्रियः ॥ ४६४ ॥ भुक्तं मृष्टं सुखं स्पृष्टं, दृष्टं मुखमपत्ययोः । त्वत्तः किं किं मया नाप्तं ? नास्ति मृत्योर्भयं मम ॥ ४६५ ॥ व्रजन्तं केवला नेयं, मां रुणद्धि सधर्मिणी । असावप्यात्मजेदानीं, सुदती वदतीति नौ ॥ ४६६ ॥ मा मातर्मा स्म वा तात, गच्छतं रक्षसो मुखे । आहारमुपहारं च, कर्तुं तस्योद्यताऽस्म्यहम् ॥ ४६७ ॥ बालो यद् युवयोरेव, जीवतोरेष जीवति । माताऽपि तात-शुश्रूषां, करोत्वाकल्पजीविनी ॥ ४६८ ॥ यदि मां नानुमंस्येथे, युवां नास्मि तथाप्यहम् । युवयोर्गेहवास्तव्या, परार्था हि पतिंवराः ॥ ४६९ ॥ इति कुन्ति ! कुटुम्बं मां, नानुजानाति मृत्यवे । अनुमन्येऽहमप्येतत्, कथं रक्षोमुखे पतत् ? ॥४७०॥ आदेशस्तु नरेशस्य, सर्वथा दुरतिक्रमः । तत्किंकर्तव्यतामूढः, पतितोऽस्म्यत्र वैशसे ॥ ४७१ ॥

इति विप्रे वदत्येव, काशकम्बां विलोलयन् । वेगादागत्य बालस्ता–नवोचत् पञ्चहायनः ॥ ४७२ ॥ मा रोदीस्तात ! मा स्माम्ब ! रोदीर्मा स्म रुदः स्वसः । अनया कम्बया गत्वा, तं हनिष्यामि राक्षसम् ॥ ४७३ ॥ मुहुर्मुहुर्ब्रुवन्नेवं, चालयंस्तां

१ पर्यायेण–अनुक्रमेण उपगतः–प्राप्त. । २ स्वादिष्ठम् । ३ विप्रे ।

लतां शिशुः । बाष्पप्लुते दृशौ तेषां, प्रममार्ज पुनः पुनः ॥ ४७४ ॥ तेषामेकैकशो नेत्रे, स ममार्ज यथा यथा । अम्भस्तथा तथा ताभ्यां, निर्झराभ्यामिवाभ्यगात् ॥ ४७५ ॥

अथ कुन्ती चलोदात्तां, तां बालस्य सरस्वतीम् । रक्षोवधैकपिशुना-मुपश्रुतिममन्यत ॥ ४७६ ॥ द्विजन्मानमवादीच्च, दयालुहृदयाऽधिकम् । हतमेवेति तं वत्स !, लक्षये राक्षसाधमम् ॥ ४७७ ॥ वध्यवेषममुं मुञ्च, किं च सिञ्चन् कुटुम्बकम् । वात्सल्यामृतकुल्याभि-श्छायां नय पुरातनीम् ॥ ४७८ ॥ शौण्डीर्योपचिताः पञ्च, ममामी सन्ति सूनवः । तेषामेकतमो गत्वा, तं हनिष्यति हेलया ॥ ४७९ ॥ इति कुन्तीवचः श्रुत्वा, हसन्नाह द्विजोत्तमः । न जानासि जगज्जैत्रं, त्वमम्ब ! बकविक्रमम् ॥ ४८० ॥ तस्मिञ्शौण्डीर्यशौण्डानां, दोर्दण्डबलडम्बरम् । अन्तर्मज्जति मार्तण्डे, तेजस्तेजस्विनामिव ॥ ४८१ ॥ अहमेव वरं मातर्यातः कीनाशदासताम् । न तु विश्वजनीनात्मा, तनयस्तव कश्चन ॥ ४८२ ॥

इति द्विजन्मनो वाचं, व्याख्यातबकविक्रमाम् । आकर्ण्य मातुरभ्यर्ण-वर्ती भीमस्तमभ्यधात् ॥ ४८३ ॥ त्वया पुत्रवतीमन्या, माता नः सर्ववत्सला । पश्यन्त्यपायमायात-मन्तः संतप्यतेतराम् ॥ ४८४ ॥ जननीयं कृतज्ञानां, त्वं च विश्वोपकारिणाम् । धौरेयतामयासिष्ट-मिति पश्यति मे मतिः ॥४८५॥ भवन्तमन्तकग्रासा-द्योऽभिरक्षति राक्षसात् । तमेव सुतमात्मीय-मम्बा मनसि मन्यते ॥ ४८६॥ तदहं विहितोत्साहो, मातुराधातुमीप्सितम् । त्वं तिष्ठ निष्ठुरं दुष्ट-मुपस्थातास्मि राक्षसम् ॥४८७॥

देवशर्मा ततः प्राह, मैवं वद महामते ! । न क्षमे श्रोतुमप्येता-मब्रह्मण्यां गिरं तव ॥ ४८८ ॥ उरीकृत्य ते मृत्युं,

१ नकुलम् । २ पराक्रमदक्षाणाम् । ३ विश्वजनहित आत्मा यस्य सः ।

नात्मानं त्रातुमुत्सहे। इन्द्रनीलोपमर्देन, कः काचं परिरक्षति ? ॥ ४८९ ॥ मादृशस्य द्विजस्यार्थे, नररत्नं भवादृशम्। राक्षसायोपनेतव्य-मिति कोऽन्योऽपि मन्यते ?॥ ४९० ॥ त्वादृक्षो विरलः कोऽपि, परोलक्षास्तु मादृशाः। स्वल्पः कल्पतरुर्लोके, भूयांसोऽन्ये हि भूरुहः ॥ ४९१ ॥ म्रियन्ते पञ्चपाण्येव, मानुपाणि मृते मयि। अस्या मूर्तेर्विपत्तौ तु, सर्वा सीदति मेदिनी ॥ ४९२ ॥ एतौ तव भुजौ वीक्ष्य, स्वयं त्रस्यन्ति शत्रवः। अक्षामस्थामधामाऽयं, न पुनर्बकराक्षसः ॥ ४९३ ॥ बक एव बको यद्वा, तव दोःपाशयोः पुरः। केवलं केवलिप्रोक्ता, गिरः संशयकारणम् ॥ ४९४ ॥ यतोऽमुष्यां पुरा पुर्यां, केवली मुनिरार्हतः। उदियाय पुरः शैल-चूलायामिव भास्करः ॥ ४९५ ॥ सर्वे वन्दारवः पौरा-स्तदभ्यर्णमुपाययुः। सोऽपि कारुणिकस्तेभ्यः, परं धर्ममुपादिशत् ॥ ४९६ ॥ तेनोपदेशपीयूष-पानेन प्रसरन्मुदः। समये विश्वमार्तण्डं, मुनीन्द्रं तेऽन्वेयुञ्जत ॥ ४९७ ॥ प्रभो ! प्रसीद सीदन्ति, पौराः सर्वे निवेद्यताम्। विरंस्यति जनस्यास्य, राक्षसोपद्रवः कदा ? ॥ ४९८ ॥ मुनिनाथोऽप्यथाऽऽचख्यौ, भो ! भद्राः पाण्डुसूनवः। जिता द्यूते यदैष्यन्ति, वनवासक्रमादिह ॥ ४९९ ॥ असौ तदानीं भविता, नगरी निरुपद्रवा। सदाऽप्यगोचरो वाचां, महिमा हि महात्मनाम् ॥ ५०० ॥ इत्याख्याय स लोकाय, जगाम मुनिपुङ्गवः। तादृशां हि महीं सर्वां, प्रिंयीकर्तुमुपक्रमः ॥ ५०१ ॥

तेन चन्द्रातपेनेव, मुनिन्द्रोर्वचनेन वे। बभूवुः प्रीतिकल्लोलै-र्नागराः सागरा इव ॥ ५०२ ॥ वर्णा अपि सुधाकीर्णाः, पाण्डवाः पाण्डवा इति। एतद्वाच्या भविष्यन्ति, पुमांसः कीदृशाः पुनः ? ॥ ५०३ ॥ इत्युक्तैः कुलदेवीभ्यः, पाण्डवागम-

१ वन्दनशीलाः। २ अपृच्छन्। ३ 'प्रिया' 'प्रियां' इति प्रत्यन्तर०। ४ अक्षराणि।

नैपिभिः । उपयाचितलक्षाणि, पौरैः प्रत्येकमीपिरे ॥ ५०४ ॥ (युग्मम्) हस्तिनापुरमार्गेण, नानोपायनपाणयः । प्रत्युद्ययुश्च ते नित्यं, पाण्डवेयान् प्रति प्रगे ॥५०५॥ जनानां जानतामेता–नद्यश्वीनसमागमान् । एकदा पथिकः कश्चि–दाययौ तेन वर्त्मना ॥ ५०६ ॥ स तैरप्रच्छि भोः पान्थ !, कथयास्मिन् पथि क्वचित् । उदन्तः पाण्डवेयानां, कश्चित् क्वचित्त्वया श्रुतः ? ॥ ५०७ ॥ शशंस सोऽपि भोः पौराः !, पथि चंक्रमणक्रमात् । आगतोऽस्मि श्रियो वास–वारिजे वारणावते ॥ ५०८ ॥ जनेभ्यस्तन्निवासिभ्यः, सवाष्पेभ्यः पदे पदे । इति कर्णविषं तस्मि–न्नश्रौषमतिदारुणम् ॥ ५०९ ॥ दुर्योधनस्य वचसा, वसन्तो जातुषे गृहे । इह चण्डाः सुताः पाण्डो–र्दाहं प्रापुः प्रदीपनात् ॥५१०॥ इहानुजीविभिस्तेषां, विरचय्योचिताश्रिताः । प्राणास्तेनैव सार्धेन, प्रहिताः प्रभुवत्सलैः ॥ ५११ ॥ वीक्ष्य भस्मस्थलीः स्थूलाः, कीर्तीस्तेषां निशम्य च । ममापि निरमाप्यन्त, वाष्पैः कूलंकषा दृशः ॥५१२॥ अथावेद्य कथामेतां, स पान्थः प्रस्थितः पुरः । आक्रन्दश्चैकचक्रायां, चक्रेऽतितुमुला दिशः ॥ ५१३ ॥ न मातुर्न पितुर्नैन, स्वामिनो मृत्युवार्तया । अभवत्तादृशः शोकः, पौराणां यादृशस्तदा ॥ ५१४ ॥ निःप्रत्याशैर्निरानन्दै–स्ततः प्रभृति नागरैः । पूर्यते यातुधानस्य, विशेषेण मनीषितम् ॥ ५१५ ॥ तदिदानीं द्रुतं यामि, प्रणम्य कुलदेवताम् । सर्वेषामेव युष्माकं, जज्ञेऽनुज्ञाञ्जलिर्मम ॥ ५१६ ॥ इति व्याहृत्य धैर्येण, संवर्मितमनास्ततः । सकुटुम्बोऽप्यगाद्विप्रः, प्रणन्तुं कुलदेवताम् ॥५१७॥

अथाभ्यधात् पृथा भीमं, वत्स ! त्वयि तनूरुहे । एकस्यापि द्विजस्यास्य, नाभूवमभयप्रदा ॥ ५१८ ॥ धन्यास्ते सति

१ राक्षसस्य ।

सामर्थ्ये, धरायां वार्धिसीमनि । ये सर्वप्राणिरक्षार्थं, ददत्यभयडिण्डिमम् ॥ ५१९ ॥ ये तूपकारकस्यापि, विपन्नद्यां निपेतुषः। निबिडं नोडुपायन्ते, तेषामजननिर्वरम् ॥ ५२० ॥ महाऽऽपदमपाकर्तु–मेतामस्योपकारिणः । अहं न चेदलंभूष्णु–स्तन्मां धिक् धिक् च मे सुतान् ॥ ५२१ ॥ तद्गच्छ बलिमादाय, निवासं तस्य रक्षसः । विदधीथास्तथा तत्र, सत्यः स्यात् केवली यथा ॥ ५२२ ॥ एवमादेशमासाद्य, मातुः पादौ प्रणम्य च । सच्छायपादपं प्राप, बकोद्यानं वृकोदरः ॥५२३॥ पश्यन् स्मेरमुखस्तस्य, वनस्य कमनीयताम् । पुरतः पुरुषं कंचि–दृष्ट्वाऽभाषिष्ट पाण्डवः ॥ ५२४ ॥ शंस मे भद्र ! कस्यायं, प्रासादः प्रांशुरग्रतः ? । कश्च त्वं ? कुत्र वा तिष्ठे–द्रक्षोभक्ष्यः पुमानिह ? ॥५२५॥ सोऽवोचत् कारितः पौरैः, प्रासादः सैष राक्षसः । स्थाने चास्मिन् बलिः शेष–राक्षसेभ्यो निधीयते ॥ ५२६ ॥ अहं तु पौरनिर्दिष्टः, प्रासादपरिचारकः, । पर्यायोपगतोऽध्यास्ते, वध्यो वध्यशिलामिमाम् ॥ ५२७ ॥ महात्मन् ! कौतुकात् किं तु, किंचित् पर्यनुयुज्यसे । त्वादृग्लोकत्रयीजैत्र–भुजः कोऽप्यत्र नाययौ ॥ ५२८ ॥ नाप्यस्ति वध्यवेषस्ते, न च ते दीनमाननम् । लम्बते निम्बमाला च, न तवाधिशिरोधरम् ॥ ५२९ ॥ इति प्रश्नपरे तस्मि–न्नकस्मादेव दुःश्रवः । पुरो याहि पुरो याही–त्येवं कोलाहलोऽभवत् ॥ ५३० ॥ तं श्रुत्वा स पुनः प्राह, नन्वसावेति राक्षसः । ततो व्यवहितो भूत्वा, देव ! स्थास्यामि संप्रति ॥ ५३१ ॥ इत्युक्त्वाऽन्तर्हिते तस्मिन्, दूरादायाति राक्षसे । पल्यङ्किकामिव शिलां, लीलयाऽध्यास्त पाण्डवः ॥ ५३२ ॥

अथोपेतः समं प्रेत–पिशाचैः स निशाचरः । सुखोत्तानशयं क्रूरः, प्रेक्षांचक्रे वृकोदरम् ॥५३३॥ अचिन्तयच्च कोऽप्यद्य,

१ पतितस्य ।

पीवरोरुर्महोदरः । आगात् पुमान्न यो माति, विपुलेऽपि शिलातले ॥ ५३४ ॥ असौ बुभुक्षाक्षामस्य, भूत्वा कुक्षिंभरिर्मम । पीनः परिच्छदस्यापि, भविष्यत्युदरंभरिः ॥ ५३५ ॥ इति प्रमुदितस्वान्तो, दन्तान् सोऽत्यन्तदारुणः । देहे व्यापारयामास, मांसले पाण्डुजन्मनः ॥ ५३६ ॥ भीमस्य वज्रकायस्य, काये व्यापारिता अपि । अवापुः कुण्ठतां तस्य, दन्ताः कुन्ता इवाश्मनि ॥ ५३७ ॥ भीमवक्षःस्थले स्थूलं-मावुकक्षुत्क्रमोदयः । खननोपक्रमं चक्रे, नखकुद्दालकैर्बकः ॥ ५३८ ॥ प्रत्युत्कारकरास्तस्य, नखरास्ते खरा अपि । मृणालकदलीभङ्गं, भज्यन्ते स्म समन्ततः ॥ ५३९ ॥ विस्मितश्च विलक्षश्च, लज्जितः गञ्जितश्च सः । रक्षोनिवहमाह्वास्त, समस्तं स्वस्य संनिधौ ॥ ५४० ॥ ऊचे च नरमेकैकं, स्वादयन्नहमन्वहम् । अस्मिन् भूभृति भूयांस-मनैर्हमलङ्घ्यम् ॥ ५४१ ॥ परं न कोऽप्यभूदीदृ-क्पुरुषः परुषच्छविः । न च स्थिरो न च स्थूल-वपुर्नाप्यक्षोभयः ॥ ५४२ ॥ तदेनं स्वे नगे नीत्वा, तीक्ष्णेन तरवारिणा । उत्कृत्योत्कृत्य कर्तास्मि, सर्वेषामाशितंभवम् ॥ ५४३ ॥ तदस्यपमुदस्यध्व-मेनं मानुषमादरात् । इत्युक्तास्ते तथा चक्रु-रुद्दामबलशालिनः ॥ ५४४ ॥ भीमभारभराक्रान्ता, मुखेनोद्वान्तशोणिताः । नक्तंचराः पिशाचास्ते निपेतुर्धरणीतले ॥ ५४५ ॥ अथ संभूय भूयोभि-स्तैः समं बकराक्षसः । भीमं कथंचिदुत्पाट्य, निनाय निजभूधरम् ॥ ५४६ ॥

इतः साकं कुटुम्बेन, विलापविकलात्मना । प्रणम्य सर्वदेवेभ्यो, देवशर्मा गृहे गतः ॥ ५४७ ॥ दूरादधिगृहद्वार-मदृष्ट्वा प्रस्टं बलेः । स द्विजो द्विजवाचालं, जङ्घालः काननं ययौ ॥ ५४८ ॥ (युग्मम्) तत्रालोक्य गदां पाद-संमर्दं च शिलान्तिके ।

१ कालम् । २ भोजनम् । ३ पक्षिभिर्वाचालम् । ४ धावकः ।

स प्रत्यासन्नमासन्न-मूर्च्छः पप्रच्छ देवेलम् ॥ ५४९ ॥ ब्रूहि बन्धो ! प्रबन्धोऽय-मधुना कीदृशोऽभवत् ? । वनमायातपूर्वी च,
लक्ष्यते राक्षसो यतः ॥ ५५० ॥ शशंस सोऽपि भो विप्र !, कोऽपि पीनवपुः पुमान् । अध्यशेत शिलामेत्य, तूलिकामिव
लीलया ॥ ५५१ ॥ वेगादागत्य तमितो, द्वितीयमिव पर्वतम् । निरीक्ष्य रक्षसां नेता, निनाय निजभूधरम् ॥ ५५२ ॥
एतावत्यन्तरे क्रूरै-रुत्कृत्योत्कृत्य खण्डशः । ध्रुवं कवलयांचक्रे, स रक्षोभिर्बुभुक्षितैः ॥ ५५३ ॥ त्वां बध्यवेषमुद्वीक्ष्य, ध्रुवं
संभावयाम्यहम् । कश्चित्तवैव पर्याये, सुकृती त्यक्तवानसून् ॥ ५५४ ॥ तच्छ्रुत्वाऽतीव चक्रन्द, वज्राहत इव द्विजः । हा
परोपकृतिप्रौढ !, निर्व्यूढाद्भुतसाहस ! ॥ ५५५ ॥ ममाधमर्ण्यमाधाय, गत्वा राक्षसपांसनम् । विश्वरक्षाक्षमैर्भ्रातः !, प्राणैर-
प्रीणयः कथम् ? ॥ ५५६ ॥ न त्वया विदधे साधु, प्राणैर्मामपि रक्षता । यतस्तृणमणिस्थाने, हन्त चिन्तामणिर्गतः
॥ ५५७ ॥ स विप्रो विलपन्नेवं, निजं संप्रेष्य मानुषम् । पृथायाः कथयामास, कथां दत्तव्यथामिमाम् ॥ ५५८ ॥
पृथाऽपि सह पाञ्चाल्या, पङ्किलं मार्गमश्रुभिः । कुर्वती वनमभ्यागात्, सार्धं धर्मसुतादिभिः ॥ ५५९ ॥ काम्येऽपि
कानने तस्मि-न्नस्पृशन्तो रतिं क्वचित् । संगताः केसरस्याध-स्ते सर्वे देवशर्मणा ॥ ५६० ॥

अथ शोकेन पक्ष्मान्त-वान्ताश्रुकणधोरणिः । युधिष्ठिरमभाषिष्ट, द्विजः स्वानुशयाऽऽशयः ॥५६१॥ इदं विश्वजनीनेन,
मत्प्राणत्राणकाङ्क्षिणा । ह हा हा दुःश्रमं(वं)तेन, त्वद्भ्रात्रा कर्म निर्ममे ॥५६२॥ प्रणन्तुं कुलदेवीभ्यो, यद्गतोऽस्मि दुनोति तत् ।
तत्रान्तरे महात्माऽसौ, गत्वा रक्षोमुखेऽपतत् ॥ ५६३ ॥ अथोवाच तपःसूनुः, सत्यैकनिकेतनम् । मा विषीद महाभाग !,

१ देवपूजकम् । २ स्थाने । ३ सुन्दरे । ४ मिलिताः । ५ सत्यैकगृहम् ।

पर्याप्तं परिदेवितैः ॥ ५६४ ॥ न जातु यातुधानेन, मद्बन्धुः परिभूयते । तमस्काण्डेन चण्डांशुः, किं कदाऽपि विलुप्यते ? ॥ ५६५ ॥ भीमस्य भुजपाशेन, लीलयाऽपि निपीडितः । कृतान्तस्यान्तिकं गन्ता, बको बक इव ध्रुवम् ॥ ५६६ ॥ इति तस्मिन् वदत्येव, मुक्तघूत्कारमम्बरात् । पपात मुण्डमुच्चण्ड–गण्डशैलोपमं पुरः ॥ ५६७ ॥ चकम्पे काश्यपी शैलाः, पेतुर्यस्मिन्निपेतुषि । । तत्किमेतदिति क्षोभा–त्ते प्रैक्षन्त मुहुर्मुहुः ॥ ५६८ ॥ भीमस्य ग्रथितैस्तेऽथ, चिह्नैर्निश्चिक्यिरे शिरः । तदैव मुक्तकण्ठं च, सर्वे परिदिदेविरे ॥ ५६९ ॥

चक्रन्द नन्दनः पाण्डो–र्ज्यायानुज्झितधीरिमा । हा ! वत्स ! विश्वसाधार !, हा ! हिडम्बविडम्बन ! ॥ ५७० ॥ अवधीस्त्वं नरव्याघ्र !, पुरा राक्षसकुञ्जरान् । किमिदानीं बकेनापि, लम्भितोऽसि दशामिमाम् ? ॥ ५७१ ॥ बकं हत्वा ध्रुवं पार्थो, विधाता वैरयातनाम् । त्वयाऽधुना विमुक्तास्तु, भवितास्मः कथं वयम् ? ॥ ५७२ ॥ सुखं निद्रायमाणाना–मतिश्रान्तिजुषां पथि । को नाम यामिकोऽस्माकं, भविष्यति विना त्वया ? ॥ ५७३ ॥ प्रचण्डतरसाऽस्माक–मगाधेऽध्वमहाम्बुधौ । उपाचोदात्तकाष्ठेन, वत्स ! पोतायितं त्वया ॥ ५७४ ॥ मामिदानीं त्वया सौम्य[3]–त्यक्तं विधुमिवाधुना । बाढं बाधिष्यते क्रूरः, सुयोधनविधुंतुदः ॥ ५७५ ॥ अथवा तव सार्थेन, यास्यतो मम निश्चितम् । विरोधे सावधानोऽपि, किं विधाता सुयोधनः ? ॥ ५७६ ॥ इत्थं विलापविकलो, यावदालोकते पुरः । तावद्धर्मात्मजः कुन्तीं, जातमूर्च्छामुदैक्षत ॥ ५७७ ॥

---

१ शोकैः । २ 'चोद्योत०' 'चोद्यत०' प्रत्यन्तर० । ३ (सौम्यो बुधः,) तेन त्यक्तो रहितस्तम् । (४ 'ग्रहपञ्चकसंयोगं, दृष्ट्वा न ग्रहणं वदेत् । यदि न स्याद्बुधस्तत्र, तं दृष्ट्वा ग्रहणं वदेत् ॥' एतदनुगामिनीयं कल्पना ।)

तनूजैस्तैस्ततः कुन्ती, वीजिता प्राप्य चेतनाम् । पर्यदेवत हा ! वत्स !, सत्त्वोदार ! वृकोदर ! ॥ ५७८ ॥ मुनिभिर्वज्रकायस्त्वं, कथितस्तत् कथं बकः । मृणालकन्दलीछेद–मिदं चिच्छेद ते शिरः ? ॥ ५७९ ॥ तवैतस्योत्तमाङ्गस्य, क्रियेऽहमवतारणम् । पुरा येन गिरिग्रावा, भस्मचूरमचूर्यत ॥ ५८० ॥ प्रकाशः प्राग्ययोरासी–त्तामसीष्वपि रात्रिपु । नेत्राभ्यामधुना ताभ्यां, कथं मामपि नेक्षसे ? ॥ ५८१ ॥ तेपु तेष्ववदातेपु, मुहुराघ्रायि यो मया । सोऽयं सन्मूर्द्धजो मूर्द्धा, कथं लुठति भूतले ? ॥ ५८२ ॥

इत्थं विसंस्थुलं कुन्त्यां, विलपन्त्यां मुहुर्मुहुः । तमुपादाय मूर्द्धानं, द्रौपदी विदधे हृदि ॥५८३॥ व्यलपत्तुमुलं साऽपि, पादपान्तरिता ततः । हा ! नाथ ! मथितारातें !, क्व गतोऽसि विहाय माम् ॥ ५८४ ॥ मया प्राणेश ! ये केशा, विकीर्णाः करकङ्कतैः । धूलिधूसरितास्तेऽमी, विलुठन्ति भुवस्तले ॥ ५८५ ॥ विद्रुमाभः पुरा योऽभूत्, सुधास्वादुस्तवाधरः । धिग्विधिं सोऽधुना धत्ते, प्रम्लानेन्दीवरश्रियम् ॥ ५८६ ॥ अध्यशेत ममोत्सङ्गे, यः शयालुरनेकधा । अयं स एव मौलिस्ते, गाहते ही महीतलम् ॥ ५८७ ॥ जानीयास्त्वमिदानीं मा–मात्मान्तिकमुपेयुषीम् । एवं विलप्य पाञ्चाली, चितामारचयत्तदा ॥ ५८८ ॥ राज्यभ्रंशं प्रवासं च, विना भीमेन दुःसहम् । विभाव्य धर्मपुत्राद्यै–र्मरणायोपचक्रमे ॥ ५८९ ॥ अहमेवाभवं हेतु–रेतस्मिन्नसमञ्जसे । इति निश्चित्य संनद्धं, भृत्यत्वे देवशर्मणा ॥ ५९० ॥

अथाश्रूयत तैः सर्वै–र्ब्रह्मस्तम्बोदरंभरिः । गुहागह्वरवर्धिष्णु–र्मुहुः किलकिलारवः ॥ ५९१ ॥ श्रुत्वा तं चिन्तयामास,

१ सुकेशः । २ अयोग्ये ।

मक्षोभं धर्मनन्दनः । भीमं हत्वाऽयमभ्येति, हन्तुमस्मान्निशाचरः ॥ ५९२ ॥ शीर्षच्छेद्यो ह्यसौ दिष्ट्या, स्वयमेत्यस्मदन्तिकम् । वैरं निर्यात्य भीमस्य, करिष्यामः स्वमीप्सितम् ॥ ५९३ ॥ विचिन्त्येत्यवदत् पार्थं, वत्सागच्छति राक्षसः । अस्य जीवितमादाय, भीममुज्जीवय द्रुतम् ॥ ५९४ ॥ इत्यादिष्टः सकोपेन, किरीटी ज्येष्ठबन्धुना । अधिज्यं धनुरादाय, तस्थौ रक्षोदिशं प्रति ॥ ५९५ ॥ कुन्ती तु चिन्तयामास, पार्थः कर्षति संप्रति । राक्षसापसदस्यास्यो-दरादाशु वृकोदरम् ॥ ५९६ ॥ अस्मिन् कृतान्तपादान्त-परिचारिणि वैरिणि । अन्वेष्यामि सुखेनैव, भीममत्यन्तवत्सलम् ॥ ५९७ ॥ चक्रे मनसि कृष्णाऽपि, भयात् कृष्णमुखी ततः । हा ! हताऽस्मि पतीनेतान्, हन्तुमेति क्षपाचरः ॥ ५९८ ॥ यत्र निर्नाम निर्मग्नं, भीमस्यौजो महौजसः । तत्र पार्थस्य शौण्डीर्यं, किं नु नाम करिष्यति ? ॥ ५९९ ॥ दुष्टस्य यस्य निर्व्यूढ-श्चण्डांशावपि चण्डिमा । ग्रसते स सुधारश्मिं, राहुरत्र किमद्भुतम् ॥ ६०० ॥ तन्मे भर्तृवधं वेधा, दुर्मेधा दर्शयिष्यति । न च वीक्षितुमेतं च, क्षमेते मम लोचने ॥ ६०१ ॥ इत्यालोच्य चिताभ्यर्णे, निमील्य नयने निजे । तथैव भृशमस्वस्था, तस्थौ द्रुपदनन्दिनी ॥ ६०२ ॥ देवशर्माऽपि सावित्रीं, स्वकलत्रमभाषत । उत्पातस्याहमेतस्य, संजातोऽस्मि निबन्धनम् ॥ ६०३ ॥ निहतो बन्धुरेतेषां, दशोरविषये मम । रक्षसा हन्यमानांस्तु, द्रष्टुं शक्ष्याम्यमून् कथम् ? ॥६०४॥ तच्चेदुद्बन्धनं कुर्यां, विशेयं वा महीं यदि । विदीर्येयं स्वयं चेद्वा, स्यात्तदेव मम प्रियम् ॥ ६०५ ॥ इति जल्पत एवास्य, कुर्वन् किलकिलारवान् । बभूव भीमः सर्वेषां, तेषां लोचनगोचरः ॥ ६०६ ॥

१ वालयित्वा । २ अनुगमिष्यामि । ३ नामरहितम् ।

अथ स्फूर्जदवष्टम्भ-
अथ व्यापारितस्फार-फालमालोक्य तं तदा । तेषां रोमोद्गमव्याजात्, सर्वाङ्गमुदितं मुदा ॥ ६०७ ॥ अथ स्फूर्जदवष्टम्भ-
मभाषिष्ट युधिष्ठिरः । बन्धुर्भीमो मदीयः किं, राक्षसैः परिभूयते ? ॥ ६०८ ॥ भवितारस्तरां पश्चा-प्यजय्या जगतोऽ-
प्यमी । इयं नो भारती दिव्या, जन्मोत्था हि किमन्यथा ? ॥ ६०९ ॥ गतिं भवन्तो गन्तारः, क्रमात् पञ्चापि पञ्चमीम् ।
इत्याख्यायि मुनीन्द्रैर्य-त्तदसत्यं भवेत्किमु ? ॥ ६१० ॥ एवमस्मिन् वदत्येव, वेगादेत्य वृकोदरः । कुन्तीं च ज्येष्ठबन्धुं
च, नमस्यामास सादरम् ॥ ६११ ॥ दूरात् प्रणमतो बन्धून्, समालिङ्ग्य कनीयसः । स्मितोत्फुल्लमुखो भीमः, पप्रच्छ क्षोभ-
कारणम् ॥ ६१२ ॥ अथ पार्थः समाचख्यौ, यथावृत्तं तदातनम् । दिक्षु भीमोऽथ चिक्षेप, चक्षुः कृष्णादिदृक्षया ॥ ६१३ ॥
दृष्ट्वा कृष्णां तथाभूतां, चितानिकटवर्तिनीम् । स गत्वा पिदधे तस्याः, पाणिभ्यां क्रीडया दृशौ ॥ ६१४ ॥ भयेन
वेपमानाङ्गी, कृष्णाऽथ गिरमाददे । रात्रिंचर ! दुराचार !, रे ! पाप ! परतो भव ॥ ६१५ ॥ आर्यपुत्रस्य भीमस्य,
च्छलाद्वधविधानतः । अदृष्टव्यमुखोऽसीति, मया नेत्रे निमीलिते ॥ ६१६ ॥ मम प्रियवधे हस्तौ, यौ तव व्यापृतौ पुरा ।
उग्रदण्डोचितौ दुष्ट !, तावेतौ दूरतः कुरु ॥ ६१७ ॥ हतैवाहं पुरा हन्त !, जीवितेशवधात्त्वया । रे ! दुरात्मन्निदानीं तु,
कुरुषे मृतमारणम् ॥ ६१८ ॥ कान्तमन्वेतुकामाऽह-मारोहामि स्वयं चिताम् । निजाङ्गस्पर्शतः पाप !, मा मा मां मलिनीकुरु
॥ ६१९ ॥ नाद्याप्यसौ भयं शत्रो-र्मुञ्चतीति विचिन्तयन् । अपसार्य निजौ पाणी, भीमस्तामिदमभ्यधात् ॥ ६२० ॥ प्रिये !
द्रौपदि ! मा भैषी-र्विलोकय निराकुला । पुरस्ते न ह्ययं रक्षो, रक्षोघाती तु ते प्रियः ॥ ६२१ ॥ पङ्कजोत्फुल्लनयना, नयना-
भ्यामुदैक्षत । सा प्रेयांसमुदाराङ्गं, नोत्तमाङ्गं तु तत्पुरः ॥ ६२२ ॥ दिष्ट्या मे जीवितव्येशः, कुशलीति मुदं पराम् । किं तु

भीमेन शमितः चक्रासुरोपद्रवः॥

मायाविनो माया, राक्षसस्येति संभ्रमम् ॥ ६२३ ॥ क्व नु तेनोत्तमाङ्गेन, प्रयातमिति विस्मयम् । मया रक्षोभयात् प्रोक्त-मसंबद्धमिति त्रपाम् ॥ ६२४ ॥ इत्थं वहन्ती संकीर्णान्, भावान् प्रियतमेन सा । तथाऽऽश्लेपि यथा तन्वो-र्भेदवादो न्यवर्तत ॥ ६२५ ॥ (त्रिभिर्विशेषकम् ।) स्तनोपपीडमाश्लिष्टा, प्रेयसा सा रसान् परान् । मुक्त्वा जितसुधासेक-मेकमानन्दमन्वभूत् ॥ ६२६ ॥ प्रियाप्रेम्णाऽतिरेकेण, तेनासंप्राप्तपूर्विणा । अनेशदाशु भीमस्य, सर्वोऽपि समरश्रमः ॥ ६२७ ॥

अनवद्यैर्महावाद्यैः, शङ्खाद्यैर्मेदुरीकृतः । तस्याथ दुन्दुभिध्वानः, कर्णजाहमगाहत ॥६२८॥ ज्ञातप्रबन्धमायान्त-मेकचक्रानरेश्वरम् । सोऽपश्यदन्वितं पौरै-र्नानामङ्गल्यपाणिभिः ॥ ६२९ ॥ पार्थदत्तासनासीन-तपःसूनुपदान्तिके । वेगादागत्य विनयी, निषसाद वृकोदरः ॥ ६३० ॥ अकृत्रिमत्रपारङ्ग-न्नीरङ्गी सुभगाकृतिः । श्वश्रूपार्श्वे समेयाय, द्रुतं द्रुपदनन्दिनी ॥६३१॥ चक्रवर्त्येकचक्रायाः, समेत्याथ युधिष्ठिरम् । वर्धयामास माङ्गल्यै-रङ्गे रोमाङ्कुरं वहन् ॥ ६३२ ॥ अहंप्रथमिकापूर्वं, सर्वेऽपि नगरीजनाः । ज्यायसः पाण्डवेयस्य, मङ्गलानि वितेनिरे ॥ ६३३ ॥ अस्मत्कुटुम्बजीवातो !, जीव त्वं जीवितेन नः । इत्याशास्य पुरीवृद्धा, भ्रमयामासुरञ्चलम् ॥ ६३४ ॥ विहिताद्भुतशृङ्गाराः, शृङ्गारास्त्रस्य सायकाः । तत्र नृत्यं स्त्रियः काश्चि-द्व्यधुः कुलवधूचितम् ॥ ६३५ ॥ हल्लीसकप्रबन्धेन, वीररत्नप्रसूरिति । अमन्दानन्दसंदोहाः, कुन्तीं काश्चिज्जगुर्मुहुः ॥ ६३६ ॥ नूतनोल्लूलकल्लोलै-र्निःसीमं भीमविक्रमम् । काश्चिद्बकवधाधान-मनोहरमुदाहरन् ॥६३७॥ इत्थं मनसि काये वा, न पौराणां ममुर्मुदः । प्रीत्यै शुभोदयोऽन्योऽपि, किं पुनर्जीवितागमः ? ॥ ६३८ ॥

---

१ कामदेवस्य ।

बद्धाञ्जलिरथोवाच, भूपतिस्तपसःसुतम् । एकचक्राप्रजाप्राण-सत्रिन् ! कल्याणमस्तु ते ।।६३९।। यतः प्रभृति कल्याणि-न्नुपागा नगरीमिमाम् । ततः प्रभृति पौराणा-मभूदभ्युदयो महान् ।।६४०।। इदानीं तु समानीते, यके कीनाशदासताम् । संजातोऽस्यशरण्यानां, प्रजानामभयप्रदः ।। ६४१ ।। अतः परं प्रजाः सन्तु, पुत्रेभ्यः स्पृहयालवः । लभन्तां कुलदेव्यश्च, पुत्रार्थमुपयाचितम् ।।६४२।। जनन्योऽनुपमस्नेहाः, पालयन्तु तनूरुहान् । चिराय वरिवस्यन्तु, सवित्रीः स्वाः सुता अपि ।।६४३।। एतत्तु कथ्यतां सौम्य !, कतमस्ते स बान्धवः ?। इन्द्रेण पाकवच्चक्रे, बको येन यमातिथिः ? ।। ६४४ ।। ततो धर्मात्मजस्तस्मै, कथयामास लीलया । बन्धुः सैष कनीयान्मे, संहर्ता सकलापदाम् ।। ६४५ ।। तदुपश्रुत्य सर्वेषा-मेकचक्रानिवासिनाम् । मुग्धाः स्निग्धाः सुधासान्द्रा, विकसत्पक्ष्मसंपुटाः ।। ६४६ ।। निमेषविमुखाः क्रोडी-कृतानन्दाश्रुबिन्दवः । जीवितव्यप्रदे भीमे, निपेतुर्युगपद्दृशः ।।६४७।। (युग्मम्) अथ पप्रच्छ निःशोको, लोको बकनिषूदनम् । कथ्यतां प्रथयांचक्रे, कथं बकवधस्त्वया ।।६४८।। इमामुदाहरिष्यामि, कथां कथमिवात्मनः ?। इति तूष्णीं स्थिते भीमे, जने चावहितेऽधिकम् ।।६४९।। अवतीर्य नभःक्रोडात्, पुरतः पाण्डुजन्मनाम् । उभौ युवा च वृद्धश्च, पुरुषावेत्य तस्थतुः ।।६५०।। (युग्मम्)

तयोरुवाच वर्षीयान्, विस्मितं धर्मनन्दनम् । बकराक्षसराजस्य, दुर्बुद्धिः सचिवोऽस्म्यहम् ।। ६५१ ।। अयं महाबलो नाम, धाम धाम्नां तदात्मजः । निजान्वयपुरीं लङ्कां, समयेऽस्मिन् गतोऽभवत् ।।६५२।। व्यावृत्तस्त्वधुनाऽपृच्छत्, केनेत्थं मे पिता हतः ?। मयाऽऽख्यायि महाकायः, कोऽप्ययागात् पुमान् बलिः ।।६५३।। जङ्घेतमां तमालोक्य, स्वामिनो नो मनोरथैः।

१ यमराजदासत्वम्-मरणमित्यर्थः । २ पूजयन्तु । ३ मातृः । ४ पुत्राः ।

यथा चिरात् कुटुम्बस्य, भवत्यथाशितंभवः ॥ ६५४ ॥ स्वाम्यादेशात्ततः शैले, समानीतं कथंचन । वीक्षमाणैरमुं रात्रि-चरैश्चि-रायितं चिरात् ॥६५५॥ सूर्यहासमसिं कृष्ट्वा, प्रजिहीर्षुः प्रहर्षतः । तेनाथ भूतलोत्थाय-मभ्यधीयत नः प्रभुः ॥६५६॥ रे रे ! निस्त्रप ! निस्त्रिंश !, दुराचार ! निशाचर ! । निर्मन्तुजन्तुविध्वंस-पापप्राग्भारपङ्किल ! ॥६५७॥ भवस्येष कथाशेष-स्त्वमिदानीम-संशयम् । परं प्रहर रे ! पूर्वं, हन्तुं प्रायास्मि शिक्षितः ॥ ६५८ ॥ इत्थमुत्तेजितस्तेजः-शालिनामग्रतःसरः । नक्तंचरमहेन्द्रस्तं, हतवांस्तरवारिणा ॥ ६५९ ॥ तत्राथ वज्रजैत्राङ्गे, प्रयुक्तमधिपेन नः । क्षणेन मण्डलाग्रं[3] त-जगाम शतखण्डताम् ॥ ६६० ॥ सोऽप्यारन्मुष्टिना हन्तुं, नक्तंचरपतिं ततः । पर्वतोच्चतरः क्रूर-श्चाणूरमिव केशवः ॥ ६६१ ॥ मुष्टिना ताडितस्तेन, धूतदम्भोलिकेलिना । पपात भुवि नः स्वामी, सपक्ष इव भूधरः ॥ ६६२ ॥ ततः कुमार ! ते ताते, जाते मूर्च्छाविसंस्थुले । रक्षोभि-र्विरलैर्जातं, हतं सैन्यमनायकम् ॥ ६६३ ॥ तथाऽप्येतस्य कूटेन[4], कुटुम्बं संहराम्यहम् । विमृश्येति प्राहिणवं, सुमायं नाम राक्षसम् ॥ ६६४ ॥ शिक्षां मम समादाय, गते तस्मिन् स्वसिद्धये । मूर्च्छां शीतोपचारेण, स्वामिनः प्रापयं क्षयम् ॥ ६६५ ॥ घट्टितस्य तथा तेन, करीषाग्नेरिवाधिकम् । धगद्धगिति जज्वाल, तेजस्तेजस्विनः प्रभोः ॥६६६॥ अथ स्वबाहुपाशेन, मोटयित्वा शिरोधराम् । तमधो न्यस्य नः स्वामी, समारोहदुरःस्थलम् ॥ ६६७ ॥ लब्धविक्रमपाकेन, बकेनाक्रम्य वक्षसि । निरुच्छ्वासां दशां नीतः, प्रमीत[5] इव सोऽभवत् ॥६६८॥ प्रावर्तत ततो मङ्क्षु, रक्षःकिलकिलारवः । पुनरासादितोल्लासैः, पुष्पितं मे मनोरथैः ॥ ६६९ ॥ तत्र कृत्रिममुण्डे च, सुमायेन प्रपञ्चिते । अत्र नः स्वामिनश्चैवं, विस्फूर्जति पराक्रमे ॥ ६७० ॥ कुलं लङ्कापते-

१ भोजनेन तृप्तिः । २ असिना । ३ असिः । ४ कपटेन । ५ मृतः ।

जैत्र-मित्युत्सेकपरे मयि । तृणं त्रिलोकीमप्येतां, मन्यमाने च नः प्रभौ ॥ ६७१ ॥ तेन छद्मभीतेन, परिवर्तनलाघवम् । तच्चक्रे ददृशे येनो-त्तराधर्यविपर्ययः ॥ ६७२ ॥ (त्रिभिर्विशेषकम्) बकवक्षःस्थलारूढः, स प्रौढभुजविक्रमः । 'मुष्टिमुद्गर-मुद्यम्य, नीतिमानिदमभ्यधात् ॥ ६७३ ॥ स्वयं दोष्मन् ! पदे विद्धः, कण्टकेनापि दूयसे । प्राणानपि परेषां तु, नित्यं हरसि लीलया ॥ ६७४ ॥ अमारिं कारयांचक्रे, लङ्केशः परमार्हतः । कुलं तस्य किमेतेन, कलङ्कयसि कर्मणा ? ॥ ६७५ ॥ इदा-नीमपि दुष्कर्म, दूरान्मुञ्चसि चेदिदम् । तद्भवत्वभयं तुभ्यं, नष्टं नाद्यापि किंचन ॥ ६७६ ॥ तस्य तेनातिसाम्नाऽपि, प्रभुरभ्यधिकं क्रुधा । जाज्वल्यते स्म तप्ताज्य-मिव चन्दनबिन्दुना ॥ ६७७ ॥ अभ्यधाच्च किमाचार्य, इव वाचाल ! जल्पसि ? । एता वाचो न मे किंचि-च्चरन्ति श्रवणान्तिके ॥ ६७८ ॥ क्षुधार्तः कल्यवर्तं त्वां, विधाय विधिनाऽधुना । सर्वासामपि दास्यामि, त्वद्वाचामुत्तरं ततः ॥ ६७९ ॥ इत्युदीर्य स्वधैर्येण, प्रतिष्ठासुर्भृशं-प्रभुः । पूर्वकायेन नितरा-मुत्पपात पपात च ॥ ६८० ॥ आक्रा-न्तस्यापि तेनोच्चैः, स्वामिनश्चेष्टया तया । रक्षोलोकस्य शोकेऽपि, हास्यमास्ये समुद्ययौ ॥ ६८१ ॥ सोऽभ्यधान्नः प्रभुं भूय-स्तदरे ! स्मर दैवतम् । महामांसाशिनां क्वापि, न हि कल्याणसंपदः ॥ ६८२ ॥ इति व्याहृत्य तेनाथ, नाथोऽस्माकमनाथवत् । मूर्द्धानं मुष्टिना भित्त्वा, प्राप्यतैकोऽपि पञ्चताम् ॥ ६८३ ॥ विद्याविदितवृत्तान्तः, सुमायश्च तदैव सः । विहङ्गराजवेगेन, व्यावृत्त्येह समाययौ ॥ ६८४ ॥ श्रुत्वेति विक्रमस्फारः, कुमारोऽसौ महाबलः । निहन्तुं तातहन्तारं, स्वीचक्रे सांयुगीनताम् ॥ ६८५ ॥ शक्तेऽस्मिन्नोचितं युद्धं, तद्भक्त्याऽभ्यर्च्य पृच्छ्यताम् । कुलविद्येति संबोध्य, रुद्धः संवर्मयन्मया ॥ ६८६ ॥

१ प्रातर्भोजनरूपम् । २ गरुडवेगेन । ३ युद्धसज्जताम् ।

एकतानेन साऽनेन, देवी सम्यगुपासिता । यदादिदेश तदसौ, स्वयमावेदयिष्यति ॥ ६८७ ॥

महाबलस्ततोऽवोच-न्मदुपास्तिवशंवदा । देवी मामादिशद्वत्स !, रुषं त्यज शमं भज ॥ ६८८ ॥ गत्वा सान्त्वय सद्भाव-तत्परः पुरुषानमून् । एते हि निंहतानीति-प्रपञ्चाः पञ्च पाण्डवाः ॥ ६८९ ॥ मया पुराऽपि ते तातः, समादिष्टो भृशं यथा । प्रतीपः पाण्डवेयानां, मा स्म भूर्वत्स ! जातुचित् ॥ ६९० ॥ भक्त्यानुकूलिता ह्येते, कामदाः कल्पपादपाः । भवेयुः प्रतिकूलास्तु, विषमा विषपादपाः ॥ ६९१ ॥ महामांसनिषेधं चेत्, त्वत्तातः प्रत्यपत्स्यत । नाहनिष्यत्तदाऽवश्य-मेनं मध्यमपाण्डवः ॥ ६९२ ॥ तद्गत्वा विनयी भूत्वा, तान् पित्रीयितुमर्हसि । पुत्रीयिष्यन्ति तेऽपि त्वां, सन्तो हि नतवत्सलाः ॥ ६९३ ॥ इति देवीसमादेशा-दस्मि युष्मानुपस्थितः । मामप्यात्मविधेयाना-मन्त्यं संख्यातुमर्हथ ॥ ६९४ ॥

पश्यतामथ पौराणां, व्याजहार वृकोदरः । आर्यपादाः प्रसन्नास्ते, निवर्तस्व वधान्नृणाम् ॥ ६९५ ॥ इत्युक्तस्त्यक्तवान् सोऽथ, तमधर्म्यं वधक्रमम् । अभ्यषिञ्चत साम्राज्ये, पैतृके तं तपःसुतः ॥ ६९६ ॥ इमे ते विस्फुरत्कीर्ति-ताण्डवाः पाण्डवा इति । ज्ञातवद्भिस्तदा पौरै-र्भूयोऽपि मुमुदेतमाम् ॥ ६९७ ॥ नृपतिश्चैकचक्रायाः, पौराश्च तपसःसुतम् । समं विज्ञापयामासुः, पुर्यां पादोऽवधार्यताम् ॥ ६९८ ॥ विन्यस्तस्वस्तिकां कामं, तोरणप्रवणापणाम् । गन्धाम्बुसिक्तसर्वाध्व-पुष्पप्रकरदन्तुराम् ॥ ६९९ ॥ सबन्धुर्बन्धुरश्रीका-मेकचक्रां युधिष्ठिरः । महाबलोपनीतेन, विमानेन ततोऽविशत् ॥ ७०० ॥ (युग्मम्) आगन्तूनामभिज्ञाभि-र्भीमः पौरपुरंध्रिभिः । बद्धानुरागमञ्जुल्या, सप्रमोदमदर्श्यत ॥ ७०१ ॥ असौ नगरजीवातु-

१ ' निहिता० ' प्रतित्रयपाठो न साधुः । २ विधेयः-अधीनः ।

बकासुर-वृत्तान्तः।

रसौ बकनिषूदनः। जगुरेवं पुरस्तस्य, बन्दिनो विरुदावलीम् ॥ ७०२ ॥ एकचक्रानरेन्द्रेण, विनयाऽऽनम्रमूर्तिना। निजं सौधमनीयन्त, तदानीं पाण्डुसूनवः ॥ ७०३ ॥ वासराणि व्यतिक्रम्य, पञ्चषाणि युधिष्ठिरः। पितृराज्याय सत्कृत्य, विससर्ज महाबलम् ॥ ७०४ ॥ परिचरितपदाब्जः[1] स्वैरसातत्यसेवा–वसरसरभसानां नागराणां गणेन। विपुलधृतिरनेकांस्तत्र मासान् किलैकं, दिवसमिव सबन्धुर्धर्मसूनुर्निनाय ॥ ७०५ ॥

इति मलधारिश्रीदेवप्रभसूरिविरचिते पाण्डवचरिते महाकाव्ये जतुगृहहिडम्ब–बकवधनिरूपणो नाम सप्तमः सर्गः ॥

अष्टमः सर्गः।

एकदा तु कृशां पश्य–न्नन्तर्मनसमायतिम्। एकान्ते मन्त्रयामास, बन्धुभिर्धर्मनन्दनः ॥ १ ॥ भीमोपज्ञबकध्वंस–कीर्तिकोलाहलोदयात्। अभूम भूमावेतस्या–मवश्यं विदिता वयम् ॥ २ ॥ इयं च संप्रति ख्यातिः, सर्वथाऽप्यहितैव नः। संनिपातज्वरार्तानां, हारेहूरेव[2] हारिणी ॥ ३ ॥ जीवतो जातु जानीया–दस्मान् दुर्योधनो यदि। राज्यश्रीदुर्मदः किंचि–द्दोजायेत ध्रुवं तदा ॥ ४ ॥ तदुपक्रम्यते गन्तु–मितो नचकमलक्षितैः। यः षाड्गुण्यप्रयोगेषु, कालज्ञः स हि सर्ववित् ॥ ५ ॥

१ सेवितचरणकमलः। २ हारहूरा–द्राक्षाविशेषः।

पाण्डवान
द्वैतवने
गमनम्॥

ओमिति प्रतिपेदानैः, समेतस्तैर्युधिष्ठिरः । सहैव कुन्ती-कृष्णाभ्यां, रजन्यामचलत्ततः ॥ ६ ॥ अरण्यपथपान्थानां, तेषामेको वृकोदरः । विभावर्यामवष्टम्भ-यष्टिरासीत् पदे पदे ॥ ७ ॥ स्कन्धं ममाधिरोहेति, प्रार्थनायां चकद्विपः । वमौ मुखेऽङ्गुलिक्षेपः, पुरो मातुः पुनः पुनः ॥ ८ ॥ वत्सला शुशुभे कुन्ती, प्रार्थनां तामकुर्वती । अर्थी पुनः पुनर्दैन्याद्, भीमस्तु शुशुभेतमाम् ॥ ९ ॥ नाध्यारोहदधिस्कन्धं, पुत्रक्लमभयात् पृथा । मातुस्तु पादचारेण, भीमस्याभूत्कृशं क्लमः ॥ १० ॥ तेषां भीमोऽभवद्दीपो, निशि मार्गप्रकाशकः । विद्याऽनवद्या तस्यापि, चाक्षुषी करदीपिका ॥ ११ ॥ स्कन्धारोहार्थनाभङ्ग-जागरूकरुपि प्रिये । कृष्णा चचाल पश्यन्ती, वलितग्रीवमग्रतः ॥ १२ ॥ अतिश्रमात् स्वयं भूत्वा, भर्तुः कण्ठावलम्बिनी । पतिप्रणयभङ्गस्य, प्रायश्चित्तं चकार सा ॥ १३ ॥ आलिङ्गनोपदादानात्, सा तूष्णीमेव तस्थुषी । आदेशातिक्रमक्रुद्ध-मनुनीतवती पतिम् ॥ १४ ॥ वक्षोवक्षोजकलशै-र्लसत्प्रेमरसोर्मिभिः । निषिच्य कृष्णया पत्यु-स्तापः सर्वोऽप्यपाकृतः ॥ १५ ॥ तस्या निषेधपारुष्य-मकुर्वाणो वृकोदरः । नितान्तमुदिताकार-श्चकार गरिमोचितम् ॥ १६ ॥ मारुतिर्मातरं स्कन्धे, बलादारोप्य दक्षिणे । प्रियामारोपयद्वामे, क्रमाभिज्ञा हि तादृशाः ॥ १७ ॥ तदा पत्तीयितं क्वापि, क्वापि तेषां सखीयितम् । सूपकारायितं क्वापि, क्वापि तेन रथायितम् ॥ १८ ॥ भीमसाहायकध्वस्त-समस्ताध्वपरिश्रमाः । अहर्दिवं वहन्तस्ते, दीर्घमध्वानमत्यगुः ॥ १९ ॥

क्रमेण रेणुदिग्धाङ्गा-स्ते मलीमसवाससः । ययुर्वैपुल्यनिर्लुप्त-द्वैतं द्वैतवनं वनम् ॥ २० ॥ कुत्रापि कुररी-कोक-कोकिला-कुलमञ्जुलम् । कुत्रापि वृक-शार्दूल-शृगाल-व्यालसंकुलम् ॥ २१ ॥ क्वचिच्चम्पक-पुंनाग-नाग-केसरभासुरम् । क्वचिज्जरत्त-

१ विस्तारेण नाशितः द्वैतभावो येन तत् ।

रुक्रीड-दूकघूत्कारदारुणम् ॥ २२ ॥ स्वाध्यायध्वनिवाचाल-तापसाश्रममेकतः । द्विप-द्वीपिवधक्रुद्ध-व्याधसंबाधमन्यतः ॥ २३ ॥ (चतुर्भिः कलापकम्) विदित्वाऽतिसुलभ्यानि, कन्द-मूल-फलान्यथ । विदधुर्वसतिं तत्र, कानने पाण्डुसूनवः ॥ २४ ॥ ते वन्येनापि वेषेण, वहन्ति स्म श्रियं पराम् । त्यजन्ति मणयस्तेज-स्त्रपुणोपहिता हि किम् ? ॥ २५ ॥ भीमो नव-नवैर्वन्यै-राहारैः सुमनोहरैः । लीलयैव समानीतैः, प्रीणयामास बान्धवान् ॥ २६ ॥ दुकूलकोमलैः स्नेहात्, सहदेवो दिवा-निशम् । वल्कलोपायनैर्नव्यै-रुपचक्रे कुटुम्बकम् ॥ २७ ॥ कृत्वा पेलाशैः पालाशै-रुटजं विकटाजिरम् । भक्तिं चक्रे कुटुम्बस्य, नकुलः स्वकुलोचिताम् ॥ २८ ॥ क्षुद्रोपद्रवकर्तॄणां, निधनाय धनंजयः । कुण्डलीकृतकोदण्ड-स्तस्थौ जाग्रदहर्निशम् ॥ २९ ॥ स्मरन्ती जिनपादानां, दीने दुःस्थे दयावती । शान्त्यै सुतानां धर्म्याणि, कुन्ती कर्माणि निर्ममे ॥ ३० ॥ परमेष्ठिस्मृतौ निष्ठां, आहितास्तनयास्तया । अनारतमजायन्त, तन्मयीकृतचेतसः ॥ ३१ ॥ व्यापिप्रिये तथा कृष्णा, सर्वेषु गृहकर्मसु । यथाऽतीव तदा तेषा-मेधिता गृहमेधिता ॥ ३२ ॥ प्रियामेकैकशस्तेऽपि, कुसुमाभरणैर्नवैः । प्रेम्णाऽलंचक्रिरे तत्र, वने सर्वर्तुशालिनि ॥ ३३ ॥ सर्वर्तुसंभवैः पुष्पैः, स्वयं कान्तैरलंकृता । विरेजे द्रौपदी साक्षा-दृतूनामिव देवता ॥ ३४ ॥ पुलिन्दप्राभृतैर्दब्धं, कुम्भिकुम्भोत्थमौक्तिकैः । हारं मनोहरं भीमः, प्रेयसीं पर्यधापयत् ॥ ३५ ॥ विनयात्तनयानां च, स्नुषायाश्चातिनिस्तुषात् । सस्मार राजसौख्यानां, नैव कुन्ती कदाचन ॥ ३६ ॥ द्रौपद्या च कलत्रेण, कुन्त्या मात्रा च पाण्डवाः । कृतार्थमानिनः प्रापुः, सुखं राज्यश्रियोऽधिकम् ॥ ३७ ॥ प्रेयोभिस्तैस्तथा श्वश्वा, मेने सानन्दमानसा । निजामप्रच्युतां

१ संबाधं-संकटम् । २ पर्णैः । ३ वृद्धिं गता ।

राज्य-संपदं द्रुपदात्मजा ॥ ३८ ॥ चक्रे धर्मसुतो बन्धु-सेवाहेवाकरञ्जितः । हस्तिनापुरसंवासात्, प्रवासमपि तं वरम् ॥ ३९ ॥ अजस्रसेवावसरं, प्राप्य पूज्ये सहोदरे । चत्वारोऽपि कनीयांसः, कृतार्थं जन्म मेनिरे ॥ ४० ॥

अन्यदाऽन्तस्तरुश्रेणि, दिशत्सु किशलश्रियम्[1] । रवेः करेषु भूपालः, प्रभातास्थानमभ्यगात्[2] ॥ ४१ ॥ वेद्यां वेत्रासनस्थस्य, भूपतेः पदपङ्कजम् । अङ्कमारोप्य भीमेऽथ, संवाहयति भक्तितः ॥ ४२ ॥ नृपान्तिकनिषण्णायाः, कुन्त्या वचनवीचिषु । अर्पितश्रोत्रपात्रायां, देव्यां द्रुपदजन्मनि ॥ ४३ ॥ सहदेवे महीभर्तु-रातपत्रविडम्बिनीम् । स्वपटीं विनयाधारे, धारयत्येकतः स्थिते ॥ ४४ ॥ नकुले चालयत्यारा-चामरोपममञ्चलम् । नृपस्येत्यनुजोपास्ति-राजिन्यां राज्यसंपदि ॥४५॥ वेत्रदण्डोपमं पाणौ, कोदण्डं धारयन् दृढम् । आयान्तं कथयामास, पान्थमेकं धनंजयः ॥ ४६ ॥ (पञ्चभिः कुलकम्)

व्यापार्याम्भोजसोदर्यौ, दृशं दूरे महीपतिः । उवाच रभसाद्वत्स !, किं नासौ स्यात् प्रियंवदः ? ॥ ४७॥ अथ कृष्णा विहस्याऽऽह, क नामात्र प्रियंवदः ?। सोऽप्यभाग्यः किमसद्वत् ?, किं वाऽस्माभिः करिष्यति ? ॥ ४८ ॥ ततो विलोकयामासु-स्ते सर्वे पुरतो दिशि । क्रमादभ्यर्णमायात-स्तैर्निश्चिक्ये प्रियंवदः ॥ ४९ ॥ प्रत्युद्यायाथ पार्थेन, प्रदत्ताद्भुतगौरवः । भूमिपीठलुठन्मौलिः, स ननाम युधिष्ठिरम् ॥ ५० ॥ निबिडोत्कण्ठमाश्लिष्टो, भुजाभ्यां पृथिवीभुजा । सहदेवार्पिते नीचै-रुपविष्टः स विष्टरे ॥ ५१ ॥ दृशा पीयूषवर्षिण्या, सिञ्चन् भूपस्तमभ्यधात् । कच्चित् कुशलिनो वत्स !, तातपादाब्जरेणवः ? ॥ ५२ ॥ कच्चित् कल्याणवान् कल्प[3]-वात्सल्यभरमेदुरः । विदुरो नित्यमस्मासु, क्षेमनिर्माणदीक्षितः ? ॥ ५३ ॥

(१ किशलशब्दोऽपि पल्लवार्थकः ।) २ प्रातःकालसभाम्, यदि वा कान्तियुक्तसभाम् । ३ कल्पं-प्रभूतम् ।

द्वैतवने प्रियंवदस्यागमनम् ॥

कच्चिदस्मत्प्रियः सौम्य !, क्षेमवान्नः पितामहः ? । द्रोणः कल्याणवान् कच्चि-द्गुरुः पूज्यतमोत्तमः ? ॥ ५४ ॥ धृतराष्ट्रः सुखी कच्चि-त्पिता नः पुत्रवत्सलः ? । कच्चिदस्माकमातॄणां, ज्यायसीनामनामयम् ? ॥ ५५ ॥ कच्चित् पूर्णाभिलापोऽभू-द्भ्रान्धवो नः सुयोधनः ? । तत्र प्रदीपनादूर्ध्वं, किं च किं च तदाऽभवत् ? ॥ ५६ ॥ कथं च वयमत्रस्था, विदांचक्रमहे त्वया ? । एतत्स्वरूपमस्माकं, प्रियंवद ! वदाद्भुतम् ॥ ५७ ॥

अथ प्रियंवदोऽवादी-द्देव दुःस्थेऽपि चेतसि । वर्तन्ते वपुषा तावत्, सर्वे कुशलशालिनः ॥ ५८ ॥ तस्मिन्नभ्रंलिहज्वाले, कराले जातवेदसि । दह्यन्ते पाण्डवा हा धि-गित्येवं पूत्कृतं जनैः ॥ ५९ ॥ लोकः शोकाकुलः कामं, तं कृशानुं कृशेतरम् । वेगाद्विध्यापयामास, वाष्पद्विगुणितैर्जलैः ॥ ६० ॥ प्रदीपनेन नानेन, मम किंचन दह्यते । इत्यौदासीन्यसुस्थोऽहं, न किंचिद्दुःखमस्पृशम् ॥ ६१ ॥ नेत्रयोः पात्रतां तत्र, भटित्रीभूतमूर्तयः । दोष्मन्तो युष्मदाकारा, नागरैर्निन्यिरे नराः ॥ ६२ ॥ असौ धर्मसुतो यस्य, मृतस्यापि मुखाम्बुजम् । दासीकरोति निजया, पार्वणेन्दुमपि श्रिया ॥ ६३ ॥ एष स्थूलवपुर्भीमो, भुजावानयमर्जुनः । वृहद्बन्धुसमीपस्थौ, मुग्धौ सौम्याविमौ यमौ ॥ ६४ ॥ इयं कुन्ती जगन्माता, न माता भुवनत्रये ; तुषाराद्रितुषारांशु-शुभ्रा यस्य गुणावली ॥ ६५ ॥ असौ द्राघीयसीं निद्रां, गता द्रुपदनन्दिनी । या श्रेयस्यपि पञ्चाना-मुच्यते स्म महासती ॥६६॥ इत्थं निश्चित्य निश्चित्य, देव ! युष्मांस्तथा जनैः । रुद्यते स्म यथा सर्वैं, रुदितं पादपैरपि ॥६७॥ (चतुर्भिः कलापकम्)॥ युष्मद्गुणानुरागेण, वीक्ष्य तान् क्रन्दतो भृशम् । आसीज्ज्ञातप्रबन्धस्य, विकल्पो मम चेतसि ॥ ६८ ॥

(१ भटित्रं-शूलपक्वमांसम्, अर्धदग्धमित्यर्थः ।)

क्वापि ते पुण्यनामानः, स्वैरं जग्मुः सुरङ्गया । हा ! दग्धाः पाण्डवा एते, मुधैव विलपन्त्यमी ॥ ६९ ॥

ततः कुतूहलाद्गत्वा, ते मया पञ्च वीक्षिताः । युष्मदत्यन्तमादृश्या–न्मूढोऽथाहमचिन्तयम् ॥ ७० ॥ धूमस्तोमेन नाद्राक्षुः, सुरङ्गाद्वारमाकुलाः । तेनाग्नेरिन्धनीभूताः, स्वामिनो मम पाण्डवाः ॥ ७१ ॥ यद्वा कान्तारदौरात्म्या–देतत्ते तेनिरे व्यापत्तिम्[1] । भवेद्धि तादृशी बुद्धि–र्यादृशी भवितव्यता ॥ ७२ ॥ इति प्रत्यक्षतो जात–युष्मद्व्यापत्तिनिश्चयः । तारपूत्कारपर्याप्त–रोदोरन्ध्रमरोदिषम्[2] ॥ ७३ ॥ अस्पृशं समतामन्यैः,शोकेनैवानुजीविभिः । भक्तिनिर्वहणे त्वस्मि–स्तेभ्योऽहमधमाधमः ॥ ७४ ॥ मन्वानास्तृणवत् प्राणान्, यत्ते त्वामन्वगुस्तदा । दर्शयाम्येष वो वक्त्र–महं तु प्रियजीवितः ॥ ७५ ॥

ततो गजपुरे गत्वा, वार्तया वः शुचा जनम् । एकं दुर्योधनं मुक्त्वा, स्वसधर्माणमादधाम् ॥ ७६ ॥ देवेन पाण्डुना छन्न–मार्येण विदुरेण च । पृष्टोऽहं कथ्यतां भद्र !, भद्रं मे तनुजन्मनाम् ॥ ७७ ॥ अचीकथं यथादृष्ट–मिष्टेतरदहं तयोः । तावप्यशृणुतां पश्चात्, पूर्वं मूर्च्छामगच्छताम् ॥ ७८ ॥ मयोपवीज्य चैतन्यं, लम्भितौ तौ विलेपतुः । हा ! वत्साः ! स्थ कथं दग्धा, दहनेन दुरात्मना ॥ ७९ ॥ कथं शिक्षाऽस्मदीयाऽपि, विस्मृता वः शुभोदया । यद्वा मतिर्विपर्येति[3], वेधसि प्रातिकूलिके ॥ ८० ॥ विदुषा विदुरेणाथ, पिता ते समबोध्यत । शोको निर्वार्यतामार्य !, मनो धैर्याय दीयताम् ॥ ८१ ॥ मन्ये किमधुना पूर्णाः, पिशुनानां मनोरथाः ? । किं वा प्रियंवदो भ्रान्तः, संशयोऽयं ममाशये ? ॥ ८२ ॥ दिनैः कतिपयैरेव, मर्ममाविर्भविष्यति । आपदः संपदो वाऽपि, न स्युश्छन्ना महात्मनाम् ॥ ८३ ॥ विदुरस्यानया वाचा, स्वल्पीचक्रे शुचं

१ व्यापत्तिः–मरणम् । २ रोदसी–द्यावापृथिव्यौ । ३ विपरीता भवति ।

पाण्डवानां कथितो वृत्तान्तः प्रियंवदेन॥

वहिः । बभार भूयसीं देव–स्तामन्तर्मनसं पुनः ॥८४॥ मातरः सत्यवत्याद्या, व्यपद्यन्त शुचाऽनया । न हि दावानलज्वालां, सहन्ते मालतीलताः ॥८५॥ विदुराश्वासनावाक्यै–र्महापद्वार्तया च वः । देवः पाण्डुरियत्काल–मासीज्जीवन्मृतोपमः ॥८६॥

कीर्तिर्वैकयथोद्भूता, स्वर्धुनीवाधुना तव । पावयन्ती भुवं देव !, हस्तिनापुरमभ्यगात् ॥ ८७ ॥ सख्यं मण्याः सुधायाश्च, सिताऽपि युगपत्तदा । अलम्भयदमित्राणां, मित्राणां च मुखानि सा ॥८८॥ तदानीं युष्मदीयैस्तैः, श्रुतैरपि यशोजलैः । देवस्तं निविडं पाण्डुः, शोकपङ्कमपाकरोत् ॥ ८९ ॥ स पाण्डुना परित्यक्तः, सर्वः सुखविपर्ययः । साभिमान इवोर्वीशं, दुर्योधनमशिश्रियत् ॥ ९० ॥ न प्रियाङ्के न पल्यङ्के, न वने भवने च न । न स्थले न जले क्वापि, रतिमालम्बते स्म सः ॥ ९१ ॥ अथाभ्येत्य तथाऽवस्थं, शकुनिस्तमभाषत । धराधव ! तव व्याधि–राधिर्वा कोऽयमुत्कटः ? ॥ ९२ ॥ येन दावानलज्वाला–दग्धस्थाणूपमं वपुः । वहसे सहसाऽस्माकं, ब्रूहि दंदह्यते मनः ॥ ९३ ॥ अथाभ्यधत्त गान्धारी–तनयो दुर्नयैकभूः । मर्वंसहः सहायोऽसि, त्वं मातुल ! ममातुलः ॥ ९४ ॥ पश्य मां विफलारम्भं, कृत्वा जीवन्ति पाण्डवाः । विरोधिनि विधौ पुंसां, वृथैव स्युर्मनोरथाः ॥ ९५ ॥ विषं पीयूषगण्डूषः, पश्य तेषामजायत । जातुषागारदाहोऽपि, पयोवाहजलप्लुतः ॥ ९६ ॥ हिडम्ब–बक–किर्मीर–वधाडम्बरडिण्डिमैः । भुर्भुवःस्वस्त्रयीरङ्गे, तेषां कीर्तिः प्रनृत्यति ॥ ९७ ॥ आजन्म विद्विषो ये ते, जीवन्तीत्यपि दुःसहम् । किं पुनर्जनितानन्दा, नन्दन्ति प्रतिपत्तनम् ॥ ९८ ॥ धुर्यो मर्माविधामेष, व्याधिर्मां बाधतेऽधिकम् । तदेतस्यागदंकारः, संप्रत्यप्रतिमो भव ॥ ९९ ॥

१ अम्रियन्त । २ गङ्गा ।

इत्युदीर्णमनःखेद–माकलय्य सुयोधनम् । सदा दुर्नयदुर्गन्धो, गान्धारीवान्धवोऽभ्यधात् ॥ १०० ॥ त्वयि देवेन्द्र-शौण्डीर्या–वमन्तरि निहन्तरि । यमगेहाङ्गणारब्ध–ताण्डवान् विद्धि पाण्डवान् ॥ १०१ ॥ पाण्डवाः क ? भवान् भूमी-मण्डलाखण्डलः क च? । कः साम्यं बहु मन्येत, खद्योतद्युतिमालिनोः ? ॥१०२॥ यदूर्जितभुजेनेदं, त्वया साम्राज्यमर्जितम् । शतांशेनापि तन्नासी–द्युधिष्ठिरमहीपतेः ॥ १०३ ॥ सावलेपास्तपःसूनो–राज्ञां ये नानुमेनिरे । तेऽपि भूपतयो जाता–स्त-वादेशवशंवदाः ॥ १०४ ॥ सन्त्येते हस्तिमल्लस्य, प्रतिमल्ला इव द्विपाः । एते च देवदेवाश्च–वान्धवाः सैन्धवाः पुरः ॥ १०५ ॥ साम्परायिकसंचार–कृतार्थरथिनो रथाः । पत्तयश्चाप्युपानीत–वैरिव्रातविपत्तयः ॥ १०६ ॥ चमूरमूदृशी विश्वे, त्वदृते कस्य दृश्यते ? । तमोपहा रवेरेव, केवलं किरणावलिः ॥ १०७ ॥ श्रीरियं ते कृतार्थीस्यात्, पश्येयुर्यदि पाण्डवाः । दृष्टा मित्रै-रमित्रैश्च, संपत्संपन्निगद्यते ॥ १०८ ॥ गोकुलालोकनव्याजा–द्व्रज द्वैतवनं वनम् । ततस्तत्र दशां शोच्या–मुपेतान् पश्य पाण्डवान् ॥ १०९ ॥ राजा राज्यच्युतान् भोगी, भोगैः काममपाकृतान् । ससैन्यो निष्परीवारा–नकृशोऽतिकृशाङ्गकान् ॥ ११० ॥ यदा वीक्षिष्यसे तांस्ते, तदा मोदिष्यते मनः । अन्याश्रित्रातपापाये, स्युर्धान्यस्य मुखे श्रियः ॥ १११ ॥ तेऽपि त्वामद्भुतश्रीकं, दृष्ट्वा म्लास्यन्ति निश्चितम् । व्यथन्ते पार्वणे चन्द्रे, दृष्टे दन्ता हि दन्तिनाम् ॥ ११२ ॥ यद्वीक्ष्यते विपक्षाणां, मानिभिः श्रीर्विपद्गतैः । स एव मृत्युरेतेषां, मृत्युस्तु ननु जीवितम् ॥ ११३ ॥ अथ सत्यव्रतं बन्धो–रनपेक्ष्य शुभैस्तव । साम-र्पाचायुधं धत्तः, करे भीमार्जुनौ यदि ॥ ११४ ॥ ततो जानीहि संजातं, भूमण्डलमपाण्डवम् । महार्णवमिवानीकं, तव को

१ 'मुखश्रियः' प्रतिद्वय० ।

पाण्डवानां कथितो वृत्तान्तः प्रियंवदेन॥

हि स्खलिष्यति ? ॥ ११५ ॥ तदिमं शकुनेर्मन्त्रं, कर्ण-दुःशासनावपि । ज्ञंमन्यावनुमेनाते, दुष्टात्मानो ह्यमी त्रयः ॥ ११६ ॥ ततोऽस्माच्छकुनेर्मन्त्रा-दुष्टाशयतया तया । युष्मदन्तिकमागन्ता, कदाचन सुयोधनः ॥ ११७ ॥

एवं विभाव्य मनसा, सावधानतया भृशम् । युष्माभिः स्थेयमित्येत-दुक्तं विदुरवाचिकम् ॥ ११८ ॥ विदुरेणेदमाख्याय, यदाऽहं प्रहितः पुरा । इदं मया तदा पृष्टं, कुत्र ते सन्ति पाण्डवाः ? ॥ ११९ ॥ विदुरेण समादिष्टं, पूर्वेऽह्नि नृपसंसदि । आयातैरेकचक्रात-श्चरैरावेदितं ह्यदः ॥ १२० ॥ एकचक्रास्थितैर्देव !, शुश्रुवेऽस्माभिरीदृशम् । पुरस्य निखिलस्यास्य, दत्ताः प्राणाः पृथात्मजैः ॥ १२१ ॥ चिरं नन्दन्तु भूयोऽपि, राज्यं कुर्वन्तु पाण्डवाः । सूर्याचन्द्रमसौ यावजीवन्त्वास्माकजीवितैः ॥ १२२ ॥ धन्या कुन्त्येव यत्कुक्षि-सरसीसरसीरुहैः । एभिः कृपाजपारामै-रामोदितमिदं जगत् ॥ १२३ ॥ पुरीप्राणहरः सोऽयं, पापपङ्कचको बकः । अपरेणान्तरेणामून्, किं प्रसह्य निगृह्यते ? ॥ १२४ ॥ प्रतिपन्थी यथाऽस्माक-ममीभिर्लम्भितः क्षयम् । तथैषामस्मदाशीर्भि-र्विपक्षः क्षीयतां क्षणात् ॥ १२५ ॥ अहो ! अमीषां माहात्म्यं, वसेयुर्यत्र पत्तने । ईतिर्न तत्र नानीति-र्न व्याधिर्न च विप्लवः ॥ १२६ ॥ न मारिर्न च दुर्भिक्षं, न च भीः परचक्रजा । केवलं सुखसंपद्भि-र्मोदन्ते सप्रजाः प्रजाः ॥ १२७ ॥ (युग्मम्) चरेयुर्यदि कान्तारे, प्रच्छन्ना अपि ते क्वचित् । तत्रापि पादपाः सत्यं, नित्यपुष्पफलर्द्धयः ॥ १२८ ॥ अन्योन्यं कलहायन्ते, न शाश्वतिकवैरिणः । दधते रससौन्दर्य-मन्यद्वन्यफलान्यपि ॥ १२९ ॥ अथ पृष्टो जनोऽस्माभिः, क्व ते संप्रति पाण्डवाः ? । तेनाप्याख्यायि ते भद्रा !, ययुर्द्वैतवनेऽधुना ॥ १३० ॥

---

१ पण्डितमानिनौ । २ दुर्योधनसभायाम् ।

अथागमाम तैश्चिह्नै–र्यत्रं ते सन्ति पाण्डवाः । पुलिन्दवृन्दमध्यस्थां–स्तांश्चापश्याम निश्चलाः ॥ १३१ ॥ सहकारतरोर्मूले, वन्यमासनमुत्तमम् । श्रातस्तदा विमुक्ताधि–व्याधिस्तस्थौ युधिष्ठिरः ॥ १३२ ॥ न केवलं विनीतास्त–मुपासांचक्रिरेऽनुजाः । दूरं मुक्तान्यकर्तव्या, आरण्याः पशवोऽपि च ॥ १३३ ॥ पाण्डवेयसभाबन्धो–रुटजद्वारवर्तिनः । परावर्तत न च्छाया, तस्य माकन्दभूरुहः ॥ १३४ ॥ तेषामद्भुतलक्षाणि, स्वयं साक्षात्कृतान्यपि । अपि जिह्वासहस्रेण, को वर्णयितुमीश्वरः ? ॥ १३५ ॥

श्रुत्वेति पाण्डवोदन्तं, तदा जज्ञे सुयोधनः । मषीभिः स्नपितः किं नु ?, नीलिभिः किं नु रञ्जितः ? ॥ १३६ ॥ स विषण्णस्तदास्थानं, विससर्ज चरैः सह । पुंसामुदित्वरे दुःखे, न किंचिदपि रोचते ॥ १३७ ॥ ततस्त्वमपि चारोक्त–स्तत्र तैस्तैः प्रियंवद ! । लक्षणैर्लक्षयेर्मङ्क्षु, पाण्डवानां निवेशनम् ॥ १३८ ॥ आदिश्य विदुरेणैवं, प्रहितोऽहं हिताय वः । एकचक्रां पुरीं पश्यन् , क्रमेणात्र ममागमम् ॥ १३९ ॥ नकुलं दन्दशूकेन, हरिणं हरिणारिणा । सह क्रीडन्तमालोक्य, विज्ञासिषमिहास्मि[3] वः ॥ १४० ॥

इत्युक्तवन्तमत्यन्त–प्रीतस्तं पवनात्मजः । पप्रच्छ वर्तते राष्ट्रे, धार्तराष्ट्रः कथं कथम् ? ॥ १४१ ॥ स किं शास्त्यधुना धात्री–मनयेन नयेन वा ? । स्नेहात्तमनुरुध्यन्ते, भीष्म-द्रोणादयोऽपि किम् ? ॥ १४२ ॥ इति पृष्टो यथा-दृष्टं, समाचष्ट प्रियंवदः । कुरुष्वीतिरनीतिश्च, नैति राज्ञि सुयोधने ॥ १४३ ॥ पितरीवानिवात्सल्यात्, प्रजाऽभ्युदयतत्परे । संपद्भिः कुरवस्तस्मिन्, प्रशासति चकासति ॥ १४४ ॥ पुरुषार्थाः किलैकत्र, निवासस्पृहयालवः । नवे तत्र धरि-

पाण्डवानां कथितो वृत्तान्तः प्रियंवदेन॥

१ अगच्छाम । २ ' स्तत्र ते यत्र पाण्डवाः इति प्रतित्रय० । ३ 'अस्मि' इत्यव्ययमहमर्थे । ४ 'कुरूनीतिरनी०' प्रतिद्वय० ।

श्रीशे, न बाधन्ते परस्परम् ॥१४५॥ स प्रज्ञामृतकुल्याभिः, सेचंसेचमनारतम् । अनपायमुपायद्रू–नादत्ते फलमुत्तमम् ॥१४६॥ आकर्णितभवन्मृत्यु–निराशीभूतमानसाः । भीष्माद्याश्चक्रिरे तेन, सर्वथाऽऽत्मवशंवदाः ॥ १४७ ॥ संप्रत्यावर्जितास्तेन, दानेन विनयेन च । प्राणैरपि समीहन्ते, ते विधातुं तदीप्सितम् ॥ १४८ ॥ आत्मानं मन्यते क्षोणि–पट्खण्डाखण्डलोपमम् । स यद्यपि तथाप्यन्त–र्भयज्ञो वहते भियम् ॥१४९॥ अर्जुनात्तरुनाम्नोऽपि, स स्मृतार्जुनविक्रमः । भीतो मुञ्चति निःश्वासान्, कम्पते च मुहुर्मुहुः ॥ १५० वने वृकोदरं क्वापि, दृष्ट्वा स्मृत्वा वृकोदरम् । मृगव्यव्यापृतोऽप्याशु, स खिद्यति भयातुरः ॥ १५१ ॥ स्वप्ने भीमा–र्जुनौ वीक्ष्य, द्रुतं जागरितो भयात् । स क्षोभं लम्भयत्येव, भृशं भानुमतीमपि ॥ १५२ ॥

इत्याकर्ण्य तपःसूनुः, प्रत्युवाच प्रियंवदम् । मद्गिरा भद्र ! विज्ञाप्यौ, तौ तात–विदुरौ त्वया ॥ १५३ ॥ निखिलं युष्मदादिष्टं, प्रहृष्टाः प्रतिशुश्रुमः । नमस्यामश्च भक्त्या वः, क्षोणीमिलितमौलयः ॥ १५४ ॥ स्नेहादापदमस्मासु, नैवाशङ्कितुमर्हथ । युष्मदाशीर्भिरस्माकं, रिपुर्न प्रभविष्यति ॥ १५५ ॥ कृकलासः कृतोल्लास–मारूढः शिखरं वृतेः । व्युत्पश्यन् सतिरस्कारं, भास्करस्य करोति किम् ? ॥ १५६ ॥ इति धर्मसुतः प्रीतः, समर्प्य प्रतिवाचिकम् । सत्कृत्य वन्यसत्कारै–र्विससर्ज प्रियंवदम् ॥ १५७ ॥

धार्ष्ट्यं तद् धार्तराष्ट्रस्य, श्रुत्वा श्रवणदुःसहम् । विहाय स्त्रैणमर्यादां, जगाद द्रुपदात्मजा ॥ १५८ ॥ छद्मना मेदिनीं जित्वा, कृत्वा मे केशकर्षणम् । दत्त्वा कान्तारवासं च, रिपुर्नाद्यापि तृप्यति ॥ १५९ ॥ एवं वनेचरानस्मान्, येनागत्य जिघांसति । निर्मर्यादा हकृत्येषु, मत्सरच्छुरिताशयाः ॥ १६० ॥ देवि ! वन्ध्येव कुन्ति ! त्वं, नाऽऽसीरप्रसवा

किमु ? । पुत्रिणीनां अपाकारि, कथं क्लीवप्रसूरभूः ? ॥१६१॥ अहो ! सुबाहवः पाण्डोः, सूनवोऽभिनवौजसः । पुरतः पश्यतां येषां, प्रिया केशेषु कृष्यते ॥ १६२ ॥ आर्यपुत्र ! तपःसूनुः, सत्यमेव त्वमुच्यसे । रिपोः परिभवेऽप्येवं, क्षमा ते कथमन्यथा ? ॥ १६३ ॥ निकारं कुरुवंशोऽपि, संसहेत यदीदृशम् । तर्हि सा नाम निर्नाम, निर्ममज्ज मनस्विता ॥१६४॥

यदि नाम वनक्लेशो, लेशतोऽप्यस्ति नात्मनः । किं दुनोति न ते चेतो, वन्धुदत्तापदप्यसौ ?॥ १६५ ॥ सूक्ष्मक्षौमोचिता येऽमी, वन्धवस्तव भूधव ! । वल्कलानि वसानांस्तान्, किमु पश्यन्न लज्जसे ? ॥१६६॥ भ्रातरः सिन्धुरारोह–केलिदुर्ललिता हि ये । चरन्तः पादचारेण, त्वां व्यथन्ते न ते किमु ? ॥ १६७ ॥ वनेऽस्मिन् क्लिश्यते स्नेह–मोहिता वो हिताय या । सोऽपि न किं कुन्ती, तवोद्बोधयति क्रुधम् ? ॥१६८॥ निश्चिन्तोऽसि किमेवं त्व–मसावभ्येति ते रिपुः । उत्तिष्ठस्व ततः स्वामि–न्विधेहि दृशमायुधे ॥१६९॥ प्रतिज्ञाभङ्गभीतोऽथ, न त्वमुत्सहसे स्वयम् । इहायातमरिं हन्तुं, भीम–पार्थौ तदादिश ॥१७०॥

अथैनां द्रौपदीवाच–मिष्टामनुवदंस्तदा । भीमोऽभ्यधत्त देवास्ति, तवाज्ञैव ममार्गला ॥ १७१ ॥ तवादेशं वहन्मूर्ध्नि, पुराऽहं नाहनं रिपुम् । तं जिघांसुमिहाऽऽयातं, न सहिष्येऽधुना पुनः ॥ १७२ ॥ देव ! प्रसादितोऽसि त्व–मागतश्चेत्स दुर्मतिः । तदा मम गुरुर्न त्वं, न विधेयोऽप्यहं तव ॥ १७३ ॥ हस्तिनापुरसाम्राज्य–गर्वपर्वतमस्तकात् । लीलयैव पराजित्य, पातयिष्यामि विद्विषम् ॥ १७४ ॥ अथास्या भीमभारत्या–स्तदा वाचः किरीटिनः । विघूर्णयत्यस्तमेवार्थं, भाष्यलीलायितं दधुः ॥ १७५ ॥

१ क्रियाविशेषणमेवत् प्रसूधातोः । २ तिरस्कारम् । ३ 'दत्तापदो' 'दत्तपदो' इति प्रत्यन्तरपाठः । ४ अधीनः ।

प्रियंवद-विसर्जनम् । द्रौपद्यादीनां क्रोधोद्गाराः ॥

एताम्तेषां गिरः श्रुत्वा, वाग्मूने युधिष्ठिरः । अभ्यधीयत पुण्याभिः, क्षत्रवंशोचितं वचः ॥ १७६ ॥ परं ममानुरोधेन, हायनानि कियन्त्यपि । यदुधाऽपि विराध्यन्तं, विपक्षं क्षन्तुमर्हथ ॥ १७७ ॥ वनवासावधौ पूर्णे, तीर्णे सत्यव्रते मया । को युष्मानभ्यमित्रीणान्, स्खलिष्यत्यर्णवानिव ? ॥ १७८ ॥ तदा भीमाद्रणे भीमा-दुःशासनसमन्वितः । लब्धा दुर्योधनः कृष्णा-केशाकर्षणनिष्क्रियम् ॥ १७९ ॥ तद्दिदानीमितो गत्वा, सेव्यन्तां स्वैःसनाभयः । उल्लसत्कमलीगन्धा, गन्धमादनभूमयः ॥ १८० ॥ निजश्रीगर्वितोऽराति-र्न दृश्येत तथा सति । वनवासकृशांस्तेन, दृश्येमहि वयं न च ॥ १८१ ॥ प्रत्यपद्यन्त भीमाद्या-स्तामाज्ञामग्रजन्मनः । अप्युल्लुण्ठधियां पुंसां, गुर्वादेशो नवाङ्कुशः ॥ १८२ ॥

मातृ-भ्रातृ-प्रियोपेतः, प्रतस्थेऽथ महीपतिः । उदात्तः सह यूथेन, यूथाधिप इव द्विपः ॥ १८३ ॥ वरिवस्यन् स तीर्थानि, नमस्यंश्चारणान् मुनीन् । नाना चित्राणि पश्यंश्च, ययौ पूर्वोत्तरां दिशम् ॥ १८४ ॥ क्रमात्तुषमतिक्रम्य, तटिनीशैलसंकटाम् । भूधरं स ययौ सार्धं, बन्धुभिर्गन्धमादनम् ॥ १८५ ॥ नक्तमिन्दूपलोद्वान्तै-र्वारिभिर्यत्र पूरिताः । प्रावृषेण्यां तरङ्गिण्यः, शश्वदश्नुवते श्रियम् ॥ १८६ ॥ श्रियैरुपासितोपान्ता, यस्मिन्नादेशवर्तिभिः । विलासान् दधते तांस्ता-नीप्सितान्प्सरोगणाः ॥ १८७ ॥ तस्मिन् स्वादुफलश्लाघ्ये, भूरिनिर्झरशालिनि । यबन्धुर्वसतिप्रीतिं, पाण्डवेया निराधयः ॥१८८॥ सर्वर्तुकमनीयानां, वनानां रामणीयकम् । तेषां विस्मृतिमानिन्ये, तत्र शत्रुपराभवम् ॥ १८९ ॥ कुन्ती क्रियासु धर्म्यासु, तत्र व्यापृतमानसा । हस्तिनापुरराज्यस्य, न सस्मार मनागपि ॥ १९० ॥

१ स्वर्गतुल्याः । २ सेव्यमानः । ३ 'अभयः' प्रतित्रय० ।

विदित्वाऽथ समीपस्थ-मिन्द्रकीलं नगोत्तमम् । सव्यसाची महीभर्तुर्दर्शयामास विस्मितः ॥ १९१ ॥ देव ! यन्नित-रामिन्द्रः, क्रीडत्यत्र शचीसखः । इन्द्रकील इति ख्यातिं, ततः प्रापदसौ गिरिः ॥ १९२ ॥ खेचरैर्व्योमगैरेव, खिन्नैश्छाया महीरुहाम् । अत्राधोगामितिग्मांशौ, सेव्यन्ते सान्द्रशीतलाः ॥ १९३ ॥ वीक्ष्य स्वप्रतिमामन्य-स्त्रीशङ्काकुपिताः प्रिये । सुरीः प्रसादयत्यब्ज-वायुर्यत्राम्बुकेलिषु ॥ १९४ ॥ असाधु-साधुपुत्राभ्यां, पितेवासौ दिवानिशम् । सूर्यकान्ते-न्दुकान्ताभ्यां, तापं शैत्यं च लम्भ्यते ॥ १९५ ॥ मध्येमणितटीक्रोडं, परिभ्राम्यन्नभोमणिः । नित्यं कन्दलयत्यस्मिन्, किंनरीणां मणिभ्रमम् ॥ १९६ ॥ तदस्मिन् युष्मदादेशा-दुपेत्य गुरुगह्वरे । आराधितचरीर्विद्याः, पुनरावर्तयाम्यहम् ॥ १९७ ॥ इत्यापृच्छ्य नृपं कुन्तीं, प्रणम्य विनयानतः । याज्ञसेनीं च संभाष्य, ययौ तस्मिन् धनंजयः ॥ १९८ ॥ गच्छतोऽस्य तपःसूनु-रङ्गुली-यकमङ्गुलौ । तातख्यापितमाहात्म्यं, बलादेन न्यवेशयत् ॥ १९९ ॥

जिष्णुर्मणिमयं तस्मि-न्नर्हत्प्रासादमुत्तमम् । अद्राक्षीत्तर्कयन्नन्यं, भूधरोपरि भूधरम् ॥ २०० ॥ शशाङ्कोपलसोपानां, विकचोत्पलशालिनीम् । उत्कल्लोलजलां वापीं, सोऽपश्यत्तस्य वामतः ॥ २०१ ॥ तस्यां स्नात्वा गृहीत्वा च, विकचाम्भो-जसंचयम् । अर्चामानर्च तस्यान्त-र्गत्वाऽऽद्यस्य जिनेशितुः ॥ २०२ ॥ स्तुत्वा स्तोत्रैर्जिनं जिष्णुः, कृतवानष्टमं तपः । तपो हि निहितं तीर्थे, भवेदिष्टार्थसिद्धये ॥ २०३ ॥ जिनवेश्मान्तिकेऽध्यास्य, पावनीमवनीं क्वचित् । स परावर्तयामास, विद्योपनिषदं निजाम् ॥ २०४ ॥ प्रादुर्बभूवुर्भूयोऽपि, पुरतस्तस्य देवताः । किं कुर्म इत्यजल्पंश्च, को न भक्तेर्वशंवदः ?

१ सूर्यः । २ आराधितप्रायाः ।

पाण्डवाना गन्ध-मादन-पर्वते गमनम् ॥

॥ २०५ ॥ स्मृताभिः संनिधातव्यं, भवतीभिर्द्रुतं मम । आहूतो वः स्मरिष्यामि, मन्थने परिपन्थिनाम् ॥ २०६ ॥ इति विज्ञाप्य सत्कृत्य, सर्वा विद्याधिदेवताः । उपकारोत्सुकाः कामं, विससर्ज धनंजयः ॥ २०७ ॥ (युग्मम्)

गतासु तासु पार्थोऽपि, शैललक्ष्मीदिदृक्षया । नन्दनोद्यानसध्रीचि, विजहार वने वने ॥ २०८ ॥ बाणभिन्नवपुः कश्चि- द्धर्मसैरिभसंनिभः । निःशूकः शूकरस्तेन, दृष्टः संमुखमापतन् ॥ २०९ ॥ क्रुधाऽसौ ध्रुवमभ्येति, नृशंसो मज्जिघांसया । एवं विमृश्य सोऽधिज्यं, धनुष्मान् धनुरादधे ॥ २१० ॥ पार्थेन पोत्रिणः[3] प्राण-मार्गणोऽक्षेपि मार्गणः । दत्त्वा प्राणांस्तिरश्चापि, तेन सोऽथ कृतार्थितः ॥ २११ ॥ आगतः शूकराभ्यर्णे, बाणग्रहणहेतवे । आयान्तं रौद्रमद्राक्षीत्, किरातं कंचिदर्जुनः ॥ २१२ ॥ सगुणं धारयन् धन्व, यमभ्रूभङ्गभङ्गुरम् । शरांश्च पंचपान् पाणौ, सोऽप्युपक्रोडमाययौ ॥ २१३ ॥ पार्थोऽथ पश्यतस्तस्य, स्वर्णपुङ्खमनोरमम् । आददानो निजं बाणं, बभाषे तेन सौष्ठवात् ॥ २१४ ॥ सौम्य ! वीक्षे तवाचार-माकार- व्यभिचारिणम् । कान्यथा पुण्यमूर्तिस्त्वं ?, क्व च स्तैन्यममूदृशाम् ? ॥२१५॥ वरं तृणमिव प्राणां-स्त्यजन्त्युज्ज्वलबुद्धयः । न पुनर्जातु कर्मेद-गाद्रियन्ते मलीमसम् ॥ २१६ ॥ सदाचारसमीचीना, भिक्षा माधुकरी वरम् । अतिचार्योऽप्यनाचार- दूताहूता न तु श्रियः ॥ २१७ ॥ तन्मामकीनमारण्य-पशुशोणितपायिनम् । विषदिग्धशिखं नैनं, विशिखं हर्तुमर्हसि ॥२१८॥ मयाऽसौ कुरुचन्द्रस्य, तव द्रोहसमीहया । वराहराहुरागच्छन्, बुधेनेव निवारितः ॥ २१९ ॥ ततः स्वच्छन्दमाच्छिन्दन्, बाणरत्नमिदं मम । हन्त प्रत्युपकारार्थ-मित्थं प्रक्रमसे किमु ? ॥ २२० ॥ रिपुव्यापादनपण-क्रीतं मित्रं भविष्यसि । इत्याशा

१ शत्रूणाम् । २ यमराजमहिषतुल्यः । ३ शूकरस्य । ४ 'मार्गणोत्क्षेपि०' प्रतित्रयपाठो न सम्यगाभाति । ५ अतिसुन्दराः ।

मम दूरेऽस्तु, प्रत्यर्थी प्रत्युताभवः ॥ २२१ ॥ अमुना संचरन्ते चे-द्वर्त्मना त्वादृशा अपि । पथिकस्तत् पथि न्याय्ये, को
नाम भविता ? वद ॥ २२२ ॥ अथासि त्वममुं दिव्यं, पृषत्कमभिलाषुकः । त्वन्मैत्रीसुखसाकाङ्क्षं, तत्किं प्रार्थयसे न माम् ?
॥ २२३ ॥ अर्थिनां प्रार्थनाभङ्गं, विधातुं नास्मि शिक्षितः । पुण्यप्रागल्भ्यलभ्यो हि, त्वादृशः प्रणयी जनः ॥ २२४ ॥ यस्ते
मुक्तापरापेक्ष-मिषोरेष हठग्रहः[3] । न ते स मामनिर्जित्य, निर्वाहमवगाहते ॥ २२५ ॥

इति व्याहृत्य विरतं, तं बीभत्सुरभाषत । उदीरितमिदं सर्व-मसत्यं सत्यवत्त्वया ॥ २२६ ॥ स्वबाणग्रहणे केय-मुपाल-
म्भपरम्परा ? । लुम्पन्ति हन्त मर्यादां, दुर्जनाः सुजनेष्वपि ॥ २२७ ॥ दुर्जनः कालकूटश्च, ज्ञातमेतौ सहोदरौ । अग्रजन्मा-
ऽनुजन्मा वा, न विद्मः कतरोऽनयोः ॥ २२८ ॥ मां चौरंकारमाक्रोशन्, क्रूरचेता मुहुर्मुहुः । भवितासि कथं मित्र-ममित्रः
प्रकटोऽस्मि यः ॥ २२९ ॥ का नाम पामरेणास्तु, संगतिर्मतिशालिनः ? । तमस्काण्डेन चण्डांशोः, सौहार्दं हन्त कीदृशम् ?
॥ २३० ॥ कलयामि न कालुष्यं, दुर्वाक्यैरिभकैस्तव । किमारवैः शृगालाना-मिभारिः क्षुभ्यति क्वचित् ॥ २३१ ॥ एनमह्नाय
गृह्णामि, पश्यतस्ते निजं शरम् । अस्ति दोर्दण्डयोः शक्ति-र्यस्यासौ मां निषेधतु ॥ २३२ ॥ न नरेन्द्रो न देवेन्द्रः, खेचरे-
न्द्रोऽपि नो पुरः । त्वय्यप्यधिज्यतां बिभ्र-त्रपते हन्त मे धनुः ॥ २३३ ॥

अथाऽऽह शबरस्वामी, सौम्य! मिथ्या प्रगल्भसे । फणिनः किं फणाटोपः, कुर्यात् खगपतेः पुरः ? ॥२३४॥ तत्तिष्ठ सौष्ठ-

---

१ शरम् । २ अन्यापेक्षारहितं यथा स्यात्तथा । ३ 'स्वयंमहः' प्रत्यन्तर० । ४ इति ज्ञातं मया इत्यर्थः कर्तव्यः, अन्यथा
'ज्ञातावेतौ' इति पाठः स्यात् । ५ सिंहः । ६ गरुडस्य ।

अर्जुनकृत
शूकरवधः
तद्विषयः
शबरा-
र्जुनयोः
संवादः ॥

वमिदं, मा त्याक्षीर्मयि योद्धरि। इति जल्पन्ननल्पौजाः, संदधे शवरः शरम् ॥ २३५ ॥ वलितं फाल्गुनोऽप्यस्य, पश्यन् बाणागमे शनैः। रोपंमारोपयांचक्रे, किरिशोणितशोणितम् ॥ २३६ ॥ अखर्वमौर्वीटंकारः, साहंकारस्तयोस्ततः। विडम्बित-युगावर्तः, प्रावर्तत रणो महान् ॥२३७॥ निषादि-सादिभीमेन, निःसीमेन समेयुपा। तदा गजाश्ववृन्देन, पुलिन्दः पर्यवार्यत ॥२३८॥ यावत् प्रतिभटं बाणान्, मुञ्चता सव्यसाचिना। तस्य क्षणादनीकस्य, दिदिशे कान्दिशीकता ॥२३९॥ पार्थ-बाणाङ्किताः सैन्या, व्यावर्तन्ते स्म ते यदा। तदाऽसौ दर्शयामास, युद्धकौशलमात्मनः ॥ २४० ॥ तदानीं द्रष्टुकामानां, विमानैर्व्योमचारिणाम्। व्योमाभोगतडागोऽभूत्, संकुलः कमलैरिव ॥२४१॥ वारंवारमजायन्त, तेनार्धपथखण्डिताः। पत्रिणः श्वेतवाहस्य, निःस्वस्येव मनोरथाः ॥ २४२ ॥ अस्मार्षीदस्त्रमाग्नेय-मर्जुनः स्फूर्जदूर्जितम्। दावानलमयो येन, सर्वतोऽजनि पर्वतः ॥२४३॥ अस्त्रमाह्वत् किरातोऽपि, वारुणं तन्निवारणम्। प्रावृषेव जलासारै-र्येनाद्रिर्निरवाप्यत ॥ २४४ ॥ शस्त्रैरस्त्रैश्च दुर्वारं-मवधार्य तमर्जुनः। धनुर्विहाय बाहुभ्यां, योद्धुं क्रुद्धः प्रचक्रमे ॥ २४५ ॥ विमुच्य चापमुत्तालः, पुलिन्दोऽपि कला-निधिः। निर्युद्धमुद्धतारम्भ-मारेभे कपिकेतुना ॥ २४६ ॥ मदोत्कटभुजास्फोट-रवसंस्तवपीवरैः। अत्रुटन्नद्रिकूटानि, तयोश्च रणदर्दुरैः ॥ २४७ ॥ दन्तघातानिव तदा, ददतौ तलहस्तकान्। कुञ्जराविव रेजाते, तौ किरात-किरीटिनौ ॥ २४८ ॥ पूर्वकायोन्नतैर्मल्ल-युद्धमत्युद्धतं तयोः। आसनोत्थायमालोकि, गणैर्दिविपदां दिवि ॥२४९॥ अथावसरमासाद्य, तमुपादाय पादयोः। मूर्धानं परितः पार्थो, भ्रमयामास लीलया ॥२५०॥ शिलायां यावदेकस्या-मास्फालयति फाल्गुनः।

१ शरम। २ अर्जुनस्य। ३ बाहुयुद्धम्। ४ संस्तवः—परिचयः। ५ रणमेधैः।

तमेव तावद्द्राक्षी-द्दिव्याकारधरं पुरः ॥ २५१ ॥ इन्द्रजालमिदं किंस्वि-दिति विस्मितमानसम् । किरीटिनमभाषिष्ट, सोऽतिहृष्टः कृताञ्जलिः ॥२५२॥ तव शौर्यपरीक्षार्थं, मया मायेयमाहिता । वरं वृणीष्व तुष्टोऽह-ममुना विक्रमेण ते ॥२५३॥ प्रसाध्य विद्याः प्रज्ञप्ति-प्रमुखाः प्राप्तवैभवम् । अवैहि मां विशालाक्ष-तनयं चन्द्रशेखरम् ॥ २५४ ॥ सापदः सुहृदः कार्ये, त्वदन्तिकमुपागमम् । तप्तस्य विष्टपस्यार्थे, क्षीरोदमिव वारिदः ॥ २५५ ॥ आस्तां वरस्तावदयं, समये प्रार्थयिष्यते । कार्यं ब्रूहीति पार्थेन, स पृष्टः पुनरभ्यधात् ॥ २५६ ॥

इतोऽस्ति पुरमभ्यर्णे, वैताढ्यगिरिमण्डनम् । अवनीवनितारत्न-नूपुरं रथनूपुरम् ॥ २५७ ॥ तत्र शत्रुमृगाक्षीणां, क्षपिताखिलमण्डनः । नमेरभवदाम्नाये, नाम्ना विद्युत्प्रभो नृपः ॥ २५८ ॥ तस्याभूतां सुतौ तीव्र-तेजसौ विपुलौजसौ । इन्द्राभिधस्तयोराद्यो, विद्युन्माली तथाऽपरः ॥ २५९ ॥ संस्थाप्येन्द्रं निजे राज्ये, स्वाराज्यसुहृदि स्वयम् । कनिष्ठं यौवराज्ये च, प्रव्रज्यामाददे नृपः ॥ २६० ॥ चिरत्नानां यतीनां च, भूपतीनां च वर्त्मना । मुनीन्द्रश्च नरेन्द्रश्च, प्रपेदाते परं पदम् ॥ २६१ ॥ इन्द्रो न नाम नाम्नैव, संपदाऽपि बभूव सः । सर्वे तत्रेन्द्रपर्यायाः, प्रायुज्यन्त जनैस्ततः ॥ २६२ ॥ इन्द्रेण सर्वथा त्यक्तां, युवराट् यौवनोद्धतः । कृपयेव समादत्त, सादरं दुर्विनीतताम् ॥ २६३ ॥ गृह्णाण दारान् पौराणां, सर्वस्वानि मुषाण च । पुषाण च महापीडां, स पुरीमित्युपाद्रवत् ॥ २६४ ॥ ततः पौरैरुपालब्धः, संततैर्नीतिवत्सलः । कृत्वैकान्ते कनीयांसं, क्षोणीपतिरशिक्षयत् ॥ २६५ ॥ समजायत वैराय, तस्मिञ्शिक्षाऽपि दुर्मदे । विपाय किं न पीयूष-मपि

१ वंशे । २ स्वर्गसदृशे । ३ पुरातनानाम् ।

किरातार्जुनयोर्युद्धम् । किरातेन दिव्याकारेण कथित इन्द्रराजवृत्तान्तः ॥

स्यात् पन्नगेऽर्पितम् १ ॥ २६६ ॥ अथ मुक्त्वा पुरीं कोपा–दुरात्मा तस्थिवान् बहिः । निजवंशनभश्चन्द्र–मिन्द्रमुच्छेत्तुमिच्छति ॥ २६७ ॥ निवातकवचा नाम, खरदूषणवंशजाः । राक्षसाः सुहृदस्तस्य, सुवर्णपुरवासिनः ॥ २६८ ॥ भूयांसस्ते बलीयांसः, कृतान्तादप्यभीरवः । ततो लोकेन सर्वेण, कीर्त्यन्ते कालकेतवः ॥ २६९ ॥ तालुन्येकपदे विद्धे, समं पाणितलेन यत् । विपद्यन्ते निगद्यन्ते, तेन ते तलतालवः ॥ २७० ॥ नित्यं युतस्तैर्दोःप्रौढै–र्वैताढ्याभ्यर्णवर्तिभिः । समास्कन्दत्यवस्कन्दै–र्विद्युन्माली स्वमग्रजम् ॥ २७१ ॥ संक्रन्दनस्तदाक्रान्ता–वनलंभूष्णुदोर्बलः । भीतभीतस्सदैवास्ते, पिहितैः पुरगोपुरैः ॥ २७२ ॥ इन्द्रः सोपद्रवं राज्य–माकलय्य कलानिधिः । अन्वयुङ्क्त बुधं नाम, नैमित्तिकशिरोमणिम् ॥ २७३ ॥ अमी दुर्वारदोर्वीर्या, दुर्जया मम वैरिणः । कथंचनापि जीयेरन्, यदि तद्भद्र ! कथ्यताम् ॥ २७४ ॥ ज्ञानेनालोक्य सोऽप्याह, देवामी तव शत्रवः । विजीयन्तेऽर्जुनेनैव, नैव चान्येन केनचित् ॥ २७५ ॥ नास्त्येव तत्समो धन्वी, त्रैलोक्येऽपि विलोक्यताम् । यच्चापाद्युगपद्धाव–दमित्रं स्युः पतत्रिणः ॥ २७६ ॥ विद्याः प्रसादयन्नद्रा–विन्द्रकीलेऽस्ति सोऽधुना । प्रार्थ्यतां प्रार्थनाशूर–स्तद्गत्वा प्रश्रयोज्ज्वलम् ॥ २७७ ॥ इत्याख्यातवतस्तस्य, कृत्वा सत्कारमादरात् । मामभ्यर्णस्थितं स्नेहा–द्व्याहरत् खेचरेश्वरः ॥ २७८ ॥ सखे ! खेदापनोदाय, यतस्वार्जुनमानय । पुंस्कुञ्जरेण तेनारी–नुन्मूलय तरूनिव ॥ २७९ ॥ किं चार्जुनेन सौजन्य–मस्त्येव तव पैतृकम् । प्राक्पाण्डुना विशालाक्षो, बद्धस्ते मोचितः पिता ॥ २८० इति त्वां मित्रकार्यार्थं, पार्थ ! सोऽहमुपस्थितः । तदेहि देहि भूयोऽपि, राज्यमिन्द्रस्य पैतृकम् ॥ २८१ ॥ इदं च यत्तवोद्दीप्त–मङ्गुलीय-

१ धात्रीभिः । २ इन्द्रः । ३ अपृच्छत् । ४ शराः ।

क्रमाङ्गुलौ । विशालाक्षस्य पाण्डोश्च, तत्प्रीतेः प्रतिभूर्मिथः ॥ २८२ ॥ ततः पाण्डुमहाराज-कृतामुपकृतिं पराम् । सहस्रशो
विशालाक्षः, कथयामास संमदि ॥ २८३ ॥ सन्ति मे व्रणसंरोह-विहायोगमनादयः । अङ्गुल्याभरणस्यास्य, प्रभावानुभवा
मुहुः ॥ २८४ ॥ तदस्य स्नपनाम्भोभिः, कुरु दिव्यौषधैरिव । निजाङ्गे गुणमाणिक्य-रोहण ! व्रणरोहणम् ॥२८५॥ इत्युक्त्वा
विरते तस्मि-न्नस्मयः कपिकेतनः । ज्येष्ठबन्धुमिवाश्लिष्य, खेचरेन्द्रमवोचत ॥ २८६ ॥ (युग्मम्)

आज्ञा युधिष्ठिरस्येव, तथापि ज्येष्ठबान्धव ! । परोपकारसुरभि-मौलिमाल्यायतां मम ॥ २८७ ॥ एतच्च वेद्मि यत्
पूर्वं, प्रस्थितस्य वनं प्रति । अर्पयित्वेदमार्यस्य, पाण्डुस्तातः समादिशत् ॥ २८८ ॥ अङ्गुलीयमिदं वत्स ! विशालाक्षेण
मेऽर्पितम् । महाप्रभावमेतद्धि, सदा दध्याः स्वसंनिधौ ॥ २८९ ॥ अत्र चागच्छतः क्षिप्त-मार्येणापि ममाङ्गुलौ । कनीयसि
गरीयस्यो, ज्यायसां प्रेमसंपदः ॥ २९० ॥ विशालाक्षस्य पाण्डोश्च, द्वयोरपि तयोस्ततः । निष्प्रत्यूहमयं स्नेहः, संतानमनु-
वर्तताम् ॥ २९१ ॥ इत्युक्त्वा विरतं भूत्वा, स्यन्दने सारथिः स्वयम् । रूढव्रणगणं पार्थ-मनैषीच्चन्द्रशेखरः ॥ २९२ ॥

अनुद्घातं सुखेनाशु, रथेन मरुता पथि । स गच्छन् दर्शयामास, वैताढ्यं सव्यसाचिनः ॥ २९३ ॥ स एष भरत-
क्षोणेः, सीमन्तः पुरतो गिरिः । मुदा विद्याधरीवृन्दै-स्त्वद्यशो यत्र गीयते ॥२९४॥ पञ्चाशद्योजनी पिण्ड-स्तदर्धं च समु-
च्छ्रितः । त्वद्यशोराशिविशदः, सैष राजति राजतः[3] ॥२९५॥ गतायां दशयोजन्या-मूर्ध्वं श्रेण्यावुभे शुभे । अभितः शैलमासाते,
दशयोजनविस्तृते ॥ २९६ ॥ इमां च दक्षिणश्रेणिं, वेगतो वयमागताः । रथो रथाङ्गबाहुभ्यां, पश्याश्लिष्यति काश्यपीम् ॥

१ गुणरत्नाना रोहणाचल ! । २ पुत्रपौत्रादिपरंपराम् । ३ रजतमयः रूप्यमयः इत्यर्थः ।

२९७ ॥ अयं पन्थाः पृथाघ्नो !, प्रयाति रथनूपुरम् । अस्ति वास्तोष्पतिर्यत्र, त्वद्दर्शनसमुत्सुकः ॥ २९८ ॥ अयं वामः पुनः पन्था-स्त्वद्रिपूनुपतिष्ठते । सन्ति येपूद्धता योद्धु-मुद्धतास्तलतालवः ॥ २९९ ॥ अथाऽऽह पार्थः सोत्कण्ठं, प्रतिपन्थिषु मे मनः । मुखमेषामनालोक्य, नैवेन्द्रं द्रष्टुमुत्सहे ॥ ३०० ॥ तचन्द्रचूड ! यत्रैते, तत्रैनं स्यन्दनं नय । यथा जानामि ते हन्त !, कियन्तः सन्ति शत्रवः ॥३०१॥ ऊचे चन्द्रावतंसोऽथ, तत्र किं गमनेन ते । प्रतिपक्षाः परोलक्षा-स्त्वं तु बाहुपरिच्छदः ॥ ३०२ ॥ यदा प्रत्यर्थिसैन्ये स्याः, समुद्रे सक्तुमुष्टिवत् । अरण्यरुदितप्राया-स्तदा स्युर्नो मनोरथाः ॥ ३०३ ॥ इन्द्रादिष्टामधिष्ठाय, ध्वजिनीं तत् कपिध्वज ! । शत्रूनुच्छेत्तुमागच्छे-र्मन्त्रस्तावदयं मम ॥ ३०४ ॥ अर्जुनः पुनरप्यूचे, किं चमूभिरमून् प्रति । भिनत्ति कुम्भिनां कुम्भा-निभारिः किं परिग्रहः ? ॥ ३०५ ॥

खेचरस्तदवष्टम्भ-मुदितोऽथ रथं ततः । नुनोद यत्र शौण्डीर्य-केतवः कालकेतवः ॥ ३०६ ॥ दृढं कवचितास्ते च, गृहीतविविधायुधाः । सव्यसाचिनमायान्तं, पश्यन्तो जगदुर्मिथः ॥ ३०७ ॥ रथोऽभ्येति यदैन्द्रोऽयं, चन्द्रशेखरसारथिः । आहूतः पुरुहूतेन, पार्थस्तद्ध्रुवमागतः ॥३०८॥ पञ्चत्वमस्मादस्माकं, मुहुर्मौहूर्तिकैरहो । आदिष्टमिति नो माति, हास्यमास्ये प्रसृत्वरम् ॥ ३०९ ॥ अस्त्रैः शस्त्रैश्च निःशेषै-रशेषेण भुजौजसा । सर्वैश्छद्मप्रयोगैश्च, शत्रुमेतं निशुम्भत ॥ ३१० ॥ इत्यालोच्य प्रहर्तुं ते, प्रावर्तन्त धनंजयम् । बाणैः फणैरिवोत्फालै-र्वैनतेयमिवाहयः ॥ ३११ ॥ तदा तेषामनीकेषु, रसन्ति स्म समन्ततः । रणतूर्याणि कीनाश-प्रवेशपटहा इव ॥ ३१२ ॥ तरणेः किरणश्रेणिं, ते वन्दीचक्रिरे शरैः । तांस्तु च्छित्त्वा विस-

१ इन्द्रः । २ नाशयत । ३ सर्पाः ।

च्छेदं, मोचयामास फाल्गुनः ॥ ३१३ ॥ स्थित्वा स्थले जले व्योम्नि, तेऽयुध्यन्त यथा यथा । तान् रथावस्थितः पार्थः, प्रतीयेप तथा तथा ॥ ३१४ ॥ किं सारथिमथो रथ्यान्, रथिनं वा महारथम् । वर्णयामः किमेतेषां, मुह्यन्ति स्मेति खेचराः ॥ ३१५ ॥ कपिकेतुः पुनर्लक्ष्मी-मुपेन्द्रं नेतुमुत्सुकः । रथेन मन्दरेणेव, ममन्थ समरार्णवम् ॥ ३१६ ॥ वयो मधुरमल्पीयः, परं चारिषु पौरुषम् । पश्यन् पार्थकुमारस्य, मुमुदे चन्द्रशेखरः ॥ ३१७ ॥ चलन्तः पार्थमनसा, सांयुगी-नपदक्रमाः । वाजिनो रेजुरिन्द्रस्य, जयश्रीस्निग्धबन्धवः ॥ ३१८ ॥ प्रत्येकं विशिखांश्छिन्द-न्नेकोऽपि कपिकेतनः । तेऽभूवन् युधि यावन्त-स्तावान् वा ददृशे स तैः ॥ ३१९ ॥

मुक्ता यथा तथा बाणा, नैतत्प्राणापहारिणः । पार्थोऽतस्तान्न चिक्षेप, तांश्चिच्छेद द्विषां पुनः ॥ ३२० ॥ न कृता दक्षिणेर्माणो, दुष्कर्माणः किरीटिना । ततः सर्वाभिसारेण, जघ्नुस्ते जितकाशिनः ॥ ३२१ ॥ एकत्र पिण्डितान् शत्रून्, वीक्ष्य प्रहरतो मुहुः । पार्थः किंचिदिवौत्सुक्या-दवोचच्चन्द्रशेखरम् ॥ ३२२ ॥ प्रगल्भयुद्धयो योद्धु-मलंकर्मीणचाहवः । शत्रवो दुर्जया ह्येते, तद्रथं वालय क्षणात् ॥ ३२३ ॥ सोऽप्यभाषत कौन्तेय !, तवैतन्नोचितं वचः । ऐन्द्रोऽरिविधनिस्तन्द्रः, सांयुगीनो रथो ह्ययम् ॥ ३२४ ॥ अभ्यस्तमस्य चक्राभ्यां, भूमेराक्रमणं पुरः । रणकर्मविपश्चिज्ञां, पश्चात्तु न कदाचन ॥

१ युद्धनिपुणपदक्रमाः (२. ॐ अत्र 'पार्थोऽपि तान् निचिक्षेप चिच्छेद द्विषतां पुनः।' इति गद्यपाण्डवचरितधृतः पाठो युक्तः प्रतिभाति। ३. दक्षिणे ईर्माणि व्रणानि येषां ते । ४. ×दृढमुष्टयः)

* इयं टिप्पणी न सम्यक् प्रतिभाति । × जयशालिनः इत्यर्थः सम्यक् प्रतिभाति ।

अर्जुनस्य राक्षसैः सह युद्धम्॥

३२५ ॥ मन्येऽरीणां विधेयानि, भागधेयानि सांप्रतम् । यत्त्वं युद्धधुरीणोऽपि, रणाद्वालयसे रथम् ॥ ३२६ ॥ पार्थोऽवादीदहो नाहं, कालं कंचिदपि क्षमे । तवायमञ्जलिर्बद्धो, रथं वालय वालय ॥ ३२७ ॥ कर्णजाहं न गाहन्ते, यद्वा तेऽमूर्गिरो मम । वरेण शाक्रदत्तेन, रथो व्यावर्त्यतां रणात् ॥ ३२८ ॥ इत्युक्तः सोऽथ कृष्णास्यः, स्यन्दनं तं न्यवर्तयत् । ते चानुपदिकास्तस्य, जैत्रंमन्या दधाविरे ॥ ३२९ ॥ जयश्रीवल्लभंमन्या, मुखाग्रन्यस्तपाणयः । ते क्ष्वेडां युगपच्चक्रुः, कृतान्ताह्वानसंनिभाम् ॥ ३३० ॥ स्मृत्वा द्रोणार्पितं मन्त्र–मनेकविशिखप्रसूः । वाणः प्राणहरस्तेषां, मुमुचे सव्यसाचिना ॥ ३३१ ॥ एकस्मादप्यथैतस्मात्, स्फुलिङ्गा इव पावकात् । यावद्विद्वेपि निर्जग्मुः, प्रेङ्खत्पुङ्खाः शिलीमुखाः ॥ ३३२ ॥ युगपच्चलितास्ते च, तालूनि सह पाणिभिः । अरीणां लीलया भित्त्वा, निर्ययुर्जीवितैः सह ॥३३३॥ *शरांशनिहताः पेतु–र्भुवि ते पर्वता इव । पपात पुष्पवर्षं च, पार्थमूर्ध्नि नभोऽङ्गणात् ॥ ३३४ ॥ तदत्यद्भुतमालोक्य, श्रुत्वा च दिवि दुन्दुभिम् । वभार सारथिः फुल्लत्पुण्डरीकमिवाननम् ॥ ३३५ ॥ साधु साधु महावाहो !, धनंजय ! चिरं जय । एते प्रत्यर्थिनः प्रौढा, लीलयैव त्वया जिताः ॥३३६॥ इत्यानन्दपरः पार्थ–मभिनन्दन् पुनःपुनः । आलिलिङ्ग स सर्वाङ्ग–मुन्मीलत्पुलकाङ्कुरः ॥३३७॥ (युग्मम्)

अथ व्योम्नि विमानेन, हर्षादायान्तमन्तिके । वासवं दर्शयामास, सारथिः पाण्डुसूनवे ॥ ३३८ ॥ दिष्ट्या दृष्टिमितो देहि, सखेचरपरिच्छदः । संग्रामकौतुकादेति, पुरतस्ते पुरंदरः ॥ ३३९ ॥ रथस्थ एव पार्थस्तं, प्रीतः प्रत्युद्ययौ दृशा ।

---

१ कर्णमूलम् । २ गर्जनाम् । ३ यावन्तो विद्वेषिणस्तान्वतो वाणाः । * अशनिः–वज्रम् । ४ 'शरासनिहिताः' इति क्वचित्पाठः । ५ इन्द्रं नृपम् ।

कृत्वा विमानमासन्नं, तमिन्द्रोऽप्यध्यरोहयत् ॥३४०॥ पाण्डवं प्राग्दशा पीत्वा, सस्नेहमुपगूह्य च। निवेश्य चासनस्यार्धे, स बद्धाञ्जलिरभ्यधात् ॥३४१॥ तवैतस्योपकारस्य, मा भून्मे प्रत्युपक्रिया। उपकर्तरि दुःस्थे हि, भवेत् प्रत्युपकारिता ॥३४२॥ तवोपश्लोकनानाक्यं, किं ब्रूमः ? किं त्वतः परम्। इदं राज्यममी प्राणा, व्यापार्यन्तां यदृच्छया ॥ ३४३ ॥ नेत्रोत्सवाय पौराणां, त्वमेहि रथनूपुरम्। खेचरीमङ्गलाचारः, संस्तुतोऽस्तु तवाधुना ॥ ३४४ ॥ समानवयसं वीक्ष्य, पाण्डुना तं धनंजयः। भक्तिभारनमन्मूर्धा, सप्रश्रयमवोचत ॥३४५॥ तातेन पाण्डुनै(ने)नाहं, भवद्भिः परवानिह। केवलं यातुधानानां, राजधानीं ममाधुना ॥ ३४६ ॥ प्रसिद्धं सिद्धकूटं च, द्रष्टुमस्ति कुतूहलम्। इति विज्ञाप्य विनयी, पार्थस्तूष्णीकतां दधौ ॥ ३४७ ॥ (युग्मम्) हुंकारेण ततः प्रेर्य, विमानं गगनाध्वना। इन्द्रः प्रीतिपरोऽवादी–न्निवातकवचद्रुहम्[1] ॥ ३४८ ॥ अवस्था पर्वनस्थाद्–सार्थेऽधः पार्थ ? वीक्ष्यताम्। त्वया छत्रेषु भग्नेषु, छाया गृध्रैर्विधीयते ॥३४९॥ रेणवश्चन्दनायन्ते, शोणितं कुङ्कुमायते। रुष्टेनापि त्वयाऽरीणां, दत्तमङ्गप्रसाधनम् ॥ ३५० ॥ सुखकृत्त्वं प्रतीपोऽपि, यत्ते शत्रून् प्रिया इव। शिवाः श्लिष्यन्ति चुम्बन्ति, दारयन्ति नखैरपि ॥ ३५१ ॥ असौ हहा ! कुसंसर्गा–न्निसर्गसरलाशयः। गतः परासुतां वत्सो, विद्युन्माली दुनोति माम् ॥ ३५२ ॥ भवत्यपेया पीयूष–गर्गरी गरसङ्गिनी। सूत्रं तु पुष्पसंसर्गा–दारोहति शिरः सताम् ॥ ३५३ ॥ इदं हिरण्यहर्म्याङ्कं, सुवर्णपुरमग्रतः। वयं यत्र स्थितैरेतै–र्मुहुर्मुहुरुपद्रुताः ॥ ३५४ ॥ युद्धोपाध्याय ! शत्रूणां, स्त्रियः शोकं त्वयाऽधुना। अध्यापिताः पुरस्तारैः, पूत्कारैर्गुणयन्त्यमूः ॥ ३५५ ॥ काश्चिच्चिकुरसंभार, त्रोटयन्ति मुहुर्मुहुः।

१ निवातकवचस्य राक्षसस्य शत्रुम्–अर्जुनमित्यर्थः। २ प्रतिपक्षसमूहे।

इन्द्रा-
र्जुनयोः
समागमः॥

काश्चित्प्रतिक्षणं वक्षः-कुट्टिमं कुट्टयन्ति च ॥ ३५६ ॥ क्षिपन्ति दूरमश्रूणि, हारमुक्ताश्च काश्चन । मन्यन्ते च दुकूलानि, प्रतिकूलानि काश्चन ॥ ३५७ ॥ त्वत्क्षुरप्रा द्विषां क्षिप्रं, लग्नाश्छिन्दन्तु कंधराम् । कथं कुचस्थले तासां, लुलुपुः पत्रवल्लरीम् ? ॥ ३५८ ॥ वयं वेगाद्विमानस्य, वैमनस्यविनाशकृत् । अर्हच्चैत्याञ्चितं वत्स !, सिद्धकूटमुपागताः ॥ ३५९ ॥

अथोत्तीर्य विमानेभ्यः, सर्वे श्रद्धालुचेतसः । तत्र शाश्वततीर्थेशं, वर्धमानं ववन्दिरे ॥ ३६० ॥ दुष्प्रापं दर्शनं मत्वा, विशेषाज्जिनमर्जुनः । स्नात्रानन्तरमानर्च, तुष्टाव च मुहुर्मुहुः ॥ ३६१ ॥ गङ्गाम्बुविमला तस्य, जिनोपासनवासना । पापपङ्कमपाकर्तु-मपुष्णात् प्रभविष्णुताम् ॥ ३६२ ॥ पुनर्विमानमारुह्य, कीर्त्यमानोऽथ बन्दिभिः । उत्क्षिप्तकेतनां[1] पुष्प-प्रकराञ्चितचत्वराम् ॥ ३६३ ॥ उत्तोरणां रणत्तूर्यां, सूर्यप्रतिनिधिद्युतिः[2] । पार्थः खेचरराजस्य, राजधानीमुपाययौ ॥ ३६४ ॥ युग्मम् ॥ सानन्दैः खेचरीवृन्दै-र्लाजाक्षेपपुरःसरम् । पीयमानाङ्गलावण्यः, स सौधद्वारमागमत् ॥ ३६५ ॥ प्रस्तुतोल्लुकल्लोलं, लोलाक्षीभिः किरीटिनः । प्रवेशमङ्गलाचारं, चकारेन्द्रप्रिया स्वयम् ॥३६६॥ स्वयं सिंहासनासीन-स्तं कृत्वोत्सङ्गसङ्गिनम् । वासवः कारयामास, पुरः संगीतमङ्गलम् ॥ ३६७ ॥ स चिरात् खेचरास्त्राणि, किरीटं कवचं तथा । तदा प्रदाय पार्थाय, स्वं कृतार्थममन्यत ॥ ३६८ ॥ अग्रजः सर्वपुत्राणां, मम सूनुरसौ जनैः । ज्ञातव्य इति सर्वत्र, घोषयामास वासवः ॥३६९॥ कंचित् कालमिहैव त्वं, तिष्ठ लक्ष्मीं कृतार्थयन् । पार्थमभ्यर्थयांचक्रे, तदेति त्रिदशेश्वरः ॥ ३७० ॥ ओमित्युक्त्वा कनीयोभि-र्गान्धर्वैरिव तत्सुतैः । सानन्दोऽस्य पुरे जिष्णु-र्विजहार यदृच्छया ॥ ३७१ ॥

१ ऊर्ध्वीकृतध्वजाम् । २ सूर्यसदृशकान्तिः ।

कृत्वा विमानमामन्त्रं, तमिन्द्रोऽप्यभ्यरोहयत् ॥३४०॥ पाण्डवं प्राग्दशा पीत्वा, सस्नेहमुपगूह्य च । निवेश्य चासनस्यार्धे, स बद्धाञ्जलिरभ्यधात् ॥३४१॥ तवैतस्योपकारस्य, मा भून्मे प्रत्युपक्रिया । उपकर्तरि दुःस्थे हि, भवेत् प्रत्युपकारिता ॥३४२॥ तवोपश्लोकनावाक्यं, किं ब्रूमः ? किं त्वतः परम् । इदं राज्यममी प्राणा, व्यापार्यन्तां यदृच्छया ॥ ३४३ ॥ नेत्रोत्सवाय पौराणां, त्वमेहि रथनूपुरम् । खेचरीमङ्गलाचारः, संस्तुतोऽस्तु तवाधुना ॥ ३४४ ॥ समानवयसं वीक्ष्य, पाण्डुना तं धनंजयः । भक्तिभारनमन्मूर्धा, सप्रश्रयमवोचत ॥३४५॥ तातेन पाण्डुनै(ने)वाहं, भवद्भिः परवानिह । केवलं यातुधानानां, राजधानीं ममाधुना ॥ ३४६ ॥ प्रसिद्धं सिद्धकूटं च, द्रष्टुमस्ति कुतूहलम् । इति विज्ञाप्य विनयी, पार्थस्तूष्णीकतां दधौ ॥ ३४७ ॥ (युग्मम्) हुंकारेण ततः प्रेर्य, विमानं गगनाध्वना । इन्द्रः प्रीतिपरोऽवादी–न्निवातकवचद्रुहम् ॥ ३४८ ॥ अनस्था पर्यवस्थातृ–सार्थेऽधः पार्थ ? वीक्ष्यताम् । त्वया छत्रेषु भग्नेषु, छाया गृध्रैर्विधीयते ॥३४९॥ रेणवश्चन्दनायन्ते, शोणितं कुङ्कुमायते । रुष्टेनापि त्वयाऽरीणां, दत्तमङ्गप्रसाधनम् ॥ ३५० ॥ सुखकृत्त्वं प्रतीपोऽपि, यत्ते शत्रून् प्रिया इव । शिवाः श्लिष्यन्ति चुम्बन्ति, दारयन्ति नखैरपि ॥ ३५१ ॥ असौ हहा ! कुसंसर्गा–न्निसर्गसरलाशयः । गतः परासुतां वत्सो, विद्युन्माली दुनोति माम् ॥ ३५२ ॥ भवत्यपेया पीयूष–गर्गरी गरसङ्गिनी । सूत्रं तु पुष्पसंसर्गा–दारोहति शिरः सताम् ॥ ३५३ ॥ इदं हिरण्यहर्म्याङ्कं, सुवर्णपुरमग्रतः । वयं यत्र स्थितैरेतै–र्मुहुर्मुहुरुपद्रुताः ॥ ३५४ ॥ युद्धोपाध्याय ! शत्रूणां, स्त्रियः शोकं त्वयाऽधुना । अध्यापिताः पुरस्तारैः, पूत्कारैर्गुणयन्त्यमूः ॥ ३५५ ॥ काश्चिच्चिकुरसंभारं, त्रोटयन्ति मुहुर्मुहुः ।

१ निवातकवचस्य राक्षसस्य शत्रुम्–अर्जुनमित्यर्थः । २ प्रतिपक्षसमूहे ।

काश्चित्प्रतिक्षण वक्षः-कुट्टिमं कुट्टयन्ति च ॥ ३५६ ॥ क्षिपन्ति दूरमश्रूणि, हारमुक्ताश्च काश्चन । मन्यन्ते च दुकूलानि, प्रतिकूलानि काश्चन ॥ ३५७ ॥ त्वत्क्षुरप्रा द्विपां क्षिप्रं, लग्नाश्छिन्दन्तु कंधराम् । कथं कुचस्थले तासां, लुलुपुः पत्रवल्लरीम् ? ॥ ३५८ ॥ वयं वेगाद्विमानस्य, वैमनस्यविनाशकृत् । अर्हच्चैत्याञ्चितं वत्स !, सिद्धकूटमुपागताः ॥ ३५९ ॥

अथोत्तीर्य विमानेभ्यः, सर्वे श्रद्धालुचेतसः । तत्र शाश्वततीर्थेशं, वर्धमानं ववन्दिरे ॥ ३६० ॥ दुष्प्रापं दर्शनं मत्वा, विशेषाज्जिनमर्जुनः । स्नात्रानन्तरमानर्च, तुष्टाव च मुहुर्मुहुः ॥ ३६१ ॥ गङ्गाम्बुविमला तस्य, जिनोपासनवासना । पाप-पङ्कमपाकर्तु-मपुष्णात् प्रभविष्णुताम् ॥ ३६२ ॥ पुनर्विमानमारुह्य, कीर्त्यमानोऽथ बन्दिभिः । उत्क्षिप्तकेतनां[1] पुष्प-प्रकराञ्चि-तचत्वराम् ॥ ३६३ ॥ उत्तोरणां रणत्तूर्यां, सूर्यप्रतिनिधिद्युतिः[2] । पार्थः खेचरराजस्य, राजधानीमुपाययौ ॥ ३६४ ॥ युग्मम् ॥ सानन्दैः खेचरीवृन्दै-र्लाजाक्षेपपुरःसरम् । पीयमानाङ्गलावण्यः, स सौधद्वारमागमत् ॥ ३६५ ॥ प्रसुतोल्लुलकल्लोलं, लोलाक्षीभिः किरीटिनः । प्रवेशमङ्गलाचारं, चकारेन्द्रप्रिया स्वयम् ॥३६६॥ स्वयं सिंहासनासीन-स्तं कृत्वोत्सङ्गसङ्गिनम् । वासवः कारयामास, पुरः संगीतमङ्गलम् ॥ ३६७ ॥ स चिरात् खेचरास्त्राणि, किरीटं कवचं तथा । तदा प्रदाय पार्थाय, स्वं कृतार्थममन्यत ॥ ३६८ ॥ अग्रजः सर्वपुत्राणां, मम सूनुरसौ जनैः । ज्ञातव्य इति सर्वत्र, घोषयामास वासवः ॥३६९॥ कंचित् कालमिहैव त्वं, तिष्ठ लक्ष्मीं कृतार्थयन् । पार्थमभ्यर्थयांचक्रे, तदेति त्रिदशेश्वरः ॥ ३७० ॥ ओमित्युक्त्वा कनी-योभि-र्बान्धवैरिव तत्सुतैः । सानन्दोऽस्य पुरे जिष्णु-र्विजहार यदृच्छया ॥ ३७१ ॥

---

१ ऊर्ध्वीकृतध्वजाम् । २ सूर्यसदृशकान्ति ।

स्मरार्ताः पुरकामिन्यः, कामयन्ते स्म फाल्गुनम् । वशी स्वदारसंतुष्टो, न तु ताः स कदाचन ॥ ३७२ ॥ उपेत्योपेत्य तं प्रेम्णा, वृणते स्म पतिंवराः । स्मरन् वन्धुवनक्लेशं, प्रतीयेष न ताः स तु ॥ ३७३ ॥ चित्राङ्गद–विचित्राङ्ग–चित्रसेनादयः शतम् । आययुः खेचरास्तत्र, फाल्गुनालोकनार्थिनः ॥ ३७४ ॥ इन्दोः संवर्णनाकर्ण्य, गुणान् प्रेक्ष्य च ते स्वयम् । धनुर्वेदादिशिक्षासु, गुरुं चक्रुः किरीटिनम् ॥ ३७५ ॥ लज्जयामास न द्रोणं, शिक्षादानक्रमेण सः । गुरुवैनयिकोत्कर्षे, न च ते सव्यसाचिनम् ॥ ३७६ ॥ अचिरेणैव पारीणा[१], कलानां तेऽथ जज्ञिरे । विद्याब्धिकर्णधारो हि, योगः सद्गुरुशिष्ययोः ॥३७७॥ ददुः सर्वस्वमप्येते, बलाज्जिष्णुर्न्यवारयत् । इत्यभूत् कलहस्तेषां, गुरुणा दक्षिणाकृते ॥३७८॥ निषिद्धाः पाण्डुपुत्रेण, समयापेक्षिणस्ततः । कृतज्ञाः कल्पयामासुः, प्राणांस्ते गुरुदक्षिणाम् ॥ ३७९ ॥ ते च विद्याधराधीशाः, सर्वेच्छा यावदन्वहम् । तस्थुः प्रतस्थिरे चापि, सहैव कपिकेतुना ॥ ३८० ॥ चित्राङ्गदस्तु गन्धर्वो, गीतेन वरिवस्यति । ततोऽस्मिन्नधिकां प्रीतिं, प्रथयामास पाण्डुसूः ॥ ३८१ ॥ इन्द्रवात्सल्यतः पार्थः, शिष्याणां चोपचारतः । भूयांसं गमयामास, कालमेकाहलीलया ॥ ३८२ ॥

कदाचिद्बान्धवोत्कण्ठा–विवशीकृतमानसः । इन्द्रमामन्त्रयामास, गमनाय धनंजयः ॥ ३८३ ॥ रथं दिव्यं विमानं च, चन्द्रचूडं च सारथिम् । इन्द्रः समर्प्य बाष्पाम्बु–प्लुताक्षो विससर्ज तम् ॥ ३८४ ॥ मनोवेगविमानस्थै–श्चित्राङ्गदपुरःसरैः । विद्याधरैरनुगतः, प्रतस्थेऽथ कपिध्वजः ॥ ३८५ ॥ स साश्रुनयनाम्भोजः, पर्यश्रुमनुगामिनम् । आविष्कृतबहुस्नेहं,

अर्जुनस्येन्द्रपुरे गमनम् । ततः प्रयाणं च ॥

१ ऐच्छन् २ सदृशान् ।

बलादिन्द्रं न्यवर्तयत् ॥ ३८६ ॥ प्रथयन्तौ कथास्तास्ता-श्चित्राङ्गद-किरीटिनौ । एकं विमानमारुह्य, वियन्मार्गेण जग्मतुः ॥ ३८७ ॥ संमेतादिषु शैलेषु, पावनेष्वर्हतां पदैः । सर्वविद्याधरोपेतः, पार्थस्तीर्थान्यवन्दत ॥ ३८८ ॥ चारण-श्रमणांश्चैष, नमस्यन् व्योम्नि संमुखान् । आगाल्लवङ्गलवली-सुगन्धं गन्धमादनम् ॥ ३८९ ॥ पुरोगखेचराख्यातां, वीक्ष्य व्योम्नि सुतश्रियम् । निजामुवाच रोमाञ्च-द्वारेणैव मुदं पृथा ॥ ३९० ॥ पश्यन्नपि सुधाबन्धु-बन्धुलक्ष्मीं युधिष्ठिरः । सानुजः कलयामास, तत्कालमनिमेषताम् ॥ ३९१ ॥ तदानीं विकसन्नेत्र-नीरजा[1] द्रुपदात्मजा । इयेष मनसोत्प्लुत्य, पत्युरुत्सङ्गसंगमम् ॥ ३९२ ॥ उन्मुखेषु मुदा तेषु, वेगादागत्य फाल्गुनः । खेचरैः सहितो मातु-रपतत् पादपङ्कजे ॥ ३९३ ॥ मुहुर्मुहुः स्पृशन्त्याऽङ्गं, सुधाशीतेन पाणिना । तयाऽपि स्नपयांचक्रे, प्रमोदाश्रुभिरात्मजः ॥ ३९४ ॥ उभाभ्यामपि पाणिभ्यां, तमुत्थाप्य पृथा बलात् । आजिघ्रन्मुदिता मूर्ध्नि, प्रश्रवक्लिन्नवल्कला ॥ ३९५ ॥ अग्रजावनमत् पार्थ-स्तं चोपेत्यानुजौ यमौ । पार्थेनावेदिता नेमुः, खेचरास्तपसःसुतम् ॥३९६॥ त्रपासीमान्तमुल्लङ्घ्य, प्लवमानैरितस्ततः । प्रेम प्रकाशयामास, कृष्णा भावैः स्वभर्तरि ॥ ३९७ ॥ उपस्थातव्यमाहूते-र्युष्माभिः समये पुनः । इत्याभाष्य तपःसूनु-र्विससर्ज नभश्चरान् ॥ ३९८ ॥

अथ पप्रच्छ विनयी, बान्धवान् कपिकेतनः । अत्यक्रामदयं कालः, कथं वो विरहे मम ? ॥ ३९९ ॥ तत्तत्तीर्थनमस्याभि-स्त्वत्कथाश्रवणेन च । गमितः समयोऽस्माभि-रित्याख्यद्धर्मनन्दनः ॥ ४०० ॥ स्मरव्यापारनिपुणा, वियोगगुणितं प्रियात् । आददे द्रौपदी स्वैरं, करणग्रामजं[2] सुखम् ॥ ४०१ ॥ कालेन भूयसा जातु, तस्याः क्रीडाजुषः प्रियैः । सहस्रपत्र-

१ नीरजं-कमलम् । २ इन्द्रियसमूहजनितम् ।

मुत्सङ्गे, पपात पवनाहृतम् ॥ ४०२ ॥ एकं विदधती तद्दिः, पाणिपङ्केरुहग्रहात् । विलोकते स्म पाञ्चाली, प्रतिपत्रं पुनः पुनः ॥ ४०३ ॥ प्रियावक्त्रं च तच्चापि, वीक्ष्य साक्षादुभे अपि । पाण्डवेयास्तयोराद्यं, निश्चिक्युर्वसतिं श्रियः ॥ ४०४ ॥ द्वयोरपि तयोरस्ति, यद्यप्यनपरागता । तथाप्यधिकसौरभ्यं, मेनिरे ते प्रियाननम् ॥ ४०५ ॥ तेनाकृष्टमनाः कृष्णा, दृशा भीमम-याचत । उपानय ममानीय, नलिनानीदृशानि मे ॥ ४०६ ॥ सुमेधास्तदबोधिष्ट, प्रियाऽभीष्टं वृकोदरः। मनोगतं विदन्त्येव, नित्यं हृदयवासिनः ॥ ४०७ ॥ ज्येष्ठबन्धुमनुज्ञाप्य, प्रस्थितस्याथ मारुतेः । दिदेशानीतराजीव-गन्धो गन्धवहः पथम् ॥ ४०८ ॥ लङ्घयामास सोऽध्वानं, सिन्धुभूधरदुस्तरम् । न पुनः क्वापि तत् प्राप, सरः सरसिजास्पदम् ॥ ४०९ ॥

इतस्तपःसुतादीना-मदीनमनसामपि। भाव्यर्थपिशुनैराशु, दुर्निमित्तैर्विजृम्भितम् ॥४१०॥ ततः समादिशद्बन्धू-नादतो धर्मनन्दनः। सत्वरं गम्यते तत्र, यत्रास्ति पवनात्मजः ॥ ४११ ॥ तस्मिन् संनिहितेऽस्माकं, विपदः स्युर्न दुस्तराः। महानद्योऽपि सुप्राप-पाराः सत्युडुपे नृणाम् ॥ ४१२ ॥ तस्याप्यत्याहितं[3] न स्यात्, स्थितेष्वस्मासु संनिधौ । केन वा यूथ-मध्यस्थः, कलभः परिभूयते ? ॥ ४१३ ॥ इत्यादेशान्नरेशस्य, ते सर्वेऽपि प्रतस्थिरे । तेषामुपादिशन्मार्गं, भग्ना भीमेन भूरुहः ॥ ४१४ ॥ गिरिभिर्विषमः पन्था-स्तैर्ललङ्घे कथंचन । एकस्यास्तु महानद्या-स्तीरे खिन्नोऽवदन्नृपः ॥ ४१५ ॥ भीमः स नास्ति यस्यासौ, महानद्यपि गोष्पदम् । एतामुत्तार्य भीमेन, कोऽस्मान् संगमयिष्यति ? ॥४१६॥ अथाऽऽह पार्थो मे देव !, विद्याः सन्ति वशंवदाः। तामामन्यतमाऽप्येतत्, करोत्वीप्सितमादिश ॥४१७॥ ततोऽवादीदजातारि-र्महासाहायिकोचिताः।

१ रागसहितत्वम् । २ वायुः । ३ विघ्नः ।

अर्जुनस्य भ्रातृसमीपे आगमनम्। भीमस्य कमला-नयनाय गमनम् ॥

विद्याः स्वल्पे न कार्येऽस्मिन्, व्यापारयितुमर्हसि ॥ ४१८ ॥ पथि निर्व्यूढसाहाय्या, हिडम्बा तु पुरापि नः । इदानीमपि तामेव, स्मर्तुमिच्छति मे मनः ॥ ४१९ ॥ इत्युदीर्य स्नुषां सद्यः, सस्मार च युधिष्ठिरः । भीमाभ्यर्णस्थमात्मानं, सकुटुम्बं ददर्श च ॥ ४२० ॥ हिडम्बां सह बालेन, सोऽपश्यत् प्रणतां पुरः । अवादीच्च दृशा सिञ्चन्, सुधावीचिचयस्यया ॥४२१॥ कच्चित् कुशलिनी वत्से !, गुर्वादेशैकतत्परे ? । अयं च कोऽयमनघो, लघुर्भीम इवापरः ? ॥ ४२२ ॥ अथ सा कथयामास, देव ! स्मरसि यत् पुरा। अन्तर्वत्नी विसृष्टाऽह–मेकचक्रावनात्त्वया ॥४२३॥ गताया मे पितुर्गेहे, तनयोऽयमजायत। विद्याभिः पात्रलाभेन, मुदितं यस्य जन्मनि ॥ ४२४ ॥ भुजस्थाम्ना निरान्नायान्, पितुः शत्रून् करिष्यति । असाविति ममाख्यायि, मुद्रमौहूर्तिकैस्तदा ॥४२५॥ अयं मे ज्ञातिचक्रेण, चक्रे नाम्ना घटोत्कचः । कलाश्चाध्यापितः काश्चित्, काश्चिदध्येष्यतेऽधुना ॥४२६॥ अथैते तनयस्नेह–लहरीहृतचेतसः । आश्लिष्यन् रभसाद्बालं, तं सर्वे पाण्डुसूनवः ॥ ४२७ ॥ भक्तिरोमाञ्चिता कामं, प्रणामं कृतपूर्विणी । सा कून्ती–याज्ञसेनीभ्यां, सस्नेहं समभाष्यत ॥ ४२८ ॥ अथोज्जृम्भन्नवाम्भोजं, हृष्टो दृष्ट्वा सरः पुरः । स्नुषां स्वस्थानयानार्थ–मनुमेने महीपतिः ॥ ४२९ ॥

आश्चर्यलहरीहेतोः, सेतोरुपरि तस्थिवान् । बन्धूनां दर्शयामास, मारुतिः सरसःश्रियम् ॥ ४३० ॥ दिवि दिव्याब्ज-सौरभ्य–लुभ्यद्भृङ्गावलिच्छलात् । छत्रं तडागराजस्य, राजते मेघडम्बरम् ॥४३१॥ लोलैरेतानि कल्लोलैः, शतपत्राणि पश्यत । कृष्णावक्त्रजितानीव, स्वमन्तर्दधते पुरः ॥ ४३२ ॥ इमां भीमगिरं श्रुत्वा, दक्षिणेऽक्ष्णि स्फुरत्यथ। प्रपेदे द्रौपदी प्रीति–

१ सन्ततिरहितान् । २ पालेः ।

मप्रीति च ममं तदा ॥ ४३३ ॥ मातुः पादौ स पुंनागः, पुंनागस्य तरोरधः । स्वोत्सङ्गसङ्गिनौ कुर्व-न्नुपासामास धर्मसूः ॥ ४३४ ॥ वर्द्धिष्णुफलपुष्पर्द्धि-रम्यासु वनराजिषु । शेषास्तु पाण्डवाः स्वैरं, रेमिरे सह कृष्णया ॥ ४३५ ॥ ददुस्तरून् समारुह्य, प्रियायै कुसुमानि ते । सा तु तेभ्यः प्रतीच्छन्ती, मुदमूर्ध्वभुजा ददौ ॥ ४३६ ॥ कुतूहलात् स्वयं कर्तुं, पुष्पावचयमिच्छती । सा प्रियैः स्कन्धमारोप्य, चक्रे पूर्णमनोरथा ॥ ४३७ ॥ मनोहारीणि निर्माय, कुसुमाभरणानि ते । परिधाप्य प्रियां प्रेम्णा, परां मुदमलम्भयन् ॥ ४३८ ॥ केतकीदलदीर्घेण, कटाक्षेण वृकोदरम् । प्रियाऽथ प्रेरयामास, कमलाऽऽहरणाय सा ॥ ४३९ ॥ तरीतुमतिनिष्णात-स्तीरे त्यक्त्वा गदां तदा । स जगाहे तडागं तं, पाथोधिमिव मन्दरः ॥ ४४० ॥ विचक्षणः क्षणान्मज्ज-न्नुन्मज्जंश्च क्षणादपि । बन्धूनां दर्शयामास, स्वसंतरणकौशलम् ॥ ४४१ ॥ संविष्टो वा निविष्टो वा, क्वचिदूर्ध्वंदमोऽथवा । बहुधा बन्धुहर्षाय, जलकेलिमसौ व्यधात् ॥ ४४२ ॥ नलिनानि सनालानि, बहिरुच्चित्य सोऽक्षिपत् । अग्रहीन्नीरतीरस्था, द्रौपदी मुदितानना ॥ ४४३ ॥ उच्चित्योच्चित्य पद्मानि, क्षिपन्नेवं वृकोदरः । तरन् यातः सरोमध्यं, ममज्जान्तर्जलं क्षणात् ॥ ४४४ ॥ जले मग्नोऽन्यदाऽप्येष, चिरेणोन्मज्जतीति ते । औदासीन्यजुषोऽभूवं-स्तदा सर्वेऽपि बान्धवाः ॥ ४४५ ॥ प्राणेश ! द्रुतमुन्मज्ज, कृतं मज्जनकेलिना । इत्याकुलमनास्तारं, जगाद द्रुपदात्मजा ॥ ४४६ ॥ अर्जुनार्जुन ! धावस्व, वेगतो भीममाकृष । कश्चिद्दुष्टाशयो ग्राहः, स्नुं मे नूनमग्रहीत् ॥ ४४७ ॥ इति कुन्तीगिरा पार्थः, समर्थः शत्रुनिग्रहे । ददावन्तर्जलं झम्पां, दीपे शलभवद्द्रुतम् ॥ ४४८ ॥ (युग्मम्) आसेदिवान् प्रदेशं तं, मग्नः पार्थोऽपि पाथसि । वृकोदरानु-

१ गृह्णन्ती । २ त्रोटयित्वा । ३ जले ।

गामित्वा–न्नोन्ममज्ज चिरादपि ॥ ४४९ ॥ उभावपि भुजे धृत्वा, जानीताशु समुद्धृतौ । इति जल्पन् विवेशाशु, नकुलः प्रणयाकुलः ॥ ४५० प्रवृत्तिरासीत्तस्यापि, प्रत्यावृत्तिस्तु नाभवत् । व्यवसायोऽन्यथा पुंसां, विधातुः पुनरन्यथा ॥ ४५१ ॥ निरयन्ति कथं मग्ना, बन्धवोऽमी ? इति ब्रुवन् । सहसा सहदेवोऽपि, वेगादेत्य जलेऽपतत् ॥ ४५२ ॥ सत्यं सोऽपि जवाद्गत्वा, बन्धूनां मिलितस्तदा । येनोन्मज्जनवार्ताऽऽसी–न्न तस्यापि कथंचन ॥ ४५३ ॥

हाहा ! किमेतदारब्धं, विधिनेति विचिन्तयन् । नरेन्द्रोऽथ समं कुन्त्या, कृष्णान्तिकमुपागमत् ॥ ४५४ ॥ अजल्पन्नृपतिः कुन्तीं, किमेतन्मातरुत्थितम् ? । अकस्मादेव येनामी, निर्ममज्जुर्ममानुजाः ॥ ४५५ ॥ शक्तास्तरीतुमेते हिं, बाहुभ्यामपि सागरम् । क्रूराणां संभवो जातु, नास्मिन्नम्भसि यादसाम् ॥ ४५६ ॥ मन्ये मन्युमता योद्धुं, रुद्धाः केनापि वैरिणा । तं निगृह्य प्रसह्याशु, गत्वाऽहं मोचयाम्यमून् ॥ ४५७ ॥ किं तु त्वां त्वद्वधूं चैतां, नो शून्ये मोक्तुमुत्सहे । तत्किंकर्तव्यतामूढः, संकटे पतितोऽस्म्यहम् ॥ ४५८ ॥ अथाऽऽह जननी वत्स !, गच्छ बन्धून् विमोचय । आवयोः संनिधौ पञ्च, तिष्ठन्ति परमेष्ठिनः ॥ ४५९ ॥ सिंहा इव श्रयन्तेऽमी, यन्मनःकंदरोदरम् । विपद्द्विपघटास्तेषां, विघटन्ते दिशो दिशि ॥ ४६० ॥ तवापि हृदयान्मा स्म, क्षणमप्यपयान्त्वमी । उदर्कः कुरुवंशार्के–श्चिरायोज्जृम्भतां शुभः ॥ ४६१ ॥ रवेरस्तमनादर्वाक्, पुनः संनिधिमावयोः । सबन्धुरेत्य विजयी, सनाथीकर्तुमर्हसि ॥ ४६२ ॥ नभो नभोमणिः स्वैरं, यावदुद्द्योतयत्ययम् । प्राणेभ्यः प्रभविष्याव–स्तावदेव त्वया विना ॥ ४६३ ॥ दक्षः शिक्षामिमां मातुः, स प्रह्वो बह्वमन्यत । नैसर्गिकी हि महतां, गुर्वादेशैकतानता ॥ ४६४ ॥

ततः पञ्चनमस्कार-पुरःसरमसौ सरः । निर्विलम्बं प्रणम्याम्बां, प्राविशद्धर्मनन्दनः ॥ ४६५ ॥ दत्तसार्द्रदशोरेव, सोऽपि मातृ-कलत्रयोः । तडागान्तर्निमग्नानां, चतुर्णां पञ्चमोऽभवत् ॥ ४६६ ॥ चिरादपि ततस्तेषा-मनागमनविक्लवाम् । कुन्तीं वीक्ष्येव संजज्ञे, दिवसोऽपि भृशं कृशः ॥ ४६७ ॥ तदा सरसि निर्मग्नां-स्तानिवालोक्य दुःखितः । चचाल पश्चिमाम्भोधौ, पतिष्यन्निव भास्करः ॥ ४६८ ॥ ग्रहाणां ग्रामणीः सोऽपि, मज्जयित्वा महार्णवे । क्वाप्यनीयत कालेन, कालो हि दुरतिक्रमः ॥ ४६९ ॥ क्रान्तमुत्तिष्ठमानेन, तिमिरेण दिशां मुखम् । कुन्ती-द्रुपदनन्दिन्योः, शोकेनेव विसर्पता ॥ ४७० ॥ संचुकोच विना भानोः, सरस्यम्भोजकाननम् । ऋते च पाण्डवेयेभ्यो, मुखं मातृ-कलत्रयोः ॥ ४७१ ॥ वाचामगोचरं प्राप्य, कष्टमिष्टवियोगतः । मूर्च्छामगच्छतामाशु, ते सहैव दिनश्रिया ॥ ४७२ ॥ मूर्च्छाऽपगमे कुन्ती, नितान्तं पर्यदेवत । हा ! वत्सास्त्रिजगत्प्राण-त्राणसोत्साहबाहवः ! ॥ ४७३ ॥ जलान्तःस्वैरसंचार-चातुरीचञ्चवोऽपि किम् । एतामपुनरावृत्ति-दुःस्थां प्राप्ताः स्थ दुर्दशाम् ? ॥ ४७४ ॥ युग्मम् ॥ कृष्णाऽपि विललापैवं, क्व ते पञ्चापि मे प्रियाः ? । तैर्विनाऽसौ कथं वामा, त्रियामा मम यास्यति ? ॥ ४७५ ॥ न म्लायते तदद्यापि, तैर्दत्तं पुष्पदाम मे । ते तु तामीदृशीं प्राप्ता, ह हा दैववशाद्दशाम् ॥ ४७६ ॥ पालिद्रुमालिनीडानां, युगपत् पक्षिणां रवैः । तद्दुःखेनेव संध्यापि, स्निग्धरागा स्म रोदिति ॥४७७॥ अथोवाच स्नुषां कुन्ती, संस्थाप्यात्मानमात्मना । वत्से ! मा स्म रुदस्तारं, शोकः स्तोको विधीयताम् ॥ ४७८ ॥ मुखन्यकृतराजीवे !, जीवन्त्येव तव प्रियाः । यतो राज्यं पुनस्तेषा-माख्यातं मुनिपुङ्गवैः ॥ ४७९ ॥ कुतश्चित् केवलं कांचि-दापदं ते प्रपेदिरे । ततस्तस्याः परित्राण-कर्मणे प्रयतावहे ॥ ४८० ॥ विपत्कन्दच्छिदाछेकं, धर्ममेकं विदुर्बुधाः । धर्म्यमावां ततः

पाण्डवानां नागसरसि मज्जनम्॥

कर्म, निर्मायं निर्मिमीवहे ॥४८१॥ भवेदाशत्वनिर्वाह-स्तथा सत्यावयोरपि । अभिधाय स्नुषामेवं विरराम पृथा तदा ॥४८२॥

अथावोचत पाञ्चाली, सत्यं मातस्त्वयोदितम् । मदुपज्ञा विपत्तेषा-मित्येतद्बाधतेतमाम् ॥ ४८३ ॥ अनेनानुशयेनात्मा, मुहुर्दन्दह्यते मम । अकार्षं यत्तदाऽलीकं, कमलाहरणाग्रहम् ॥ ४८४ ॥ कुन्ती कृष्णामथोवाच, न ते दोषोऽस्ति कश्चन । अवश्यंभाविनो भावा, निवार्यन्ते न केनचित् ॥ ४८५ ॥ तदानीमेत्य चन्द्रोऽपि, चन्द्रातपपटाञ्चलैः । सौजन्यादिव पर्यश्रु, तदाननममाजर्यत् ॥ ४८६ ॥ तयोः शोके निमीलद्भिः, कमलैः सुजनायितम् । सहसा कृतहासैस्तु, कुमुदैर्दुर्जनायितम् ॥ ४८७ ॥ ममार्हन्नेव देवश्चे-द्गुरवश्च सुसाधवः । भन्तु विघ्नं सुतानां मे, ततः सम्यग्दृशः सुराः ॥ ४८८ ॥ उक्त्वेति कुन्ती स्मृत्वा च, पञ्चापि परमेष्ठिनः । प्रलम्बितभुजावल्लिः, कायोत्सर्गमसूत्रयत् ॥ ४८९ ॥ (युग्मम्) अवादीद्द्रौपदी हंहो !, सुरकिंनरखेचराः ! । शेषं विमुच्य व्यापार-मेकं मे श्रूयतां वचः ॥ ४९० ॥ सुधांशुधवलं शीलं, शश्वज्जानीथ चेन्मम । संनिधत्त[3] प्रियाणां मे, क्वचिदापज्जुषां ततः ॥ ४९१ ॥ इति व्याहृत्य साऽप्यन्त-र्मनसं बिभ्रती जिनान् । ग्रावोत्कीर्णेव निष्कम्पा, कायोत्सर्गे व्यवस्थिता ॥ ४९२ ॥ तयोरभीष्टमाधातुं, ध्यायन्त इव देवताम् । पादपा अपि निःस्पन्दाः, प्राणायामं दधुस्तदा ॥ ४९३ ॥ विस्मृत्य पयसः पानं, मुक्त्वा वैरं परस्परम् । अतिष्ठन्मण्डलीभूय, तत्पार्श्वे श्वापदा अपि ॥ ४९४ ॥ तयोः पश्यत माहात्म्यं, क्रूरै रात्रिचरैरपि । संजातं यत्तदा जन्तु-संहारपरिहारिभिः ॥ ४९५ ॥ तयोर्व्यसनसाक्षिण्या, वहन्त्या महतीं शुचम् । वयोविरावैः[4] क्रन्दन्त्या, क्षपयाऽक्षीयत ध्रुवम् ॥ ४९६ ॥ तयोर्दुष्कर्मभिर्नष्टं, तिमिरच्छद्मना तदा । पुण्योद्द्योतः

१ मायारहितं शुद्धमित्यर्थः । २ 'दारब्धनिर्वा०' प्रत्यन्तर० । ३ सान्निध्यं कुरुत । ४ पक्षिशब्दैः ।

प्रभाव्याजात्, प्रादुरासीच्च सर्वतः ॥ ४९७ ॥ तदानीं तद्वियोगार्ति-म्लानमूर्तीं विलोक्य ते । ययौ क्वापि तुषारांशु-रन्वेष्टुमिव पाण्डवान् ॥ ४९८ ॥ प्रातर्वातोच्छलद्वीचिं-च्छलतो मन्तुमात्मनः । प्रमार्ष्टुमिव पादेषु, लगति स्म सरस्तयोः ॥४९९॥ मुनीन्द्रैरपि दुःमाप्यां, ध्याननिश्चलतां तयोः । रविर्द्रष्टुमिवारोह-त्तदा पूर्वाद्रिचूलिकाम् ॥ ५०० ॥

अथ व्योम्नि क्रमाज्जाते, याममात्रे त्रयीतनौ । तथैव सावधानेषु, श्वापदेष्वखिलेष्वपि ॥ ५०१ ॥ स्वच्छाम्भसः सरोगर्भा-ज्ज्योतिः समुदजृम्भत । अनणुः किङ्किणीक्वाणः, शुश्रुवे च श्रुतिप्रियः ॥५०२॥ ततः स्वर्णमयस्तम्भं, नानारत्नाङ्कवेदिकम् । विमानं निरगादेकं, नाकस्येव निदर्शनम् ॥ ५०३ ॥ निर्निमेषाम्बुजव्याजात्, कृत्वा नेत्राणि कोटिशः । नूनं सरोऽप्यनूनश्रि, तदालोकत कौतुकात् ॥ ५०४ ॥ तीरे ततः समुत्तीर्य, निस्तीर्णविपदर्णवाः । पादपङ्केरुहं कुन्त्याः, प्रणमन्ति स्म पाण्डवाः ॥५०५॥ दिव्यमूर्तिधरः कश्चि-न्नरस्तैः सममागतः । स्फीतप्रीतिः पुरोभूय, कुन्तीं प्राञ्जलिरभ्यधात् ॥ ५०६ ॥ दिष्ट्या ते फलितो धर्मः, कुन्ति ! पारय पारय । एते लुठन्ति विनयात्, तनयास्तव पादयोः ॥ ५०७ ॥ कायोत्सर्गं विसृज्याथ, प्रमोदभरमेदुरा । पाणिना मृदु पस्पर्श, कुन्ती प्रत्यङ्गमङ्गजान् ॥ ५०८ ॥ द्रौपदीं च करे धृत्वा, सा समाधिममोचयत् । पायं पायं पयः सर्वैः, प्रतस्थे श्वापदैरपि ॥५०९॥ कुन्ती वहन्ती विजिता-म्भोजकाननमाननम् । गत्वाऽथ केसरस्याधो, न्यसीदत् सपरिच्छदा ॥ ५१० ॥ ततः पप्रच्छ तं देव-मात्मजानां कथां पृथा । सोऽपि सानन्दमुन्मील-च्चमत्कारमचीकथत् ॥ ५११ ॥

१ अपराधम् । २ सूर्ये । ३ स्वर्गस्य ।

पाण्डवानां नागसरस आगमनम्।

महर्षेः कस्यचित् संप्र–त्युदपद्यत केवलम्। इन्द्रस्तत्रोत्सवं कर्तु–मगच्छदमुनाऽध्वना ॥ ५१२ ॥ वृत्रारेरेनमाकाश–प्रदेशमुपसेदुपः । विमानस्य क्षणादासी–दकाण्डे गतिखण्डनम् ॥ ५१३ ॥ विमानं मम को मूर्खो, मुमूर्षुः स्खलयत्यदः ? । असौ भिनत्तु दम्भोलि–स्तस्य मौलिमनाकुलः ॥ ५१४ ॥ इति जल्पन् क्रुधा वज्रं, वज्रपाणिः करेऽदधत् । मुहुर्व्यापारयामास, क्रूराः प्रतिदिशं दृशः ॥५१५॥ (युग्मम्) निरुपाधिसमाधिस्थे, प्रेक्ष्य साध्व्यौ ततः । मां फुल्लाक्षः सहस्राक्षो, बभाषेऽभ्यर्णवर्तिनम् ॥५१६॥ पुत्र–भर्तृवियोगार्ते, सत्यौ श्वश्रू–स्नुषे इमे । समाहिते[1] स्तस्तदयं, विमानो याति नाग्रतः ॥५१७॥ नैगमेषिन्निमे विद्धि, मान्ये सुमनसामपि । मातैका पाण्डवेयाना–मपरा च सधर्मिणी ॥५१८॥ माता कुन्तीति विख्याता, यस्य देदीप्यतेऽधिकम् । विपत्पङ्केऽपि सम्यक्त्व–रत्नमत्यन्तभासुरम् ॥ ५१९ ॥ मानसं तीर्थमेवास्याः, सर्वपापतमोपहम् । यदध्यासितमर्हद्भि–र्युगपन्निखिलैरपि ॥ ५२० ॥ पत्नी तु द्रौपदी नाम्ना, यां महिम्नाऽतिशायिनीम् । पतिव्रतामयं ज्योति–रामनन्ति मनीषिणः ॥५२१॥ तत् पाण्डवान् विपत्पङ्का–द्गत्वा सत्वरमुद्धर । एतयोः स्युर्महासत्यो–र्यथा पूर्णा मनोरथाः ॥ ५२२ ॥ इदं हि नागराजस्य, सरः सागरसोदरम् । स चास्य सहते नैव, विमर्दमपरैः कृतम् ॥ ५२३ ॥ द्रौपद्या प्रार्थितो भीमः, कमलानि कुतूहलात् । इहाक्रष्टुं प्रविष्टश्चा–कृष्टश्चाधो भुजंगमैः ॥ ५२४ ॥ हा ! ममज्ज जले भीम, इत्याकुलतया क्रमात् । ददुर्झम्पां झगित्यत्र, चत्वारो बान्धवा अपि ॥ ५२५ ॥ प्रसह्य समगृह्यन्त, तेऽपि नागैर्दुराशयैः । निन्यिरे नागपाशैश्च, बद्ध्वा नागपतेः[2] पुरः ॥५२६॥ तद्व्रज ध्वजिनीनाथ !, द्रुतं मोचय पाण्डवान् । सोऽपि पाण्डुसुतानेतान्, विदित्वाऽ–

१ समाधिमत्यौ । २ नागपतिः ।

नुशयिष्यते ॥ ५२७ ॥

ततोऽहमिममादेश-मुपादाय दिवस्पतेः । प्रीतिप्रह्वीकृतो वेगा-न्नागराजमुपागमम् ॥ ५२८ ॥ तस्यास्थाने दृढं बद्धा-ञ्छ्रयाऽधोमुखांस्तदा । कृशाञ्शोकाश्रुपूर्णाक्षा-नद्राक्षं कुन्ति ते सुतान् ॥५२९॥ तदा तेषु सुसत्त्वेषु, गतार्तिषु सुमूर्त्तिषु । निपेतुर्नागराजस्य, भूरिभावस्पृशो दृशः ॥५३०॥ व्यज्ञाप्यत ततः प्रह्वै-स्तैर्द्विजिह्वैरहीश्वरः। एते देव! नराः केचित्, सरोवरविमर्दिनः ॥ ५३१ ॥ अमीभिः सैरिभप्रायै-र्जलं चक्रे रजस्वलम् । लूनानि नलिनीनां च, शिरांसि कमलच्छलात् ॥५३२॥ तैरिङ्गसोऽपि नागेन्द्रः, पाण्डवार्पितलोचनः । तस्थौ तथैव निष्कम्पः, चिन्तयन्नेव किंचन ॥ ५३३ ॥ मयाऽथ वक्तुमारेभे, कृतं भोगीन्द्र! चिन्तया । अमी ते पाण्डवा येषां, ख्यातं नाम जगत्रये ॥५३४॥ एषां राभसिको मा स्म, कार्षीत् कंचिदतिक्रमम् । भवानिति सुरेन्द्रेण, प्रहितोऽस्मि त्वदन्तिके ॥ ५३५ ॥ सदा जलचरैर्ग्राहै-रिव तावकपत्तिभिः । छलेन जलकेलिस्था, रुद्धा ह्येते निरायुधाः ॥ ५३६ ॥ अतः परं यदौचित्यं, स्वयमेतेषु वेत्सि तत् । पर्वसंजातयोगं हि, चन्द्रं सत्कुरुते रविः ॥ ५३७ ॥

श्रुत्वेति मामिकां वाचं, प्रीतस्त्वत्तनुजन्मनाम् । नागेन्द्रः स्वयमुत्थाय, नागपाशानपास्यत ॥ ५३८ ॥ निजासनसमानेषु, संनिवेश्यासनेष्वमून् । द्वारं निवारयामास, तेषां त्वत्तनयद्विषाम् ॥ ५३९ ॥ सर्वानेकैकशो ज्ञात्वा, नामतः क्रमतस्ततः । परिष्वज्य महीपालं, पातालप्रभुरभ्यधात् ॥ ५४० ॥ एवं भृत्यापराधान्मे, क्ष्मापाल! क्षन्तुमर्हसि । अवज्ञा

१ प्रीत्या नम्रीकृतः । २ धूलिमयं-मलिनमित्यर्थः ।

नैगमेषणा कथितो वृत्तान्तः ॥

पामरोपज्ञा, न क्रोधाय महात्मनाम् ॥५४१॥ सर्वमेषा विषं हन्ति, जङ्गमस्थावरात्मकम् । एवमादिश्य तेनास्मै, मणिमाले-यमर्पिता ॥५४२॥ नयनोपान्तवास्तव्यं, पाञ्चाल्याः कर्णभूषणम् । एतदस्त्विति सोऽस्य स्वं, लीलाकमलमार्पयत् ॥५४३॥ पञ्चानामपि भर्तॄणा-मिदं क्षेमे भविष्यति । भृशं विकस्वराकार-मक्षेमे त्वविकस्वरम् ॥५४४॥ किं च धर्मात्मज ! श्लाघ्य-स्त्वमेवासि जगत्त्रये । यस्य ते बान्धवावेतौ, ख्यातौ भीम-किरीटिनौ ॥५४५॥ अनयोर्नागनारीभि-र्दोलाकेलिषु गीयते । किर्मीरादिवधप्राय-मत्रापि चरिताद्भुतम् ॥ ५४६ ॥ तत् संप्रति ससोदर्यौ, वासराणि कियन्त्यपि । अवनीपाल ! पातालं, पवित्रयितुमर्हसि ॥ ५४७ ॥ अथाभाषत ते सूनु-स्त्वद्द्वीयमहीश्वर ! । क्षरत्यस्मासु पीयूषं, क्लेशमेनमनाशयत् ॥ ५४८ ॥ वर्तते त्वतिदुःखेन, स्नुषा च जननी च वः । तथा कुरुत जीवन्त्यौ, पश्याम्यहमिमे यथा ॥ ५४९ ॥ ततः पन्नगनाथोऽपि, कथंचन सगौरवम् । विससर्ज ससत्कार-मन्वव्राजीच्च ते सुतान् ॥ ५५० ॥ नम्रस्तमनुगच्छन्त-मवोचत तपःसुतः । तडाग-रक्षानागेभ्यः, प्रसीद द्वारसेवया ॥५५१॥ यदानुकूलं कर्तारः, कर्णयुद्धे किरीटिनः । मां पुनः सेवितारस्ते, शङ्खचूडादय-स्तदा ॥५५२॥ इति दत्तोत्तरं धर्म-सूनुः पन्नगपुङ्गवम् । प्रणम्य पादयोः सास्रं, बलादेव न्यवर्तयत् ॥ ५५३ ॥ (युग्मम्) तत्कुन्ति ! त्वत्तपःप्रह्व-पुरुहूतनिदेशतः । अमी मया समानीय, सुताः पञ्चापि तेऽर्पिताः ॥ ५५४ ॥ इन्द्रादिष्टमिदं चक्रे, मम भक्तिस्त्वतः परम् । नयामि वो विमानेन, यथेदानीं तथाऽऽदिश ॥ ५५५ ॥ अथाजल्पत् पृथा सौम्य !, त्वन्माहात्म्यं

१ पामरजनैः प्रथमं कृता इत्यर्थः, अत्र "उपज्ञोपक्रमं तदाद्याचिख्यासायाम्" (पाणिनि० २-४-२१) इति सूत्रेण समासः, परंतु नपुंसकेन भाव्यम् । २ तडागरक्षना० प्रतिद्वयपाठः ।

पाण्डवानां आगमनम्।

किमुच्यते । पुनर्वेगेन तत्रास्मा-न्नय द्वैतवने वने ॥ ५५६ ॥ तथा कृत्वा वचः कुन्त्या-स्तानापृच्छ्य समुत्सुकः । तन्नेत्रैर-नुयातोऽगा-न्नैगमेषी यथागतम् ॥५५७॥ पञ्चवर्षीमतीत्यैव-मन्यान्यवनभूमिषु । पुनर्द्वैतवनोत्सङ्ग-मधितस्थौ युधिष्ठिरः ॥ ५५८ ॥ स्वयं मणिमयं दाम, पर्यधत्त नृपःसुतः । आरोपयच्च पाञ्चाल्याः कर्णोत्तंसे तदम्बुजम् ॥ ५५९ ॥ मातुः पत्न्याश्च तैस्तत्र, समाधिस्थैर्यदद्भुतम् । अत्यद्भुतं प्रभावं च, स्मारंस्मारममुद्यत ॥५६०॥ प्रीतिं कदाचिदिन्द्रस्य, नागेन्द्रस्य कदाचन । वर्णयन्तः सुखेन स्म, समयं गमयन्ति ते ॥ ५६१ ॥

कदाचिज्जैनेन्द्रस्तवननवगुम्फव्यतिकरैः,
कदाचिन्मार्गस्थश्रमणचरणोपास्तिविधिना ।
कदाचिन्निर्णीतस्वसमयविचारोपनिपदा,
दिनानि स्वान्येते किमपि चरितार्थान्यरचयन् ॥ ५६२ ॥

इति मलधारिश्रीदेवप्रभसूरिविरचिते पाण्डवचरित्रे महाकाव्ये किरातार्जुनीय-तलतालवध-कमला-हरणवर्णनो नामाष्टमः सर्गः ॥ ८ ॥

---

१ उपनिषद्—ब्रह्मविद्य